॥ ॐ अर्हम् ॥

सूत्रकृताङ्ग-सूत्र-दीपिका ।

हर्षकुलगणि-रचिता-

प्रणम्य श्रीजिनं वीरं, गौतमादिगुरूंस्तथा । स्वान्योपकृतये कुर्वे, द्वितीयाङ्गस्य दीपिकाम् ॥ १ ॥

इह हि प्रवचने चत्वारोऽनुयोगाः । तथाहि-चरणकरणानुयोगः १, द्रव्यानुयोगः २, धर्मकथानुयोगः ३, गणितानुयोगश्च ४, तत्र प्रथमं श्रीमदाचाराङ्गं चरणकरणानुयोगप्राधान्येन व्याख्यातम् । अथेदं श्रीसूत्रकृताख्यं द्वितीयाङ्गं द्रव्यानुयोगप्राधान्येन व्याख्यायते । सूत्रकृताङ्गमिति च कः शब्दार्थः । उच्यते-' सूत्रं ' स्वपरसमयसूचनं कृतं येन तत्सूत्रकृतं, तदेवाङ्गमिति । तत्र श्रुतस्कन्धद्वयं, प्रथम श्रुतस्कन्धे षोडशाध्ययनानि द्वितीये सप्त । तत्र प्रथमश्रुतस्कन्धस्य प्रथमाध्ययने चत्वार उद्देशकाः, तत्रापि पूर्वं प्रथमोद्देशकः तस्या[य]मादिश्लोकः ।

बुज्झिज्जा० × × × (सूत्रम्) ॥ १ ॥

व्याख्या—' बुध्येत ' जानीयात्, किं तत् ? ' बन्धनं ' बध्यते जीवोऽनेन बन्धनं ज्ञानावरणाद्यष्टप्रकारं कर्म तद्धेतवो

मिथ्यात्वादयो वा परिग्रहारम्भादयो वा बन्धनं जानीयादित्युक्तं, न च ज्ञानमात्रेण सिद्धिरित्याह। 'तिउट्टिज्जा-परिजाणिआ' परिज्ञाय त्रोटयेत्–अपनयेत्, आत्मनः पृथक्कुर्यादित्यर्थः। अथ जम्बूस्वामी शिष्यः सुधर्मस्वामिनमाह, किमाहेति, श्रीवीरः किं बन्धनं 'आह' उक्तवान्? किंवा जानन् बन्धनं त्रोटयति? उत्तरमाह ॥ १ ॥

चित्तमंत० × × × (सू०) ॥ २ ॥

व्याख्या—'चित्तवत्' सचित्तं द्विपदचतुष्पदादि, अचित्तं कनकरजतादि द्वयमपि 'परिगृह्य' परिग्रहं कृत्वा 'कृशमपि' स्तोकमपि स्वयं अन्यान् वा ग्राहयित्वा गृह्णतो वान्यानुज्ञाय एवं दुःखान्न मुच्यते, परिग्रह एव परमार्थतोऽनर्थमूलमित्युक्तम् ॥ २ ॥ परिग्रहतश्चारम्भस्तस्मिंश्च प्राणातिपात इति दर्शयति।—

सयं० × × × (सू०) ॥ ३ ॥

व्याख्या—अथवा प्रकारान्तरेण बन्धनमेवाह–स परिग्रहवान् 'स्वयं' आत्मना प्राणान् अतिपातयेत्–जीवान् हिंस्यात् अथवा 'अन्यैः' परैरपि घातयति, घ्नतश्चान्याननुजानीते, तदेवं कृतकारितानुमतिभिः प्राणिघातं कुर्वन् आत्मनो वैरं वर्द्धयति, ततश्च बन्धनान्न मुच्यत इति भावः ॥ ३ ॥ पुनर्बन्धनमेवाश्रित्याह—

जंसि कुले० × × × (सू०) ॥ ४ ॥

व्याख्या—यस्मिन् कुले जातो यैर्वा मित्रैर्भार्यादिभिर्वा सह संवसेन्नरः, तेषु मित्रपितृमातृभार्यादिषु 'ममायी'ति ममत्व-

वान् लुप्यते, ममत्वजनितेन कर्मणा बाध्यते 'बालो' मूर्खः, विवेकरहितत्वादन्येषु च 'मूर्च्छितो' ममत्वबहुल इत्यर्थः ॥ ४ ॥

किं जानन् बन्धनं त्रोटयतीत्यस्योत्तरमाह—

वित्तं सोयरिआ० × × × (सू०) ॥ ५ ॥

व्याख्या—'वित्तं' द्रव्यं, तच्च सचित्तमचित्तं वा, सोदर्या भ्रातृभगिन्यादयः, सर्वमेतद् वित्तादिकं संसारे पीड्यमानस्य जन्तोर्न त्राणाय न रक्षणाय भवतीति, एतत् 'सङ्ख्याय' ज्ञात्वा तथा जीवितं स्वल्पमिति 'सङ्ख्याय' ज्ञपरिज्ञया ज्ञात्वा प्रत्याख्यानपरिज्ञया प्रत्याख्याय कर्मणः सकाशात् 'त्रुट्यति' अपगच्छत्यसौ, तुर्निश्चये, त्रुट्यत्येव, यदि वा 'कर्मणा' क्रियया संयमानुष्ठानरूपया बन्धनात् त्रुट्यति-कर्मणः पृथग् भवतीत्यर्थः ॥ ५ ॥

स्वसमयं प्रतिपाद्य परसमयं प्रतिपादयितुकाम आह—

एए गंथे० × × × (सू०) ॥ ६ ॥

व्याख्या—'एतान्' पूर्वोक्तान् 'ग्रन्थान्' सूत्रार्थान् 'व्युत्क्रम्य' परित्यज्य 'एके' केचित् श्रमणब्राह्मणाः, श्रमणाः शाक्यादयो ब्राह्मणाश्च 'अयाणंता' परमार्थमजानाना 'विउस्सिअ'त्ति विविधमुत्प्राबल्येन 'सिता' बद्धाः स्वसमयेषु प्रतिबद्धाः सन्तः कामेषु च सक्ता वर्तन्त इति ॥ ६ ॥ साम्प्रतं नास्तिकमतमाश्रित्याह—

संति पंच० × × × (सू०) ॥ ७ ॥

व्याख्या—सन्ति पञ्चमहाभूतानि इहास्मिल्लोके 'एकेषां' भूतवादिनामाख्यातानि—तत्त्वार्थकृतानि, तैर्वा भूतवादिभिर्नास्तिकैराख्यातानि स्वयमङ्गीकृतानि परेषां च प्रतिपादितानि, चामूनि 'पुढवी'त्यादि पृथ्वी १ अपो–जलं २ तेजो–अग्निः ३ वायुः ४ आकाशं ५ पञ्चमं येषां तानि। ननु साङ्ख्यादिभिरपि भूतानि मन्यन्त एव तत्कथं चार्वाकमतापेक्षयैव भूतोपन्यास इति चेदुच्यते—साङ्ख्यादिभिर्हि प्रधानाहङ्कारादिकं तथा कालदिगात्मादिकं चान्यदपि वस्तुजातमङ्गीक्रियते, चार्वाकैस्तु भूतव्यतिरिक्तं नात्मादि किञ्चिन्मन्यते इति तन्मताश्रयेणैवायं सूत्रोपन्यास इति ॥७॥ चार्वाकमताङ्गीकारमेवाह—

एते पंच० × × × (सू०) ॥ ८ ॥

व्याख्या—एतानि पञ्च महाभूतानि 'तेभ्यो' भूतेभ्यः कायाकारपरिणतेभ्य एकः कश्चिद्रूपो भूताऽव्यतिरिक्त आत्मा भवति, न तु कश्चिदपरः परलोकयायी जीवाख्यः पदार्थोऽस्तीत्येवमाख्यातवन्तस्ते। ननु यदि भूतेभ्योऽन्यः कश्चिदात्मा नास्ति कथं तर्हि मृत इति व्यपदेश इत्याशङ्कायामाह–'अह तेसिं'ति, अथ तेषां भूतानां विनाशेऽपगमे देहिनो देवदत्तादेर्विनाशो भवति, ततश्च मृत इत्युच्यते, न पुनर्जीवापगम इति। अत्रैतन्मतनिर्लोठनयुक्तयो वृत्तितोऽवसेयाः ॥ ८ ॥

अथ एकात्माद्वैतवादमुद्दिश्याह—

जहा य० × × × (सू०) ॥ ९ ॥

व्याख्या—यथा, च शब्दोऽपि शब्दार्थे, स च भिन्नः, पृथिव्याः स्तूपः पृथिव्येव वा स्तूपः पृथिवीसङ्घाताख्योऽ-

वयवी, स च एकोऽपि यथा नानारूपः सरित्समुद्रपर्वतनगरग्रामाद्याकारतया विचित्रो दृश्यते, निम्नोन्नतमृदुकठिनरक्त-पीतादिभेदेन वा दृश्यते, न च तावता पृथिवीतत्त्वस्यैकस्य भेदो भवति, एवं भो ! इति परामन्त्रणं, कृत्स्नोऽपि चेतना-चेतनरूपो लोक एको विद्वान् एक एवात्मा ' विद्वान् ' ज्ञानपिण्डः पृथिव्यादिभूताकारतया नाना दृश्यते, न च तावता तस्यैकस्यात्मतत्त्वस्य भेदो भवति ॥ ९ ॥ अस्योत्तरमाह—

एवमेगेत्ति० × × × (सू०) ॥ १० ॥

व्याख्या—एवमात्माद्वैतवादमाश्रिता एके जल्पन्ति ' मन्दा ' जडाः, मन्दत्वं चैतेषां युक्तिविकलजीवाद्वैतपक्षा-श्रयणात् । तथाहि-यद्येक एवात्मा स्यात्तदा एके कृषीबलादय आरम्भे जीवहिंसात्मके ' निश्रिता ' आसक्ताः स्वयं पापं कृत्वा तीव्रं नारकादि दुःखं ' निगच्छइ ' त्ति आर्षत्वाद्बहुवचनार्थे एकवचनं, निश्चयेन गच्छन्ति, त एवारम्भसक्ता, नान्ये इत्येतन्न स्यात् यद्येक एवात्मा स्यात्तदा केनाप्यशुभे कर्मणि कृते सर्वेषां दुःखं स्यान्न चैवं दृश्यते, तस्मादेक एवात्मेति न युक्तम् ॥ १० ॥ साम्प्रतं तज्जीव-तच्छरीर-वादिमतं पूर्वपक्षयन्नाह—

पत्तेअं कसिणे० × × × (सू०) ॥ ११ ॥

व्याख्या—' प्रत्येकं ' प्रतिशरीरमात्मानः ' कृत्स्नाः ' सर्वेऽपि ये ' बाला ' अज्ञा ये च पण्डितास्ते सर्वेऽपि पृथग् व्यवस्थिताः, नहि एक एवात्मा सर्वव्यापी स्वीकार्यः, बालपण्डितादिविभागाऽभावप्रसङ्गात् । नन्वेवमात्मबहुत्वं जैनैरपि

स्वीक्रियत एव, तत्किमिति परमतमाश्रित्य सूत्रमिदमुच्यते ? इत्याशङ्कायामाह–' संति 'त्ति–' सन्ति ' विद्यन्ते जीवाः शरीरं यावत्, शरीराभावे तु न सन्ति, एतदेवाह–' पिच्चा न ते संति ' ' प्रेत्य ' परलोके ते जीवा न सन्ति, तेषां मते शरीराद्भिन्नः परलोकयायी न कश्चिदात्माख्यः पदार्थोऽस्तीति जैनेभ्यो भेदः । किमित्येवं ते मन्यन्त इत्याह–' णत्थि सत्तोववाइआ ' औपपातिका–भवाद्भवान्तरगामिनः सत्त्वाः प्राणिनो ' नत्थि 'त्ति न संति । ननु भूतवादिनोऽस्य च तज्जीव-तच्छरीरवादिनः को भेद ? इत्यत्रोच्यते–भूतवादिनो भूतान्येव कायाकारपरिणतानि धावनचलनादिक्रियां कुर्वन्ति, अस्य तु कायाकारपरिणतेभ्यो भूतेभ्यश्चेतनाख्य आत्मोत्पद्यते अभिव्यज्यते वा तेभ्यश्चाऽभिन्न इत्यनयोर्विशेषः ॥ ११ ॥ तन्मतमेवाह—

नत्थि पुण्णे व० × × × (सू०) ॥ १२ ॥

व्याख्या—नास्ति पुण्यं पापं च नास्ति, अतो [नास्ति] अस्माल्लोकात् परोऽन्यो लोकः परलोको, यत्र पुण्यपापानुभव इति । अत्र हेतुमाह–शरीरस्य विनाशेन ' देहिन ' आत्मनोऽपि विनाशोऽभावो भवति तथा च दर्श्यते तन्मतलेशो, यथा–स्वभावादेव जगद्वैचित्र्यं, यदुक्तम्–" कण्टकस्य च तीक्ष्णत्वं, मयूरस्य विचित्रता । वर्णाश्च ताम्रचूडानां, स्वभावेन भवन्ति हि ॥ १ ॥ " इति ॥ १२ ॥ अथाक्रियावादिमाह—

कुव्वं च० × × × (सू०) ॥ १३ ॥

व्याख्या—कुर्वन् कारयंश्च आत्मा न भवति, आत्मनो व्यापकत्वादमूर्त्तत्वाच्च कर्तृत्वानुपपत्तिः । तत एव कारयितृत्व-मप्यात्मनो न युक्तं, एकश्च 'एवं' शब्दोऽतीतानागतकर्तृनिषेधको द्वितीयः समुच्चयार्थः । कर्तृत्व-कारयितृत्व-निषेधादन्यापि क्रिया तस्य नास्तीत्याह-'सव्वं'ति सर्वां परिस्पन्दादिकां देशाद्देशान्तरप्राप्तिरूपां क्रियां कुर्वन् आत्मा न विद्यते, सर्वव्यापित्वेनामूर्त्तत्वेन चाकाशस्येवात्मनो निष्क्रियत्वं साङ्ख्यमते, एवं 'ते उ'त्ति एवमुक्तप्रकारेण ते साङ्ख्याः प्रगल्भिताः प्रागल्भ्यवन्तो धार्ष्ट्यवन्तो विद्यन्ते ॥ १३ ॥

साम्प्रतं तज्जीव-तच्छरीराकारकवादिनोर्मतं निराकुर्वन्नाह—

जे ते उ वाइणो० × × × (सू०) ॥ १४ ॥

व्याख्या—ये तावच्छरीराव्यतिरिक्तात्मवादिनः 'एवं' पूर्वोक्तयुक्त्या भूताव्यतिरिक्तमात्मानमभ्युपगतवन्तस्ते निरा-क्रियन्ते, तेषां लोकश्चतुर्गतिभवरूपः सुभगदुर्भगसुरूपकुरूपेश्वरदारिद्र्यादिगत्या जगद्वैचित्र्यरूपः कुतः स्यात् ?, आत्मा-नङ्गीकारे पुण्यपापाभावे कथं विश्ववैचित्र्यरूपमित्यर्थः । ते च नास्तिकास्तमसोऽज्ञानरूपात् तमो यान्ति, ज्ञानावरणावृताः पुनर्ज्ञानावरणरूपं तमः प्रविशन्ति अथवा सद्विवेकविध्वंसित्वात्तमो-दुःखं, तस्मात्तमो-महादुःखं यान्ति, यतस्ते मन्दा जडाः परलोकनिरपेक्षत्वादारम्भनिश्रिताः । अयमेव श्लोकोऽकारकवादिमतमाश्रित्य किञ्चिद्विव्रियते-ये वादिनोऽकारकाः-साङ्ख्याः सन्ति, तेषां लोको जरामरणशोकहर्षादिरूपो नारकतिर्यगादिरूपो निष्क्रिये सत्यात्मनि 'कुतः' कस्माद्धेतोः स्यात् ? न स्यादित्यर्थः । ततश्च दृष्टेष्टबाधारूपात्तमसोऽज्ञानाच्च 'तमो' वेदनास्थानं यान्ति । यतो मन्दा आरम्भनिश्रि-

ताश्चेति साङ्ख्यमतं निरस्तम् ॥ १४ ॥ अथात्मषष्ठवादिमतमाह—

संति पंच० × × × × (सू०) ॥ १५ ॥

व्याख्या—सन्ति पञ्च महाभूतानि इहास्मिन् संसारे 'एकेषां' आत्मषष्ठवादिनां साङ्ख्यानां वैशेषिकाणां च एतदाख्यातं, भूतान्याख्यातानि वा। ते पुनर्वादिन एवमाहुः-यद्भूतानि आत्मषष्ठानि-आत्मा षष्ठो येषां तान्यात्मषष्ठानि, केषाञ्चिद्वादिनामनित्यानि भूतान्यात्मा च न तथा एषामित्याह-आत्मा लोकश्च पृथिव्यादिरूपः शाश्वतो-नित्यः ॥ १५ ॥ शाश्वतत्वमेवाह—

दुहओ ते ण० × × × (सू०) ॥ १६ ॥

व्याख्या—'ते' भूतपदार्था आत्मषष्ठा 'उभयतो' निर्हेतुकसहेतुकविनाशाभ्यां न विनश्यन्ति, बौद्धानां मते घटादिवस्तु हेतुं विनाऽपि क्षणे क्षणे विनश्यति, वैशेषिकाणां तु लकुटादियोगेन घटादीनां विनाशः, तेन द्विविधेनापि विनाशेन लोकात्मनोर्न विनाश इति तात्पर्यार्थः। यदि वा द्विरूपाचेतनाचेतनस्वभावान्न विनश्यन्ति, आत्मा चेतनस्वभावान्न विनश्यति, पृथिव्याद्या लोकाश्चाचेतनस्वभावान्न विनश्यतीति, न चोत्पद्यतेऽसत्-अविद्यमानं, सर्वेऽपि भावाः सर्वथा नियतिभावं नित्यत्वमागताः-प्राप्ताः ॥ १६ ॥ अथ बौद्धमतमाह—

पंचखंधे० × × × (सू०) ॥ १७ ॥

व्याख्या—एके बौद्धाः पञ्च स्कन्धान् वदन्ति। रूपस्कन्धः १, वेदनास्कन्धः २, विज्ञानस्कन्धः ३, सञ्ज्ञास्कन्धः ४, संस्कारस्कन्धः ५। तत्र रूपस्कन्धः पृथिवीत्वादयो रूपादयश्च १, वेदनास्कन्धः सुखदुःखा अदुःखसुखा च वेदना २, विज्ञानस्कन्धो रूपविज्ञानं रसविज्ञानमित्यादि ३, सञ्ज्ञास्कन्धः 'सञ्ज्ञा' निमित्तोद्ग्रहणात्मकः प्रत्ययः, सविकल्पकं ज्ञानमित्यर्थः ४, संस्कारस्कन्धः पुण्यापुण्यादि धर्मसमुदायः ५, न चैतेभ्योऽन्यः कश्चिदात्माख्यो पदार्थोऽस्तीति 'बाला' मूर्खास्ते, ते स्कन्धाः किंभूताः? क्षणयोगिनः, क्षणे क्षणे विनश्वरा इत्यर्थः। पूर्ववादिभ्यो बौद्धव्यतिरेकमाह। 'अण्णो' त्ति यथा साङ्ख्यादयो भूतेभ्योऽन्यमात्मानमङ्गीकृतवन्तः, यथा च चार्वाकाः भूतेभ्योऽन्यमभिन्नमात्मानमिष्टवन्तस्तथा बौद्धा नैवाहुर्नोक्तवन्तः तथा हेतुभ्यो जातो हेतुकः--कायाकारपरिणतभूतनिष्पादितः, तथाऽहेतुको नित्य, इत्येवं तमात्मानं बौद्धा नाङ्गीकृतवन्त इति ॥ १७ ॥ तथाऽन्ये चतुर्धातुकं जगद्बौद्धा वदन्तीत्याह—

पुढवी आऊ० × × × (सू०) ॥ १८ ॥

व्याख्या—पृथिवी धातुः 'आपो' जलं धातुः, तथा तेजोवायुश्चेति धातवः एते चत्वारोऽपि धातवो यदा 'एक्का उ' त्ति एकाकारपरिणतास्तदाकारतया जीवाख्यां लभन्ते, एवमाहु 'जानकाः' पण्डितंमन्या बौद्धाः 'एवमाहंसु आवरे' इति क्वचित्पाठः तत्र 'आवरे' त्ति अपरे बौद्धा इत्यर्थः ॥ १८ ॥

अथ पूर्वोक्तं सर्वं दुर्मतीनामफलत्वं स्वदर्शनाङ्गीकारं च दर्शयन्नाह—

अगारमावसंता वि० × × × (सू०) ॥ १९ ॥

व्याख्या—'अगारं' गृहमावसन्तश्चिह्मन्तो गृहस्था, आरण्या वा तापसादयः, प्रव्रजिताश्च शाक्यादयः, अपि सम्भावने, इदं ते सम्भावयन्ति, यथा-इदमस्मदीयं 'दर्शनं' मतमापन्ना—आश्रिताः सर्वदुःखेभ्यो जीवा विमुच्यन्त इति ते वदन्ति ॥१९॥ अथ तेषां निष्फलत्वमाह—

तेणावि संधिं० × × × (सू०) ॥ २० ॥ ॥ २१ ॥ ॥ २२ ॥ ॥ २३ ॥ ॥ २४ ॥ ॥ २५ ॥

व्याख्या—ते पञ्च पञ्चभूतवाद्याद्याः सन्धिं ज्ञानावरणादि कर्मविवररूपं नापि नैव ज्ञात्वा, अज्ञात्वा इत्यर्थः । णं वाक्या-लङ्कारे यथा जीवकर्मणोः सन्धिर्भिन्नत्वं भवति तथाऽज्ञात्वा मोक्षार्थं प्रवृत्ता इत्यर्थः । सन्धिर्द्विविधः द्रव्यसन्धिः कुड्यादेः भावसन्धिः कर्मविवररूपस्तं उत्तरोत्तरपदार्थपरिज्ञानं वा सन्धिस्तं अज्ञात्वा प्रवृत्ताः । ते किं भूता ? इत्याह—'न ते' त्ति, ते जना-लोका न सम्यग् धर्मविदः, ये तु ते एवंविधवादिनस्ते 'ओघो' भवौघः, संसारस्तत्तरणशीला न आख्याता जिनैः । अग्रेतनाः पञ्च श्लोकाः एवमेव व्याख्येयाः । परं संसार १, गर्भ २, जन्म ३, दुःख ४, मार ५, पारगा न भवन्तीति ज्ञेयम् ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥

ते यत् प्राप्नुवन्ति तदाह—

णाणाविहाइं० × × × (सू०) ॥ २६ ॥

व्याख्या—'नानाविधानि' अनेकप्रकाराणि दुःखानि अनुभवन्ति पुनः पुनः संसारचक्रवाले मृत्युव्याधिजराभिराकुले—व्याप्ते ॥ २६ ॥ तेषां दुःखफलमुपसंहारं चाह—

उच्चावयाणि० × × × (सू०) ॥ २७ ॥

व्याख्या—'उच्चावचानी'ति अधमोत्तमानि स्थानानि 'गच्छन्तो' भ्रमन्तो गर्भाद्गर्भमेष्यन्ति—यास्यन्त्यनन्तशः । 'नायपुत्ते'त्ति 'ज्ञातः' सिद्धार्थक्षत्रियस्तस्य पुत्रः श्रीमहावीरो जिन एवमुक्तवान् इति । ब्रवीमीति सुधर्मास्वामी जम्बूस्वामिनं प्रत्याहेति ॥ २७ ॥

इति श्रीसूत्रकृते द्वितीयाङ्गे प्रथमाध्ययने प्रथमोद्देशकव्याख्या सम्पूर्णा ॥ १ ॥

उक्तः प्रथमोद्देशः, अथ द्वितीयोद्देशकः कथ्यते । तस्यायमर्थसम्बन्धः आद्योद्देशके भूतवादा[द्या]दिमतं प्रदर्श्य निराकृतं, इहाप्यवशिष्टं तदेवोपदर्श्य निराक्रियत इत्यनेन सम्बन्धेनागतस्यास्योद्देशकस्य सूत्रं यथा—

आघायं पुण० × × × (सू०) ॥ १ ॥

व्याख्या—पुनः 'एकेषां' नियतिवादिनामेतदाख्यातं, आख्यातमित्यत्र भावे क्त प्रत्ययः, तद्योगे च "वा क्लीबे" इति कर्तरि षष्ठी । ततश्च नियतिवादिभिरिदमाख्यातमित्यर्थः । किं तदित्याह—'उववण्ण'त्ति 'उपपन्ना' युक्त्या घटमानाः 'पृथक्' अनेके जीवाः जीवसत्त्वे पञ्चभूततच्छरीरवादिमतं निराकृतं पृथगित्यनेन आत्माऽद्वैतवादिनिरासश्च ।

तेऽनेके जीवाः सुखं दुःखं देवनारकादिभवेषु 'वेदयन्ति' अनुभवन्ति, अनेनाकर्तृवादो निरस्तः। 'अदुवे'त्ति अथवा 'लुप्यन्ते' स्थानात् स्थानान्तरं सङ्क्राम्यन्ते, एतेनोपपातिकत्वमप्युक्तम् ॥ १ ॥ नियतिवादिमतमेवाह श्लोकद्वयेन—

न तं सयं कडं० × × × (सू०) ॥ २ ॥

न सयं कडं न० × × × (सू०) ॥ ३ ॥

व्याख्या—यत्तैः प्राणिभिरनुभूयते सुखं दुःखं स्थानविलोपनं वा, न ते तत्स्वयं-आत्मना पुरुषाकारेण कृतं दुःखं, दुःखस्य चोपलक्षणात्सुखमपि ग्राह्यं, सुखदुःखानुभवः पुरुषकारकृतो न स्यादित्यर्थः। अनेन कालेश्वरस्वभावकर्मादिना च कुतः कृतं। णमित्यलङ्कारे। कालादिभिरपि न कृतमित्यर्थः किन्तु नियतेरेव निष्पद्यते सर्वमिति। ततः सुखं सैद्धिकं, सिद्धौ-मोक्षे भवं सैद्धिकं, यदि 'वा' दुःखं असैद्धिकं-सांसारिकं, अथवा सैद्धिकमसैद्धिकं च सुखं, यथा स्रक् चन्दनाङ्गनाद्युपभोगक्रिया, सिद्धौ भवं सैद्धिकं, आन्तरं सुखमानन्दरूपमसैद्धिकं तथा सैद्धिकमसैद्धिकं च दुःखं, यथा कशाताडनाङ्कनादिक्रियासिद्धौ भवं सैद्धिकं-ज्वरशिरोर्तिशूलादिरूपमङ्गोत्थमसैद्धिकं दुःखं। एतदुभयमपि सुखं दुःखं च न पुरुषाकारकृतं न चान्यैः कालादिभिः कृतं वेदयन्त्यनुभवन्ति पृथग् जीवाः, कथं तर्हि प्राणिनो सुखं दुखं च स्यादित्याह—'संगइअं'ति सम्यग् स्वपरिणामेन गतिर्यस्य यदा यत्र यत्सुखदुःखानुभवनं सा सङ्गतिर्नियतिस्तस्या भवं साङ्गतिकं, नियतिकृतमित्यर्थः ॥ ३ ॥ इहास्मिन् सुखदुःखानुभववादे एकेषां नियतिवादिनामिदमाख्यातं यदुक्तं तैः—

"प्राप्तव्यो नियतिबलाश्रयेण योऽर्थः, सोऽवश्यं भवति नृणां शुभोऽशुभो वा।
भूतानां महति कृतेऽपि हि प्रयत्ने, नाभाव्यं भवति न भाविनोऽस्ति नाशः ॥१॥" इति ॥३॥

अस्योत्तरमाह—

एवमेयाणि० × × × (सू०) ॥४॥

व्याख्या—एवमेतानि पूर्वोक्तानि वचनानि जल्पन्तो नियतिवादिनो 'बाला' मूर्खाः, पण्डितमानिनः, स्वयमपण्डिता अपि आत्मानं पण्डितं मन्यमानाः। पुनः किम्भूताः? नियता नियतमजानन्तः, किञ्चिन्नियतिकृतमवश्यम्भावि नियतं, आत्म-पुरुषाकारेश्वरादिकृतं किञ्चिदनियतं, एवं द्विविधं वस्तु अजानन्तो नियतिकृतमेवैकान्तेनाश्रयन्तः। अत एवाऽबुद्धिकाः–बुद्धि-रहिता भवन्ति, पुरुषाकारादयोऽपि वस्तूत्पादकाः, यतः। 'न दैवमिति सञ्चिन्त्य, त्यजेदुद्यममात्मनः। अनुद्यमेन कस्तैलं, तिलेभ्यः प्राप्तुमर्हति? ॥१॥" इति। इत्याद्यजानन्तोऽत एव निर्बुद्धिकाः ॥४॥ एतद्वादिनामपायमाह—

एगमेगे उ० × × × (सू०) ॥५॥

व्याख्या—एवमेके नियतिवादिनः पार्श्वस्था युक्तिसमूहाद्बहिस्तिष्ठन्तीति पार्श्वस्थाः परलोकक्रियापार्श्वस्था वा, अथवा 'पाशः' कर्मबन्धनं तत्र स्थिताः, 'ते भुज्जो'त्ति ते भूयो विविधं 'प्रगल्भिताः' धार्ष्ट्योपेताः, नियतिवादमङ्गी-कृत्यापि एवं पुनरपि स्वकार्ये परलोकक्रियासु च प्रवर्त्तमाना अत एव धार्ष्ट्योपेताः न ते दुःखविमोचकाः आत्मानं

दुःखाच्च मोचयन्ति ॥ ५ ॥ नियतिवादिनो मता, अथाऽज्ञानिमतमाह—

जविणो मिगा० × × × (सू०) ॥ ६ ॥

व्याख्या—यथा 'जविनो' वेगवन्तः सन्तो मृगाः 'परित्राणेन' शरणेन 'तर्जिता' रहिताः, अथवा 'परितानं' वागुरादिबन्धनं, तेन 'तर्जिता भयम्प्रापिताः सन्तोऽशङ्कितानि स्थानानि शङ्कन्ते, भयभ्रान्ताः सन्तो निर्भयान्यपि स्थानानि सभयतया मन्यन्ते शङ्कितानि च वागुरादीनि अशङ्कमानाः 'सम्पर्ययन्त' इत्युत्तरसूत्रेण सम्बन्धः ॥ ६ ॥

परियाणियाणि० × × × (सू०) ॥ ७ ॥

व्याख्या—परित्राणं सञ्जातं येषु तानि परित्राणितानि-शरणभूतानि स्थानानि मूढत्वात् शङ्कमानाः-सभयानि मन्यमानाः 'पाशितानि' पाशयुक्तानि अशङ्कमानास्तेषु शङ्काभङ्कर्षणाः अज्ञानेन भयेन च 'संविग्ग'त्ति सम्यग् व्याप्तास्तत्र तत्र वागुरादिके बन्धने सम्पर्ययन्ते, समेकीभावेन परिसमन्तात् अयन्ते गच्छन्तीति ॥ ७ ॥ इममेव दृष्टान्तमाश्रित्याह—

अह तं पवेज्ज० × × × (सू०) ॥ ८ ॥

व्याख्या—अथानन्तरमसौ मृगस्तद् 'वज्झं'ति 'वर्ध्रं' बन्धनकारणं रज्जुर्वागुरादिबन्धं वा यदि 'प्लवेत्' उपरि-गच्छेत् 'वा' अथवा वर्ध्रस्य अधो व्रजेत् तदा 'पदपाशात्' वागुरादिबन्धनान्मुच्यते, एवं सन्तमपि तमनर्थपरिहरणोपायं 'मन्दो' जडो न 'देहती'ति न पश्यति ॥ ८ ॥ पाशमपश्यतो याऽवस्था स्यात्तामाह—

अहिअप्पाऽहि० × × × (सू०) ॥ ९ ॥

व्याख्या—स मृगोऽहितात्मा, तथाऽहितं 'प्रज्ञानं' बोधो यस्य सोऽहितप्रज्ञानो 'विषमान्तेन' कूटपाशादियुक्तेन प्रदेशेनोपागतः, अथवा 'विषमान्ते' कूटपाशे आत्मानमनुपातयेत्, तत्र चासौ बद्धः पदपाशादीनऽनर्थबहुलान् अवस्थाविशेषान् प्राप्तस्तत्र बन्धने 'घातं' विनाशं 'नियच्छति' प्राप्नोति ॥ ९ ॥ दृष्टान्तयोजनामाह—

एवं तु समणा० × × × (सू०) ॥ १० ॥

व्याख्या—'एवं' पूर्वोक्तमृगदृष्टान्तेन, तुरवधारणे, एके श्रमणाः पाखण्डाश्रिता मिथ्यादृष्टयोऽनार्या असदनुष्ठाना अशङ्कितानि धर्मानुष्ठानानि शङ्कमानास्तथा शङ्कितानि-एकान्तपक्षाश्रयणानि अशङ्किनो मृगा इवानर्थभाजः स्युः ॥ १० ॥ शङ्किताशङ्कितविपर्यासमाह—

धम्मपण्णवणा० × × × (सू०) ॥ ११ ॥

व्याख्या—'धर्मप्रज्ञापना' क्षान्त्यादि दशविधधर्मप्ररूपणा या सा प्रसिद्धा तां शङ्कन्ते, असद्धर्मप्ररूपणेयमिति मन्यन्ते, आरम्भांश्च-पापोदानभूतान् न शङ्कन्ते, यतो 'अव्यक्ता' मुग्धाः सदऽसद्विवेकविकला 'अकोविदाः' अपण्डिताः सच्छास्त्रावबोधविधुराः ॥ ११ ॥ तेषां सत्फलाभावमाह—

सव्वप्पगं० × × × (सू०) ॥ १२ ॥

व्याख्या—'सर्वात्मको' लोभस्तं 'व्युत्कर्षो' मानस्तं सर्वं नूमं'ति मायां तथा 'अप्पत्तियं'ति क्रोधस्तं च विधूय 'अकर्मांशः' न विद्यते कर्मांशो यस्य सोऽकर्मांशः स्यात् । अकर्मांशत्वं च ज्ञानाद्भवति नाज्ञानादित्याह—'एय-मट्ठं'ति एतमर्थं कर्माभावरूपं मृग इव मृगो अज्ञानी 'चुए'त्ति त्यजेत् ॥ १२ ॥ भूयोऽप्यज्ञानवादिनां दोषमाह—

जे एतं नाभि० × × × (सू०) ॥ १३ ॥

व्याख्या—य एतं कर्मक्षपणोपायं न जानन्ति मिथ्यादृष्टयोऽनार्यास्ते मृगा इव पाशबद्धा 'घातं' विनाशमेष्यन्ति—यास्यन्ति अन्वेषयन्ति वा, तद्योग्यक्रियाकरणात् 'अनंतसो' निरन्तरम् ॥ १३ ॥ अज्ञानवादिनामेव दूषणान्तरमाह—

माहणा० × × × (सू०) ॥ १४ ॥

व्याख्या—एके ब्राह्मणास्तथा 'श्रमणाः' परिव्राजकाः सर्वे स्वकमात्मीयं ज्ञानं वदन्ति, न च तानि सर्वेषां ज्ञानानि, अन्योन्यविरोधेन प्रवृत्तत्वात्, तस्मादज्ञानमेव श्रेय इत्याह 'सव्वलोयंसि'त्ति सर्वस्मिंल्लोके ये 'प्राणाः' प्राणिनस्ते 'किंचन' सम्यग् न जानन्ति ॥ १४ ॥ अथ दृष्टान्तमाह—

मिलक्खू० × × × (सू०) ॥ १५ ॥

व्याख्या—यथा 'म्लेच्छो'ऽनार्यः 'अम्लेच्छस्यार्यस्य' यदुक्तं भाषितं, तदनुभाषते, परमार्थशून्यं तद्भाषित-मेवानुभाषते, न च हेतुं विजानाति ॥ १५ ॥ दार्ष्टान्तिके योजयति—

एवमन्नाणिआ० × × × (सू०) ॥ १६ ॥

व्याख्या—एवं 'मज्ञानिकाः' सम्यग्ज्ञानरहिताः 'स्वकं आत्मीयं ज्ञानं प्रमाणत्वेन वदन्तोऽपि निश्चयार्थं न जानन्ति। 'इव' यथा म्लेच्छो निश्चयार्थमजानन् परोक्तमनुवदत्येवं तेऽपि 'अबोधिका' बोधरहिताः, ततोऽज्ञानमेव श्रेय इति ॥ १६ ॥ इदानीमेतद्दूषणमाह—

अण्णाणिआण० × × × (सू०) ॥ १७ ॥

व्याख्या—'अज्ञानिकानां' अज्ञानमेव श्रेय इति वादिनां यो 'विमर्शो' विचारः स अज्ञानेऽज्ञानविषये 'न नियच्छति' न युज्यते, यतो ज्ञानं सत्यमसत्यं वेति विमर्शः अज्ञानेन कृतेऽपराधे स्वल्पो दोषः, ज्ञानेन कृते महान् दोष इत्येवंभूतो विचारोऽपि तेषां न युज्यते, एवंविधविचारस्य ज्ञानरूपत्वादिति, अज्ञानवादे विचारो न युज्यते। तथा आत्मनोऽपि परं प्रधानमज्ञानवादं 'शासितु'मुपदेष्टुं 'नालं' न समर्थाः, स्वयमज्ञत्वात्, कुतो अन्येषां शिष्याणामुपदेष्टुं समर्था भवेयुः ॥ १७ ॥ यथा ते आत्मनः परेषां च शिक्षणेऽसमर्थास्तथा दृष्टान्तेनाह—

वणे मूढो० × × × (सू०) ॥ १८ ॥

व्याख्या—वनेऽरण्ये यथा कश्चिन्मूढो जन्तुर्मूढमेव 'नेतारं' प्रापकमनुगच्छति आश्रयति, तदा तौ द्वावपि 'अकोविदौ' मार्गानिपुणौ सन्तौ तीव्रं स्रोतो गहनं शोकं वा 'नियच्छतः' प्राप्नुतः ॥ १८ ॥ दृष्टान्तान्तरमाह—

अंधो अंधं० × × × (सू०) ॥ १९ ॥

व्याख्या—यथाऽन्धः स्वयमन्यमन्धं पन्थानं नयन् 'दूरमध्वानं' वाञ्छितमार्गादन्यं दूरं मार्गं गच्छति । तथा 'उत्पथं' उन्मार्गमापद्यते 'जन्तुः' प्राणी अन्धः । अथवा परं पन्थानमनुगच्छेन्न वाञ्छितम् ॥ १९ ॥ दार्ष्टान्तिकमर्थमाह—

एवमेगे० × × × (सू०) ॥ २० ॥

व्याख्या—'एवं' पूर्वोक्तार्थेन एके भावमूढा 'नियागो' मोक्षः सद्धर्मो वा, तदर्थिनस्ते किल वयं धर्माराधका इति जानन्तो अधर्मं पापमेव 'आपद्येरन्' प्राप्नुवन्ति । तथा तेऽप्यननुष्ठाना आजीविकादयो गोशालकमतानुसारिणोऽज्ञानवाद-प्रवृत्ताः । सर्वथा ऋजुः 'सर्वर्जुः' संयमः सुधर्मो वा, तं न तेऽद्दुर्ं गच्छन्ति, न प्राप्नुवन्तीत्यर्थः । अथवा 'सर्वर्जुकं' सत्यं अज्ञानान्धा न वदेयुः ॥ २० ॥ दूषणान्तरमाह—

एवमेगे० × × × (सू०) ॥ २१ ॥

व्याख्या—'एवं' पूर्वोक्तनीत्या 'एके'ऽज्ञानवादिनो 'वितर्काभि'र्मीमांसाभिः स्वमतिकल्पनाभिः परमन्यं जैनादिकं न पर्युपासते न सेवन्ते, स्वमतमेव श्रेय इति ज्ञात्वा तदेव सेवन्ते, नान्यं ज्ञानादिवादिनं, तथा 'अप्पणो'त्ति आत्मीयैर्वितर्कैः सविचारैरयमस्मदीयो मार्गो 'अञ्जु' निर्दोषत्वाद् व्यक्तः स्पष्टः ऋजुर्वा प्रगुणोऽकुटिलः इत्यस्माच्चे दुर्मतयस्तत्र एवमाहुः ॥ २१ ॥ पुनस्तेषामेव दोषमाह—

एवं तक्काइ० × × × (सू०) ॥ २२ ॥

व्याख्या—एवं पूर्वोक्तन्यायेन 'तर्कया' स्वकल्पनया 'साधयन्तो' वदन्तो धर्माधर्मयोरकोविदाः दुःखं ते नातिशोटयन्ति न अतिशयेनापनयन्ति, यथा शकुनिः पञ्जरं-पक्षी पञ्जरस्थो यथा पञ्जरं त्रोटयितुं बन्धनादात्मानं मोचयितुं न समर्थः, एवममावपि संसारपञ्जरादात्मानं मोचयितुं नालम् ॥ २२ ॥ अथ एकान्तवादिमतं दूषयन्नाह—

सयं सयं० × × × (सू०) ॥ २३ ॥

व्याख्या—स्वकं स्वकमात्मीयमात्मीयं मतं प्रशंसन्तः। परकीयां वाचं 'गर्हन्तो' निन्दन्तः, यथा साङ्ख्या नित्यवादिनो बौद्धं क्षणिकवादिनं निन्दन्ति, तेऽपि साङ्ख्यान्, एवमन्येऽपि ज्ञेयाः, एवं एकान्तवादिनो ये 'तु' स्वधारणे, तत्र तेष्वेव स्वमतेषु 'विद्वस्यन्ते' विद्वांस इवाचरन्ति। ते संसारं व्युच्छ्रिताः, विविधमनेकप्रकारमुत्प्राबल्येन श्रिताः संसारे सम्बद्धा उषिताः स्युः ॥ २३ ॥ अथ क्रियावादिमतमाह—

अहावरं० × × × (सू०) ॥ २४ ॥

व्याख्या—अथाऽपरं 'पूर्वमाख्यातं' पूर्वसूचितं क्रियावादिदर्शनं, किम्भूताः क्रियावादिनः? इत्याह-'कम्मचिंत'चि कर्मणि ज्ञानावरणादिके चिन्ता कर्मचिन्ता, ततः 'प्रणष्टा' अपगता, यतस्ते चतुर्विधं कर्मबन्धं नेच्छन्ति, ततः कर्मचिन्ताप्रणष्टास्तेषामिदं मतं संसारस्य प्रवर्द्धनं स्यात् ॥ २४ ॥ कर्मचिन्तानष्टत्वमेवाह—

जाणं काएणऽहे० × × × (सू०) ॥ २५ ॥

व्याख्या—जानन् यः प्राणिनो हिनस्ति 'कायेन' शरीरेण चा'ऽनाकुट्टी' अहिंसकः, कोऽर्थः ? कोपादेर्निमित्तान् मनोव्यापारेण जीवान् हन्ति, न कायेन, तस्यानवद्यं, कर्मोपचयो न स्यादित्यर्थः। तथाऽबुधोऽजानन् कायेन हिनस्ति तस्यापि मनोव्यापाराभावान्न कर्मबन्धः 'पुट्ठो'त्ति तेन कर्मणाऽसौ केवलमनोव्यापारकृतेन केवलकायक्रियोत्थेन वा स्पृष्ट एव वेदयति, स्पर्शमात्रेणैव तत्कर्मानुभवति, न तस्याधिको विपाकः, स्पर्शानन्तरमेव परिशटतीत्यर्थः ॥ २५ ॥

एवं तस्सावद्यं कर्म अव्यक्तमेव, न स्पष्टं, कथं तर्हि कर्मोपचयः स्यादित्याह—

संतिमे तउ० × × × (सू०) ॥ २६ ॥

व्याख्या—सन्त्यमूनि त्रीणि 'आदानानि' कर्मोपादानानि, यैः पापकर्म क्रियते, तान्याह—'अभिक्रम्य' सन्मुखं गत्वा स्वयं हन्ति १, परं प्रेष्य यत्कारयति २, कुर्वन्तं वा मनसाऽनुजानीते ३, एतत्कर्मोपादानत्रयम्। अयम्भावः—केवलं मनसा शरीरेण वा न कर्मबन्धः, किन्तु यत्र स्वयं कृतकारितानुमतयः क्लिष्टाध्यवसायश्च तत्रैव कर्मबन्धः ॥ २६ ॥ एतदेव दर्शयति—

एए उ तउ० × × × (सू०) ॥ २७ ॥

व्याख्या—तुरवधारणे, एतान्येव त्रीणि व्यस्तानि समस्तानि कर्मादानानि, यैः पापं कर्म क्रियते। एवं सति यत्र

कृतकारितानुमतयः प्राणिहिंसायां न सन्ति, तत्र भावविशुद्ध्या-रागद्वेषरहितबुद्ध्या प्रवर्त्तमानस्य सत्यपि प्राणातिपाते केवलेन मनसा मनोव्यापाररहितेन कायेन उभयेन वा विशुद्धबुद्धेर्न कर्मबन्धस्तदभावान्निर्वाणमभिगच्छति-प्राप्नोति ॥२७॥ भावशुद्ध्या प्रवर्त्तमानस्य हिंसायामपि कर्मबन्धो न स्यादित्यत्रार्थे दृष्टान्तमाह—

पुत्तं पिया० × × × (सू०) ॥ २८ ॥

व्याख्या—पिता पुत्रं 'समारभ्य' व्यापाद्य आहारार्थं कस्याञ्चित्तथाविधायामापदि रागद्वेषरहितो 'असंयतो' गृहस्थस्तन्मांसं भुंजानोऽपि, च शब्दोऽप्यर्थे, मेधावी संयतोऽपि भुञ्जानः कर्मणा नोपलिप्यते, यथा पितुः पुत्रं व्यापादयतोऽपि शुद्धमनसः कर्मबन्धो न स्यात्तथा तस्यारक्तद्विष्टस्य प्राणिवधे न कर्मबन्धः ॥ २८ ॥ एतद् दूषयन्नाह—

मणसा जे० × × × (सू०) ॥ २९ ॥

व्याख्या—ये कुतोऽपि हेतोर्मनसा 'प्रदुःष्यन्ति' प्रद्वेषं यान्ति तेषां वधपरिणतानां शुद्धं चित्तं न विद्यते। एवं च यत्तैरुक्तं केवलमनः प्रद्वेषेऽपि 'अनवद्यं' पापाभाव इति तत्तेषामतथ्यं-मिथ्या, यतस्ते न संवृतचारिणः, मनसोऽशुद्धत्वात्। तथाहि-कर्मबन्धे मुख्यो हेतुर्मन एव, यथा ईर्यापथेऽनुपयुक्तो गच्छन् कर्मबन्धकः, उपयुक्तस्तु सहसाहिंसकोऽपि न कर्मबन्धक इति ततः पुत्रं पितेति दृष्टान्तो न समीचीन इति ॥ २९ ॥ अथ तेषामनर्थमाह—

इच्चेयाहिं० × × × (सू०) ॥ ३० ॥

व्याख्या—इत्येताभिः पूर्वोक्ताभिर्दृष्टिभिर्मतैस्ते वादिनः सातगौरवनिश्रिताः इदमस्मन्मतं शरणमिति मन्यमाना नराः पापमेव सेवन्ते कुर्वन्ति ॥ २० ॥ अत्रार्थे दृष्टान्तमाह—

जहा अस्साविणिं० × × × (सू०) ॥ २१ ॥

व्याख्या—' आश्राविणीं ' सच्छिद्रां नावं यथा जात्यन्धः समारुह्य पारं-तटमाप्तुमिच्छति, स नरो नावो जलव्याप्तत्वात् ' अन्तरा ' मध्ये एव विषीदति-जले निमज्जति ॥ २१ ॥ दार्ष्टान्तिकमर्थमाह—

एवं तु समणा० × × × (सू०) ॥ २२ ॥ त्तिबेमि ॥

व्याख्या—एवं नौदृष्टान्तेन एके श्रमणाः शाक्यादयो मिथ्यादृष्टयोऽनार्याः स्वमतानुसारेण संसारपारकाङ्क्षिणोऽपि संसारमेवाऽनुपर्यटन्ति, संसारे एवानन्तकालं भ्रमन्ति ॥ २२ ॥ इति ब्रवीमीति पूर्ववत् ॥

इति श्री सूत्रकृताङ्गे प्रथमाध्ययने द्वितीयोद्देशकः समाप्तः ॥

द्वितीयोद्देशके स्वान्यसमयप्ररूपणा कृता, तृतीयेऽपि सैवोच्यते इति-तस्येदमादिसूत्रम्—

जंकिंचि वि० × × × (सू०) ॥ १ ॥

व्याख्या—यत्किञ्चिदाहारजातं स्वल्पं घनं वा पूतिकृत-माधाकर्मादि सिक्थेनापि युक्तं ' सड्ढि 'त्ति ' श्रद्धावता ' भक्तिमतान्येनाऽपरागन्तुकान् उद्दिश्य ' ईहितं ' कृतं, तत्साहस्रान्तरितमपि यो भुञ्जीत, [सद्धि] पक्षं गृहस्थपक्षं प्रव्रजितपक्षं

च सेवते, अयमर्थः आधाकर्मादिलवेनाऽपि संसृष्टं परकृतमप्याहारं यो भक्षयेत्, सोऽपि द्विपक्षसेवी स्यात्, किं पुनः स्वयमाहारं निष्पाद्य ये शाक्यादयो भुञ्जते ते सुतरां द्विपक्षसेविनः स्युरित्यर्थः। अथवा द्विपक्षमीर्यापथं साम्परायिकं वा बद्धनिकाचितमेवं वा कर्म, तत्सेविनः परतीर्थिकाः स्वयूथ्या वा स्युरिति ॥ १ ॥ अथ तद्भोजिनां विपाकं दृष्टान्तेनाह—

तमेव अविआणंता० × × × (सू०) ॥२॥ उदयस्स × × × (सू०) ॥ ३ ॥

व्याख्या—तमाधाकर्माद्युपभोगदोषमविजानन्तो 'विषमे' कर्मबन्धे संसारे वाऽकोविदाः—कथं कर्मबन्धः स्यात्कथं वा न स्यात् कथं संसारार्णवस्तीर्येत इत्यत्रानिपुणा दुःखिनः स्युः। दृष्टान्तमाह—मत्स्या यथा 'वेसालिअ'त्ति विशालः समुद्रस्तत्र भवा विशालाख्यजातिभवा वा विशाला एव वा वैशालिका—बृहच्छरीरा 'उदकस्य' जलस्याभ्यागमे समुद्रवेलायां सत्यां उदकस्य प्रभावेन नदीमुखमागताः, पुनर्वेलापगमे जले शुष्कवेगेनाऽपगते सति ढङ्कैः कङ्कैश्च पक्षिविशेषैरन्यैश्चामिषार्थिभिर्विलुप्यमानास्ते दुःखिनो मत्स्या 'घातं' विनाशं यान्ति—प्राप्नुवन्तीति श्लोकद्वयार्थः ॥ २ ॥ ३ ॥ दार्ष्टान्तिकयोजनामाह—

एवं तु समणा० × × × (सू०) ॥ ४ ॥

व्याख्या—एवमेके श्रमणाः शाक्यादयः स्वयूथ्या वा वर्तमानमेव सुखं इहलोकसुखमाधाकर्माद्युपभोगजमेषितुं शीलं येषां ते वर्तमानसुखैषिणो वैशालिका मत्स्या इव 'घातं' विनाशमेष्यन्त्यनन्तशो यास्यन्ति बहुवारं संसारे अभिष्यन्ति दुःखमनुभवन्तः ॥ ४ ॥ अथापराज्ञानिमतमाह—

इणमन्नं तु × × × (सू०) ॥ ५ ॥

व्याख्या—इदं वक्ष्यमाणमन्यत् अज्ञानं, इहास्मिल्लोके एकेषामाख्यातं। किं पुनस्तैराख्यातमित्याह–'देवउत्त'त्ति देवेन 'उप्तः' कृतं देवोप्तः देवपुत्रो वाऽयं लोकः ब्रह्मणा उप्तो–ब्रह्मणा कृतो वायं लोक इत्यपरे वदन्तीति ॥ ५ ॥ तथा—

ईसरेण० × × × (सू०) ॥ ६ ॥

व्याख्या—ईश्वरेण कृतो लोकः अपरे वदन्ति प्रधानादिकृतो लोकः, सत्त्वरजस्तमोगुणानां साम्यावस्था प्रकृतिः, सैव प्रधानशब्दवाच्या। आदिशब्दान्नियतिकृतो लोक इत्यन्ये, लोको जीवाजीवसमायुक्तः सुखदुःखसमन्वितश्च ॥ ६ ॥ तथा—

सयंभुणा० × × × (सू०) ॥ ७ ॥

व्याख्या—स्वयम्भूर्विष्णुरन्यो वा, स चैकाकी रतिं न लभते, ततोऽन्या शक्तिः समुत्पन्ना। तदनन्तरं जगत्सृष्टिरभूत् इति महर्षिणा उक्तं। ततः स्वयम्भुवा लोकं निष्पाद्याऽतिसम्भारभयाद्यमाख्यो मारयतीति मारो व्यधायि, तेन मारेण 'संस्तुता' कृता माया, तया मायया च लोको म्रियते, न च तत्त्वतो जीवस्य मृतिरस्ति, अतो मायैषा, तेन लोकोऽशाश्वत इति गम्यते ॥ ७ ॥ तथा—

माहणा० × × × (सू०) ॥ ८ ॥

व्याख्या—'ब्राह्मणा' द्विजातयः, श्रमणास्त्रिदण्डिप्रमुखा, एके अण्डेन कृतमण्डकृतं अण्डाज्जातं जगत् 'आहुः'

वदन्ति, ब्रह्मणाऽण्डं कृतं, ततो विश्वं जातं। एवंभूते जगति असौ ब्रह्मा 'तत्त्वं' पदार्थसमूहमकार्षीत्-कृतवान्, ते च ब्राह्मणाद्याः परमार्थानभिज्ञा एवं मृषा वदन्ति ॥ ८ ॥ अथ तेषामुत्तरमाह—

सतेहिं० × × × (सू०) ॥ ९ ॥

व्याख्या—स्वकैः-निजैः पर्यायैः-रभिप्रायैर्लोकं कृतमब्रुवन् कथितवन्तस्ते 'तत्त्वं' परमार्थं नाभिजानन्ति, न च विनाशी लोकः कदाचिन्निर्मूलतः, पर्यायरूपेण विनाशेऽपि द्रव्यार्थतया नित्यत्वात्। लोकस्य ईश्वरादिकृतत्वनिषेधयुक्तयष्टीकातो ज्ञेयाः ॥ ९ ॥ अथ तेषां मृषावादिनां फलमाह—

अमणुन्न० × × × (सू०) ॥ १० ॥

व्याख्या—'अमनोज्ञं' असदनुष्ठानं, तस्मादुत्पादः-प्रादुर्भावो यस्य तत् अमनोज्ञसमुत्पादं-दुःखं विजानीयात् प्राज्ञः, अयमर्थः-स्वकृतादसदनुष्ठानादेव दुःखमुत्पद्यते, नेश्वरादेरिति, ते चैवं दुःखस्य समुत्पादमजानन्तः कथं दुःखस्य संवरं प्रतिघातहेतुं ज्ञास्यन्ति? कारणोच्छेदादेव कार्योच्छेदः स्यात्, कारणं वाऽज्ञानन्तः कथं दुःखोच्छेदाय यतिष्यन्ते? यत्नवन्तोऽपि दुःखोच्छेदं नाप्नुवन्तीति ॥ १० ॥ कृतवादिमतमेवाह—

सुद्धे अपावए० × × × (सू०) ॥ ११ ॥

व्याख्या—अयमात्मा शुद्धो, मनुष्यभव एव शुद्धाचारो भूत्वा मोक्षेऽपापकः स्यात्, इदमेकेषां गोशालमतानुसारिणा-

माख्यातं, पुनरयमात्माऽकर्मको भूत्वा क्रीडया प्रद्वेषेण वा तत्र मोक्षस्थ एवापराध्यति–रजसा श्लिष्यते, तस्य हि स्वशासन-पूजामन्यदर्शनपराभवमुपलभ्य 'क्रीडा' प्रमोदः स्यात्, स्वशासनपराभवदर्शनाच्च द्वेषः, ततोऽसौ क्रीडा–द्वेषाभ्यां कर्मणा बध्यते, ततो भूयः संसारेऽवतरति ॥ ११ ॥ किञ्च—

इह संवुडे० × × × (सू०) ॥ १२ ॥

व्याख्या—इह संसारे प्राप्तः सन् प्रव्रज्यामङ्गीकृत्य संवृतात्मा जातः सन् पश्चादपापः स्यात्। यथा 'विकटाम्बु' उष्णोदकं 'नीरजस्कं' निर्मलं सत् वातोद्धूतरेणुयुक्तं 'सरजस्कं' मलिनं भूयः स्यात्। तथाऽयमात्मा त्रैराशिकानां मते राशित्रयावस्थः स्यात्। यथा–पूर्वं संसारावस्थायां सकर्मकः, ततो मोक्षेऽकर्मकः पुनः शासनपराभवदर्शनाद् द्वेषोदयात्सकर्मा स्यादिति ॥ १२ ॥ एतन्मतं दूषयति—

एआणुचिंति० × × × (सू०) ॥ १३ ॥

व्याख्या—'एतान्' पूर्वोक्तान् वादिनोऽनुचिन्त्य 'मेधावी' प्रज्ञावानेतदवधारयेद्यथा–न ते वादिनो 'ब्रह्मचर्ये' संयमानुष्ठाने वसेयुः। यद्यपि ते संयमे स्थितास्तथापि न सम्यगनुष्ठातार इत्यवधारयेत्, पृथक् २ सर्वेऽप्येते 'प्रावादुकाः' परमतिनः स्वकं स्वकं–आत्मीयं दर्शनमाख्यातारः, शोभनत्वेन कथयितारः, स्वदर्शनं शुभं वदन्ति ते, न च तत्रास्था विधेयेति ॥ १३ ॥ कृतवादिमतमेव प्रकारान्तरेणाह—

सए सए०   ×   ×   ×   (सू०) ॥ १४ ॥

व्याख्या—ते कृतवादिनः स्वके स्वके 'उपस्थाने' संगमाद्यनुष्ठाने 'सिद्धिं' मोक्षमभिहितवन्तो, नान्यथा, तथा सिद्धिप्राप्तेरधः प्रागपि 'वशवर्ती' वश्येन्द्रियः स्यात्, अस्मन्मताश्रितः सांसारिकैः स्वभावैर्नाभिभूयते सर्वे 'कामा' अभिलाषा 'समर्पिताः' सम्पन्ना यस्य स सर्वकामसमर्पितः, इहलोके ईदृशः स्यात् । परलोके च मोक्षं यायात् इत्यर्थः ॥१४॥ एतदेवाह—

सिद्धा य ते०   ×   ×   ×   (सू०) ॥ १५ ॥

व्याख्या—तेऽस्मन्मताश्रिताः सिद्धाश्चारोगाश्च स्युः । अरोगग्रहणात् शारीरमानसानेकदुःखरहिताश्चेति ज्ञेयं । इहास्मिल्लोके एकेषां शैवादीनामिदमाख्यातं ते हि 'सिद्धिं' मुक्तिमेव पुरस्कृत्याङ्गीकृत्य 'स्वाशये' स्वमतानुरागे 'ग्रथिताः' सम्बद्धा नराः प्राकृतपुरुषाः पण्डितंमन्या इवेत्यर्थः ॥ १५ ॥ एतद्दूषणायाह—

असंवुडा०   ×   ×   ×   (सू०) ॥ १६ ॥ त्तिबेमि

व्याख्या—ते पाखण्डिनस्तत्त्वतोऽसंवृता अनादिकं संसारं पुनः पुनर्भ्रमिष्यन्ति, यदि कथञ्चित्तेषां स्वर्गावाप्तिस्तथाऽपि 'कल्पकालं' बहुकालं उत्पद्यन्ते सम्भवन्त्यासुराः, असुरस्थानोत्पन्ना अपि न प्रधानाः, किं तर्हि ? 'किल्बिषिका' अधमा एवेति ॥ १६ ॥ ब्रवीमीति पूर्ववत् ॥

इति श्री सूत्रकृताङ्गदीपिकायां प्रथमाध्ययने तृतीयोद्देशकः समाप्तः ॥ छः ॥

तृतीयोद्देशकेऽन्यतीर्थिकानां कुत्सितत्वमुक्तमिहापि तदेवोच्यत इत्यर्थसम्बद्धस्याऽस्योद्देशकस्येदमादिसूत्रम्—

एते जिआ० × × × (सू०) ॥ १० ॥

व्याख्या—एतेऽन्यमतिनो 'जिता' अभिभूता रागद्वेषादिभिः, भो इति शिष्यामन्त्रणं, एवं त्वं जानीहि, यथा-एते शरणं कस्यचित्त्राणाय न समर्थाः। 'जत्थ' त्ति यत्राऽज्ञाने बालोऽज्ञो लग्नः सन् अवसीदति। तत्र ते व्यवस्थिताः 'बाला-पण्डिअमाणिणो' इति क्वचित्पाठस्तत्र 'बाला' निर्विवेका अपण्डिता अपि पण्डितमानिनः कस्याऽपि न त्राणाय स्युरित्यर्थः। तत्कृत्यमाह-'हिच्चा णं' ति-'हित्वा त्यक्त्वा पूर्वसंयोगं-धनस्वजनादिकं, णमिति वाक्यालङ्कारे, सिता-बद्धाः परिग्रहारम्भेषु, पुनः किम्भूताः 'कृत्यं' कार्यं पचनपाचनादि, तस्योपदेशं गच्छन्ति इति कृत्योपदेशगाः। अथवा 'सिया' इत्यार्षत्वात् स्युर्भवेयुः। 'कृत्यं' सावद्यानुष्ठानं, तत्प्रधानाः कृत्या-गृहस्थास्तेषामुपदेशः—

" संकप्पो० × × × (सू०) ॥ १ ॥ "

संरम्भ समारम्भरूपः, स विद्यते येषां ते कृत्योपदेशिकाः, प्रव्रजिता अपि कर्त्तव्यैर्गृहस्थेभ्यो न भिद्यन्त इत्यर्थः ॥ १ ॥ एवम्भूतेषु तीर्थिकेषु सत्साधुना यत्कर्त्तव्यं तदाह—

तं च भिक्खू० × × × (सू०) ॥ २ ॥

व्याख्या—'तं' पाखण्डिलोकं 'परिज्ञाय' सम्यग् ज्ञात्वा 'भिक्षुः' संयतो विद्वान् तेषु न मूर्च्छयेत्, तैः सह

सम्बन्धं न कुर्यात् । किं तर्हि कुर्यात् ? इत्याह—अनुत्कर्षवान्, उत्कर्षो मदस्तं अकुर्वन् तथा अप्रलीनोऽसम्बद्धस्तीर्थिकेषु गृहस्थेषु पार्श्वस्थादिषु वासं श्लेषमकुर्वन् 'मध्येन' रागद्वेषयोरन्तरालेन सञ्चरन् मुनि-र्जगत्त्रयवेदी यापयेत्-आत्मानं वर्त्तयेत्, तेषु निन्दां स्वस्य प्रशंसां च परिहरन् साधुर्मध्यस्थवृत्त्या चरेदित्यर्थः ॥ २ ॥ कथं तीर्थिकास्त्राणाय न स्युरित्याह—

सपरिग्गहा य० × × × (सू०) ॥ ३ ॥

व्याख्या—'सपरिग्रहा' धनादियुक्ताः, धनाद्यभावेऽपि शरीरोपकरणादौ मूर्च्छावन्तः सपरिग्रहा एव तथा 'सारम्भाः' सावद्यव्यापाराः इतीह विचारे एकेषां आख्यातं, यथा—किमनया शिरस्तुण्डमुण्डनादिक्रियया गुरोरनुग्रहाद्यदा परमाक्षरावाप्तिर्भवति तदा मोक्षः स्यादेवं भाषमाणास्ते न त्राणाय स्युः । ये त्रातुं समर्थास्तानाह—'अपरिग्रहा' धर्मोपकरणं विना शरीरोपभोगाय स्वल्पोऽपि न विद्यते परिग्रहो येषां तेऽपरिग्रहा अनारम्भाश्च, तान् 'भिक्षुः' साधुः शरणं 'परिव्रजेत्' गच्छेत्, तेषां शरणं यायादित्यर्थः ॥ ३ ॥ परिग्रहारम्भवर्जनं यथा स्यात्तथाह—

कडेसु घास० × × × (सू०) ॥ ४ ॥

व्याख्या—'कृतेषु' गृहस्थैः स्वार्थं निष्पादितेषु ओदनादि पिण्डेषु ग्रासमाहारं 'एषयेत्' याचेत इति षोडशोद्गमदोषत्यागः सूचितः, तथा 'विद्वान्' संयमनिपुणो 'दत्तं' परैराशंसादोषरहितैर्निःश्रेयसबुद्ध्या वितीर्णं, तत्र एषणां—ग्रहणैषणां चरेत् । दत्तमित्यनेन षोडशोत्पादनादोषाः एषणां चरेदित्यनेन दश एषणादोषाश्च सूचिताः, एतद्दोषत्यागेन पिण्डं गृह्णीया-

दित्यर्थः । ' अगृद्धो'ऽमूर्च्छितो ' विप्रमुक्तो ' रागद्वेषरहितश्च आहारे स्यादिति पञ्चग्रासैषणादोषत्यागयुक्तः । स एवम्भूतो भिक्षुः परेषामपमानं परिवर्जयेत्, तपोमदं ज्ञानमदं च न कुर्यादित्यर्थः, आत्मनः सकाशात् परान् हीनान् न पश्येदिति तात्पर्यम् ॥ ४ ॥ स्वमतं प्रख्याप्य पुनः परमतं दर्शयति—

लोगवायं० × × × (सू०) ॥ ५ ॥

व्याख्या—लोकानां पाखण्डिकानां वादमङ्गीकारं ' निसामिज्जा ' निशामयेत्–जानीयात् । तद्दर्शयति इह संसारे केषाञ्चित् इदमाख्यातं यथा ' विपरीता ' मिथ्या या प्रज्ञा, तया ' सम्भूतं ' उत्पन्नं विपर्यस्तबुद्धिग्रथितमित्यर्थः । तथा अन्यैरविवेकिभिर्यदुक्तं ' तदनुगं ' तत्सदृशं, अविवेकिजनवाक्यसदृशमिति ॥ ५ ॥ लोकवादमेवाह—

अणंते णितिए० × × × (सू०) ॥ ६ ॥

व्याख्या—न विद्यते अन्तो यस्येत्यनन्तः नित्यः शाश्वतो निरन्वयनाशेन न नश्यति यो यादृगिह भवे स परभवेऽपि तादृश एव, पुरुषः पुरुष एव अङ्गना अङ्गनैवेति । अथवाऽनन्तो–ऽपरिमितो निरवधिकस्तथा 'नित्यः' अप्रच्युतानुत्पन्नस्थिरैकरूपः । तथा शाश्वतः, कार्यद्रव्यं भवदपि प्रान्ते परमाणुत्वं न त्यजति । तथा न विनश्यति दिगात्माकाशाद्यपेक्षया । तथा अन्तवान् लोकः, सप्तद्वीपा वसुन्धरेति परिमाणोक्तनात्तादृक् परिमाणो ' नित्यः ' इति ' धीरः ' साहसिको व्यासादिरतीव पश्यति ॥ ६ ॥ किञ्च—

अपरिमाणं० × × × (सू०) ॥ ७ ॥

व्याख्या—न विद्यते परिमाणमियत्ता क्षेत्रतः कालतो वा यस्य तद्-अपरिमाणं विजानाति कश्चित्तीर्थिकः अपरिमितज्ञोऽसौ अतीन्द्रियद्रष्टा न पुनः सर्वज्ञः यद्वाऽपरिमितज्ञोऽभिप्रेतार्थातीन्द्रियदर्शी, न पुनः सर्वदर्शी । यदुक्तम्—

"सर्वं पश्यतु वा मा वा, इष्टमर्थं तु पश्यतु । कीटसङ्ख्यापरिज्ञानं, तस्य न कोपयुज्यते ॥ १ " इति ।

इह केषांचित् सर्वज्ञापह्नववादिनामिदमाख्यातं, तथा सर्वत्र क्षेत्रे काले वा 'सपरिमाणं' परिमाणयुक्तं, धी-बुद्धिस्तया राजते इति धीरः, इत्येवमसावतीव पश्यति, दिव्यं वर्षसहस्रं ब्रह्मा स्वपिति, तावत्कालं न पश्यति किञ्चित्, पुनस्तावन्तं कालं जागर्ति तत्र पश्यति एवं बहुधा प्रवृत्तो लोकवादः ॥ ७ ॥ अस्योत्तरमाह—

जे केइ तसा पाणा० × × × (सू०) ॥ ८ ॥

व्याख्या—ये केचित्त्रसाः प्राणिनस्तिष्ठन्ति, अथवा स्थावराः, तेषां स्वकर्मपरिणत्याऽयं पर्यायोऽस्ति, 'अंजु' चि-प्रगुणोऽव्यभिचारी, तेन पर्यायेण ते त्रसस्थावराः स्युः । त्रसत्वमनुभूय कर्मपरिणत्या स्थावराः स्थावरत्वमनुभूय त्रसाश्च भवन्तीति, ततो यो यादृगिहभवे स परभवेऽपि तादृगिति नियमो न युक्तः ॥ ८ ॥ अत्र दृष्टान्तमाह—

उरालं जगओ० × × × (सू०) ॥ ९ ॥

व्याख्या—'उदारं' स्थूलं जगतो योगं, औदारिकाः प्राणिनो गर्भकललार्बुदरूपादवस्थाविशेषाद्विपरीतं बालकुमार-यौव-

नादिकं उदारं योगं परि समन्तात् 'अयंते' गच्छन्ति संपर्ययन्ते । अयमर्थः । औदारिकशरीरिणो मनुष्यादेर्बालकुमाराद्यवस्था-विशेषाः प्रत्यक्षेण दृश्यन्ते, न पुनर्यादृक् प्राक् तादृगेव सर्वदेति । एवं सर्वेषां स्थावरजङ्गमानामन्यथा भवनं ज्ञेयं । तथा आक्रान्ता पीडिता दुःखेन सर्वे जन्तवस्ततस्ते अहिंसिता भवन्ति तथा कार्यं । अथवा 'ऽकान्तं' अप्रियं दुःखं येषां तेऽकान्तदुःखाश्च-शब्दात् प्रियसुखाश्च, अतः सर्वान्न हिंस्यादिति दृष्टान्तो दर्शित उपदेशश्च दत्तः ॥ ९ ॥ किमर्थं सत्त्वान्न हिंस्यादित्याह—

एवं खु नाणिणो० × × × (सू०) ॥ १० ॥

व्याख्या—खुर्निश्चये, एतदेव ज्ञानिनः सारं यत्किञ्चन प्राणिजातं न हिनस्ति । 'अहिंसा समता चैव' एतावत् विजानीयात् । कोऽर्थः । यथा मम मरणं दुःखं चाप्रियं एवं सर्वस्य प्राणिलोकस्यापीति, एवं ज्ञात्वा न हिंस्यात्प्राणिनः उपलक्षणान्मृषा न ब्रूयान्नादत्तं गृह्णीयान्नाऽब्रह्म सेवेत न परिग्रहं कुर्यादिति ॥ १० ॥ मूलगुणानुक्त्वोत्तरगुणानाह—

उसिए य० × × × (सू०) ॥ ११ ॥

व्याख्या—विविधमनेकधा 'उषितः' स्थितो दशविधसामाचार्यां व्युषितः, विगता आहारादौ गृद्धिर्यस्य स विगतगृद्धिः साधुः, आदीयते प्राप्यते मोक्षो येन तत् आदानीयं-ज्ञानादित्रयं, तत्सम्यग् रक्षयेत् । तथा चर्यासनशय्यासु, चर्या-गमनं आसनं-निषीदनस्थानं शय्या-वसतिः, संस्तारको वा, तेषु तथा भक्ते पाने चाऽन्तशः सम्यगुपयोगवता भाव्यं । अयमर्थः । ईर्याभाषैषणादाननिक्षेपप्रतिष्ठापनसमितिषु उपयुक्तेनाऽन्तशो भक्तपानं यावन्निर्दोषमन्वेषणीयं ॥ ११ ॥ पुनरुत्तरगुणानाह—

एतेहिं तिहिं०   ×   ×   ×   ॥ १२ ॥

व्याख्या—एतानि त्रीणि स्थानानि, यथा-ईर्यासमितिरित्येकं स्थानं १, आसनं शय्येत्यादानभाण्डमात्रनिक्षेपणासमितिरिति द्वितीयं २, भक्तं पानमित्येतेन एषणासमितिः, भक्तपानार्थं च प्रविष्टस्य भाषणासम्भवाद्भाषासमितिराक्षिप्ता, सति चाहारे उच्चारप्रश्रवणादीनां सद्भावात् प्रतिष्ठापनसमितिरप्यायाता, इति तृतीयं स्थानं ३, एतेषु त्रिषु स्थानेषु सम्यग् यतः संयत, आमोक्षाय परिव्रजेदित्युत्तरश्लोकेन सम्बन्धः तथा सततं मुनिः 'उत्कर्षो' मानः 'ज्वलनः' क्रोधः 'णूमं'ति गहनं मायेत्यर्थः, संसारमध्ये सर्वदा भवतीति 'मध्यस्थो' लोभः, च समुच्चये, एतान् मानादीन् कषायान् 'विगिंचए'त्ति विवेचयेदात्मनः पृथक्कुर्यात् । ननु क्रोध एवादौ सर्वत्र स्थाप्यते, अत्र तु कथं मान ? इति चेदुच्यते-माने सत्यऽवश्यम्भावी क्रोधः, क्रोधे च सति मानः स्यान्नवेत्यर्थस्य दर्शनाय क्रमोल्लङ्घनमिति ॥ १२ ॥ उपसंहारमाह—

समिए य०   ×   ×   ×   (सू०) ॥ १३ ॥ त्तिबेमि ॥

व्याख्या—पञ्चसमितिभिः समितः साधुः पञ्चमहाव्रतोपेतत्वात् पञ्चप्रकारसंवरसंवृतः, च शब्दाद्गुप्तिगुप्तस्तथा गृहपाशादिषु 'सिता' बद्धा गृहस्थास्तेष्वऽसितो न बद्धो-न मूर्च्छितो भिक्षुर्भावभिक्षुः, आसमंतात् मोक्षाय परिसमंतात् व्रजेः, संयमानुष्ठानरतो भवेस्त्वमिति शिष्यस्योपदेशः । इतिः समाप्तौ, ब्रवीमीति पूर्ववत् ॥ १३ ॥

इति तपागच्छाधिपश्रीहेमविमलसूरीश्वरशिष्यहर्षकुलप्रणीतायां श्रीसूत्रकृताङ्गदीपिकायां

प्रथमं समयाध्ययनं समाप्तम् ॥   ॥ श्रीरस्तु ॥

सूक्ष्मदर्शी अतोऽस्मान् पोषय अन्यथा त्वया प्रव्रज्या प्रव्रजितेन लोकस्त्यक्तः अस्मत्परिपालनत्यागाच्च परलोकमपि त्वं जहासि-त्यजसि ॥ १९ ॥

अन्नेहिं मुच्छिता असंवुडा नरा मोहं यांति सदनुष्ठाने च मुह्यन्ति । तथा विषमैरऽसंयतैर्विषमं असंयमं ग्राहिता असंयमे प्रवर्त्तितास्ते पापैः कर्मभिः पुनः प्रगल्भिता धृष्टतां गताः ॥ २० ॥

तम्हा दविइक्ख पंडिए पावाओ विरतेऽभिनिव्वुडे । पणए वीरे महाविहं सिद्धि पहं णेआउअधुवं ॥ २१ ॥

तस्माद् द्रव्यमतो मुक्तियोग्यं पण्डितः सन् ईक्षस्व-विचारय पापाद्विरतः अभिनिर्वृतः क्रोधादित्यागात् शीतीभूतः तथा वीराः कर्मविदारणसमर्था महावीथिं महामार्गं प्रणताः प्राप्ताः नान्ये महावीथिं किम्भूता सिद्धिपथं ज्ञानादिमार्गं प्रतिनेतारं प्रापकं ध्रुवमव्यभिचारं इति ज्ञात्वाऽसंयमप्रगल्भेन भाव्यमिति ॥ २१ ॥

वेतालिअमग्गमागतो मणवयसा काएण संवुडो । चिच्चावित्तं च णायओ आरंभं च सुसंवडे चरिज्जासि त्तिबेमि ॥

कर्मणां वैदारिकं विदारणसमर्थं मार्गमागतो मनोवाक्कायसंवृतस्त्यक्त्वा वित्तं धनं ज्ञातीन् स्वजनान् सावद्यारम्भं च सुसंवृत इन्द्रियैः संयमे चरेत इति ब्रवीमीति पूर्ववत् ॥ २२ ॥

वैतालियाख्यद्वितीयाध्ययनस्य प्रथमोद्देशकः ॥

अथ सप्तमाध्ययनमारभ्यते ॥

अस्य च नालन्दीयमिति नाम, तस्यायमर्थः—नालन्दा—राजगृहनगरे बाहिरिका, तस्यां भवं नालन्दीयमिति। पूर्वं सकलेन सूत्रकृताङ्गेन साध्वाचारः प्ररूपितः, अत्र तु श्रावकविधिरुच्यते। तस्येदं सूत्रम्—

तेणं कालेणं तेणं समएणं रायगिहे नामं नयरे होत्था, (इत्यादि) जावपडिरूवा (सू०) ॥ १ ॥

व्याख्या—तस्मिन् काले तस्मिन् समये-ऽवसरे राजगृहं नाम नगरमभवत् रिद्धिस्फीतं समृद्धं वर्णको वाच्यः, यावत् 'प्रतिरूपं' अनन्यसदृशं। तस्य नगरस्य बहिरुत्तरपूर्वस्यां दिशि नालन्दानाम बाहिरिकाऽऽसीत्, सा चानेकभवनशतसन्निविष्टा नैकगृहसङ्कीर्णेत्यर्थः ॥ १ ॥

तत्थ णं नालंदाए बाहिरियाए लेवे नामं गाहावई हुत्था (इत्यादि) अपरिभूए आवि होत्था (सू०) ॥ २ ॥

व्याख्या—तस्यां नालन्दायां लेपो नाम 'गृहपतिः' कुटुम्बिक आसीत्। स च आढ्यो 'दीप्तस्तेजस्वी 'वित्तो' विख्यातो विस्तीर्णविपुलभवनशयनासनयानवाहनाकीर्णो बहुधनो बहुजातरूपरजत 'आयोग' अर्थोपायाः 'प्रयोगा' प्रयोजनानि, तैः 'सम्प्रयुक्तः' संयुतः इतश्चेतश्च विच्छिन्नप्रचुरभक्तपानो बहुदास्यादिपरिवृतो बहुजनस्यापरिभूत आसीत् ॥ २ ॥

से णं लेवे नामं गाहावई समणोवासए याविहुत्था (इत्यादि) अप्पाणं भावेमाणे एवं च णं विहरइ (सू०) ॥ ३ ॥

व्याख्या—स लेपो नाम गृहपतिः श्रमणोपासकोऽभिगतजीवाजीव इत्यादि, 'निग्गंथे'त्ति आर्हते प्रवचने निःशङ्कितः

निष्काङ्क्षितोऽन्यमतनिराकाङ्क्षः, 'विचिकित्सः' चित्तप्लुतिर्विद्वज्जुगुप्सा वा, तद्रहितो निर्विचिकित्सो 'लब्धार्थो' ज्ञाततत्त्वः 'गृहीतार्थः' स्वीकृतमोक्षमार्गः विशेषतः पृष्टोऽर्थो येन स पृष्टार्थः पृष्टार्थत्वादेव विनिश्चितार्थ 'अभिगतः' प्रतीतोऽर्थो येन स तथा, अट्ठिमिंजा-अस्थिमध्यं, यावद्धर्मे प्रेमानुरागेण रक्तोऽत्यन्तं सम्यक्त्ववासितचित्त इत्यर्थः। केनचिद्धर्मं पृष्टः प्राह-अयमायुष्मन्! जैनधर्मोऽर्थः-सत्यं परमार्थरूपः, शेषः सर्वोऽप्यनर्थः। 'ऊसियफलिह'त्ति 'उच्छ्रितं' प्रख्यातं स्फटिकवन्निर्मलं यशो यस्य 'अप्रावृत्तं' अस्थगितं द्वारं गृहस्य येन सोऽप्रावृतद्वारः, परतीर्थिकोऽपि गृहं प्रविश्य धर्मं यदि वदेत्, तदनुमतस्य परिजनोऽपि सम्यक्त्वाच्चालयितुं शक्यते, तद्भीत्या न द्वारप्रदानमित्यर्थः। प्रीतिकारी राजान्तःपुरेऽपि प्रवेशो यस्य स तथा, कोऽर्थः? राजान्तःपुरे हि कोऽपि न प्रवेश्यस्तत्राप्यसौ प्रतीतगुणत्वेन प्रवेशयोग्य इत्यर्थः। तथा चतुर्दश्यष्टम्यादिषु तिथिषु उद्दिष्टासु महाकल्याणकसम्बन्धितया पुण्यतिथित्वेन प्रसिद्धासु, तथा पौर्णमासीषु च तिसृष्वपि चातुर्मासिकतिथिषु एवंभूतेषु धर्मदिवसेषु 'सुष्ठु' अतिशयेन प्रतिपूर्णं सम्पूर्णमाहारशरीरसत्कारब्रह्मचर्याऽव्यापाररूपं पौषधमनुपालयन् तथाविधान् सद्गुणान् श्रमणान् एषणीयेन शुद्धेनाशनादिना प्रतिलाभयन् बहुभिः शीलव्रतगुणविरमणप्रत्याख्यान-पौषधोपवासैरात्मानं भावयन्। एवं पूर्वोक्तप्रकारेण, च समुच्चये णं वाक्यालङ्कारे, विहरति-आस्ते ॥ ३ ॥

तस्स णं लेवस्स गाहावइस्स नालंदाए बाहिरियाए (इत्यादि) किण्हे, वण्णओ वणसंडस्स (सू०) ॥ ४ ॥

व्याख्या—तस्य लेपस्य गृहपतेः सम्बन्धिनी नालन्दायाः पूर्वोत्तरस्यां दिशि गृहोपयुक्तशेषद्रव्येण कृता [इति शेषद्रव्यानाम्] उदकशालाऽऽसीदनेकस्तम्भशतसन्निविष्टा प्रासादीया यावत्प्रतिरूपा, तस्याश्चोत्तरपूर्वदिग्भागे हस्तियामाख्यो

वनखण्ड आसीत्, कृष्ण इत्यादि वर्णको वनखण्डस्य वाच्यः ॥ ४ ॥

तस्सिं च णं गिहपएसंमि भयवं गोयमे विहरइ (इत्यादि) उदए पेढालपुत्ते भयवं गोयमं एवं वयासी (सू०) ॥ ५ ॥

व्याख्या—तस्मिन् वनखण्डे गृहप्रदेशे भगवान् गौतमो विहरति, तस्मिन्नारामे स्थितः। अथ उदकाख्यो निर्ग्रन्थ पेढालपुत्रः पार्श्वापत्यस्य-पार्श्वशिष्यस्याऽपत्यं शिष्यः। स च मेदार्यो गोत्रेण 'जेणेव'त्ति यस्यां दिशि गौतमस्तत्रागत्येदं तं प्राह—आयुष्मन् भो गौतम! अस्ति मम कश्चित्प्रदेशः पृष्टव्यः, तं प्रदेशं मम यथाश्रुतं त्वया यथादर्शितं श्रीवीरेण तथा 'व्यागृणीहि' कथय, स चायं भगवान् यदि वा सह वादेन सवादं पृष्टस्तमुदकं पेढालसुपुत्रमेवमवादीत्। अपि चायुष्मन् उदक! श्रुत्वा त्वदीयं प्रश्नं निशम्य चावधार्य गुणदोषविचारेण सम्यग् ज्ञास्येहं, तदुच्यतां विश्रब्धं त्वया स्वाऽभिप्रायः 'सवायं' स सद्वाचं वा उदकः पेढालपुत्रो गौतमं एवं अवादीत् ॥ ५ ॥

आउसो गोयमा! अत्थि खलु कुमारपुत्तिया नाम समणा निग्गंथा (इत्यादि) तेसिं च णं थावरकायंसि उववण्णाणं ठाणमेयं घत्तं (सू०) ॥ ६ ॥

व्याख्या—भो गौतम! 'अत्थि' सन्ति कुमारपुत्रा नाम निर्ग्रन्था युष्मदीयं प्रवचनं प्रवदन्तः, तथाहि—'गृहपतिं' श्रमणोपासकं 'उपसम्पन्नं' नियमग्रहणायेतं प्रत्याख्यापयन्ति—प्रत्याख्यानं कारयन्ति। तद्यथा—त्रसेषु 'दण्डं' हिंसां-निहाय त्यक्त्वा प्राणातिपातनिवृत्तिं कुर्वन्ति। 'नन्नत्थ'त्ति' नान्यत्र स्वमतेरन्यत्र राजाद्यभियोगेन यः प्राणिघातो न तत्र निवृत्तिरिति, तत्र स्थूलप्राणिविशेषणात्तदन्येषां जीवानां हिंसानुमतिदोषः स्यादित्याशङ्कावान् प्राह—'गाहावइ-चोर'त्ति, अस्यार्थोऽग्रे भावयिष्यते। 'एवंण्हं'त्ति, उदक एवाह ण्हमिति वाक्यालङ्कारे। एवं प्रत्याख्यानं कुर्वतां श्राद्धानां

दुष्प्रत्याख्यानं भवति, प्रत्याख्यानभङ्गसद्भावात्तथा एवं 'प्रत्याख्यापयतां' प्रत्याख्यानं कारयतां 'यतीनां' साधूनां दुष्टं प्रत्याख्यानदानं भवति, एवं प्रत्याख्यानं कुर्वन्तः कारयन्तश्च स्वां प्रतिज्ञामतिलङ्घन्ते-अतिक्रामन्ति 'कस्स णं तं हेउं' कस्माद्धेतोरित्यर्थः । प्रतिज्ञाभङ्गकारणमाह-'संसारिया' इत्यादि, सांसारिकाः खलु प्राणिनः स्थावरा अपि प्राणिन-स्त्रसतया प्रत्यायान्ति त्रसाश्च स्थावरत्वेनेति । एवं सति प्रतिज्ञालोपः स्यात्, यथा नागरिको न हन्तव्य' इति प्रतिज्ञा येन कृता स यदि उद्यानस्थं नागरिकं हन्यात्तदा तस्य किं प्रतिज्ञालोपो न स्यात्? एवमत्रापि, येन त्रसवधनिवृत्तिः कृता स यदि तमेव त्रसं स्थावरकायस्थितं हन्ति तदा तस्य किं न भवेत् प्रतिज्ञालोपः? भवत्येवेत्यर्थः, त्रसकायान्मुच्यमानाः स्थावरकाये उत्पद्यन्ते स्थावरकायान्मुच्यमानास्तु त्रसकाये, न च किञ्चिल्लिङ्गमस्ति येन ज्ञायतेऽयं त्रसोऽभूत् पूर्वं स्थावरो वेति । 'तेसिं च णं' तेषां त्रसानां स्थावरकाये उत्पन्नानां श्राद्धस्यारम्भवतः 'स्थानमिदं' स्थावराख्यं घात्यं स्यात् एवं नागरिक-दृष्टान्तेन त्रसमेव घ्नतः प्रतिज्ञालोपः स्यात् ॥ ६ ॥ उदकः पुनः स्वाभिप्रायमाह—

एवण्हं पच्चक्खंताणं सुपच्चक्खायं भवइ, पच्चक्खावेमाणाणं सुपच्चक्खावियं भवइ (इत्यादि) अवियाइं आउसो गोयमा ! तुब्भंपि एवं रोयइ (सू०)७

व्याख्या—एवं प्रत्याख्यानं कुर्वतां सुप्रत्याख्यानं भवति, एवं प्रत्याख्यापयतां च तदेव, एवं प्रत्याख्यानं कुर्वतां कारयतां च न स्वप्रतिज्ञालोपः । 'णण्णत्थे'त्यादि, एवं गृहस्थः प्रत्याख्याति-'त्रसभूतेषु' वर्त्तमानकाले त्रसत्वेनोत्पन्नेषु प्राणिषु 'दण्डं' वधं 'निहाय' त्यक्त्वा प्रत्याख्यानं करोति, तदिह भूतत्वविशेषणात् स्थावरपर्यायप्राप्तस्य वधेऽपि न प्रतिज्ञालोपः, नान्यत्राऽभियोगेन राजाद्यभियोगादन्यत्र प्रत्याख्यानं गृहपतिचौरविमोक्षणतयेति सम्यगुक्तं, तस्माद्भूतत्वविशेषणाङ्गीकारे

यथा क्षीरविकृतिप्रत्याख्यायिनो दधिभक्षणेऽपि न प्रतिज्ञाभङ्गः, तथा त्रसभूता न हंतव्या इति प्रतिज्ञावतः स्थावरहिंसाया-मपि न प्रत्याख्यानातिचारः, एवं विद्यमाने सति 'भाषायाः' प्रत्याख्यानवाचः पराक्रमे-भूतविशेषणाद्दोषपरिहारसामर्थ्ये एवं दोषपरिहारोपाये सति केचन क्रोधाद्वा लोभाद्वा श्रावकं निर्विशेषणमेव प्रत्याख्यापयन्ति तेषां मृषावादः स्यात्, गृहीतां च मतलोपः । तदेवमयमपि नोऽस्मदीयोऽङ्गीकारः । किं भवतां नो 'नैयायिको' न्यायोपपन्नो भवति ? अपि च आयुष्मन् गौतम ! एष पक्षस्तुभ्यमपि रोचते ॥ ७ ॥

सवायं भगवं गोयमे उदयं पेढालपुत्तं एवं वयासी (इत्यादि) तेसिं च णं तसकायंसि उववन्नाणं ठाणमेयं अघत्तं (सू०) ॥ ८ ॥

व्याख्या—सवादं भगवान् गौतमस्तं उदकं पेढालपुत्रं एवमवादीत्—आयुष्मन् उदक ! नो खलु अस्मभ्यं एतद् रोचते, यदिदं त्रसकायविरतौ भूतत्वाविशेषणं तदस्मभ्यं न रोचत इत्यर्थः । एवं सति ये श्रमणा वा ब्राह्मणा वा एवं आख्यान्ति ते यथार्थां भाषां न भाषन्ते किन्तु अनुतापिनीं भाषां भाषन्ते, अन्यथा भाषणे हि परस्यानुतापो भवति, ते अभ्याख्यान्ति श्रमणोपासकान्, असद्भूतदोषप्रकटने नाभ्याख्यानं ददते 'जेहिं'ति येष्वपि अन्येषु जीवेषु ये 'संयमयन्ति' संयमं कुर्वन्ति, तद्यथा—'ब्राह्मणा मया न हन्तव्या' इत्युक्ते स यदा वर्णान्तरे तिर्यक्षु वा स्थितस्तद्वधे ब्राह्मणवध आपद्यते, भूतशब्द-विशेषणाभावात् । एवं शूकरादिर्न हन्तव्य इत्यादि विशेषव्रतानि ते'ऽभ्याख्यान्ति' दूषयन्ति, कस्माद्धेतोः ? यस्मात्सांसारिका प्राणास्त्रसाः स्थावरत्वेन स्थावरात्मत्वेन प्रत्यायान्ति, त्रसकायात्तदायुष्केन मुच्यमानाः स्थावरकाये, स्थावरकायाच्च तद्योग्य-कर्मणा मुच्यमानास्त्रसकाये उत्पद्यन्ते, तेषां त्रसकाये समुत्पन्नानां स्थानमेतत्त्रसकायाख्यमघात्यं—अघाताई भवति, स्थूल-

प्राणिघातान्निवृत्तः श्राद्धस्तन्निवृत्त्या च त्रसस्थानमघात्यं स्यात्, तस्य तीव्राध्यवसायोत्पादकत्वाल्लोकगर्हितत्वाच्च स्थावर-कायाच्चानिवृत्त इति तत् स्थानमस्य घात्यमिति ॥ ८ ॥ उदक आह—

सवायं उदए पेढालपुत्ते भगवं गोयमं एवं वयासी अवइ (इत्यादि) अयंपि भेदो से नो नेआउए भवइ (सू०) ॥ ९ ॥

व्याख्या—उदको गौतममवादीत्—हे आयुष्मन्! गौतम! कतरान् प्राणिनो यूयं वदथ त्रसप्राणिन इति अथ सद्वाचं गौतम उदकमवादीत्—आयुष्मन् उदक! यान् प्राणिनो यूयं वदथ त्रसभूतान् त्रसत्वेन वर्तमानान् नातीतान् नाप्येष्यतः, तानेव वयं वदामस्त्रसा इति, ये(?)यान् वयं वदामस्त्रसांस्तान् यूयं वदथ त्रसभूतान् एते द्वे स्थाने तुल्ये एकार्थे एव, नात्र कश्चिदर्थ-भेदः, एवं सति अयं युष्मदीयः पक्षः किं 'सुप्रणीततरो' युक्तियुक्तः ? त्रसभूताः प्राणा इत्ययं तु पक्षो दुष्प्रणीततरोऽयुक्तः प्रतिभासते, कोऽयं व्यामोहो भवतां ? येन शब्दभेदादिकं पक्षमाक्रोशथ द्वितीयं त्वभिनन्दथ, इत्ययं देशाङ्गीकारो भवतां नो नैयायिको न न्यायोपपन्नः उभयोरपि पक्षयोस्तुल्यत्वात् ॥ ९ ॥ कुमतनिषेधमाह—

भगवं च णं उदाहु—संतेगइया मणुस्सा भवंति (इत्यादि) तंपि तेसिं कुसलमेव भवइ (सू०) ॥ १० ॥

व्याख्या—भगवान् गौतमः पुनराह—सन्ति 'एके' केचन मनुष्याः, येषां साधोर्धर्मकथकस्य पुर इदमुक्तं भवति—यथा न खलु वयं 'मुण्डा भवितुं' प्रव्रज्यां ग्रहीतुं शक्नुमः, अगारादनगारितां प्रव्रजितुं, वयं 'आनुपूर्व्येण' क्रमेण क्रमेण 'गोत्रं' साधुत्वमऽनुश्लेषयिष्यामः । कोऽर्थः ? वयं देशविरतिं पालयामः, ततः क्रमेण चारित्रं, तत (?) एवं ते 'सङ्ख्यां' व्यवस्थां श्रावयन्ति—प्रत्याख्यानं कुर्वन्तः प्रकाशयन्ति, ते एवं व्यवस्थां स्थापयन्ति सूपस्थापयन्ति च नान्यत्राभियोगेन, अभियोगो-

राजाभियोगादिस्तेन त्रसं घ्नतोऽपि न व्रतभङ्गः, तथा गृहपति–चौरविमोक्षणतयेति ।

अस्यार्थः कथागम्यः, सा चेयं–रत्नपुरे रत्नशेखरराज्ञा स्वान्तःपुरादिस्त्रीणां स्वैरक्रीडारूपः कौमुदीमहोत्सवोऽनुज्ञातः, पुरुषेण केनापि नगरमध्ये न स्थेयमित्याघोषणा कारिता, नृपादयः पुरुषाः सर्वेऽपि उद्याने सायं जग्मुः । एकस्य वणिजः षट् पुत्राः क्रयविक्रयादिव्यग्राः पुरमध्ये एव तस्थुः, स्थगितानि गोपुराणि, ततो निष्क्रान्ते महे राज्ञारक्षकाणामुक्तं–पश्यत नगरे कोऽपि नरोऽस्ति न वेति ? तैर्विलोकयद्भिः षट्पुत्रास्ते दृष्टा, राज्ञो निवेदिताः, राज्ञा कुपितेन षण्णामपि वधः समादिष्टस्ततस्तत्पिता शोकाकुलो राजानं विज्ञापयति स्म, देव ! मा कृथाः कुलक्षयमस्माकं, सर्वधनं गृहाण, मुच्यतां पुत्राः । एवमुक्तेऽपि राजा कथमपि न मुञ्चति पुत्रान्, ततः पिता सर्वपुत्रघातप्रवृत्तं राजानं ज्ञात्वा पञ्चानां मोचनं याचितवान्, राजा पञ्चापि न मुञ्चति, ततश्चत्वारो याचिता तथाऽपि न मन्यते नृपस्ततस्त्रयो याचितास्तेऽपि न मुक्तास्ततो द्वौ मार्गितौ, तावपि अमुञ्चन्तं नृपमेकं पुत्रं याचितः, समग्रपौरजनविज्ञप्तो नृपः पुत्रमेकं ज्येष्ठं मुक्तवान् । अत्रेयं दृष्टान्तयोजना ।

सम्यक्त्ववान् श्राद्धः सर्वप्राणातिपातविरतिं कर्तुमशक्तो नृपस्थानीयषट्कायपितृतुल्येन साधुना प्रेरितोऽपि सर्वविरतिं नाङ्गीकुरुते, षडपि जीवकायान्मोचयति साधुः, श्राद्धस्तु षण्णां मोचनेऽशक्तो ज्येष्ठमेकं त्रसकायं मुञ्चति, पालयतीत्यर्थः साधुरेकमोचनेनाऽपि कृतार्थमात्मानं मन्यते । यथा च तस्य वणिजो न शेषपञ्चपुत्रवधानुज्ञा एवं साधोरपि न शेषप्राणिवधानुमतिः किन्तु यदेव व्रतं गृहीत्वा यावत् स्थूलसत्त्वान् सङ्कल्पवधनिवृत्तो रक्षति श्राद्धः, तन्निमित्तं कुशलानुबन्ध एवेत्याह– ‘तसेहिं’ त्रसेभ्यो ‘दण्डं’ हिंसां त्यक्त्वा यावद्विरमति तावत्तस्य कुशलं पुन्यमेवेति ॥ १० ॥

तसावि वुच्चंति तसा (इत्यादि) ते महाकाया ते चिरट्ठिइया (सू०) ॥ ११ ॥

व्याख्या—त्रसा अपि द्वीन्द्रियादयोऽपि त्रसा उच्यन्ते। त्रसाख्यसम्भारकृतेन कर्मणा स्युः, सम्भारो नाम कर्मणोऽवश्यं विपाकानुभवेन वेदनं, तच्च त्रसनाम प्रत्येकनाम इत्यादिकं त्रसत्वेन संबद्धं यदायुष्कं उदयप्राप्तं स्यात्तदा त्रसनामादिकर्मणा त्रसा उच्यन्ते, त्रसायुर्यदा क्षीणं स्यात्त्रसकायस्थितिश्च क्षीणा स्यात्, सा च जघन्येनान्तर्मुहूर्तं उत्कृष्टतः सातिरेकसहस्रद्वयसागरोपमानास्ततस्ते त्रसायुस्त्यजन्ति, [illegible] स्थावरत्वेन प्रत्यायान्ति, स्थावरा अपि तथैव कर्मणा स्थावरत्वेनोत्पद्यन्ते, एवं सति स्थावरकायं घ्नतः श्राद्धस्य कथं स्थूलप्राणातिपातनिवृत्तिव्रतभङ्गः? इति। किञ्च 'थावर आउं'ति, यदा स्थावरायुष्कमपि क्षीणं स्यात्तथा स्थावरकायस्थितिश्च, सा जघन्येनान्तर्मुहूर्त्तम्, उत्कृष्टतोऽनन्तकालमसङ्ख्येयाः पुद्गलपरावर्ताः, ततस्ते स्वायुः परित्यज्य 'भूयते' पुनरपि परलोकतया स्थावरकायस्थितेरभावात्सामर्थ्यात्त्रसत्वेन प्रत्यायान्ति, ते त्रसाः प्राणा अप्युच्यन्ते त्रसा अप्युच्यन्ते महाकायास्ते योजनलक्षप्रमाणशरीरविकुर्वणात्। चिरस्थितिकास्ते भवस्थित्यपेक्षया त्रयस्त्रिंशत्सागरायुष्कभावात्। ततस्तन्निवृत्तिरेव श्राद्धेन कृता न तु स्थावराणां, नागरिकदृष्टान्तोऽप्ययुक्तः, नागरिको न हन्तव्य इति प्रतिज्ञां कृत्वा बहिःस्थितं तमेव पर्यायापन्नं घ्नतो व्रतभङ्ग इति त्वत्पक्षः, स चायुक्तो, यो हि नगरधर्मैरुपेतः स बहिःस्थोऽपि नागरिक एवातः पर्यायापन्न इति विशेषणमयुक्तं, सर्वथा नगरधर्मत्यागे तु तमेवेति नोपपद्यते, स चान्य एवेति। तथा त्रसत्वस्यागाद्यदा स्थावरत्वं प्राप्तस्तदाऽन्य एवायमिति, ततो न व्रतभङ्गः ॥ ११ ॥ पुनरुदकः प्राह—

सवायं उदए पेढालपुत्ते भगवं गोयमं एवं वयासी (इत्यादि) तेसिं च णं थावरकायंसि उववण्णाणं ठाणमेयं घत्तं (सू०) ॥ १२ ॥

त्वादयो हि चत्वारो 'हेतवः' कर्मबन्धकारणानि। "बंधस्स मिच्छअविरइ-कसायजोगत्ति हेयवो चउरो" इति वचनात्, परिग्रहारम्भादयो वा। न च बोधमात्रादभीष्टार्थसिद्धिः, अतः क्रियां दर्शयति-'परिजाणिया' बन्धनं परिज्ञाय विशिष्टया क्रियया संयमानुष्ठानरूपया 'त्रोटये'दपनयेत्-आत्मप्रदेशेभ्यः कर्म पृथक्कुर्यात्। एवमुक्ते जम्बूस्वाम्यादिको विनेयो बन्धादिस्वरूपं पृष्टवान्-'किमाह ? बंधणं वीरे' श्रीवीरो भगवान् किं बन्धनमुक्तवान् ? येन ज्ञातेन बन्धनं त्रोटयति, किमुक्तं भवति? षट्कायवधे बन्धं विज्ञाय बन्धनं-अष्टकर्मलक्षणं परिज्ञाय त्रोटयेत्। एवं श्रीसुधर्मस्वामिनाऽभिहिते श्रीजम्बू प्रोवाच-किमाह बन्धनं वीरः ? यदवगच्छतस्तद्बन्धनं त्रोटयतीति गाथार्थः ॥ १ ॥ बन्धनप्रश्ननिर्वचनायाह—

चित्तमंतमचित्तं वा, परिगिज्झ किसामवि। अन्नं वा अणुजाणाइ, एवं दुक्खाण मुच्चई ॥ २ ॥

व्याख्या—अस्मिञ्जगति ज्ञानावरणीयादिकर्मबन्धनं ज्ञेयं, कर्मबन्धकारणं च आरम्भपरिग्रहावेव, तत्र पूर्वं परिग्रहस्वरूपं दर्शयति-'चित्तमंतमचित्तं वा' +सचित्तमचित्तं× वा 'कृशमपि' स्तोकमपि परिग्रहं परिगृह्य 'अन्नं वा अणुजाणाइ' करणकारणानुमतिप्रकारैः परिग्रहं 'परिगृह्य' स्वीकृत्य, एवं दुःखयतीति दुःखं अष्टप्रकारं कर्म तत्फलं वा असातोदयादिरूपं, तस्मान्न मुच्यते। किमुक्तं भवति ? सचित्ताचित्तरूपं वा परिग्रहं परिगृह्य अन्यान्वा ग्राहयित्वा गृह्णतो वाऽन्याननुज्ञाय दुःखात् अष्टप्रकारकर्मरूपात्तत्फलभूतादसातोदयादिरूपाद्वा न मुच्यत इति गाथार्थः ॥ २ ॥

अथ यत्र परिग्रहस्तत्रारम्भः, यत्रारम्भस्तत्र प्राणातिपात एव, एतदेव दर्शयति—

---

१ बन्धस्य मिथ्यात्वाविरतिकषाययोगा इति हेतवश्चत्वारः। + द्विपदचतुष्पदादि। × कनकरत्नादि।

सयं तिवायए पाणे, अदुवाऽन्नेहिं घायए । हणंतं वाऽणुजाणाइ, वेरं वड्ढइ अप्पणो ॥ ३ ॥

व्याख्या—स परिग्रहवानसन्तुष्टः सन् भूयस्तदर्जनपरः समर्जितोपद्रवकारिणि च द्वेषमुपगतः प्राणिनः प्राणानतिपातयति, पुनः स परिग्रहाग्रही लोभाभिभूतः सन् स्वयं व्यापादयति अप[रैरपि]शानपि (?) घातयति, त[घ्न]तश्चान्यान् समनुजानीते, तदेवं कृतकारितानुमतिभिर्जीवोपमर्दनेन जन्मान्तरशतान्यात्मनो वैरं वर्द्धयति, ततश्च दुःखपरम्परारूपबन्धनान्न मुच्यते। किमुक्तं भवति ? परिग्रहारम्भनिरतो जन्तुर्लोभाभिभूतः सन् स्वयं प्राणिनः अतिपातयति, अपरैर्घातयति घ्नतोऽन्यान् समनुजानीते, ततश्च जन्मान्तरशतान्यनुबन्धि केवलं वैरमेव वर्द्धयति, उपलक्षणार्थत्वान्मृषावादादयोऽपि बन्धहेतवो द्रष्टव्या इति गाथार्थः ॥ ३ ॥ पुनर्बन्धमेवाश्रित्याह—

जस्सिं कुले समुप्पन्ने, जेहिं वा संवसे नरे । ममाई लुप्पई बाले, अन्नमन्नेहि मुच्छिते ॥ ४ ॥

व्याख्या—यस्मिन्कुले राष्ट्रकूटादौ समुत्पन्नः, यैर्वा समं वसति पांशुक्रीडादिकं करोति, एवंविधो 'नरो' मनुष्यः पितृमातृभ्रातृभगिनीभार्यापुत्रादिषु 'ममत्ववान्' ममतां कुर्वन्–स्वपरिवारे स्निह्यन् बालो-ऽज्ञो लुप्यते, ममत्वजनितेन कर्मणा 'लुप्यते' विलुप्यते, कुत्र ? संसारे–नारकतिर्यग्मनुष्यामरलक्षणे 'बाध्यते' पीड्यते। इदमुक्तं भवति–'बालो'ऽज्ञो 'नरो' मनुष्यः स्वपरिवारममतोद्भ्रान्तचेताः सँश्चातुर्गतिके संसारे सदसद्विवेकशून्यः सन् परिभ्रमति, ततश्च तिर्यग्नरकादिषु असातवेदनया पीड्यत इति गाथार्थः ॥ ४ ॥ किं वा जानन् बन्धनं त्रोटयतीत्यस्योत्तरमाह—

वित्तं सोयरिया चेव, सव्वमेयं न ताणए । संखाय जीविउं चेव, कम्मुणा उ तिउट्टइ ॥ ५ ॥

व्याख्या–' वित्तं ' सचित्तमचित्तं वा ' सोदर्याः ' भ्रातृभगिन्यादयः संसारान्तर्गतस्यासुमतो दुस्सहा–अतिकटुकाः शारीरमानसा वेदनाः समनुभवतो न ' त्राणाय ' रक्षणाय भवन्ति, इति ' सङ्ख्याय ' ज्ञात्वा जीवितं च मितं प्राणिनां ज्ञपरिज्ञया ज्ञात्वा प्रत्याख्यानपरिज्ञया च सचित्ताचित्तपरिग्रहं प्राण्युपघातस्वजनस्नेहादीनि बन्धनस्थानानि प्रत्याख्याय कर्मणः सकाशात्त्रुट्यति–अपगच्छति–कर्मणः पृथग् भवति, यदि वा ' कर्मणा ' क्रियया संयमानुष्ठानरूपया बन्धनात्त्रुट्यति । इदमुक्तं भवति–जीवस्य संसारसागरान्तर्भ्रमतो दुस्सहा वेदनाः समनुभवतो वित्तं सोदर्याश्च त्राणाय न भवन्ति इति ज्ञपरिज्ञया ज्ञात्वा प्रत्याख्यानपरिज्ञया च सर्वं धनस्वजनादिसम्बन्धं प्रत्याख्याय कर्मणः पृथग्भवतीति गाथार्थः ॥ ५ ॥

स्वसमयप्रतिपादनानन्तरं परसमयप्रतिपादनायाह—

एए गंथे विउक्कम्म, एगे समणमाहणा । अयाणंता विउस्सिता, सत्ता कामेहि माणवा ॥ ६ ॥

व्याख्या—एतान् ग्रन्थान् अर्हदुक्तान् 'व्युत्क्रम्य' परित्यज्य 'एके' केचन, न सर्वे, श्रमणाः–शाक्यादयो 'ब्राह्मणाः' बृह[बार्ह]स्पत्यमतानुसारिणः अजानानाः ' विविधं ' अनेकप्रकारं ' उत् ' प्राबल्येन 'सिताः' बद्धाः–स्वसमयेष्वभिनिविष्टाः–स्वमतकदाग्रहग्रस्ताः, एवंविधा मानवाः स्वस्वदर्शननानुरागिण इच्छामदनादिके कामे आसक्तास्सन्तः प्रवर्त्तन्ते । इदमुक्तं भवति–अर्हदुक्तान् ग्रन्थान् दयारसमयान् परित्यज्य स्वमतिविकल्पितग्रन्थेषु आसक्ता एके श्रमणब्राह्मणाः परवादिनः

परमार्थमजानन्तः केवलं स्वकदाग्रहग्रस्ताः स्वस्वमतानुरागिणो मानवाः कामे इच्छामदनाख्ये प्रवर्त्तन्त इति गाथार्थः ॥ ६ ॥

अथ ग्रन्थकारः पूर्वं चार्वाकमतं दर्शयन्नाह—

संति पंच महब्भूया, इहमेगेसिमाहिया । पुढवी आऊ तेऊ य, वाऊ आगासपंचमा ॥ ७ ॥

व्याख्या-चार्वाकाः एवं प्रतिपादयन्ति-'सन्ति' विद्यन्ते 'इह' जगति पञ्च महाभूतानि, सर्वलोकव्यापित्वात्, इह लोके एकेषां-भूतवादिनां 'आख्यातानि' प्रतिपादितानि तत्तीर्थकृता तैर्वा भूतवादिभिश्चार्वाकैः 'आख्यातानि' स्वयमङ्गीकृत्यान्येषां प्रतिपादितानि । कानि तानि ? 'पुढवी' इत्यादि, पृथिवी-काठिन्यरूपा, आपो-द्रवलक्षणा, तेज-उष्णरूपं, वायुश्चलनलक्षणः, आकाशं-शुषिरलक्षणं, तच्च पञ्चमं, एतानि पञ्च महाभूतानि-न कैश्चिदप्यपह्नोतुं शक्यानि, एतावता चार्वाकाः सर्वलोकव्यापित्वात् पञ्च महाभूतानि प्रतिपादयन्ति इति गाथार्थः ॥ ७ ॥

अथ पुनश्चार्वाकः स्वमतस्वरूपं दर्शयति—

एए पंच महब्भूया, तेब्भो एगोत्ति आहिया । अह तेसिं विणासे उ, विणासो होइ देहिणो ॥ ८ ॥

व्याख्या—एतान्यनन्तरोक्तानि पृथिव्यादीनि पञ्च महाभूतानि, यानि, तेभ्यः-कायाकारपरिणतेभ्यः 'एकः' कश्चिच्चिद्रूपो भूताव्यतिरिक्त आत्मा भवति, न भूतेभ्यो व्यतिरिक्तोऽपरः कश्चिदात्माऽस्ति, यथाऽपरे वादिनः प्ररूपयन्ति, यथा-देहाद् व्यतिरिक्तः पृथगात्माख्यः पदार्थोऽस्तीति, न तथा परलोकयायी सुखदुःखादिभोक्ता जीवाख्यः पदार्थोऽस्तीति

चार्वाकाः प्रतिपादयन्ति । अथ परवादी जीवाख्यपदार्थप्रतिपादनपरस्तत्स्थापनाय प्रोवाच–भो चार्वाक ! यदि भूतव्यतिरिक्तोऽपरः कश्चिदात्माख्यः पदार्थो न विद्यते तर्हि कस्मिन्नपि मृते 'असौ मृत' इति व्यपदेशः कुतो भवति ? इत्युक्ते चार्वाकः प्राह–'अह तेसिं विणासे उ, विणासो होइ देहिणो' तेषां पञ्चमहाभूतानां कायाकारपरिणतानां विनाशे सति देहिनो देवदत्ताख्यस्य विनाशो भवति, ततो 'मृत' इति व्यपदेशः स्यान्न परं पञ्चभूतेभ्यः पृथग्भूतः कश्चिदात्माख्यः पदार्थोऽस्तीति भावः, परं ये एवं प्रतिपादयन्ति परलोकयायी सुखदुःखादिभोक्ता जीवाख्यः पदार्थोऽस्ति तन्मुग्धरञ्जनमेवेति गाथार्थः ॥ ८ ॥

एतावता पञ्चभूतवादिना स्वपक्षे प्ररूपिते आत्माद्वैतवादी स्वपक्षमाविष्करोति—

जहा य पुढवीथूभे, एगे नाणा य दीसइ । एवं भो ! कसिणे लोए, विन्नू नाणा य दीसइ ॥९॥

व्याख्या—पृथिव्येव स्तूपः–पृथिवीसङ्घाताख्योऽवयवी, स चैक एवास्ति, परं नानारूपः–सरित्समुद्रपर्वतनगरपुरसन्निवेशाद्याधारतया विचित्रो दृश्यते, निम्नोन्नतमृदुकठिनरक्तपीतश्वेतादिभेदेन वा दृश्यते, न च पृथ्वीतत्त्वाद्व्यभिचरति, भेदेन विचित्रतया दृश्यमानोऽपि पृथिव्येव कथ्यते, एवं 'भो !' इति परामन्त्रणं, भो परवादिन् ! यथा पृथिवीपिण्डः सर्वत्र एक एव, तथैवात्माऽपि नानाप्रकारो द्विपद–चतुष्पद–बहुपदादिरूपेण दृश्यते, परं भवन्मते यत्प्रतिशरीरं आत्मा वर्ण्यते तन्मुधा, यतः–" एक एव हि भूतात्मा, देहे देहे व्यवस्थितः । एकधा बहुधा चैव, दृश्यते जलचन्द्रवत् ॥ १ ॥ " ॥ ९ ॥

इत्यात्माऽद्वैतवादः, अथ जैनः प्रत्युत्तरदानायाह—

एवमेगेत्ति जंपंति, मंदा आरंभनिस्सिया । एगे किच्चा सयं पावं, तिव्वं दुक्खं नियच्छइ ॥ १० ॥

व्याख्या—' एवं ' पूर्वोक्तन्यायेन ' एके ' केचन परवादिनः आत्माऽद्वैतवादमाश्रित्य ' जल्पन्ति ' प्रतिपादयन्ति । किम्भूतास्ते ? ' मन्दा ' जडाः-सम्यक्परिज्ञानविकलाः, अत एव ' मन्दाः ' युक्तिविकला आत्माद्वैतपक्षसमाश्रयणात्, तथाहि-यद्येक एवात्मा स्याच्चात्मबहुत्वं ततो ये ' सत्त्वाः ' प्राणिनः कृषिवलाः ' आरम्भे ' प्राण्युपमर्दनकारिणि व्यापारे निःश्रितास्ते स्वयमेवारम्भकृतं पापफलमनुभवन्ति, नान्ये, यद्यात्मा एक एव सर्वत्र तर्हि एकेन विहिते पापे तत्फलं सर्व-एवानुभवन्ति, एकेन विहिते पुण्ये तच्छुभफलमपि सर्वेऽप्यनुभविष्यन्ति, न चैवं दृश्यते, स्वस्वकर्मफलभुजः सर्वेऽपि प्राणिनः, यद्येक एवात्मा सर्वगतः शरीरं शरीरं प्रति जलचन्द्रवत्प्रतिभासते तर्हि एके सुखिनः एके दुःखिनः एके सधनाः एके निःस्वाः एके मूर्खाः एके प्राज्ञाः एके राजानः एके रङ्काः एके सुरूपाः एके कुरूपाः, एवं अन्धाः काणाः कुब्जाः पङ्गवः, एके पटुशरीरा इत्यादि व्यवस्था व्यभिचरति, तस्माद्यत्किञ्चिदेतत् । यदिवा एकश्चौर्यादिकमसमञ्जसं करोति, स एव वधबन्धनच्छेदन-भेदनादिकां विडम्बनां सहते, नापरे, यद्येक एवात्मा स्यात्तर्हि एकेन जन्तुना कृतेऽपराधे सर्वेऽपि सुरा मानवास्तिर्यञ्चो नारकाश्च सर्वेऽपि सदृशामेव दुःखरूपां विडम्बनामनुभवन्ति, न चैवं दृश्यते, यतो नारकाः सर्वदाऽपि दुःखरूपां विडम्बनामनुभवन्तो दृश्यन्ते " अंच्छिनिमीलणमित्तं, नत्थि सुहं दुक्खमेव अणुबद्धं । नरए नेरइयाणं, अहो-

१ अक्षिनिमीलनमात्रं नास्ति सुखं दुःखमेवानुबद्धं । निरये नैरयिकाणां अहर्निशं पच्यमानानाम् ॥ १ ॥

निसिं पच्चमाणाणं ॥ १ ॥ " इति वचनात् । देवाश्च सदाऽपि सुखिन एव, यतः " तंहिं देवा वंतरिया, वरतरुणी-गीयवाइयरवेणं । निच्चं सुहिया पमुइया, गयंपि कालं न याणंति ॥ २ ॥ " एवं वैमानिका अपि सुखिनः " देवाणं देवलोए, जं सुक्खं तं नरो सुभणिओवि । न भणइ वाससएण वि, जस्स वि जीहासयं हुज्जा ॥३॥ तिर्यञ्चस्तु दुःखिन एव " तिरिया कसंकुसारा-निवायवहबंधमारणसयाइं । नेव इहं पाविंता, परत्थ जइ नीमिया हुंता ॥ ४ ॥ " मनुष्यास्तु केऽपि सुखिनः केऽपि दुखिनः " केचिल्लक्षम्भरयः, कोटिम्भरयश्च केऽपि केऽपि नराः । केऽपि च नात्मम्भरयः, फलमेतत्सुकृतदुष्कृतयोः ॥ ५ ॥ " एवं चातुर्गतिका अपि प्राणिनः सुखदुःखव्यवस्थया व्यवस्थिता विलोक्यन्ते, यतः " प्रत्यक्ष एव विश्वेऽस्मिन्, प्रपञ्चः पुण्यपापयोः । यद्विभिन्नं जगत्सर्वं, सुखदुःखव्यवस्थया ॥ १ ॥ " एवं स्थिते ये केचन वादिनः " एक एव हि भूतात्मा, देहे देहे व्यवस्थितः । एकधा बहुधा चैव, दृश्यते जलचन्द्रवत् ॥ १ ॥ " इत्यादिप्ररूपयन्ति, तत्सर्वं मिथ्या, किञ्च–सर्वगतत्वे आत्मनो बन्धमोक्षाद्यभावः, तथा प्रतिपाद्यप्रतिपादकविवेकाभावाच्छास्त्रप्रणयनाभावश्च स्यादिति, तेनोन्मत्तप्रलपितमिव भवदुक्तं न सङ्गतिमङ्गतीति श्रुत्वा सर्वगतात्मवादी मौनमालम्ब्य स्थितः ॥ १० ॥ अथ तज्जीवतच्छरीरवादी प्राह—

---

१ तत्र देवा व्यन्तरिका वरतरुणीगीतवादितरवेण । नित्यं सुखिताः प्रमुदिता गतमपि कालं न जानन्ति ॥ २ ॥ २ देवानां देवलोके यत्सुखं तन्नरः सुभणितोऽपि । न भणति वर्षशतेनापि यस्यापि जिह्वाशतं भवेत् ॥ २ ॥ ३ तिर्यञ्चः कषाङ्कुशारानिपातवधबन्धनमारणशतानि । नैवेह प्राप्नुयुः परत्र यदि नियमिता अभूवन् ॥ ४ ॥

पत्तेयं कसिणे आया, जे बाला जे य पंडिया । संति पेच्चा ण तेसिंति, नत्थि सत्तोववाइया ॥११॥

व्याख्या–तज्जीवतच्छरीरवादी एवं ब्रूते '**पत्तेयं कसिणे आय**' त्ति, 'प्रत्येकं' शरीरं प्रति प्रत्येकं आत्मानः 'कृत्स्नाः' सर्वेऽपि, शरीरं प्रति पृथगेवात्मा इति भावः, न पुनः सर्वगत एक एवात्मा 'जे बाला जे य पंडियर' ये 'बाला' मूर्खा ये च 'पण्डिताः' सदसद्विवेकज्ञास्ते सर्वे पृथग् व्यवस्थिताः, यद्येक एवात्मा सर्वव्यापकः स्यात्तर्ह्यसौ बालः पण्डितश्चासौ, नायं लोके व्यवहारः परिस्फुटः स्यात् , दृश्यते चायं प्रसिद्धो व्यवहारः आबालगोपालादिषु अयं बालः अयं पण्डित इत्यादि, तर्हि ज्ञायते–शरीरं शरीरं प्रति पृथगेवात्मा, नहि सर्वजगद्व्यापी एक एवेति, एवमात्मनो बहुत्वमार्हतानामपीष्टमेव इत्याशंक्याह—जैनानां मते तन्मते च न कोऽपि भेदः स्यात् , परमयं विशेषः–आत्मनां बहुत्वमस्ति, परं यावच्छरीरं तावदेवात्मा, शरीरविनाशे आत्मनोऽपि विनाशः, शरीराद्भिन्नो गत्यन्तरगामी आत्मा नास्त्येव, तदेव दर्शयति–'**संति पेच्चा ण तेसिं**' ति, परलोकानुयायी शरीराद्भिन्नः स्वकर्मफलभोक्ता न कश्चिदात्माख्यः पदार्थोऽस्तीति भावः । किमित्येवमत आह–'**नत्थि सत्तोववाइया**' अस्ति शब्द एकवचनोऽप्यत्र बहुवचनान्तो द्रष्टव्यः, ततश्च न विद्यन्ते 'सत्त्वाः' प्राणिनः, उपपातेन निर्वृत्ताः औपपातिकाः, भवाद्भवान्तरगामिनो न भवन्तीति तात्पर्यार्थः । अत्राह परः–प्रागुपन्यस्तभूतवादिनोऽस्य च तज्जीवतच्छरीरवादिनश्च मिथः को विशेषः ? इत्यत्रोच्यते–भूतवादिना त्वेवं प्ररूप्यते–भूतान्येव कायाकारपरिणतानि धावनवल्गनादिकां क्रियां कुर्वन्ति, तज्जीवतच्छरीरवादी त्वेवं प्ररूपयति–कायाकारपरिणतेभ्यो भूतेभ्यश्चेतनाख्य आत्मोत्पद्यते अभिव्यज्यते वा तेभ्यश्चाभिन्न इति । कायाकारपरिणतेभ्यो भूतेभ्य आत्मोत्पद्यते,

तेषु विनष्टेषु आत्माऽपि विनश्यति, न परलोकयायी स्वकर्मफलभोक्ता आत्माख्यः पदार्थोऽस्तीति भावः ॥ ११ ॥

एवं चात्मनोऽभावे पुण्यपापयोरप्यभाव इति दर्शयितुमाह—

नत्थि पुन्ने व पावे वा, नत्थि लोए इओ परे । सरीरस्स विणासेणं, विणासो होइ देहिणो ॥१२॥

व्याख्या—आत्मनोऽभावे पुण्यपापयोरप्यभावः, तत्र पुण्यमभ्युदयप्राप्तिलक्षणं, तद्विपरीतं पापं, तत आत्मनोऽभावे पुण्यपापयोरप्यभावः, धर्मिणोऽभावे धर्मस्याप्यभाव इति, आत्मनोऽभावेऽस्माल्लोकात्परोऽन्यो लोकस्तस्याप्यभाव एवेति। ततः किमुक्तं भवति ? आत्मनोऽभावे पुण्यपापयोरप्यभावस्ततश्च परलोकस्याप्यभाव एवेति तत्त्वं, पुण्यपापानुसारिणी शुभाशुभगतिः प्राणिनामुदयमायाति परलोके, तत एकस्यात्मनोऽभावे पुण्यपापपरलोकानां च अभाव एवेति। अत्रार्थे बहवो दृष्टान्ताः सन्ति, तथाहि—यथा जलबुद्बुदो जलातिरेकेण नापरः कश्चिद्विद्यते, जलापगमे बुद्बुदानामप्यपगमः, तथा भूतव्यतिरेकेण नापरः कश्चिद्विद्यते आत्मेति, तथा यथा कदलीस्तम्भस्य बहिस्त्वगपनयने क्रियमाणे त्वग्मात्रमेव सर्वं, नान्तः कश्चित्सारोऽस्ति, एवं भूतसमुदायविघटने तावन्मात्रं विहाय नान्तः सारभूतः कश्चिदात्माख्यः पदार्थ उपलभ्यते, पुनर्यथाऽऽदर्शे स्वच्छत्वात्प्रतिबिम्बितो बहिस्थोऽप्यर्थोऽन्तर्गतो लक्ष्यते, न तथाऽऽत्मेति । यथा च ग्रीष्मे भौमेनोष्मणा परिस्पन्दमाना मरीचयो जलाकारं विज्ञानमुत्पादयन्ति, एवमन्येऽपि गन्धर्वनगरादयः स्वस्वरूपेणा-तथाभूता अपि तथा प्रतिभासन्ते, तथाऽऽत्माऽपि भूतसमुदायस्य कायाकारपरिणतौ सत्यां पृथगसन्नेव तथा भ्रान्ति

मुत्पादयति। अत्राह परः—ननु यदि भूतव्यतिरिक्तः कश्चिदात्मा न विद्यते न च पुण्यापुण्यफलं न च परलोकस्तर्हि कथं जगद्वैचित्र्यं घटते ?, तथाहि—कश्चिदीश्वरः परो दरिद्रः एक सुखी एको दुःखी इत्येवंप्रकारा जगद्विचित्रता कुतो जाता ? इत्यत्रोच्यते—स्वभावात्, तथाहि—कुत्रचिच्छिलाशकले प्रतिमारूपं निष्पाद्यते, तच्च कुङ्कुमागरुचन्दनादिविलेपनानुभोगमनुभवति, स्रग्धूपाद्यामोदं च गृह्णाति, अन्यस्मिँस्तु पाषाणखण्डे पादक्षालनादि क्रियते, न च तयोः पाषाणखण्डयोः शुभाशुभे स्तः, यदुदयात्तौ—पाषाणखण्डौ शुभाशुभावस्थाविशेषमनुभवतः, इत्येवं स्वभावाज्जगद्वैचित्र्यं, यत—"कण्टकस्य च तीक्ष्णत्वं मयूरस्य विचित्रता। वर्णाश्च ताम्रचूडानां, स्वभावेन भवन्ति हि॥ १ ॥" इति तज्जीवतच्छरीरवादिमतं गतम्॥ १२॥ अथ अकर्तृवादिमतनिरूपणायाह—

कुव्वं च कारयं चेव, सव्वं कुव्वं न विज्जई। एवं अकारओ अप्पा, एवं ते उ पगब्भिया ॥ १३ ॥

व्याख्या—ते अकर्तृ[त्व]वादिन एवं कथयन्ति—आत्मा अमूर्त्तो नित्यः सर्वव्यापी चेति, अत एव न स्वयं क्रिया करोति न चान्यान् कारयति, एतावता आत्मा स्वयं क्रियायां न प्रवर्त्तते नाप्यन्यं प्रवर्त्तयति, यद्यपि स्थितिक्रियां 'मुद्राप्रतिबिम्बोदय' न्यायेन [जपास्फटिकन्यायेन च] भुजिक्रियां करोति तथापि समस्तक्रियाकर्तृत्वं तस्य नास्तीत्येतद्दर्शयति—'सव्वं कुव्वं ण विज्जई' सर्वां परिस्पन्दादिकां देशाद्देशान्तरप्राप्तिलक्षणां क्रियां कुर्वन्नात्मा न विद्यते, सर्वव्यापित्वेनामूर्त्तत्वेनाकाशस्येवात्मनो निष्क्रियत्वमिति। तथा चोक्तं—"अकर्त्ता निर्गुणो भोक्ता, आत्मा साङ्ख्यस्य दर्शने।

---

१ स्वभाववादी। २ मुद्रितबृहद्वृत्तौ।

[प्रकृतेर्विरहो मोक्षः, तन्नाशे स स्वरूपतः ॥१॥" +]एवमनेन प्रकारेणात्मा अकारक इति साङ्ख्या, एवं प्रगल्भिताः प्रगल्भवन्तो धार्ष्ट्यवन्तः सन्तो–भूयो भूयस्तत्र तत्र प्रतिपादयन्ति, यथा–प्रकृतिः करोति पुरुष उपभुङ्क्ते, तथा बुद्ध्यध्यवसितमर्थं पुरुषश्चेतयते, इत्याद्यकारकवादिमतमिति ॥ १३ ॥ साम्प्रतं तज्जीवतच्छरीरकारकवादिनो मतं निराचिकीर्षुराह—

जे ते उ वाइणो एवं, लोए तेर्सि कुतो सिया ?। तमाओ ते तमं जंति, मंदा आरंभनिस्सिया ॥ १४ ॥

व्याख्या—तत्र ये तावच्छरीराव्यतिरिक्तात्मवादिनः 'एवं' पूर्वोक्तया नीत्या भूताव्यतिरिक्तमात्मानमभ्युपगतवन्तः, अत्र कोऽर्थः ? भूतान्येव कायाकारपरिणतानि धावनवल्गनादिक्रियां कुर्वन्ति, न पुनस्तद्व्यतिरिक्तः कश्चिदात्माख्यः पदार्थोऽस्ति, एवं (?) भूताव्यतिरिक्तात्मवादिन एवं प्रज्ञापयन्ति। अथ ते निराक्रियन्ते–यदि भूताव्यतिरिक्तः कश्चिदात्माख्यः पदार्थो नास्ति तर्ह्यात्माभावे योऽयं लोकश्चातुर्गतिकसंसारो भवाद्भवान्तरगतिलक्षणः प्राक्प्रसाधितः सुभगदुर्भगसुरूपकुरूपेश्वरदारिद्र्यादिगत्या जगद्वैचित्र्यलक्षणश्च, स एवम्भूतो लोकस्तेषां कुतो भवेत् ? कया युक्त्या घटेत ? आत्मनोऽनभ्युपगमान्न कथञ्चिदित्यर्थः, अतस्ते नास्तिकाः परलोकयायिजीवानभ्युपगमेन पुण्यपापयोश्चाभावमाश्रित्य यत्किञ्चनकारिणोऽज्ञानरूपात्तमसः सकाशादन्यत्तमो यान्ति भूयोऽपि ज्ञानावरणादिरूपं महत्तरं तमः सञ्चिन्वन्ति, यदि वा तमसः परं तमो यान्ति–सप्तमनरकपृथिव्यां रौरव–महारौरव–काल–महाकाला–प्रतिष्ठानाख्यं नरकावासं यान्तीत्यर्थः। किमिति ? यतस्ते 'मन्दा' जडा-मूर्खाः सत्यपि सर्वजगत्प्रसिद्धे युक्त्युपपन्ने आत्मनि मिथ्याभिनिवेशात्तदभावमादृत्य × प्राण्युपमर्दकारिणि विवेकिजन-

+ भाण्डारकरप्रतौ। × परलोकाभावं।

निन्दिते आरम्भे निश्चयेन नितरां वा श्रिताः-सम्बद्धाः, किमुक्तं भवति? ते चार्वाका मूर्खाः सन्तो भूताव्यतिरिक्तमात्माभावं मन्यन्ते, तदभावे + च पुण्यपापयोरप्यभावः, ततश्च परलोकाभावः, इत्यादिमिथ्यायुक्तिभिरात्माद्यभावप्रतिपादनपराः प्राण्युपमर्दकारिणि निश्शूकतया महारम्भे निलीयन्ते, ततश्च "महारंभयाए महापरिग्गहयाए कुणिमाहारेणं पंचिंदियवहेणं जीवा नेरइयत्ताए कम्मं पकरिंति" इति वचनात् ते महारम्भनिमग्नाः सप्तमनरकावासेषूत्पद्यन्ते। अत्र परवादिनिराकरणं हेतुयुक्तिभिस्तद्बृहट्टीकातोऽवसेयं, अत्र तु संक्षिप्तलिखितत्वादिति गाथार्थः ॥ १४ ॥

साम्प्रतमात्मषष्ठवादिमतं पूर्वपक्षयितुमाह—

संति पंच महब्भूया, इहमेगेसि आहिया। आयछट्ठो पुणो आहु, आया लोगे य सासए ॥१५॥

व्याख्या—एकेषां वादिनां मते पञ्च महाभूतानि यथा सन्ति तथा आत्मा षष्ठः, कोऽर्थः? पञ्च महाभूतानि सन्ति तथा तेभ्यः पृथग्भूतः षष्ठः आत्माख्यः पदार्थोऽस्तीति भावः। एतानि चात्मषष्ठानि भूतानि यथाऽन्येषां वादिनां मते अनित्यानि तथा नामीषामिति दर्शयति-'आया लोगे य सासए' इति, आत्मा लोकश्च पृथिव्यादिरूपोऽविनाशी, तत्रात्मनः सर्वव्यापित्वादमूर्त्तत्वाच्च आकाशस्येव शाश्वतत्वं, पृथिव्यादीनामपि तद्रूपाप्रच्युतेरविनश्वरत्वमिति गाथार्थः ॥ १५ ॥

शाश्वतत्वमेव भूयः प्रतिपादयितुमाह—

+ आत्माभावे। १ महारम्भतया महापरिग्रहतया कुणिमा(मांसा)हारेण पञ्चेन्द्रियवधेन जीवा नैरयिकतया कर्म प्रकुर्वन्ति।

दुहओ ते ण विणस्संति, णेय उप्पज्जए असं। सव्वे वि सव्वया भावा, णियतीभावमागया ॥ १६ ॥

व्याख्या—विनाशो हि द्विधा, सहेतुको निर्हेतुकश्च, तत्र[ते] पृथिव्यादयः पदार्था आत्मषष्ठा 'उभयतः' सहेतुकनिर्हेतुकविनाशद्वयेनापि न विनश्यन्ति, यथा बौद्धानां स्वत एव निर्हेतुको विनाशः सम्पद्यते पदार्थानां, वैशेषिकाणां च लकुटादिकारणसान्निध्ये विनाशः सहेतुकः, एतेषां च मते उभयरूपेणापि विनाशेन लोकात्मनोर्न विनाश इति भावार्थः। यदि वा 'दुहओ'त्ति द्विरूपादात्मनः स्वभावाच्चेतनाचेतनारूपान्न विनश्यन्तीति, तथाहि-पृथिव्यादयो भावाः स्वरूपापरित्यागेन नित्यानि, पृथिव्यप्तेजोवाय्वाकाशानि न स्वरूपपरित्यागं कदाचिदपि कुर्वन्ति, अत एव नित्यानि। आत्माऽपि नित्य एव, अकृतकत्वादिति। तथा चोक्तं-"+नैनं छिन्दन्ति शस्त्राणि, नैनं दहति पावकः। न चैनं क्लेदयन्त्यापो, न शोषयति मारुतः॥१॥अच्छेद्योऽयमभेद्योऽय-मविकारी स उच्यते। नित्यः सततगः स्थाणुरचलोऽयं सनातनः×॥ २ ॥" 'णे य उप्पज्जए असं' एवं च स्वभावेन वस्तु नासदुत्पद्यते, असतश्चेत्पदार्थस्योत्पत्तिः स्यात्तर्हि गगनारविन्दशशविषाणादयोऽपि भावा उत्पद्येरन्, न चोत्पद्यन्ते, तर्हि ज्ञायते-असतः पदार्थस्योत्पत्तिरेव नास्ति, यथा मृत्पिण्डादेव घटोत्पत्तिः, मृत्पिण्डे घटसद्भावात्, यदि असदुत्पत्तिस्तर्ह्यन्यस्मादपि भावात् घटोत्पत्तिर्मृगयतां*, परं न कोऽपि सकर्णः पुमान् असदुत्पत्तिं प्ररूपयति, पटोत्पत्तौ तन्तव एव कारणं, परं नहि पटोत्पत्तौ मृत्पिण्डगवेषणं कुर्यात् घटोत्पत्तौ च तन्तूनां गवेषणं, अतः सति कारणे कार्यमुत्पद्यते, एवं च कृत्वा सर्वं नासदुत्पद्यते, असति पदार्थे कारकव्यापारा-

---

+ जीवं। × शाश्वतः। * विचारयन्तु।

भावात्, असदुत्पत्तौ कर्त्तुर्व्यापार एव न परिस्फुरति, ततश्च सर्वेऽपि भावाः सर्वदापि नियतिभावमाश्रिताः, नित्या एव सन्तीति भावः, असतः पदार्थस्योत्पत्तिरेव न सम्भवति तर्हि कथमुत्पद्यते विनश्यते च, आविर्भावतिरोभावमात्रत्वादुत्पत्ति-विनाशयोरिति गाथार्थः ॥ १६ ॥

इत्यात्मषष्ठवादिमतं निरूपितं, अस्योत्तरं निर्युक्तिकारेण प्रादायि, तन्निर्युक्तिगाथाव्याख्यानं बृहट्टीकातोऽवसेयं । अथ अफलवादाधिकारमाविर्भावयन्नाह—

पंच खंधे वयंतेगे, बाला उ खणजोइणो । अन्नो अणन्नो नेवाहु, हेउयं च अहेउयं ॥ १७ ॥

व्याख्या—'एके' केचन वादिनो बौद्धाः पञ्च स्कन्धान् वदन्ति, रूप–वेदना–विज्ञान–संज्ञा–संस्काराख्याः पञ्चैव स्कन्धा विद्यन्ते, एतेषां परमार्थः षड्दर्शनसमुच्चयादिग्रन्थान्तरेभ्योऽवसेयः+, बौद्धानां मते पञ्च स्कन्धा एव, न चैतेभ्यो

+ १–" तत्र रूपस्कन्धः पृथिवीधात्वादयो रूपादयश्च " (बृहद्वृत्तिः) " रूपमिति रगरगायमाणपरमाणुप्रचयः, बौद्धमते हि स्थूलरूपस्य जगति विवर्त्तमानपदार्थजातस्य तद्दर्शनोपपत्तिभिर्निराक्रियमाणत्वात्परमाणव एव तात्त्विकाः । " (षड्दर्शनसमु०)

२–"सुखा दुःखा अदुःखसुखा चेति वेदना–वेदनास्कन्धः । " (बृद्वृत्तिः), " वेदनेति–वेद्यत इति वेदना, पूर्वभवपुण्यपाप-परिणामबद्धाः सुखदुःखानुभवरूपाः । भिक्षुर्भिक्षामटँश्चरणकण्टके लग्ने प्राह–' इत एकनवतेः कल्पे, शक्त्या मे पुरुषो हतः । तेन कर्मविपाकेन, पादे विद्धोऽस्मि भिक्षवः ! ॥ १ ॥ " (षड्द०)

३–" रूपविज्ञानं रसविज्ञानमित्यादि विज्ञानं–विज्ञानस्कन्धः " (बृहद्वृत्तिः) । " विज्ञानमिति विशिष्टं ज्ञानं सर्वक्षणिकत्वं,

व्यतिरिक्तः कश्चिदात्माख्यः पदार्थोऽध्यक्षेणाध्यवसीयते, तदव्यभिचारिलिङ्गग्रहणाभावान्नाप्यनुमानेन, न च प्रत्यक्षानुमानव्यतिरिक्तमर्थाविसंवादि प्रमाणान्तरमस्तीत्येवं बाला इव बालाः-यथावस्थितार्थापरिज्ञानात्, इत्येवं बौद्धाः प्रतिपादयन्ति, तथा च स्कन्धाः क्षणयोगिनः-क्षणमात्रावस्थायिन इत्यर्थः। पूर्ववादिभ्योऽसावन्यथा प्ररूपयति, तमेव श्लोकपश्चार्द्धेन दर्शयति-'अन्नो अणन्नो' इत्यादि, ते हि बौद्धा यथाऽऽत्मषष्ठवादिनः साङ्ख्यादयो भूतव्यतिरिक्तमात्मानमभ्युपगतवन्तः, यथा च चार्वाकाः भूताव्यतिरिक्तं चैतन्याख्यमात्मानमिष्टवन्तः, तथा बौद्धा नैवाहु-न चोक्तवन्तः। तथा 'हेउयं च अहेउयं' तथा हेतुभ्यो जातो हेतुकः-कायाकारपरिणतभूतनिष्पादित इति, तथा अहेतुकोऽनाद्यपर्यवसितत्वान्नित्य

यदुक्तं-'यत्सत्तत्क्षणिकं यथा जलधरः सन्तश्च भावा इमे, सत्ताशक्तिरिहार्थकर्मणि मितेः सिद्धेषु सिद्धा च सा। नाप्येकैवविधाऽन्यदाऽपि परकृन्नैव क्रिया वा भवेद्, द्वेधाऽपि क्षणभङ्गसङ्गतिरतः साध्ये च विश्राम्यति॥ १॥' इति विज्ञानम्"। (षड्द०)

४-"संज्ञास्कन्धः-संज्ञानिमित्तोद्ग्रहणात्मकः प्रत्ययः।" (बृहद्वृत्तिः), "संज्ञेति संज्ञा-नाम, कोऽर्थः? सर्वमिदं सांसारिकं सचेतनाचेतनस्वरूपव्यवहरणं संज्ञामात्रं-नाममात्रं, नात्र कलत्रपुत्रमित्रभ्रात्रादिसम्बन्धो घटपटादिपदार्थसार्थो वा पारमार्थिकः। तथा च तत्सूत्रं-'तानीमानि भिक्षवः! संज्ञामात्रं-व्यवहारमात्रं कल्पनामात्रं संवृतिमात्रमतीतोऽध्वाऽनागतोऽध्वा सहेतुको विनाशः आकाशं पुद्गला' इति।" (षड्दर्शन०)।

५-"संस्कारस्कन्धः पुण्यापुण्यधर्मसमुदाय इति।" (बृहद्वृत्तिः)। "संस्कार इति, इहपरभवविषयसन्तानपदार्थनिरीक्षणप्रबुद्धपूर्वभावानुरूपसंस्कारस्य प्रमातुः स एवायं देवदत्तः सैवेयं दीपकलिकेत्याद्याकारेण ज्ञानोत्पत्तिः संस्कारः।" (षड्दर्शन०)।

इति। एवमप्यात्मानं बौद्धा नाभ्युपगतवन्तः ॥ १७ ॥ तथा परे बौद्धविशेषाश्चतुर्द्धातुकमिदं जगदाहुरित्येतद्दर्शयितुमाह—

पुढवी आऊ तेऊ य, तहा वाऊ य एगओ। चत्तारि धाउणो रूवं, एवमाहंसु (जाणया) आवरे॥१८॥

व्याख्या—पृथिवीधातुरापश्च धातुस्तथा तेजो धातुर्वायुश्च धातुः, एते चत्वारोऽपि पदार्था जगतो धारकत्वात्पोषकत्वाच्च धातवोऽभिधीयन्ते 'एगओ'त्ति चत्वारोऽप्येते धातवो ह्येकाकारपरिणताः सन्तो जीवव्यपदेशमश्नुवते, तथा चोचुः— चतुर्द्धातुकमिदं शरीरं, न तद्व्यतिरिक्त आत्मा अस्तीत्ये'वमाहंसु आवरे'ति अपरे बौद्धविशेषा एवमभिहितवन्त इति [क्वचिद्] 'जाणगा' इति [पाठः, तत्राप्ययमर्थो-×] 'जानकाः' ज्ञानिनः किल वयमित्यभिमानाग्निदग्धाः सन्त एवमाहुरिति। अफलवादित्वं चैतेषां क्रियाक्षण एव कर्त्तुः सर्वात्मना नष्टत्वात्, यतस्तेषां हि मते यत्सत्तत्क्षणिकं, क्षणिकवादिनस्ते, अतः क्रियाक्षण एव कर्त्तुरभावः, क्षणिकत्वात् प्रथमक्षण एव कर्त्ता विनष्टः, पुण्यपापफलं को भुनक्ति ? अफलवादित्वात्क्रियाफलेन सम्बन्धाभावात्, अथवा सर्वेऽप्यफलवादिन एव द्रष्टव्याः, कैश्चिदात्मनो नित्यस्य अविकारिणो अभ्युपगतत्वात्, कैश्चित्त्वात्मन एवानभ्युपगमादिति गाथार्थः ॥ १८ ॥

अथ सूत्रकारः स्वस्वदर्शनाभ्युपगमेन मुक्तिरिति दर्शयितुमाह—

आगारमावसंता वि, आरन्ना वावि पव्वया। इमं दरिसणमावन्ना, सव्वदुक्खा विमुच्चई ॥ १९ ॥

× बृहद्वृत्तौ।

व्याख्या—अगारमावसन्तो गृहस्थाः, आरण्या वा तापसादयः, प्रव्रजिताः–शाक्यादयः, एवं प्रतिपादयन्ति–यथेद-मस्मदीयं दर्शनं ये समाश्रितास्ते सर्वदुःखेभ्यो विमुच्यन्ते, तथाहि–पञ्चभूत–तज्जीवतच्छरीवादिनामयमाशयो–यथेदमस्मदीयं दर्शनं ये समाश्रितास्ते गृहस्थाः सन्तः सर्वेभ्यः शिरस्तुण्डमुण्डन–दण्डाजिनजटाकाषायचीवरधारण–केशोल्लुञ्चन–नाग्न्य–तपश्चरण–कायक्लेशरूपेभ्यो दुःखेभ्यो मुच्यन्ते, तथा चाहुः–"तपांसि यातनाश्चित्राः, संयमो भोगवञ्चना। अग्निहोत्रादिकं कर्म, बालक्रीडेव लक्ष्यते ॥ १ ॥" इति। एवं साङ्ख्या अपि वदन्ति–येऽस्मदीयं दर्शनमकर्त्तृत्वात्मा-द्वैतपञ्चस्कन्धादिकप्रतिपादकमापन्नाः प्रव्रजितास्ते सर्वेभ्यो जन्मजरामरणगर्भपरम्परानेकशारीरमानसातितीव्रतरासातोदय-रूपेभ्यो दुःखेभ्यो विमुच्यन्ते सकलद्वन्द्वविनिर्मोक्षं मोक्षमास्कन्दन्तीति ॥ १९ ॥

अथ तेषामेवाफलवादित्वमाविष्कुर्वन्नाह—

तेणावि संधिं णच्चाणं, ण ते धम्मविऊ जणा। जे ते उ वाइणो एवं, न ते ओहंतराहिया ॥ २० ॥

व्याख्या–ते पञ्चभूतादिप्ररूपका वादिनः 'सन्धि' भावसन्धिर्ज्ञानावरणादिकर्मविवररूपस्तं अज्ञात्वा ते प्रवृत्ताः [यथा आत्मकर्मणोः सन्धिर्द्विधा (द्रव्य)भावलक्षणा भवति×] तथा अबुद्ध्वैव ते वराकाः दुःखविमोक्षार्थमभ्युद्यता इति भावः। [यतश्चैवं] अत एव [ते] सम्यग्धर्मपरिच्छेदे कर्त्तव्ये न [विद्वांसो] निपुणाः [जनाः–] पञ्चभूतास्तित्वादिवादिनो लोका इति 'जे ते उ वाइणो एवं' ये च ते एवमनन्तरोक्तप्रकारवादिनो नास्तिकादयो भवौघ+स्तत्तरणशीलास्ते न भवन्तीत्यर्थः ॥२०॥

× बृहद्वृत्तौ + संसारः।

तेणावि संधिं णच्चाणं[1], ण ते धम्मविऊ[2] जणा। जे ते उ[3] वाइणो एवं, न ते संसारपारगा ॥२१॥
तेणावि संधिं णच्चाणं, ण ते धम्मविऊ जणा। जे ते उ वाइणो एवं, न ते गब्भस्स पारगा ॥२२॥
तेणावि संधिं णच्चाणं, ण ते धम्मविऊ जणा। जे ते उ वाइणो एवं, न ते जम्मस्स पारगा ॥२३॥
तेणावि संधिं णच्चाणं, ण ते धम्मविऊ जणा। जे ते उ वाइणो एवं, न ते दुक्खस्स पारगा ॥२४॥
तेणावि संधिं णच्चाणं, ण ते धम्मविऊ जणा। जे ते उ वाइणो एवं, न ते मारस्स[4] पारगा ॥२५॥

एतासां व्याख्या सुगमैव, एते सर्वेऽपि वादिनो मिथ्याप्ररूपणया संसार-गर्भ-जन्म-दुःख-मारादिपारगा न भवन्तीति, अनन्तशो दुःखपरम्परामनुभविष्यन्ति, अनन्तशो गर्भप्रपञ्चकलङ्कलिभागिनो भविष्यन्ति, न हि संसारसमुद्रादुत्तीर्य पारगामिनो भविष्यन्ति ॥ २१-२५ ॥ यत्पुनस्ते प्राप्नुवन्ति तद्दर्शयितुमाह—

नाणाविहाइं दुक्खाइँ, अणुहोंति पुणो पुणो। संसारचक्कवालम्मि, वाहिमच्चुजराकुले ॥ २६ ॥

व्याख्या-×'नानाविधानि' बहुप्रकाराणि दुःखान्यसातोदयलक्षणान्यनुभवन्ति पुनः पुनस्तथाहि-नरकेषु करपत्रदारण-कुम्भीपाकतप्तायःशाल्मलीसमालिङ्गनादीनि, तिर्यक्षु च शीतोष्ण-दहन-दमनाङ्कन-ताडना-तिभारारोपण-क्षुत्तृडादीनि,

१ अज्ञात्वा। २ धर्मविदो जनाः। ३ ते तु वादिनः। ४ कामः॥ × व्याधिमृत्युजराभिराकुले-व्याप्ते संसारचक्रवाले।

मनुष्येष्विष्टवियोगानिष्टसंप्रयोग-शोकाक्रन्दनादीनि,देवेषु चाभियोग्येर्ष्याकिल्विषिकत्व-च्यवनादीन्यनेकप्रकाराणि दुःखानि, एवम्भूता वादिनः पौनःपुन्येन समनुभवन्तीति गाथार्थः ॥ २६ ॥

उच्चावयाणि गच्छंता, गब्भमेसंतिऽणंतसो । नायपुत्ते महावीरे, एवमाहु जिणोत्तमे त्तिबेमि ॥२७॥

व्याख्या-उच्चावचानीति अधमोत्तमानि नानाप्रकाराणि वा [सं]स्थानानि 'गच्छंता' इति 'गच्छन्तो' भ्रमन्तो गर्भाद्गर्भमेष्यन्ति-यास्यन्त्यनन्तशो-निर्विच्छेदमिति, ब्रवीमीति सुधर्मस्वामी जम्बूस्वामिनं प्रत्याह-'ज्ञातपुत्रो' भगवान् श्रीमहावीर एवमुक्तवान्, तत्सकाशे मयाऽपि श्रुतं तथाऽहमपि ब्रवीमि, न स्वमनीषिकयेति गाथार्थः ॥ २७ ॥

इति समयाख्ये प्रथमाध्ययने प्रथमोद्देशकः समाप्तः ।

उक्तः प्रथमोद्देशकः साम्प्रतं द्वितीयोऽभिधीयते, तस्य चायमभिसम्बन्धः-इह प्रथमोद्देशके स्वसमय-परसमयप्ररूपणा कृता, द्वितीयोद्देशकेऽपि सैवाभिधीयते, यदि वाऽनन्तरोद्देशके भूतवाद्यादिमतप्रदर्शनेन तन्निराकरणं कृतं, इह तु नियतिवाद्यादिमिथ्यादृष्टिमतान्युपदर्श्य निराक्रियन्ते । अथ द्वितीयोद्देशकस्यादिसूत्रं—

आघायं पुण एगेसिं, उववन्ना पुढो जिया । वेदयंति सुहं दुक्खं, अदुवा लुप्पंति ठाणओ ॥ १ ॥

व्याख्या-तैर्नियतिवादिभिः पुनरिदमाख्यातं-एतत्प्ररूपितं-उपपन्नाः 'पृथक्' पृथग् नारकादिभवेषु शरीरेषु चेत्यनेनात्माऽऽद्वैतवादनिरासोऽवसेयः । उपपन्नाः के ? 'जीवाः' प्राणिनः सुखदुःखभोगिनः, तथा ते जीवाः पृथक् पृथक् प्रत्येकदेह-

व्यवस्थिता सुखदुःखं वेदयन्त्यनुभवन्ति, न वयं प्रतिप्राणिप्रतीतं सुखदुःखानुभवं निह्नुमहे, अनेन अकर्तृत्ववादिनो निरस्ताः, अकर्त्तरि अविकारिणि आत्मनि सुखदुःखानुभवो न स्यात्। अदुवेत्यथवा ते प्राणिनः सुखं दुःखं चानुभवन्तो 'विलुप्यन्ते' उच्छिद्यन्ते–स्वायुषः प्रच्याव्यन्ते, स्थानात्स्थानान्तरं सङ्क्राम्यन्त इत्यर्थः। एतावता नियतिवादिन एवमाख्यान्ति–जीवाः पृथक् पृथग् नारकादिभवेषूत्पद्यन्ते, तत्र च सुखदुःखादिकमनुभवन्ति, ततश्च स्वस्थानाद्विलुप्यन्ते–उच्छिद्यन्ते स्वायुषः प्रच्याव्यन्ते, स्थानात्स्थानान्तरं सङ्क्राम्यन्त इति गाथार्थः ॥ १ ॥

अथ पुनरपि यत्तैर्नियतिवादिभिराश्रियते तच्छ्लोकद्वयेन दर्शयितुमाह—

न तं सयं कडं दुक्खं, कत्तो अन्नकडं च णं ?। सुखं वा जइ वा दुक्खं, सेहियं वा असेहियं ॥ २ ॥

व्याख्या–यत्तेन जीवेन सुखदुःखाद्यनुभूयते, एकस्मात्स्थानात्स्थानान्तरे यदुत्पत्तिर्विधीयते, तत्सर्वं दुःखादि नात्मकृतं न च कालेश्वरस्वभावादिकृतं, यद्यात्मकृतं सुखदुःखादि नानुभूयते तर्ह्यन्यकृतं कुतः ?, यदि स्वयमात्मना पुरुषकारेण कृतं सुखदुःखाद्यनुभूयेत ततः सेवकवणिक्कर्षकादीनां समाने पुरुषकारे कृते सति फलप्राप्तिवैसादृश्यं फलाप्राप्तिश्च न भवेत्। कस्यचित्तु सेवादिव्यापाराभावेऽपि विशिष्टफलावाप्तिर्दृश्यते, इत्यतो न पुरुषकारात्किञ्चिदासाद्यते, किं तर्हि ? नियतेरेवेत्येतच्च द्वितीयश्लोकान्तेऽभिधास्यते, तथा च न कालेश्वरस्वभावकृतं, यदि कालेश्वरादिकृतं सुखदुःखादि स्यात्तर्ह्येकाकारमेव स्यात्, जगद्वैचित्र्यं कुतः ? सुभगदुर्भग–सधननिर्धनादिभेदेन जगद्वैचित्र्यं दृश्यते, तर्हि ज्ञायते–कालेश्वरादिकृतमपि न, किन्तु नियतिकृतमेव सर्वं। किञ्च–तत्सुखं दुःखं च द्विधा–सैद्धिकं असैद्धिकं च, यदि वा सैद्धिकं सुखमपवर्गलक्षणं दुःख-

मसातोदयलक्षणं, असैद्धिकं [सुखं] सांसारिकं, अथ चोभयमप्येतत्सुखं दुःखं च स्रक्चन्दनाद्युपभोगक्रियासिद्धौ भवं सुखं सैद्धिकं, तथा कशाताडनाङ्कनादिक्रियासिद्धौ भवं दुःखं, तथा असैद्धिकं सुखमान्तरमानन्दरूपं आकस्मिकमनवधारितबाह्यनिमित्तं, एवं दुःखमपि ज्वरशिरोऽर्तिशूलादिरूपमङ्गोत्थमसैद्धिकमिति गाथार्थः ॥ २ ॥

यदि कस्यापि कृतं सुखदुःखादि न स्यात्तर्हि असौ सुखी असौ दुःखी इत्यादि वैचित्र्यं कुतः ? तदेव कथयति—

न सयं कडं न अन्नेहिं, वेदयंति पुढो जिया । संगइयं तं तहा तेसिं, इहमेगेसिमाहियं ॥ ३ ॥

व्याख्या—न स्वयं पुरुषकारेण कृतं दुःखं नाप्यन्येन केनचित्कालादिना कृतं वेदयन्त्यनुभवन्ति, पृथग् 'जीवाः' प्राणिन इति, तर्हि कुतस्तेषां सुखदुःखाद्युदयमायाति ? अत्र नियतिवादी स्वाभिप्रायं प्रकाशयति-'संगइयं'ति, सङ्गतिर्नियतिस्तस्यां भवं साङ्गतिकं, न पुरुषकारादिकृतं सुखदुःखादि, केवलं नियतिकृतं साङ्गतिकमित्युच्यते । इह 'एकेषां' वादिनां सुखदुःखानुभववादे 'एवमाख्यातं' एषा प्ररूपणेत्यर्थः, उक्तं च-"प्राप्तव्यो नियतिबलाश्रयेण योऽर्थः, सोऽवश्यं भवति नृणां शुभोऽशुभो वा । भूतानां महति कृतेऽपि हि प्रयत्ने । नाभाव्यं भवति न भाविनोऽस्ति नाशः ॥ १ ॥" इत्येवं श्लोकद्वयेन नियतिवादमतमुपन्यस्यास्योत्तरदानाय आह—

एवमेयाणि जंपंता, बाला पंडियमाणिणो । णिययाणिययं संतं, अजाणंता अबुद्धिया ॥ ४ ॥

व्याख्या—एवं ते नियतिवादिनो नियतिवादमाश्रित्य जल्पन्तो 'बाला' अज्ञानिनः पण्डितमानिनः, आत्मानमेव

पण्डितम्मन्याः बाला उच्यन्ते । किमिति बालाः ? यतस्ते किञ्चित्सुखदुःखादि जन्तूनां नियतिकृतं किञ्चिदनियतिकृतं न मन्यन्ते, केवलं भवितव्यतावशान्नियतिकृतमेव मन्यन्ते, अत एव 'अजाणगा' अज्ञानिनो बुद्धिरहिताः, जैनास्तु किञ्चिन्नियतिकृतं मन्यन्ते तथा किञ्चिदनियतिकृतमपि पुरुषाकारकालेश्वरस्वभावकर्मादिकृतं मन्यन्ते, तत्र कथञ्चित्सुखदुःखादि पुरुषाकारसाध्यमप्याश्रीयते, यतः फलं क्रियातः सम्भवति, क्रिया च पुरुषाकारायत्ता वर्त्तते, तथा चोक्तं—" न दैवमिति सञ्चिन्त्य, त्यजेदुद्यममात्मनः । अनुद्यमेन कस्तैलं, तिलेभ्यः प्राप्तुमर्हति ॥ १ ॥ " किञ्च–" उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी "रिति वचनात्पुरुषकारकृतं मन्यन्ते । आर्हतास्तु स्याद्वादप्ररूपिणः, न नियतिवादिवदेकान्तप्ररूपिणः "कालो सहावनियई, पुव्वकयं पुरिसकारणे पंच । समवाये सम्मत्तं, एगंते होइ मिच्छत्तं ॥ १ ॥ " इति वचनात् । ते तु नियतिवादिन एकान्तपक्षाश्रयणान्मिथ्यादृश एवेति गाथार्थः ॥ ४ ॥ अथैषामपायदर्शनायाह—

एवमेगे उ पासत्था, ते भुज्जो विप्पगब्भिया । एवं उवठिया संता, ण ते दुःखविमोक्खया ॥ ५ ॥

व्याख्या—एवमेके नियतिवादमाश्रिताः सर्वस्मिन्नपि वस्तुनि नियतानियते सति एके नियतमेवावश्यं भाव्येव, कालेश्वरादिनिराकरणेन निर्हेतुकतया नियतिवादमाश्रितास्ते पार्श्वस्थाः, युक्तिकदम्बकाद्बहिस्तिष्ठन्तीति पार्श्वस्थाः, परलोकक्रियातो वा पार्श्वस्थाः, ते हि परलोकसाधिकां क्रियां न मन्यन्ते, नियतपक्षाश्रयणाद्यद्भाव्यं तद्भविष्यतीति वचनात्तपश्चरणादिक्रियासु पराङ्मुखाः, यदि वा पाश इव पाशः–कर्मबन्धनं, तच्च युक्तिविकलनियतवादप्ररूपणं, तत्र स्थिताः

१ कालः स्वभावो नियतिः, पूर्वकृतं पुरुषाकारः कारणानि पञ्च । समवाये सम्यक्त्वमेकान्ते भवति मिथ्यात्वम् ॥ १ ॥

पाशस्थाः, अन्येऽपि ये कालेश्वरादिकारणिका एकान्तवादिनस्तेऽपि पार्श्वस्थाः पाशस्था वा द्रष्टव्या इति । ते कथम्भूताः ? ' विप्रगल्भिताः ' धार्ष्ट्योपेताः परलोकसाधिकासु क्रियासु प्रवर्त्तमाना अपि सन्तो नात्मदुःखविमोक्षकाः, असम्यक्प्रवृत्तत्वान्नात्मानं दुःखात्संसाररूपाद्विमोचयन्तीति गाथार्थः ॥ ५ ॥ उक्ता नियतवादिनः, साम्प्रतमज्ञानिमतं दूषयितुं दृष्टान्तमाह—

जविणो मिगा जहा संता, परित्ताणेण वज्जिया । असंकियाइं संकंती, संकियाइं असंकिणो ॥ ६ ॥

व्याख्या—यथा ' जविनो ' वेगवन्तः सन्तो मृगाः परित्राणेन वर्जिताः–सम्यग्विवेकविकला अशङ्कनीयानि कूटपाशादिरहितानि स्थानानि शङ्कन्ते–निर्भयेषु स्थानेषु भयं कुर्वन्ति । यानि पुनः ' शङ्काऽर्हाणि ' शङ्कायोग्यानि वागुरादीनि, तत्र शङ्कामकुर्वाणास्तत्र तत्र निर्भयतया पर्यटन्ति, विवेकविकलत्वात् । अशङ्कनीयेषु शङ्कां कुर्वन्ति, शङ्कनीयेषु निर्भयाः पर्यटन्तीति गाथार्थः ॥ ६ ॥ पुनरपि तमेवार्थमाविष्करोति—

परियाणियाणि संकंता, पासियाणि असंकिणो । अन्नाणभयसंविग्गा, संपलिंति तहिं तहिं ॥ ७ ॥

व्याख्या—परित्राणयुक्तानि निर्भयानि स्थानानि, तेषु शङ्कमाना–मूढत्वाद्विपर्यस्तमतयस्त्रातर्यपि भयमुत्प्रेक्षमाणाः ' पाशितानि ' अनर्थोत्पादकानि, तेषु अशङ्किनः, कोऽर्थः ? यानि निर्भयानि स्थानानि तेभ्यो बिभ्यन्ति, यानि सभयानि स्थानानि तेभ्यो न शङ्कन्त इत्यर्थः । ततश्च अज्ञानेन भयेन च 'संविग्ग'त्ति सम्यग्व्याप्ता–वशीकृताः सम्यग्विवेकविकलाः पाशवागुरादिके बन्धने सम्पर्यटन्ते, तथैतेऽपि नियतवादिनः परित्राणार्हेऽप्यनेकान्तवादे शङ्कां कुर्वाणाः युक्त्या अघटमानकं

अनर्थबहुलमेकान्तवादमशङ्कनीयत्वेन गृह्णन्ति अज्ञानावृताः, ततस्तेषु कर्मबन्धस्थानेषु सम्पर्यटन्त इति गाथार्थः ॥ ७ ॥

अथ पुनरपि प्राक्तनदृष्टान्तमधिकृत्याह—

अह तं पवेज्ज वज्झं, अहे वज्झस्स वा वए । मुच्चेज्ज पयपासाओ, तं तु मंदे ण देहए ॥ ८ ॥

व्याख्या—अथासौ मृगस्तत् ‘ वज्झं ’ति ब[द्ध्यं]द्धं–बन्धनाकारेण व्यवस्थितं वागुरादि बज्झमित्युच्यते, तदेवम्भूतं कूटपाशादिकं बन्धनं यद्यसौ मृग उपरि प्लवेत्–तद्बन्धनस्थानमधो विमुच्य उपरि गच्छेत् तस्य वा बध्यस्याधो गच्छेत्, तत एवं क्रियमाणेऽसौ मृगः पदे पाशः पदपाशो–वागुरादिबन्धनं, तस्मान्मुच्येत, आदिग्रहणाद्वधताडनमारणादिकाः क्रिया गृह्यन्ते, एवं सन्तं अनर्थपरिहरणोपायं ‘ मन्दो ’ जडोऽज्ञानावृतो ‘ न देहयेत् ’ न पश्यतीति गाथार्थः ॥ ८ ॥

कूटपाशादिकं चापश्यन् यामवस्थामवाप्नोति तां दर्शयितुमाह—

अहियप्पा अहिअप्पन्नाणे, विसमं तेणुवागए । स बद्धे पयपासेणं, तत्थ घातं नियच्छई ॥ ९ ॥

व्याख्या—स मृगो अहितात्मा अहितप्रज्ञानः सन् ‘ विषमान्तेन ’ कूटपाशादियुक्तेन प्रदेशेन उपागत आत्मानं अनुतापयेत्, तत्र चासौ पतितो बद्धश्च तेन कूटादिना पदपाशादीननर्थबहुलानवस्थानविशेषान् प्राप्तस्तत्र च बन्धने ‘ घातं ’ विनाशं ‘ नियच्छति ’ प्राप्नोति ॥ ९ ॥ एवं दृष्टान्तं प्रदर्श्य दार्ष्टान्तिकमज्ञानविपाकं दर्शयितुमाह—

एवं तु समणा एगे मिच्छदिट्ठी अणारिया । असंकियाइं संकंति, संकियाइं असंकिणो ॥ १० ॥

व्याख्या–एवं ते मृगा अज्ञानावृता अनर्थमनेकशः प्राप्नुवन्ति, एवमेव 'श्रमणाः' केचन पाषण्डविशेषाश्रिताः, एके, न सर्वे। किम्भूतास्ते? मिथ्यादृष्टयोऽनार्याः; अज्ञानावृतत्वादसदनुष्ठायिन इति। अज्ञानित्वं च तेषां दर्शयति–'अशङ्कितानि' अशङ्कनीयानि सुधर्मानुष्ठानादीनि शङ्कन्ते, कोऽर्थः? सुधर्मानुष्ठाने अधर्मशङ्कामानयन्ति अधर्मे च धर्मबुद्धिं कुर्वन्तीति गाथार्थः ॥ १० ॥

पुनस्तेषां दर्शनिनां विपरीतमतित्वं दर्शयति—

धम्मपन्नवणा जा सा, तं तु संकंति मूढगा। आरंभाई ण संकंति, अवियत्ता अकोविया ॥ ११ ॥

व्याख्या—धर्मस्य क्षान्त्यादिदशविधस्य या प्ररूपणा, तत्र शङ्कन्ते–असद्धर्मप्ररूपणेयमित्येवमध्यवसन्ति, ये पुनः पापोपादानभूताः समारम्भास्तान्न शङ्कन्ते, यतस्ते 'अव्यक्ताः' मुग्धाः–विवेकविकलाः 'अकोविदाः' अपण्डिताः–अगीतार्था इति गाथार्थः ॥ ११ ॥ तथाऽज्ञानावृता यन्नाप्नुवन्ति तद्दर्शनायाह—

सव्वप्पगं विउक्कस्स, सव्वं णूमं विहूणिया। अप्पत्तियं अकम्मंसे, एयमट्ठं मिगे चुए ॥ १२ ॥

व्याख्या—'सर्वात्मको' लोभस्तं विधूयेति सम्बन्धः। तथा विविध उत्कर्षो–गर्वः व्युत्कर्षो–मानः, तथा 'णूमं'ति माया, तां विधूय, तथा 'अप्पत्तियं'ति क्रोधं, क्रोधविधूनने मोहनीयविधूननमावेदितं, एतद्विधूनने अकर्मांशो भवति, अकर्मांशश्च विशिष्टज्ञानाद्भवति, नाज्ञानात्। एनमर्थं कर्माभावलक्षणं 'मृगो'ऽज्ञानी 'चुए'त्ति त्यजेद्भ्रश्येत्, किमुक्तं भवति? यो ज्ञानी स तु कषायचतुष्कविधूननेन अकर्मांशो भवति, परं यस्त्वज्ञानी स त्वेतस्मादर्थाद्भ्रष्टः अज्ञानित्वादकर्मांशो न

भवितुमलं, यतः–" पढमं नाणं तओ दया, एवं चिट्ठइ सव्वसंजए । अन्नाणी किं काही ?, किं वा नाही ? य छेयपावगं ॥ १ ॥ " इति गाथार्थः ॥ १२ ॥ पुनरप्यज्ञानिनां दोषदर्शनायाह—

जे एयं नाभिजाणंति, मिच्छद्दिट्ठी अणारिया । मिगा वा पासबद्धा ते, घायमेसंतिऽणंतसो ॥ १३ ॥

व्याख्या—ये अज्ञानिनस्ते कर्मक्षपणोपायं न जानन्ति, आत्मीयासद्ग्रहग्रस्ताः मिथ्यादृष्टयः अनार्यास्ते मृगा इव पाशबद्धा 'घातं' विनाशमेष्यन्ति अनन्तशो जन्मजरामरणान्यनुभविष्यन्ति, मृगस्त्वेकवारमेव म्रियते, अज्ञानवादिनस्त्वनन्तैर्मरणैर्मरिष्यन्तीति गाथार्थः ॥ १३ ॥

ये पुनरज्ञानिनः स्वकदाग्रहं न त्यजन्ति तानुद्दिश्य विशेषमाह—

माहणा समणा एगे, सव्वे नाणं सयं वदे । सव्वे लोगेऽवि जे पाणा, न ते जाणंति किंचण ॥ १४ ॥

व्याख्या—'एके' केचन ब्राह्मणाः 'श्रमणाः' परिव्राजकाः आत्मीयात्मीयं ज्ञानं वर्णयन्ति, परं तानि ज्ञानानि परस्परविरोधेन प्रवृत्तत्वान्न सत्यानि, तस्मादज्ञानमेव श्रेयः । अज्ञानवादिन एवं प्ररूपयन्ति–वादिनः सर्वेऽपि स्वस्वमतानुरागिणः सन्तः पृथक्पृथग्नवीनामेव प्ररूपणां कुर्वन्ति, ततश्चास्मादृशां मनसि सन्देहो जायते–का सत्या का चासत्येति, ततश्चाज्ञाने सति नवीनां प्ररूपणां कर्तुं न शक्यते लोकानां मनसि शंसयोऽपि नोत्पद्यते, अतः अज्ञानमेव चारु,

---

१ प्रथमं ज्ञानं ततो दया एवं तिष्ठति सर्वसंयतः । अज्ञानी किं करिष्यति ? किं वा ज्ञास्यति ? छेक[श्रेयः]पापकम् ।

सर्वस्मिन्नपि लोके ये प्राणिनो न ते किञ्चन जानन्ति, यदपि गुरुपारम्पर्यागतं तेषां किञ्चन ज्ञानमस्ति तदपि छिन्नमूलत्वादवितथं न भवतीति गाथार्थः ॥ १४ ॥ एतदेव दृष्टान्तद्वारेण दर्शयितुमाह—

मिलक्खू अमिलक्खुस्स, जहा वुत्ताणुभासए। ण हेउं से विजाणाइ, भासिअं तऽणुभासए ॥ १५ ॥

व्याख्या—यथा कश्चिन्म्लेच्छः आर्यभाषां न वेत्ति, परमम्लेच्छस्य–आर्यस्य भाषितं तदनुभाषते, परं स म्लेच्छः आर्यस्य तदभिप्रायं न वेत्ति, यथाऽनेनानया विवक्षया भाषितं इति न सम्यग्जानाति, न च 'हेतुं' निमित्तं निश्चयेनासौ म्लेच्छस्तद्भाषितस्य जानाति, केवलं परमार्थशून्यं तद्भाषितमेवानुभाषते इति गाथार्थः ॥ १५ ॥

एवं दृष्टान्तेन दार्ष्टान्तिकं योजयति—

एवमन्नाणिया णाणं, वयंतावि सयं सयं। निच्छयत्थं न याणंति, मिलक्खू व अबोहिया ॥ १६ ॥

व्याख्या—एवमिति यथा म्लेच्छः अम्लेच्छस्य परमार्थमजानानः केवलं तद्भाषितमनुभाषते, एवमज्ञानिकाः–सम्यग्ज्ञानरहिताः श्रमणाः ब्राह्मणाः स्वीयं स्वीयं ज्ञानं प्रमाणत्वेन वदन्तोऽपि निश्चयार्थं न जानन्ति, निश्चयार्थमजानानाः म्लेच्छवदपरोक्तमनुभाषते 'अबोधिकाः' बोधिरहिता [अतोऽज्ञानमेव श्रेयः×] इति गाथार्थः ॥ १६ ॥ अथामीषां(दोष+) दर्शनायाह—

अन्नाणियाण वीमंसा, नाणेण विणियच्छति। अप्पणो य परं नालं, कत्तो अन्नाणुभासणं? ॥१७॥

× बृहद्वृत्तौ। + एतच्चिन्हान्तर्गतः पाठोऽस्मत्परिवर्द्धितः।

व्याख्या—ये पुनरेवं प्ररूपयन्ति–अज्ञानमेव श्रेयस्ते अज्ञानवादिनस्तेषामयमुपदेशः-यावान् [यावान्] ज्ञानाभ्युपगमस्तावत्तावद्गुरुतरदोषसम्भवः, तथाहि–योऽवगच्छन् पादेन कस्यचिच्छिरः स्पृशति तस्य महानपराधो भवति, यस्त्वनाभोगेन स्पृशति तस्मै न कश्चिदपराध्यति, इत्येवं चाज्ञानमेव प्राधान्यभावमनुभवति, न तु ज्ञानं। अथ ये अज्ञानवादिनस्तेषां या 'वीमंसा' ज्ञातुमिच्छा सा ज्ञानविषये न प्रभवति, न निश्चयेन यच्छति–नावतरति। कोऽयमज्ञानवादिनां विमर्शः? तथाहि–किमेतज्ज्ञानं सत्यं? उतासत्यमिति? किञ्च–अज्ञानमेव श्रेयो, यथा यथा च ज्ञानातिशयस्तथा तथा दोषाधिक्यं, सोऽयमेवम्भूतो विमर्शस्तेषां न बुध्य[ते], एवम्भूतस्य पर्यालोचनस्य ज्ञानरूपत्वादिति। तथा ते अज्ञानवादिनः आत्मनोऽपि 'परं' प्रधानमज्ञानवादमुपदेष्टुं 'नालं' न समर्थाः, अज्ञानपक्षाश्रयणादिति। कुतः पुनस्ते स्वयमज्ञाः सन्तोऽन्येषां शिष्यत्वेनोपगतानां अज्ञानवादमुपदेष्टुं–समर्था भवेयुरिति गाथार्थः ॥ १७ ॥

तदेवं ते तपस्विनो अज्ञानिनः आत्मनः परेषां च शासने कर्त्तव्ये यथा न समर्थास्तथा दृष्टान्तेन दर्शयति—

वणे मूढे जहा जंतू, मूढे नेयाणुगामिए। दोवि एए अकोविया, तिव्वं सोयं नियच्छई ॥ १८ ॥

व्याख्या—यथा वने कश्चिन्मूढो जन्तुः–दिक्परिज्ञाने असमर्थः कमपि मूढमेवाग्रेसरं विधाय तमनुगच्छति ततस्तौ द्वावपि सम्यग्मार्गानभिज्ञौ तीव्रं स्रोतो–गहनं नियच्छत–निश्चयेन गच्छतः, अज्ञानावृतत्वात्तौ द्वावपि क्वापि गहने पततः, एवमज्ञानवादिनः आत्मीयमेव शोभनं मार्गं मन्यमानाः परकीयं चाशोभनं जानन्तः स्वयं मूढाः परानपि मोहयन्तीति गाथार्थः ॥१८॥

अस्मिन्नेवार्थे दृष्टान्तान्तरमाह—

अंधो अंधं पहं निंतो, दूरमद्धाणुगच्छई । आवज्जे उप्पहं जंतू, अदुवा पंथाणुगामिए ॥ १९ ॥

व्याख्या—यथा स्वयमन्धः अपरं अन्धं पन्थानं नयन् विवक्षिताद्ध्वनः परतरं पन्थानं गच्छति तथोत्पथमापद्यते [अथवा परं पन्थानमनुगच्छति ×] इति गाथार्थः ॥ १९ ॥

एवमेगे नियागट्ठी, धम्ममाराहगा वयं । अदुवा अहम्ममावज्जे, ण ते सव्वज्जुयं वदे ॥ २० ॥

व्याख्या—एवमेके भावमूढाः भावान्धाश्च नियागट्ठी, नियागो–मोक्षः सद्धर्मो वा, तदर्थिनः सन्तः किल वयं सद्धर्माराधका इत्येवं सम्प्रधार्य प्रव्रज्यायामुद्यताः सन्तः षट्कायोपमर्देन पचनपाचनादिक्रियासु प्रवृत्ताः सन्तस्तत्स्वयमनुतिष्ठन्ति अन्येषां चोपदिशन्ति, येन मोक्षावाप्तेर्भ्रश्यन्ति, अथवा अधर्ममापद्येरन्, ततोऽज्ञानवादप्रवृत्ताः सर्वैः प्रकारैः 'ऋजुः' प्रगुणो–मोक्षगमनं प्रत्यकुटिलः सर्वर्जुः–संयमः सुधर्मो वा, तं सर्वर्जुकं मार्गं न व्रजेयु–र्न प्राप्नुयुरिति गाथार्थः ॥ २० ॥

एवमेगे वियक्काहिं, नो अन्नं पज्जुवासिया । अप्पणो य वियक्काहिं, अयमंजू हि दुम्मई ॥ २१ ॥

व्याख्या—एवमेके अज्ञानवादिनो 'वितर्काभि'र्युक्तिभिः स्वोत्प्रेक्षिताभिरसत्कल्पिताभिः 'नो अन्नं पज्जुवासिय'त्ति नोऽपरं–अन्यं आर्हतादिकं ज्ञानवादिनं पर्युपासते, को भावः? ते ह्यज्ञानवादिनः स्वावलेपग्रस्ता एवं मन्यन्ते–वयमेव तत्त्वज्ञानाभिज्ञाः, नापरः कश्चिद्विद्यतेऽस्मिन् विश्वेऽस्मत्समः, तेनाभिमानिनः सन्तो नापरं पर्युपासते। तथा 'अप्पणो य विय-

× बृहद्वृत्तौ

काहिं 'ति आत्मीयैर्वितर्कैः-स्वमनोरुचिविकल्पैरेवमभ्युपगतवन्तो, यथाऽस्मदीय एव मार्गः श्रेयान्-अज्ञानमेव श्रेयः, अयमेव मार्गः ' अंजू 'इति निर्दोषत्वात्स्पष्टः, परवादिभिस्तिरस्कर्त्तुं न शक्यते, ऋजुर्वा प्रगुणः-अकुटिलः, यथावस्थितार्थाभिधायित्वात् । किमित्येवंविधा ? इति हि-यस्मात्ते ' दुर्मतयो ' विपर्यस्तमतय इति गाथार्थः ॥ २१ ॥

एवमज्ञानवादिनां ज्ञानवादी दोषदर्शनायाह—

एवं तक्काइ साहिंता, धम्माधम्मे अकोविया । दुक्खं ते नाइतुट्टंति, सउणी पंजरं जहा ॥ २२ ॥

व्याख्या—एवं त[र्कया]र्काभिः-स्वमनोरुचिकृतविक[ल्पनया]ल्पैः ' साधयन्तः ' प्रतिपादयन्तो धर्मे क्षान्त्यादिके दशविधे अधर्मे च जीवोपमर्दापादिते पापे ' अकोविदाः ' अनिपुणाः ' दुःखं ' दुःखकारणभूतं कर्म त्रोटयितुं नालं, कर्म न त्रोटयन्तीति, यथा पञ्जरस्थः ' शकुनिः ' पक्षी पञ्जरं त्रोटयितुं-पञ्जरबन्धनादात्मानं मोचयितुं नालं, एवमसावप्यज्ञानवादी संसारपञ्जरादात्मानं मोचयितुं नालमिति गाथार्थः ॥ २२ ॥ अथ सामान्येनैकान्तवादिमतदूषणायाह—

सयं सयं पसंसंता, गरहंता परं वयं । जे उ तत्थ विउस्संति, संसारं ते विउस्सिया ॥ २३ ॥

व्याख्या—स्वकीयं स्वकीयं-आत्मीयात्मीयं दर्शनं प्रशंसन्तः परकीयां वाचं ' गर्हन्तो ' निदन्तः (ये तु) एकान्तवादिनो ' विद्वस्यन्ते ' विद्वांस इवाचरन्ति, ततः संसारं विविधमनेकप्रकारं उत्प्राबल्येन ' श्रिताः ' सम्बद्धाः, तत्र वा संसारे ' उषिताः ' स्थिताः, संसारान्तर्वर्त्तिनः सर्वदा भवन्तीत्यर्थः ॥ २३ ॥

अथ चतुर्विधभिक्षुसमयः कर्मचयं न गच्छति तदधिकृत्याह—

अहावरं पुरक्खायं, किरियावादिदरिसणं । कम्मचिंतापणट्ठाणं, संसारस्स पवड्ढणं ॥ २४ ॥

व्याख्या—अथाज्ञानवादमतानन्तरं अन्यत्पुरा-पूर्वमाख्यातं, किं तत् ? क्रियावादिदर्शनं, कर्मणि-ज्ञानावरणादिके 'चिन्ता' पर्यालोचनं, ततः 'प्रणष्टा' अपगताः-कर्मचिन्ताप्रणष्टाः 'संसारस्स पवड्ढणं' संसारवर्द्धनं। ते ह्येवं प्रतिपद्यमानाः संसारस्य वृद्धिमेव कुर्वन्ति, नोच्छेदमिति गाथार्थः ॥ २४ ॥

यथा च ते कर्मचिन्तातो नष्टास्तथा दर्शयितुमाह—

जाणं काएणऽणाउट्टी, अबुहो जं च हिंसति । पुट्ठो वेदेइ परं, अवियत्तं खु सावज्जं ॥ २५ ॥

व्याख्या—यो हि जानन् प्राणिनो हिनस्ति कायेन अनाकुट्टी, किमुक्तं भवति ? यो हि कोपादेर्निमित्तात्केवलं मनोव्यापारमात्रेण प्राणिनो व्यापादयति, न च कायेन प्राण्यवयवानां छेदनभेदनादिके व्यापारे वर्त्तते, न तस्यावद्यं, तस्य कर्मोपचयो न भवतीत्यर्थः, तथा अबुधोऽजानानः कायव्यापारेण यं च हिनस्ति प्राणिनं तत्रापि मनोव्यापाराभावान्न कर्मोपचय इति । अत्र पुरा यदुक्तं-चतुर्विधं कर्म नोपचयति भिक्षुसमय इति, तत्र परिज्ञोपचितं अविज्ञोपचिताख्यं भेदद्वयं साक्षादुपात्तं, शेषं त्वीर्यापथस्वप्नान्तिकभेदद्वयं च शब्दादुपात्तं, तत्रेर्यापथं नाम पथि गच्छतो यथा कथञ्चिदनभिसन्धेर्यत्प्राणिव्यापादनं भवति न तत्र कर्मबन्धः, [तथा 'स्वप्नान्तिक'मिति स्वप्न एव लोकोक्त्या स्वप्नान्तः, स विद्यते यस्य तत्]

स्वप्नान्तिकं, तदपि न कर्मबन्धाय, यथा स्वप्ने भुजिक्रियायां न तृप्तिस्तथा कर्मबन्धोऽपि न भवतीत्यर्थः, तर्हि कथं कर्मबन्धः ? उच्यते–" प्राणी प्राणिज्ञानं, घातकचित्तं च तद्‌गता चेष्टा। प्राणैश्च विप्रयोगः, पञ्चभिरापद्यते हिंसा ॥ १ ॥" अत्र पञ्चानां पदानां द्वात्रिंशद्‌भङ्गा भवन्ति, तत्र प्रथमभङ्गे हिंसकोऽपरेष्वेकत्रिंशद्भङ्गकेषु अहिंसक इति। किमेकान्तेन परिज्ञोपचितादिना कर्मोपचयो न भवत्येव ? भवति काचिदव्यक्तमात्रेति दर्शयितुं श्लोकपश्चार्द्धमाह–'पुट्ठो'त्ति, तेन केवलमनोव्यापाररूपपरिज्ञोपचितेन केवलकायक्रियोत्थेन वा अविज्ञोपचितेन ईर्यापथेन स्वप्नान्तिकेन च चतुर्विधेनापि कर्मणा 'स्पृष्टः' ईषच्छुप्तः सन् कर्मस्पर्शमात्रेणासावनुभवति, न तस्याधिको विपाकोऽस्ति, कुडचापतितसिकतामुष्टिवत्स्पर्शानन्तरमेव परिशटतीत्यर्थः। यतस्तत्सावद्यं, खुरवधारणे, अव्यक्तं–अस्पष्टमिति गाथार्थः ॥ २५ ॥

कथं तर्हि कर्मोपचयो भवतीत्याह—

संतिमे तउ आयाणा, जेहिं कीरइ पावगं। अभिकम्मा य पेसा य, मणसा अणुजाणिया ॥ २६ ॥

व्याख्या—'सन्ति' विद्यन्ते त्रीणि 'आदानानि' कर्मोपादानकारणानि, यैरादानैः क्रियते पापं, तानि चामूनि–'अभिकम्मा य'त्ति 'अभिक्रम्य' आक्रम्य वध्यं प्राणिनं तद्‌घाताभिमुखं मनो विधाय यत्र स्वत एव प्राणी व्यापाद्यते, तदेकं कर्मादानं १। तथाऽपरं प्राणिघाताय प्रेष्यं समादिश्य यत्प्राणिव्यापादनं तद्‌द्वितीयं कर्मादानं २। तथा परं व्यापादयन्तं मनसा अनुजानीत इत्येतत्तृतीयं कर्मादानं ३। ॥ २६ ॥

तदेवं यत्र स्वयं कृतकारितानुमतयः प्राणिघाते क्रियमाणे विद्यन्ते क्लिष्टाध्यवसायस्य प्राणातिपातश्च, तत्रैव कर्मो-

पचयो नान्यत्रेति दर्शयितुमाह—

एए उ तउ आयाणा, जेहिं कीरइ पावगं। एवं भावविसोहीए, निव्वाणमभिगच्छाति ॥ २७ ॥

व्याख्या—एतानि पूर्वोक्तानि त्रीण्येव आदानानि, यैर्दुष्टाध्यवसायसव्यपेक्षैः पापकर्म क्रियते, तथा यत्र पुनः प्राणिघाते त्रीण्यमूनि न प्रवर्त्तन्ते भावविशुद्धिश्च भवति, एतावता रागद्वेषौ विना यद्यपि मनसा कायेन वा प्राणिघातः स्यात्तथापि भावविशुद्ध्या कर्मबन्धो न भवति, कर्मबन्धाभावाच्च निर्वाणमिति गाथार्थः ॥ २७ ॥

भावविशुद्ध्या कर्मबन्धो न भवतीत्यत्रार्थे दृष्टान्तमाह—

पुत्तं पिया समारब्भ, आहारेज्ज असंजए। भुंजमाणे य मेधावी, कम्मुणा णोवलिप्पई ॥ २८ ॥

व्याख्या—कश्चित्पिता पुत्रं 'समारभ्य' व्यापाद्य कस्याश्चिदवस्थायां × अरक्तद्विष्टः 'आहारेज्ज'त्ति आहारं करोति 'असंयतो' गृहस्थः 'मेधावी' संयतोऽपि तमाहारं भुञ्जानः कर्मणा नोपलिप्यते, एतावता 'असंयतो' गृहस्थो भिक्षुर्वा शुद्धाशयः पिशितास्यपि कर्मणा नोपलिप्यते, अत्र यथा पितुः पुत्रं व्यापादयतस्तत्रारक्तद्विष्टमनसः कर्मबन्धो न स्यात्तथाऽन्यस्याप्यरक्तद्विष्टान्तःकरणस्य प्राणिवधे सत्यपि न कर्मबन्ध इति गाथार्थः ॥ २८ ॥ साम्प्रतमेतद्दूषणायाह—

मणसा जे पउस्संति, चित्तं तेसिं ण विज्जति। अणवज्जमतहं तेसिं, ण ते संवुडचारिणो ॥ २९ ॥

× " तथाविधायामापदि तदुद्धरणार्थं " इति बृहद्वृत्तौ।

व्याख्या—ये हि कुतश्चित्कारणान्मनसा ' प्रादुःष्यन्ति ' प्रद्वेषमुपयान्ति तेषां वधपरिणतानां चित्तं शुद्धं न विद्यते, तदेवं यत्तैरभिहितं–यथा केवलमनःप्रद्वेषेऽप्यनवद्यं–कर्मोपचयाभावः, तत्तेषामतथ्यं–असत्यं–मृषा, यतो मनसोऽशुद्धत्वात्, न ते संवृतचारिणः–न ते संवरे प्रवर्त्तन्ते इति। यतः कर्मबन्धे मुख्यं कारणं मन एव, यदि मनोव्यापारे सति न बन्धस्तर्ह्यन्यत्कर्मबन्धकारणं किमस्तीति भावः ॥ २९ ॥ अथ क्रियावादिनामनर्थपरम्परां दर्शयितुमाह—

इच्चेयाहिं दिट्ठीहिं, सातागारवणिस्सिया। सरणं ति मन्नमाणा, सेवंती पावगं जणा ॥ ३० ॥

व्याख्या—इत्येताभिः पूर्वोक्ताभिर्दृष्टिभिः–प्ररूपणाभिस्ते वादिनः सातगौरवनिश्रिताः–सुखशीलतायामासक्ता यत्किञ्चनकारिणो यथालब्धभोजिनश्च संसारोद्धरणार्थमस्मदीयं दर्शनं शरणमिव मन्यमानाः विपरीतानुष्ठानिन ' अवद्यं ' पापमेव कुर्वन्ति व्रतिनोऽपि सन्तः जना इव जनाः–प्राकृतपुरुषसदृशाः पामरा इति गाथार्थः ॥ ३० ॥

अस्यैवार्थस्योपदर्शकं दृष्टान्तमाह—

जहा अस्साविणीं नावं, जाइअंधो दुरूहिया। इच्छई पारमागंतुं, अंतरा य विसीयती ॥ ३१ ॥

व्याख्या—यथा अस्राविणीं सच्छिद्रां नावं जात्यन्धः समारुह्य ' पारं ' तटमागन्तुं–प्राप्तुमिच्छत्यसौ, तस्याश्चास्राविणीत्वेनोदकप्लुतत्वादन्तराले–जलमध्ये एव विषीदति–वारिणि निमज्जति इति गाथार्थः ॥ ३१ ॥

साम्प्रतं दार्ष्टान्तिकयोजनार्थमाह—

एवं तु समणा एगे, मिच्छद्दिट्ठी अणारिया । संसारपारकंखी ते, संसारं अणुपरियट्टंति ॥३२॥त्ति बेमि ॥

व्याख्या—यथाऽन्धः सच्छिद्रायां नावि समारूढः पारगमनाय नालं, तथा एके श्रमणाः शाक्यादयो मिथ्यादृष्टयः पिशिताशनानुमतिदानादनार्याः स्वदर्शनानुरागेण संसारपारकांक्षिणो—मोक्षाभिलाषुका अपि सन्तः संसारमेव—चतुर्गतिसंसरणरूपमेवानुपर्यटन्ति, भूयोभूयस्तत्रैव जन्मजरामरणदौर्गत्यादिक्लेशमनुभवन्तोऽनन्तमपि कालमासते, न विवक्षितमोक्षसुखमाप्नुवन्तीति, ब्रवीमीति पूर्ववदिति गाथार्थः ॥ ३२ ॥

द्वितीयाङ्गे समयाख्याध्ययनस्य द्वितीयोद्देशकः समाप्तः ।

द्वितीयोद्देशकानन्तरं तृतीयः समारभ्यते, द्वितीयोद्देशके स्वसमयप्ररूपणा कृता, इहापि सैव क्रियते । तथाहि—

जं किंचि उ पूतिकडं, सड्डिमागंतुमीहितं । सहस्संतरियं भुंजे, दुपक्खं चेव सेवइ ॥ १ ॥

व्याख्या—यत्किञ्चिदित्याहारजातं स्तोकमप्यास्तां प्रभूतं, तदपि पूतिकृत—माधाकर्मिकाहारसिक्थेनाप्युपस्पृष्टमास्तां तावदाधाकर्म, तदपि न स्वयं कृतं अपितु श्रद्धावता—ऽन्येन भक्तिमताऽपरानागन्तुकानुद्दिश्य ईहितं—चेष्टितं निष्पादितं, तच्च सहस्रान्तरितमपि यो भुञ्जीतासौ द्विपक्षं—गृहस्थपक्षं प्रव्रजितपक्षं चासेवते, किम्पुनर्य एते शाक्यादयः स्वयमेवाधाकर्मतया × निष्पाद्य स्वयमेव चोपभुञ्जते, ते च सुतरां द्विपक्षासेविनो भवन्तीत्यर्थः, अथवा ईर्यापथं साम्परायिकं च कर्म आदत्ते,

× " स्वयमेव सकलमाहारजातं निष्पाद्य " इति बृहद्वृत्तौ ।

यद्वा पूर्वबद्धा निकाचिताद्यवस्थां कर्मप्रकृतिर्नयन्ति *अपूर्वश्चादत्ते*। एवमपि द्विपक्षासेविनो भवन्तीत्याह च–"अट्ठवि कम्माइं अट्ठे, बंधइ पकरेइ चिणइ उवचिणइ। कम्मियभोई साहू, जं भणियं भगवईए फुडं ॥ १ ॥" अत्र श्रीभगवतीसत्क आलापको वाच्यः+। एतावता शाक्यादयः परतीर्थिकाः स्वयूथ्या वा आधाकर्मोपभुञ्जानाः द्विपक्षमेवासेवन्ते इति सूत्रार्थः ॥ १ ॥

अथामीषां सुखैषिणां आधाकर्मभोजिनां कटुकविपाकं दर्शयन्नाह—

तमेव अवियाणंता, विसमंसि अकोविया। मच्छा वेसालिया चेव, उदगस्सऽभियागमे ॥ २ ॥
उदगस्स पभावेणं, सुक्कंसि घातमिंति उ। ढंकेहि य कंकेहि य, आमिसत्थीहिं ते दुही ॥ ३ ॥

व्याख्या—तमेवाधाकर्मोपभोगजनितं दोषमजानानाः 'विसमंसि'त्ति विषमो अष्टप्रकारकर्मबन्धश्चतुर्गतिकः संसारो वा, तस्मिन् अकोविदाः–कथमेष कर्मबन्धो भवति कथं वा न भवति केन वा प्रकारेण संसारार्णवस्तीर्यत ? इत्येवंविधे–

---

* एतादृक्चिह्नद्वयान्तर्गतः पाठो बृहद्वृत्तित उद्धृतो ज्ञेयः।

१ अष्टावपि कर्माण्यधो बध्नाति प्रकरोति चिनोत्युपचिनोति। कार्मिकभोजी साधुर्यद्भणितं भगवत्यां स्फुटम् ॥ १ ॥

+ स चायं–"आहाकम्मं भुंजमाणे समणे कइकम्मपयडीओ बंधइ ? गोयमा ! अट्ठ कम्मपयडीओ बंधइ, सिढिलबंधणबद्धाओ धणियबंधणबद्धाओ करेइ चियाओ करेइ उवचियाओ करेइ हस्सट्ठिइयाओ दीहट्ठिइयाओ करेइ" इति।

प्रकारे अकुशलाः संसारे दुःखिनो भवन्तीत्यत्र दृष्टान्तमाह–यथा मत्स्याः 'वैशालिकाः'+ विशालजात्युद्भवाः–बृहच्छरीरा उदकस्याभ्यागमे–समुद्रवेलायां सत्यां×, पुनर्वेलापगमे तस्मिन्नुदके शुष्के तस्मिन्नेव धुनीमुखे विलग्नाः अवसीदन्ति, आमिषगृध्नुभिर्ढङ्कैः कङ्कैश्च पक्षिभिः अन्यैश्च मांसवसार्थिभिर्मत्स्यबन्धादिभिर्जीवन्त एव विलुप्यमाना महान्तं दुःखसमुद्घातमनुभवन्तो अशरणा 'घातं' विनाशं यान्ति, त्राणाभावाद्विनाशमेव यान्तीति श्लोकद्वयार्थः ॥ २–३ ॥

एवं तु समणा एगे, वट्टमाणसुहेसिणो । मच्छा वेसालिया चेव, घातमेसंतिऽणंतसो ॥ ४ ॥

व्याख्या—यथा मत्स्यास्तथा श्रमणाः शाक्यपाशुपतादयः स्वयूथ्या वा वर्त्तमानमेव सुखं आधाकर्मोपभोगजनितमेषितुं शीलं येषां ते वर्त्तमानसुखैषिणो वैशालिका मत्स्या इव 'घातं' विनाशमेष्यन्त्यनन्तशोऽरघट्टघटीन्यायेन भूयोभूयः संसारोदरे निमज्जनोन्मज्जनं कुर्वाणा, न ते संसारपारगामिनो भविष्यन्तीत्यर्थः ॥ ४ ॥

साम्प्रतमपराज्ञानिमतोपदर्शनायाह—

इणमन्नं तु अन्नाणं, इहमेगेसि आहियं । देवउत्ते अयं लोए, बंभउत्ते त्ति आवरे ॥ ५ ॥

व्याख्या—इदमन्यदज्ञानं–मोहविजृम्भितं, इहास्मिँल्लोके एकेषां, न सर्वेषां, आख्यात–मभिप्रायः । किमाख्यातमिति

+ "विशालः–समुद्रस्तत्र भवा विशालाख्यजातिभवा वा विशाला एव वा वैशालिका–बृहच्छरीरा" इति हर्षकुलगणिः ।

× "उदकस्य प्रभावेण नदीमुखमागताः" इति हर्षकुलगणिः ।

तदेवाह–अयं लोको देवोप्तः–कर्षकेणेव बीजवपनं कृत्वा देवेन निष्पादितोऽयं लोक इत्यर्थः, 'देवगुप्तो' देवरक्षितो वा, इत्येवमादिकं सर्वमज्ञानमिति। तथा ब्रह्मणा उप्तो ब्रह्मोप्त इत्ययं लोक इत्यपरे, तेषामयमभ्युपगमः–'ब्रह्मा' जगत्पितामहः, स चैक एवादावासीत्, तेन च प्रजापतयः सृष्टास्तैश्च क्रमेणैतत्सकलं जगदिति गाथार्थः ॥ ५ ॥

ईसरेण कडे लोए, पहाणाइ तहावरे। जीवाजीवसमाउत्ते, सुहदुक्खसमन्निए ॥ ६ ॥

व्याख्या—एके वदन्ति ईश्वरकृतोऽयं लोकः, तथा प्रधानादिकृतो लोकः, [प्रधानं–]सत्त्वरजस्तमसां साम्यावस्था-प्रकृतिस्तत्कृतोऽयं लोकः, तथा अन्ये स्वभावनिष्पन्नोऽयं लोक इति, यथा–कण्टकास्तीक्ष्णाः, चित्रिताः मयूराः, ईक्षवो मधुराः, निम्बः कटुकः, लहसणो दुर्गन्धः, पद्मं सुगन्धं, एते पदार्था यथा स्वभावनिष्पन्नास्तथा लोकोऽपि स्वभावादेव, न केनापि कृतः। परं कथम्भूतोऽयं लोकः जीवाजीवस[मायुक्तः]मन्वितः, तथा सुखमानन्दरूपं दुःखं त्वसातोदयरूपं, ताभ्यां समन्वितोऽयं लोक इति गाथार्थः ॥ ६ ॥ किञ्च—

सयंभुणा कडे लोए, इति वुत्तं महेसिणा। मारेण संथुया माया, तेण लोए असासते ॥ ७ ॥

व्याख्या—एके वदन्ति स्वयम्भु–र्विष्णुरन्यो वा, स च एक एवादावभून्न चैकाकी रमते, द्वितीयमिष्टवान्, ततस्त-च्चिन्तानन्तरं द्वितीया शक्तिः समुत्पन्ना, तदनन्तरं जगत्सृष्टिरभूदित्येवं महर्षिणोक्तं–कथितं, ततः स्वयम्भुवा लोकं निष्पाद्य अति सम्भारभयाद्यमाख्यो मारयतीति मारो व्यधायि, तेन मारेण माया [संस्तुता–] कृता, तया मायया लोकोऽयं

म्रियते+, ततो लोकोऽयमशाश्वतः अनित्यो विनाशीति च गाथार्थः ॥ ७ ॥ अपिच—

माहणा समणा एगे, आह अंडकडे जगे । असो तत्तमकासी य, अजाणंता मुसं वदे ॥ ८ ॥

व्याख्या—एके ब्राह्मणाः 'श्रमणा'स्त्रिदण्डिप्रभृतयः एवमाहु-रेवमुक्तवन्तः, यथा-अण्डकृतं जगत्-अण्डाज्जातमित्यर्थः, यदा न किञ्चिदपि वस्त्वासीत्, पदार्थशून्योऽयं संसारस्तदा ब्रह्माऽप्स्वण्डमसृजत, तस्माच्च क्रमेण वृद्धाद् द्विधाभावमुपगतादूर्द्धाऽधो विभागोऽभूत्, तन्मध्ये च सर्वाः प्रकृतयः पृथिव्यप्तेजोवाय्वाकाशसमुद्रसरित्पर्वतमकराकरनिवेशादिसंस्थितिरभूदिति, एवम्भूते चास्मिञ्जगति 'असौ' ब्रह्मा, तस्य भावस्तत्त्वं-पदार्थजातं तदण्डादिप्रक्रमेण अकार्षीत्, ते च ब्राह्मणादयः परमार्थमजानाना [एवं] मृषा वदन्ति-अन्यथाऽवस्थितमन्यथा प्ररूपयन्तीति गाथार्थः ॥ ८ ॥

अथ देवोप्तादिजगद्वादिनामुत्तरदानायाह—

सएहिं परियाएहिं, लोयं बूया कडेत्ति य । तत्तं ते ण विजाणंति, ण विणासी कयाइवि ॥ ९ ॥

व्याख्या—स्वकीयैः स्वकीयैः पर्यायै-रभिप्रायैर्युक्तिविशेषैरयं लोकः कृत इत्यब्रुव-न्नभिहितवन्तः, तद्यथा-देवोप्तो ब्रह्मोप्त ईश्वरकृतः प्रधानादिनिष्पादितः स्वयम्भुवा निष्पादितः तथाऽण्डजश्चायं लोक इत्यादि स्वकीयाभिर्युक्तिभिः प्रतिपादयन्ति, यथाऽस्मदुक्तमेव सत्यं, नान्यदिति । ते चैवंवादिनः सर्वेऽपि 'तत्त्वं' परमार्थ-यथावस्थितलोकस्वभावं न [वि]जानन्ति-

---

\+ "न च तत्त्वतो जीवस्य मृतिरस्ति, तेन मायैषा," इति ह.

न सम्यग्विवेचयन्ति, यथाऽयं लोको द्रव्यार्थतया न विनाशी निर्मूलतः कदाचन, न चायमादित आरभ्य केनापि कृत इति शाश्वतोऽयं लोकः अनाद्यपर्यवसानोऽयं लोक इत्यादिपरमार्थं न विदन्ति, ततो अविमृश्य भाषिण इति गाथार्थः ॥ ९ ॥

अथ तेषामज्ञानफलोपदर्शनायाह—

अमणुन्नसमुप्पायं, दुक्खमेव विजाणिया । समुप्पायमजाणंता, किह नाहिंति? संवरे ॥ १० ॥

व्याख्या—दुःखं अमनोज्ञसमुत्पादं—अमनोज्ञानुष्ठानादनाचाराद्दुःखमुत्पद्यते, एतावता अमनोज्ञसमुत्पादं दुःखं 'विजानीयात्' अवगच्छेत्प्राज्ञः । एतदुक्तं भवति—स्वकृतादसदनुष्ठानादेव दुःखस्योद्भवो भवति, नान्यस्मादित्येवं व्यवस्थिते एते [अनन्तरोक्त]वादिनोऽसदनुष्ठानोद्भवस्य दुःखस्य समुत्पादं अजानानाः सन्त ईश्वरादेव दुःखोत्पादमिच्छन्ति, ते हि वराकाः ईश्वरवादिन ईश्वरकृतमेव दुःखं प्रतिपादयन्ति, ते चैवमिच्छन्तः कथं दुःखस्य संवरं—दुःखप्रतिघातहेतुं ज्ञास्यन्ति? कारणोच्छेदे कार्योच्छेदः, यथा—रोगोत्पत्तिनिदानं ज्ञात्वा तत्प्रतीकाराय यत्नो विधीयते, रोगनिदानमन्यत्तत्प्रतीकारश्चान्य एव विधीयते, कथं तदुपशमः स्यात्?, तथैव ते वादिनोऽपि दुःखनिदानमेव न जानन्ति, तच्चाजानानाः कथं ते दुःखोच्छेदाय यतिष्यन्ते? यत्नवन्तोऽपि च न दुःखोच्छेदनमवाप्स्यन्ति, अपितु संसारारण्ये पर्यटन्तोऽनन्तमपि कालं संस्थास्यन्तीति गाथार्थः ॥१०॥

साम्प्रतं प्रकारान्तरेण कृतवादिमतमुपन्यस्यन्नाह—

सुद्धे अपावए आया, इह मेगेसिमाहियं । पुणो किड्डापदोसेणं, सो तत्थ अवरज्झइ ॥ ११ ॥

व्याख्या—इह एके गोशालकमतानुसारिण एवं वदन्ति, यथाऽयमात्मा मनुष्यभव एव शुद्धाचारो भूत्वा अपगताशेषमलकलङ्कः सन्मोक्षं याति, अपापकश्च तत्र भवति, इदं एकेषां आख्यातं, इयं वाचोयुक्तिरेकेषां वादिनामिति भावः। एवमयमात्मा शुद्धत्व–अकर्मकत्वराशिद्वयावस्थो भूत्वा क्रीडया प्रद्वेषेण वा स तत्र मोक्षावस्थ एव 'अपराध्यति' रजसा श्लिष्यते, किमुक्तं भवति ? तस्य स्वशासनपूजामुपलभ्य अन्यशासनपराभवेन च 'क्रीडा' प्रमोदः सञ्जायते, स्वशासनतिरस्कारदर्शनेन प्रद्वेषस्ततः शनैः शनैः रजसा मलिनी भवति, मलीमसश्च कर्मगौरवाद्भूयः संसारे अवतरति, तदा तृतीयराश्यवस्थो भवति। पूर्वं मनुष्यभव एव शुद्ध इत्येकाऽवस्था, तदनु मोक्षेऽकर्मक इति द्वितीयावस्था, पुनः स्वशासनतिरस्कारदर्शनाद्द्वेषेण संसारेऽवतरति इयं तृतीयावस्था इति गाथार्थः ॥ ११ ॥ किञ्च—

इह संवुडे मुणी जाए, पच्छा होइ अपावए। वियडंबु जहा भुज्जो, नीरयं सरयं तहा ॥ १२ ॥

व्याख्या—'इह' मनुष्य भव एव प्रव्रज्यामभ्युपेत्य संवृतात्मा–यमनियमरतो जातः, पश्चादपापो भवति–अपगताशेषमलकलङ्को जायते, ततो मुक्तावस्थो भवति, ततः पुनरपि स्वशासनपूजादर्शनान्निकारोपलब्धेश्च रागद्वेषोदयात्कलुषितान्तरात्मा विकटाम्बुव–दुदकवन्नीरजस्कं [सत्] वातोद्धूतरेणुसम्पृक्तं 'सरजस्कं' मलिनं भवति, एवमात्माऽपि पूर्वं नरभवे शुद्धः, मोक्षे अपापको-ऽकर्मा, तदनु शासन[पूजा]तिरस्कारदर्शनेन रागद्वेषोदयाद्भवावतरणेन सरजा, एवं राशित्रयावस्थो भवत्यात्मेति गाथार्थः ॥ १२ ॥ अधुनैतन्मतं दूषयितुमाह—

एयाणुचिंति मेधावी, बंभचेरे ण ते वसे । पुढो पावाउया सव्वे, अक्खायारो सयं सयं ॥ १३ ॥

व्याख्या—' मेधावी ' प्राज्ञः एतान् वादिनोऽनुचिन्त्य एवमवधारयेत्—नैते राशित्रयवादिनो देवोप्तादिलोकवादिनश्च ब्रह्मचर्ये * तदुपलक्षिते * संयमानुष्ठाने वा वसेयुः, अपिच—सर्वेऽप्येते प्रावादुकाः स्वीयं स्वीयं दर्शनं स्वदर्शनानुरागात् शोभनत्वेन ' अख्यातारः ' प्रख्यापयितारः, नच तत्र विदिततत्त्वेनास्था विधेयेति गाथार्थः ॥ १३ ॥

पुनरन्यथा कृतवादिमतमुपदर्शयितुमाह—

सए सए उवट्ठाणे, सिद्धिमेव न अन्नहा । अहो !! इहेव वसवत्ती, सव्वकामसमप्पिए ॥ १४ ॥

व्याख्या—ते कृतवादिनः अपरेऽपि स्वकीये २ ' उपस्थाने ' स्वकीयानुष्ठाने दीक्षागुरुचरणशुश्रूषादिके सिद्धिमभिहितवन्तः—सर्वेऽपि वादिनः स्वकीयानुष्ठानादेव सिद्धिं प्रतिपादयन्ति, यः पृच्छ्यते स एवमेव वक्ति—अस्मदीयानुष्ठानादेव मुक्त्यवाप्तिः,नान्येन केनापि प्रकारेण सिद्धिरवाप्यते, अहो !! 'इहेव'त्ति सिद्धिप्राप्तेरवस्तात्प्रागपि यावदद्यापि सिद्धिप्राप्तिर्न भवति तावदिहैव जन्मनि अस्मदीयदर्शनोक्तानुष्ठानानुभावात् 'वसवत्ती' वशवर्त्ती—वशेन्द्रियो भवति, न ह्यसौ सांसारिकस्वभावैरभिभूयते, सर्वकामसमर्पितो—यान् यान् कामान् कामयते ते तेऽस्य सर्वे सिद्ध्यन्ति—सिद्धेरर्वाक् अष्टगुणैश्वर्यलक्षणा सिद्धिर्भवति परत्र चाशेषद्वन्द्वोपरमलक्षणा सिद्धिर्भवतीति गाथार्थः ॥ १४ ॥ एतदेव दर्शयति—

सिद्धा य ते अरोगा य, इहमेगेसिमाहियं । सिद्धिमेव पुरो काउं, सासए गंढिया नरा ॥ १५ ॥

व्याख्या—ते हि दर्शनिनः एवं प्रतिपादयन्ति—येऽस्मदुक्तमनुष्ठानं सम्यगनुतिष्ठन्ति तेऽस्मिञ्जन्मनि अष्टगुणैश्वर्यरूपां सिद्धिमासाद्य पुनरन्ते शरीरत्यागेन 'सिद्धा' अशेषद्वन्द्वरहिता अरोगाश्च भवन्ति। एकेषां वादिनां इदमाख्यातं—भाषितं, ते च वादिनः सिद्धिमेव पुरस्कृत्य—मुक्तिमेवाङ्गीकृत्य स्वकीये आशये—स्वदर्शनरागेण 'ग्रथिताः' सम्बद्धास्तदनुकूला युक्तिः प्रतिपादयन्ति नरा इव—प्राकृतपुरुषा इव, यथा प्राकृतपुरुषाः—शास्त्रावबोधविकलाः स्वाभिप्रेतार्थसाधनाय युक्तिः प्रतिपादयन्ति, एवं तेऽपि पण्डितम्मन्याः परमार्थमजानानाः स्वाग्रहप्रसाधिका युक्तिरुद्घोषयन्ति। तथा चोक्तं—"आग्रही बत × निनीषति, युक्तिं तत्र यत्र मतिरस्य निविष्टा। पक्षपातरहितस्य तु, युक्तिर्यत्र तत्र मतिरेति निवेशम् ॥ १ ॥" इति गाथार्थः ॥ १५ ॥ अथैतत्प्ररूपिणां फलदर्शनायाह—

असंवुडा अणादीयं, भमिहिंति पुणो पुणो। कप्पकालमुवज्जंति, ठाणा असुरकिब्बिसियत्ति बेमि ॥

व्याख्या—ते हि पाषण्डिनो मोक्षार्थिनोऽपि 'असंवृता' असंयताः, ते हि एवं वदन्ति—इहास्माकं इन्द्रियानुरोधेन सर्वविषयोपभोगादमुत्र च मुक्त्यवाप्तेः, तदेवं मुग्धजनं प्रतारयन्तो अनादिकं संसारकान्तारं पुनः पुनर्भ्रमिष्यन्ति, याऽपि च तेषां बालतपोऽनुष्ठानादिना स्वर्गावाप्तिः साऽप्येवंप्राया भवतीति दर्शयति—'कल्पकालं' प्रभूतकालमुत्पद्यन्ते, असुराः नागकुमारादयस्तत्रापि न प्रधानाः, किं तर्हि ? 'किल्बिषिकाः' अधमाः—अल्पर्द्धयः अल्पायुषः अल्पसामर्थ्याद्युपेताः

× इति खेदे।

प्रेष्यभूताश्च भवन्ति । सुधर्मस्वामी जम्बूस्वामिनमाह, इतिरधिकारसमाप्तौ, ब्रवीमीति पूर्ववत् ॥ १६ ॥

इति समयाख्याध्ययनस्य तृतीयोद्देशकः समाप्तः ॥

उक्तस्तृतीयोद्देशकः, अधुना चतुर्थः प्रारभ्यते । अनन्तरोद्देशके स्वपरसमयवक्तव्यतोक्ता, इहापि सैवाभिधीयते, तथाहि—

एते जिया भो ! न सरणं, बाला पंडियमाणिणो । हिच्चा णं पुव्वसंजोगं, सिया किच्चोवएसया ॥१॥

व्याख्या–एते सर्वेऽपि पूर्वोक्ता वादिनः 'जिता' अभिभूताः, कैः ? रागद्वेषादिभिर्विषयैर्वा, 'भो' इति शिष्यामन्त्रणं, * एवं त्वं गृहाण यथा–* एते कुवादिनो मिथ्योपदेशप्रवृत्तत्वान्न कस्यचिच्छरणं भवन्ति–न कञ्चनापि तारयितुं समर्थाः स्युः। किमिति न शरणं ? यतो 'बाला' अज्ञानिनः, तथा च पण्डितमानिनः, ते कथमीदृशाः ? यतः–'हित्वा' त्यक्त्वा पूर्वसंयोगं धनधान्यस्वजनादिसंयोगं, निस्सङ्गाः सन्तः प्रव्रजिताः, पुनः 'सिताः' बद्धाः परिग्रहारम्भेष्वासक्तास्ते गृहस्थास्तेषां कृत्यं पचनपाचनखण्डनपीषणादि अन्यो वा भूतोपमर्दकारी व्यापारस्तं गच्छन्तीति सितकृत्योपदेशगाः प्रव्रजिता अपि सन्तो गृहस्थेभ्यो न भिद्यन्ते, संरम्भसमारम्भरूपपञ्चसूना+ व्यापारोपेता वा गृहस्था इव कथं तदुपासकानां शरणं भवन्तीति गाथार्थः ॥ १ ॥

एवम्भूतेषु तीर्थिकेषु सत्सु भिक्षुणा किं कर्त्तव्यं ? तद्दर्शयितुमाह—

+ खण्डनी १ पेषणी २ चुल्ही ३, उदकुम्भी ४ प्रमार्जनी ५ । पञ्च शूना गृहस्थस्य, तेन स्वर्गं न गच्छति ॥१॥ ["वधास्पदे ॥ ६५२ ॥ शूना तालव्यदन्त्यादिः" इति शब्दरत्नाकरे ३ काण्डे]

तं च भिक्खू परिन्नाय, विज्जं तेसु ण मुच्छए । अणुक्कसे अप्पलीणे, मज्झेण मुणि जावए ॥ २ ॥

व्याख्या—' भिक्षुः ' साधुस्तत्परिज्ञाय-ज्ञात्वा, किं ज्ञात्वा ? यथैते दर्शनिनो मिथ्यादृशो-विवेकशून्या नात्मने न परस्मै हिताय भवन्ति इति भिक्षुर्ज्ञात्वा विद्वाँस्तेषु-कुतीर्थिकेषु न मूर्च्छयेत्-न सङ्गतिं कुर्यात्, किं पुनः कर्त्तव्यं ? 'अणुक्कसे' इति अनुत्कर्षवान्-उत्सेकरहितः ' अप्रलीनः ' कुतीर्थिकेषु असम्बद्धो मुनिर्जगत्त्रयवेदी मध्यस्थवृत्त्या रागद्वेषरहित आत्मा यापयितव्यः, आत्मप्रशंसां परनिन्दां च परिहरन् मध्येन-रागद्वेषयोरन्तराले सञ्चरेदिति गाथार्थः ॥ २ ॥

किमेते कुतीर्थिकास्त्राणाय न भवन्तीति दर्शयितुमाह—

सपरिग्गहा य सारंभा, इह मेगेसिमाहियं । अपरिग्गहा अणारंभा, भिक्खू ताणं परिव्वए ॥ ३ ॥

व्याख्या—ते कुतीर्थिकाः ' सपरिग्रहाः ' शरीरोपकरणादौ मूर्च्छावन्तो जीवोपमर्दकारिण औद्देशिकभोजिन, [' च ' पुनः सारम्भाः-] अत एव न त्राणाय, " परिग्रहारम्भमग्ना-स्तारयेयुः ? कथं परान् । स्वयं दरिद्रो न पर-मीश्वरीकर्त्तुमीश्वरः ॥ १ ॥ " इति वचनात् । तथा ' इह मेगेसिमाहियं ' इह-परलोकचिन्तायां एकेषामेतदाख्यातं-एतद्भाषितं, यथा-किमनया शिरस्तुण्डमुण्डनादिकया क्रियया ? परं गुरोरनुग्रहात्परमाक्षरावाप्तिस्तद्दीक्षावाप्तिर्वा [यदि] भवति, ततो मोक्षो भवतीत्येवं भाषमाणास्ते न त्राणाय भवन्ति । तर्हि के त्राणाय भवन्तीति दर्शयति-अपरिग्रहाः, धर्मो-पकरणादृते शरीरोपभोगाय न स्वल्पोऽपि परिग्रहो येषां ते अपरिग्रहाः, अनारम्भाः-सावद्यारम्भरहिताः, ते चैवम्भूताः

कर्मलघवः स्वयं यानपात्रकल्पाः संसारमहोदधेर्जन्तूत्तारणसमर्थास्तान्, भिक्षुः शरणं [परि]व्रजेद्-गच्छेदित्यर्थः ॥ ३ ॥

कथं पुनस्तेन अपरिग्रहेण अनारम्भेण च वर्त्तनीयमित्येतद्दर्शयितुमाह—

कडेसु घासमेसेज्जा, विऊ दत्तेसणं चरे । अगिद्धो विप्पमुक्को अ, ओमाणं परिवज्जए ॥ ४ ॥

व्याख्या—गृहस्थैः स्वार्थं निष्पादिता ओदनादयस्ते कृता उच्यन्ते, तेषु 'कृतेषु' परकृतपरनिष्ठितेषु षोडशोद्गमदोषपरिहारेण यो ग्रास-आहारस्तमेषये-न्मृगयेत्-याचेत । तथा 'विद्वान्' संयमकरणैकनिपुणः । निःश्रेयसबुद्ध्या दत्तमित्यनेन षोडशोत्पादना दोषाः परिहृता द्रष्टव्याः । एवंविधे आहारे स भिक्षुश्चरे-दनुतिष्ठेदित्यनेन दशैषणादोषाः परिगृहीता इति मन्तव्यम् । 'अगृद्धो' रागद्वेषरहितो भोजने, अनेन पञ्च ग्रासैषणादोषा निरस्ता मन्तव्याः । तथा विप्रमुक्तो रागादिभिः परेषामपमानं + अधिसहेतेति, एवंविधो भिक्षुर्भवतीति गाथार्थः ॥ ४ ॥

इदानीं परवादिमतमेवोद्देशार्थाधिकाराभिहितं, तद्दर्शयन्नाह—

लोगवायं निसामेज्जा, इह मेगेसिमाहियं । विवरीयपन्नसंभूयं, अन्नेहिं बुईयाणुयं ॥ ५ ॥

व्याख्या—लोकानां पाषण्डिकानां *पौराणिकानां* वा वादो लोकवादः, यथा स्वमभिप्रायेण यो यस्याभ्युपगमस्तं निशामये-च्छृणुया-ज्जानीयादित्यर्थः । इहा-स्मिन्संसारे 'एकेषां' केषाञ्चिदिदमाख्यात-मयमभ्युपगमः, तदाख्यातं-कीदृशं ?

+ '-परावमदर्शित्वं परिवर्जयेत्-परित्यजेत्, न ज्ञानमदं तपोमदं च कुर्यादिति भावः ।' इति बृहद्वृत्तिः ।

'विवरीयपन्नसंभूय'मिति विपरीतप्रज्ञासम्भूतं-विपर्यस्तबुद्धिग्रथितं 'अन्नेहिं बुईयाणुगं' अन्यैरविवेकिभिर्यदुक्तं तदनुगं-अविवेकिभिर्यद्भाषितं पुनस्तदनुसारेण प्रवर्त्तितं, एवंविधं विपर्यस्तबुद्धिरचितं पाषण्डिलोकवादं निशामये-च्छृणुयादिति गाथार्थः ॥५॥

अथ तमेव लोकवादं दर्शयितुमाह—

अणंते नितिए लोए, सासए ण विणस्सती । अंतवं णितिए लोए, इति धीरोऽतिपासए ॥ ६ ॥

व्याख्या—अनन्तोऽयं लोकः, यो यादृगिहभवे स तादृगेव परभवेऽप्युत्पद्यते, पुरुषः पुरुष एव अङ्गना अङ्गनैव, अथवा 'अनन्तो'ऽपरिमितो-निरवधिक इति । तथा 'नित्यः' अप्रच्युतानुत्पन्नस्थिरैकस्वभावो लोकः । तथा शाश्वतो न कदाचिद्विनश्यति । तथा 'अंतवं' अन्तोऽस्यास्तीति अन्तवान् "सप्तद्वीपा वसुन्धरे"ति, इतो नाधिको न न्यूनः, स च तादृक्परिमाणो नित्यः, इत्येवं 'धीरः' कश्चित्साहसिको अन्यथा प्ररूपणाद्व्यासादिरिवातिपश्यति [इव] अतिपश्यति । तदेवम्भूतमनेकभेदभिन्नं लोकवादं निशामयेदिति गाथार्थः ॥ ६ ॥ किञ्च—

अपरिमाणं वियाणाइ, इहमेगेसिमाहियं । सव्वत्थ सपरिमाणं, इति धीरोऽतिपासई ॥ ७ ॥

व्याख्या—यस्य वस्तुनः क्षेत्रतः कालतश्च 'परिमाणं' इयत्ता न विद्यते तदपरिमाणं, एके वादिनो वदन्ति—अस्माकं तीर्थकृदपरिमाणं जानाति, परं न सर्वज्ञः, इह जगति सर्वज्ञः कोऽपि नास्ति, एकेषां-सर्वज्ञापह्नववादिनामिदमाख्यातं-इदं

५

भाषितं + सपरिमाणं क्षेत्रतः कालतश्च तत्पश्यति धीरः, तथाहि—ते ब्रुवते दिव्यं वर्षसहस्रं ब्रह्मा स्वपिति, तस्यामवस्थायां न पश्यत्यसौ, तावन्मात्रं च कालं जागर्त्ति, तत्र च पश्यत्यसाविति ॥ ७ ॥

तदेवम्भूतो बहुधा लोकवादः प्रवृत्तस्तस्य दोषवत्तामाह—

जे केइ तसा पाणा, चिट्ठंति अदु थावरा । परियाए अत्थि से उं[? अं]जु, जेणं ते तसथावरा ॥८॥

व्याख्या—ये केचन त्रसाः द्वीन्द्रियादयः ×स्थावराः पृथिव्यादयः [ते], यद्ययं लोकवादः सत्यो भवेद्यथा—यो यादृगस्मिञ्जन्मनि मनुष्यादिः सोऽन्यस्मिन्नपि जन्मनि तादृगेव भवतीति, यदीयं वाचोयुक्तिः सत्या तदा दानाध्ययन-जपनियमतपोऽनुष्ठानादिकाः क्रियाः सर्वा निरर्थकाः स्युः, न चैवं, तस्माद्ये केचन त्रसाः स्थावरास्तेषां स्वकर्मपरिणत्याऽयं पर्यायो 'उं[अं]जू' इति प्रगुणो-ऽव्यभिचारी, त्रसाः स्थावरपर्यायं लभन्ते स्थावराश्च त्रसत्वं, परं ये त्रसाः त्रसा एव स्थावराः स्थावरा एव नायं नियमः, परं ये वदन्ति—यो यादृगिह जन्मनि स परभवेऽपि तादृगेव तन्मिथ्येति गाथार्थः ॥८॥

अस्मिन्नेवार्थे दृष्टान्ताभिधित्सया आह—

उरालं जगतो जोगं, विवज्जासं पलियंति य । सव्वे अकंतदुक्खा य, अओ सव्वे अहिंसिया ॥ ९ ॥

+ " तथा [सर्वत्र–] सर्वक्षेत्रमाश्रित्य कालं वा परिच्छेद्यं कर्मतापन्नमाश्रित्य सह परिमाणेन [वर्तत इति] सपरिमाणं—सपरिच्छेदं, धी–र्बुद्धिस्तया राजत इति धीर इत्येवमसावतीव पश्यतीत्यतिपश्यति, तथाहि– ० " इति बृहद्वृत्तौ ।

× " प्राणाः–प्राणिनः सत्त्वाः 'तिष्ठन्ति' त्रसत्वमनुभवन्ति, अथवा " इति बृहद्वृत्तौ ॥

व्याख्या—औदारिकजन्तुग्रामस्य 'जोगं' व्यापारं-अवस्थाविशेषमित्यर्थः, औदारिकशरीरिणो हि जन्तवः प्राक्तनावस्थाविशेषाद्गर्भकललार्बुदरूपाद्विपर्यासभूतं बालकुमारयौवनादिकमुदारं योगं परि-समन्ताद् गच्छन्ति, एतदुक्तं भवति-औदारिकशरीरिणो हि मनुष्यादेर्बालकुमारादिकः कालादिकृतोऽवस्थाविशेषोऽन्यथाऽन्यथा वा भवत्प्रत्यक्षेण लक्ष्यते, न पुनर्यादृक्प्राक्तादृगेव सर्वदा, नायं नियमः । एवं (सर्वेषां) स्थावरजङ्गमानां जन्तूनां विपर्यासो द्रष्टव्यः । अपि च-सर्वेऽपि जन्तवो दुःखाक्रान्ताः सन्तोऽन्यथाऽवस्थाभाजो लक्ष्यन्ते, यदिवा सर्वेऽपि जन्तवोऽकान्तदुःखा-अप्रियदुःखाः प्रियसुखाश्च, अतस्तान् सर्वान्न हिंस्यादिति गाथार्थः ॥ ९ ॥ किमर्थं सत्त्वान्न हिंस्यादित्याह—

एयं खु नाणिणो सारं, जं न हिंसति किंचणं । अहिंसासमयं चेव, एतावंतं विजाणिया ॥ १० ॥

व्याख्या-एतदेव 'खु'र्निश्चये, ज्ञानिनो-विशिष्टविवेकवतः 'सारं' न्याय्यं, यत्कञ्चन प्राणिजातं स्थावरं जङ्गमं वा न हिनस्ति-न परितापयति, उपलक्षणं चैतत्तेन मृषाऽदत्ताब्रह्मपरिग्रहनिशाभोजनान्यपि परिहरेत् इत्येतदेव ज्ञानिनः सारं यच्च कर्माश्रवेषु वर्तत इति । अपिच 'अहिंसासमयं चेव'त्ति अहिंसासमयमेव एतावदेव विजानीयात्, एतावतैव कार्यसिद्धेः, किम्बहुना ज्ञानाभ्यासेन पलालप्रायेण ?, + "किं ताए पढियाए ?, पयकोडीए पलालभूयाए । जत्थित्तियं न नायं, परस्स पीडा न कायव्वा ॥ १ ॥" इति गाथार्थः ॥ १० ॥

उक्ता मूलगुणा अथोत्तरगुणानाह—

+ किं तया पठितया ? पदकोट्या पलालभूतया । यत्रैतावन्न ज्ञातं परस्य पीडा न कर्त्तव्या ॥ १ ॥

वुसिए य विगयगेद्धी, आया[णीयं×]णं संरक्खए। चरियासणसिज्जासु, भत्तपाणे य अंतसो ॥ ११॥

व्याख्या—विविध—मनेकप्रकारं [illegible] उ[षितो-व्यु]षितः। पुनः कीदृग्भवति साधुः ? विगत-गृद्धिः–आहारादौ लौल्यतारहितः, + आदानीयं–ज्ञानदर्शनचारित्र[रूपं रत्न]त्रयं सम्यग्रक्षति, यथा यथा रत्नत्रयस्य शुद्धिर्भवति तथा तथा कुर्यादित्यर्थः। कथं चारित्रं पालितं भवति ? तद्दर्शयति—'चरियासणसिज्जासु'त्ति, साधुना हि सति प्रयोजने युगमात्रदृष्टिना गन्तव्यं, तथा सुप्रत्युपेक्षिते सुप्रमार्जिते चासने उपवेष्टव्यं, तथा 'शय्यायां' वसतौ संस्तारके वा सुप्रत्युपेक्षितप्रमार्जिते स्थानादि विधेयं, तथा भक्ते पाने चान्तशः सम्यगुपयोगवता भाव्यमिति गाथार्थः ॥ ११ ॥

पुनश्चारित्रशुद्ध्यर्थमुत्तरगुणानधिकृत्याह—

एतेहिं तिहिं ठाणेहिं, संजते सययं मुणी। उक्कसं जलणं णूमं, मज्झत्थं च विगिंचए ॥ १२ ॥

व्याख्या—एतानि त्रीणि स्थानानि, तद्यथा–ईर्यासमितिरित्येकं स्थानं १, आसनं शय्येत्यनेनादानभाण्डमात्रनिक्षेपणा-समितिरिति द्वितीयं स्थानं २, भक्तपानमित्यनेनैषणासमितिरुपात्ता, भक्तपानार्थं च संप्रविष्टस्य भाषणसम्भवाद्भाषासमिति-राक्षिप्ता भवति, सति चाहारे उच्चारप्रश्रवणादीनां सद्भावात् परिष्ठापनासमितिरप्यायातेत्येतच्च तृतीयं स्थानं ३, एतेषु त्रिषु-

---

× समीचीनोऽयं प्रतिभाति पाठो वृत्ति–दीपिकाकारयोरभिप्रायेण। + "आदीयते–प्राप्यते मोक्षो येन तदादानीयं–ज्ञानादि-त्रयं, तत्सम्यग्रक्षयेत्।" इति हर्षकुलगणिः।

स्थानेषु संयतो मुनिः 'उत्कर्षो' मानः +'ज्वलनः' क्रोधः 'णूमं'ति माया 'मध्यस्थो' लोभः, एतांश्चतुरोऽपि कषायान् मुनिः सदा 'विगिंचए'त्ति विवेचयेदात्मनः पृथक्कुर्यादिति गाथार्थः ॥ १२ ॥ पुनः साधुगुणानेवाह—

समिते उ सदा साहू, पंचसंवरसंवुडे। सितेहिं असिते भिक्खू, आमोक्खाय परिवएज्जासि त्तिबेमि॥

व्याख्या—एवंविधः साधुरामोक्षाय × परिव्रजेत्, समितिभिः समितः पञ्चप्रकारसंवरसंवृतः, तथा गृहपाशादिषु 'सिताः' बद्धाः गृहस्थाः, तेषु 'असितो' अबद्धः—गृहिषु मूर्च्छामकुर्वाणः, पङ्काधारपङ्कजवत् "जहा पोमं जले जायं, नोवलिप्पइ वारिणा" इति वचनात्। एवंविधः साधुः संयमानुष्ठानरतो भवेस्त्वमिति विनेयस्योपदेशः। इतिरध्ययनपरिसमाप्तौ, ब्रवीमीति गणधर एवमाह—यथा तीर्थकृतोक्तं तथैवाहं ब्रवीमि, न स्वमनीषिकयेति गाथार्थः ॥ १३ ॥

[इति श्रीपरमसुविहितखरतरगच्छविभूषणमहोपाध्याय–श्रीमत्साधुरङ्ग–गणिवर्यविहितायां]
श्रीसूत्रकृताङ्गदीपिकायां समयाख्यं प्रथममध्ययनं समाप्तमिति।

+ "ननु क्रोध एवादौ सर्वत्र स्थाप्यते, अत्र तु कथं मानः? इति चेदुच्यते—माने सत्यवश्यम्भावी क्रोधः, क्रोधे च सति मानः स्यान्न वेत्यर्थस्य दर्शनाय क्रमोल्लङ्घनमिति" हर्षकुलगणिः।

× "आमोक्षाय–अशेषकर्मापगमलक्षणमोक्षार्थं 'परि' समन्ताद्व्रजेः" इति बृहद्वृत्तौ।

अथ द्वितीयं वैतालीयाख्यं अध्ययनम्

अथ द्वितीयाध्ययनमारभ्यते. * तत्रेयमादिगाथा—

संबुज्झह किं न बुज्झह?, संबोही खलु पेच्च दुल्लहा। णो हु उवणमंति राईओ, नो सुलहं पुणरावि जीवियं ॥

व्याख्या—भगवनादितीर्थंकरो भरततिरस्कारागतसंवेगान् स्वपुत्रानुद्दिश्येदमाह, यदि वा सुरासुरनरोरगतिरश्चान् समुद्दिश्य प्रोवाच, यथा-सम्बुध्यध्वं यूयं-ज्ञानदर्शनचारित्रलक्षणे धर्मे बोधं कुरुत, यतः-पुनरेवंविधोऽवसरो दुरापः, किं न बुध्यध्वमित्यवश्यमेवंविधसामग्र्यवाप्तौ सत्यां सकर्णेन × तुच्छान् भोगान् परित्यज्य सद्धर्मे बोधो विधेय इति भावः । योऽस्मिन् भवे धर्मं न करिष्यति तस्य परभवे बोधिप्राप्तिर्दुर्लभा +, यतोऽतिक्रान्ता रात्रिः पुनर्नायाति " † जा जा वच्चइ रयणी, न सा पडिनियत्तई । " इति वचनात् । एवमतिक्रान्तं यौवनाद्यपि न वलति, संयमजीवितव्यमपि न सुलभमिति गाथार्थः ॥१॥

अथ सर्वजन्तूनामायुरनित्यमिति दर्शयति—

डहरा वुड्ढा य पासह, गब्भत्था वि चयंति माणवा। सेणे जह वट्टयं हरे, एवं आउखयम्मि तुट्टई ॥ २ ॥

---

* " तत्र प्रथमाध्ययने परसमयदोषाः स्वसमयगुणाश्चोक्ताः, तांश्च ज्ञात्वा यथा कर्म विदार्यते तथा बोधो विधेय इत्यनेन सम्बन्धेनागतस्यास्योद्देशकत्रयं, तत्र प्रथमोद्देशकस्येदमादिसूत्रं-" इति हर्षकुलगणिः ।

× प्राणिना । + " खलु शब्दस्यावधारणार्थत्वात्सुदुर्लभैव " इति सू. वृ. । † या या व्रजन्ति रजन्यो न ताः प्रतिनिवर्त्तन्ते ।

व्याख्या—‘ डहरा ’ बालाः सन्तो म्रियन्ते, एके वृद्धाः सन्तो गर्भस्थाश्च, पश्यत यूयं, के ? मानवाः, मानवा एवोपदेशार्हा इति मानवग्रहणं, एवमपायबाहुल्यात् सर्वास्वप्यवस्थासु प्राणी प्राणाँस्त्यजति +। अत्रैव दृष्टान्तमाह—यथा श्येनः पक्षिविशेषो ‘ वर्त्तकं ’ तित्तिरजातीयं ‘ हरेत् ’ व्यापादयेत्, एवं प्राणिनः प्राणान्मृत्युरपहरेदिति गाथार्थः ॥२॥ तथा च—

मायाहिं पियाहिं लुप्पती, नो सुलभा सुगती वि पेच्चउ। एयाइं भयाइं पेहिया, आरंभा विरमेज्ज सुव्वते ॥३॥

व्याख्या—कश्चिद्वराकः प्राणी × मातापित्रादिस्वजनैर्विलुप्यते, कोऽर्थः ? तेषां ममतावशात्संसारे भ्राम्यते, ततश्च तन्मूर्च्छोपगतो धर्मे नोद्यमं करोति, धर्मेण विना च सुगतिरपि न सुलभा, तदेवमेतानि ‘ भयानि ’ भयकारणानि दुर्गतिगमनादीनि ‘ पेहिय ’त्ति प्रेक्ष्य ‘ आरम्भात् ’ सावद्यानुष्ठानरूपाद्विरमेत्, को भावः ? एवं च ज्ञात्वा यो विवेकी सुव्रतो भवति स आरम्भान्निवर्त्तते—आरम्भे न रमते इति गाथार्थः ॥ ३ ॥ अनिवृत्तस्य दोषमाह—

जमिणं जगती पुढो जगा, कम्मेहिं लुप्पंति पाणिणो। सयमेव कडेहिं गाहती, नो तस्स मुच्चेज्जऽपुट्ठवं ॥४॥

व्याख्या—यद्यस्मादनिवृत्तानामिदं भवति—‘ जगति ’ पृथिव्यां ‘ पुढो ’त्ति पृथक्पृथग् यानि नरकादीनि स्थानानि सन्ति तेषु सावद्यानुष्ठानोपचितैः स्वकृतैः कर्मभिर्विलुप्यन्ते—नरकादियातनास्थानेषु भ्राम्यन्ते प्राणिनः स्वयमेव कृतैः कर्मभि-

---

+ “ तथाहि—त्रिपल्योपमायुष्कस्यापि पर्याप्त्यनन्तरमन्तर्मुहूर्त्तेनैव कस्यचिन्मृत्युरुपतिष्ठति । ” इति बृहद्वृत्तौ ।

× “ यो मातापितृमोहेन धर्मोद्यमं न कुरुते स वैरेव ” इति हर्षकुलगणिः ।

गच्छते नरकादिस्थानानि, न च तस्याशुभाचरितस्य कर्मणो विपाकेन अस्पृष्टो मुच्यते जन्तुः, नाभुक्तं कर्म विलीयते, तपोविशेषमन्तरेण दीक्षाप्रवेशादिना न तदपगमं विधत्त इति गाथार्थः ॥ ४ ॥ अधुना सर्वस्थानानित्यतां दर्शयितुमाह—

देवा गंधव्वरक्खसा, असुरा भूमिचरा सरीसिवा। राया नरसिट्ठिमाहणा, ठाणा ते वि चयंति दुक्खिया ॥५॥

व्याख्या—सुगमैव, × नवरमेते पूर्वोक्ताः सर्वेऽपि स्वकीयानि स्थानानि दुःखिताः सन्तस्त्यजन्ति, यतः सर्वेषामपि प्राणिनां प्राणपरित्यागे महद्दुःखं समुत्पद्यते इति गाथार्थः ॥ ५ ॥ किञ्च—

कामेहि य संथवेहि य, कम्मसहा कालेण जंतवो। ताले जह बंधणच्चुते, एवं आउखयम्मि तुट्टई ॥६॥

व्याख्या—कामैर्विषयादिभिः संस्तवैर्मातृपितृश्वशुरादिजनितैः, तत्रासक्ताः सन्तः कर्मविपाकसहिष्णवो भवन्ति, क? काले +, के? जन्तवः, को भावः? विषयादिष्वासक्ताः जन्तवः कर्मविपाककाले कर्मविपाकमनुभवन्ति, परं न कोऽपि स्वजनादिर्दुःखात्त्रायते, यथा च तालफलं 'बन्धनाद्' वृन्तात्च्युतं सदवश्यं पतत्येव, एवं असावपि जन्तुः स्वायुषः क्षये 'त्रुट्यति' जीविताच्यवते इति गाथार्थः ॥ ६ ॥ अपि च—

× "देवा—ज्योतिष्कसौधर्माद्या, गन्धर्वराक्षसयोरुपलक्षणार्थत्वादष्टप्रकारा व्यन्तराः, असुरा—दशधा भवनपतयः, ये चान्येऽपि भूमिचराः, सरिसृपास्तिर्यञ्चस्तथा राजानश्चक्रिहरिप्रमुखा, नराः—सामान्यमनुष्याः, श्रेष्ठिनः—पुरमहत्तरा ब्राह्मणाश्च।" इति हर्ष०।

+ सप्तम्यर्थे तृतीयाऽत्र मूले, बृहद्वृत्तिकारेण तु तृतीयैव व्याख्याता।

जेयावि बहुस्सुते सिया, धम्मिय माहण भिक्खुए सिता।
अभिनूमकडेहिं मुच्छिते, तिव्वं ते कम्मेहिं किच्चती ॥ ७ ॥

व्याख्या—ये चापि बहुश्रुताः धार्मिका ब्राह्मणाः भिक्षादाः × स्यु–र्भवेयुः, तेऽपि 'अभि' समन्तात् 'नूम' त्ति कर्म माया वा, तत्कृतैरसदनुष्ठानैर्मूर्च्छितास्तीव्रमत्यर्थं कर्मभिरशुभैश्छिद्य[कृत्य]न्ते–पीडयन्ते जन्तव इति गाथार्थः ॥ ७ ॥

साम्प्रतं ज्ञानदर्शनचारित्रमन्तरेण नापरो मोक्षमार्गोऽस्तीति दर्शयन्नाह—

अह पास विवेगमुट्ठिते, अवितिण्णे इह भासई धुवं। णाहिसि ? आरं कओ परं, वेहासे कम्मेहिं किच्चती॥

व्याख्या—'अह पास' त्ति + शिष्यं प्रति गुरुर्वक्ति यथा–भो शिष्य ! त्वं पश्य–कश्चित्तीर्थिको 'विवेकं' परिग्रह-परित्यागं कृत्वा 'उत्थितः' प्रव्रज्याविषये सावधानोऽभूत्, परं सम्यक्परिज्ञानाभावादवितीर्णः–संसारसमुद्रात्स्वयं न तीर्णस्तथापि भाषते–अस्मदीयादेवाचारान्मुक्तिरिति, ततश्चाहो !! शिष्य ! तन्मार्गं प्रपन्नस्त्वं 'आरं' इहलोकं 'परं' परलोकं कथं ज्ञास्यसि ? अपितु न ज्ञास्यसि, ततश्च इहलोकपरलोकभ्रष्टः सन् 'वेहास' त्ति अन्तराले स्थित एव स्वकृतैर-शुभैः कर्मभिः 'कृत्यते' पीड्यते इति गाथार्थः ॥ ८ ॥

पुनः शिष्य आह–ननु तीर्थिका अपि निष्परिग्रहास्ततश्च तत्कथं न मोक्षावाप्तिरित्येतदाशंक्याह—

× भिक्षामहीतुमिच्छुकाः । + 'अथेत्यनन्तर'मिति बृहद्वृत्तौ ।

जइ वि य नगिणे किसे चरे, जइ वि य भुंजइ माससंतसो ।
जे इह मायाइ मिज्जई, आगंता गब्भायऽणंतसो ॥ ९ ॥

व्याख्या—यद्यपि कश्चित्तापसादिस्त्यक्तपरिग्रहो नग्नः कृशश्च चरेत्–प्रव्रज्यानुष्ठानं कुर्यात् । ' जइ वि य भुंजइ माससंतसो ' यद्यपि भुङ्क्ते मासेन तथाप्यान्तरकषायापरित्यागान्न मुच्यते, य इह तीर्थिको मायया मीयते, एतावता कषायैर्युज्यते, स गर्भाद्गर्भमेष्यति ' अनन्तशो ' निरवधिकं कालं, अग्निशर्मवत्संसारे पर्यटतीति गाथार्थः ॥ ९ ॥

यतो मिथ्यादृक्कृतकष्टानुष्ठानेऽपि न मोक्षावाप्तिः, अतो मदुक्त एव मार्गे स्थेयमेतद्गर्भमुपदेशं दातुमाह—

पुरिसोरम पावकम्मुणा, पलियंतं मणुयाण जीवियं ।
सन्ना इह काममुच्छिया, मोहं जंति असंवुडा नरा ॥ १० ॥

व्याख्या—हे पुरुष ! असदनुष्ठानादुपरम–निवर्तस्व, यतः–पुरुषाणां जीवितं सुबह्वपि त्रिपल्योपमान्तं, संयमजीवितं पल्योपमस्यान्त–र्मध्ये वर्तते, तदप्यूनं पूर्वकोटिमितं, तदपि गतमेव जानीहि, एतावद्विज्ञाय यावज्जीव्यते तावत्सदनुष्ठानेन सफलं कर्त्तव्यं, ये पुनर्भोगस्नेहपङ्के मग्नाः कामेषु चाप्युपपन्नास्ते नरा असंवृत्ताः सन्तो मोहं यान्ति–हिताहितप्राप्तिपरिहारे मुह्यन्तीति गाथार्थः ॥ १० ॥ यद्येवं ततः किं कर्त्तव्यं ? तदेवाह—

ज[ययं]इतं (?) विहराहि जोगवं, अणुपाणा पंथा दुरुत्तरा ।

अणुसासणमेव पक्कमे, वीरेहिं सम्मं पवेदितं ॥ ११ ॥

व्याख्या—स्वल्पं जीवितव्यमवगम्य विषयांश्च क्लेशप्रायानवगम्य छित्वा गृहपाशबन्धनं 'यतमानो' यत्नं कुर्वन् प्राणिनामनुपतापेन 'विहर' उद्युक्तविहारी भव। कथम्भूतः सन्? 'योगवान्' संयमयोगवान् गुप्तः समितिगुप्तः, किमित्येवं? यतः—पन्थाः सूक्ष्मप्राणिभिराक्रान्तस्ततस्तस्मिन् पथि जीवविराधनामन्तरेण विहरणं दुष्करं, अत एवेर्यासमितियुक्तो व्रज, एवमन्यास्वपि समितिषु सततोपयुक्तेन भवितव्यं, ['अनुशासनमेव'] यथागममेव—सूत्रानुसारेण संयमं पालयेदेतच्च सर्वैर्वीरै—रर्हद्भिः सम्यक्प्रवेदितं ॥ ११ ॥ अथ के ते वीरा? इत्याह—

विरया वीरा समुट्ठिया, कोहकायरियाइपीसणा, पाणे ण हणंति सव्वसो, पावाओ विरताभिनिव्वुडा ॥

व्याख्या—वीराः के उच्यन्ते? ये हिंसादिपापेभ्यो निवृत्ताः, पुनः कीदृशाः? 'समुत्थिताः' सम्यगारम्भपरित्यागेन समुत्थिताः क्रोधकातरिकादिपीषणाः क्रोधग्रहणान्मानो गृहीतः, माया—कातरिका, तद्ग्रहणाल्लोभो गृहीतस्तदपनेतारः, तथा प्राणान् घ्नन्ति 'सर्वशः' मनोवाक्कायकर्मभिः, पापाच्च सावद्यानुष्ठानरूपान्निवृत्ताः, अत एवाभिनिर्वृताः—क्रोधाद्युपशमेन शीतीभूताः, ईदृशा वीरा इति गाथार्थः ॥ १२ ॥ पुनरप्युपदेशान्तरमाह—

नवि ता अहमेव लुप्पए, लुप्पंती लोगंसि पाणिणो ।
एवं सहिए य पासए, अणिहे से पुट्ठे अहियासए ॥ १३ ॥

व्याख्या–परीषहोपसर्गैरभिद्रुतः सन् एवं विचिन्तयेत्, न च तावत् अहमेवैकः परीषहोपसर्गैर्लुप्ये–पीड्ये, अपि त्वस्मिँल्लोके अन्येऽपि प्राणिनस्तिर्यग्मनुष्यादयोऽतिदुस्सहैर्दुःखैर्लुप्यन्ते–पीड्यन्ते, परं तेषां सम्यग् विवेकाभावाच्च काऽपि निर्जरा, एवं [ज्ञानादिभिः] सहितो वा आत्महितः सन् पश्येत्–कुशाग्रीयया बुद्ध्या अनन्तरोदितं पर्यालोचयेत्। तथा 'अणिहे'त्ति क्रोधादिभिरपीडितः सन्–गजसुकुमालादिवन्महासत्त्वः परीषहैः स्पृष्टोऽपि तानधिसहेत–मनःपीडां न विदध्यादिति। अथवा 'अनिहे' इति तपःसंयमे परीषहसहने वा अनिगूहितबलवीर्यो भूयादिति गाथार्थः ॥ १३ ॥ अपि च—

धुणिया कुलियं व लेववं, किसए देहम[णसणाईहिं+]णासणा इह ।
अविहिंसामेव पव्वए, अणुधम्मो मुणिणा पवेदितो ॥ १४ ॥

व्याख्या–यथा कुड्यं गोमयादिलेपेन सलेपस्सन् शाड्य[जाघट्य]मानं लेपापगमात्कृशं भवति, एवं हे मुने! त्वमपि 'धूत्वा' विधूय लेपं कुड्यवत् देहं [अनशनादिभिः] कृशयेद्–अपचितमांसशोणितं विदध्यात्तदपचयाच्च कर्मणामपचयो भवतीति भावः, तथा [न विहिंसा] अ[वि]हिंसा, तामेव प्रकर्षेण व्रजे–दहिंसाप्रधानो भूयादित्यर्थः। 'अणुधम्मो' मोक्षं प्रत्यनुकूलो धर्मो 'मुनिना' सर्वज्ञेन 'प्रवेदितः' कथित इति गाथार्थः ॥ १४ ॥ किञ्च—

सउणी जह पंसुगुंडिया, विहुणिय धंसयती सियं रयं। एवं दविओवहाणवं, कम्मं खवति तवस्सिमाहणे॥१५

+ हर्षकुलीयदीपिकाऽऽदर्शेऽयं पाठो युज्यतेऽपि चैवंविध एव वृत्त्याद्यभिप्रायतः ।

व्याख्या–‘ शकुनिका ’ पक्षिणी यथा ‘पांशुना’ रजसा अवगुण्ठिता सती अङ्गं ‘विधूय’ कम्पयित्वा तद्रजः ‘ सितं ’ बद्धं ‘ध्वंसयति’ अपनयति, एवं तपस्वी माहनो+‘ दविनो ’ द्रव्यो–भव्यो मुक्तिगमनयोग्यः ‘ उपधानवान् ’ तपोयुक्तः कर्म ज्ञानावरणीयादिकं क्षपयति–अपनयतीति गाथार्थः ॥ १५ ॥ अथानुकूलोपसर्गमाह—

उट्ठियमणगारमेसणं, समणं ठाणठितं तवस्सिणं ।

डहरा वुड्ढा य पत्थए, अवि सुस्से ण य तं लभे जणा ॥ १६ ॥

व्याख्या—‘ अनगारं ’ श्रमणं संयमोत्थानेन एषणां गत्युत्थितं–स्थितं उत्तरोत्तरविशिष्टतपोनिष्टप्तदेहं स्थानस्थितं कदाचित् ‘डहराः’ पुत्रनप्त्रादयो ‘ वृद्धाः ’ मातृपितृप्रभृतयः ‘ उन्निष्क्रामयितुं ’ प्रव्रज्यां मोचयितुं प्रार्थयेयुस्ते तं साधुमेवं वदेयुः–वयं भवता प्रतिपाल्याः, न त्वामन्तरेण कोऽपि नः पालयिता, एवं च ते भणन्तोऽपि जनाः पुत्रादयः अपि ‘शुष्येयुः’ श्रमं गच्छेयुर्न च तं साधुं विदितपरमार्थं ‘ लभेरन् ’ नैवात्मवशं विदध्युरिति गाथार्थः ॥ १६ ॥ किञ्च—

जइ कालुणियाणि कासिया, जइ रोयंति य पुत्तकारणा ।

दवियं भिक्खुं समुट्ठियं, नो लब्भंति ण संठवित्तए ॥ १७ ॥

व्याख्या—यद्यपि ते मातृपितृपुत्रकलत्रादयः ‘ कारुण्यानि ’ करुणाप्रधानानि वचांसि अनुष्ठानानि कुर्युः ‘ रोयंति ’त्ति

+ “ मा वधीरिति प्रवृत्तिर्यस्य स प्राकृतशैल्या माहनः ” इति हर्षकुलगणिः ।

६

तथा रुदन्ति पुत्रनिमित्तं, यथा—कुलवर्द्धनमेकं पुत्रं समुत्पाद्य एवं गच्छेः, तथापि ते भिक्षुं 'द्रव्यं' मुक्तियोग्यं 'समुत्थितं' संयमोत्थानेन न लभन्ते—न शक्नुवन्ति प्रव्रज्यातो भ्रंशयितुं नापि संस्थापयितुं—गृहस्थभावे, न द्रव्यलिङ्गाच्च्यावयितुमिति गाथार्थः ॥ १७ ॥ अपि च—

जइ वि[य] कामेहि लाविया, जइ णेजाहि णं बंधिउं घरं ।
जति जीवति नावकंखए, नो लब्भंति न संठवित्तए ॥ १८ ॥

व्याख्या—यद्यपि ते साधुं कामभोगैर्लोभयन्ति यदि वा बध्वा गृहं नयन्ति, एवमनुकूलप्रतिकूलोपसर्गैः पीडितोऽपि जीवितं न वाञ्छति, किन्तु मरणमाद्रियते, परं नासंयमे प्रवर्तते, तथापि ते स्वजनास्तं साधुं 'नो लब्भंति' न लभन्ते—न प्राप्नुवन्त्यात्मसात्कर्तुं नापि गृहस्थभावेन संस्थापयितुमलमिति गाथार्थः ॥ १८ ॥ किञ्च—

सेहंति य णं ममाइणो, माया पिया य सुया य भारिया ।
पोसाहि णे पासओ तुमं, लोगं परं पि जहासि पोसणे ॥ १९ ॥

व्याख्या—यद्यपि ते मातापित्रादयः 'ममाइणो' त्ति ममत्ववन्तः—स्नेहालवः 'ण' मित्यलङ्कारे 'सेहंति' त्ति शिक्षयन्ति । कथं शिक्षयन्तीत्याह—पश्यानवेक्षितार्थदर्शी एवं 'पश्यकः' सूक्ष्मदर्शी सश्रुतिकः पश्य नो—ऽस्मान् अत्यन्तदुःखितान् पोषकाभावात् तेन नः 'पोषय' पालय, अन्यथा इहलोकपरलोकं जहासि—इहलोकपरलोकभ्रष्टो भविष्यसि, अस्मत्पालनेन

पुण्यवासितैरवेति गाथार्थः ॥ १९ ॥

एवं तैरुपसर्गिताः सन्तः केचित्कातराः कदाचिदेतत्कुर्युरित्याह—

अन्ने अन्नेहिं मुच्छिया, मोहं जंति नरा असंवुडा ।
विसमं विसमेहिं गाहिया, ते पावेहिं पुणो पगब्भिया ॥ २० ॥

व्याख्या—'अन्ये' अल्पसत्त्वाः कातराः प्राणिनः अन्यैः–मातापित्रादिभिर्मूर्च्छिताः–ममत्ववन्तः असंवृता नराः, एवम्भूता मोहं यान्ति–सदनुष्ठाने मुह्यन्ति, ततश्च ते विषमै–रसंयतैर्गृहस्थैर्विषमं–असंयमं ग्राहिताः सन्तः पुनः पापकर्मणि प्रवृत्ताः 'प्रगल्भिताः' धृष्टतां गताः सन्तः पापं कुर्वन्तो न लज्जन्त इति गाथार्थः ॥ २० ॥ ततः किं कर्तव्यमित्याह—

तम्हा दवि इक्ख पंडिए, पावातो विरए अभिनिव्वुडे ।
पणता वीरा महावीहिं, सिद्धिपहं णेयाउयं धुवं ॥ २१ ॥

व्याख्या—यतो मातापित्रादिमूर्च्छिताः पापकर्मसु प्रगल्भा भवन्ति, तस्मात्त्वं 'पण्डितः' सदसद्विवेकयुक्तः 'द्रव्यभूतो' रागद्वेषरहितो मुक्तिगमनयोग्यः सन् ईक्षस्व–तद्विपाकं पर्यालोचय, पापेभ्यो विरतः 'अभिनिर्वृतः' क्रोधादिपरित्यागाच्छीतीभूतः प्रणताः (प्राप्ताः) वीराः महावीथिं 'सिद्धिपथं' ज्ञानादिमोक्षमार्गं 'ध्रुवं' अव्यभिचारिणं अवगम्य स एव मार्गोऽनुष्ठेयो, नासदनुष्ठानमनल्पैर्भाव्यमिति गाथार्थः ॥ २१ ॥ पुनरप्युपदेशदानपूर्वकमुपसंहरन्नाह—

वेयालियमग्गमागओ, मणवयसा काएण संवुडो ।

चिच्चा वित्तं च णायओ, आरंभं च सुसंवुडे चरे ॥ २२ ॥ त्ति बेमि ॥

व्याख्या—कर्मविदारणसमर्थं मार्गमागतो भूत्वा त्वं मनोवाक्कायसंवृतः पुनस्त्यक्त्वा वित्तं ज्ञातीयांश्च स्वजनान् सावद्यारम्भं च सुसंवृतः संयमानुष्ठानं चरेदिति गाथार्थः ॥ २१ ॥ ब्रवीमीति पूर्ववत् ।

[इति] वैतालीयस्य प्रथम, [उद्देशकः], प्रथमानन्तरं द्वितीयः आरभ्यते—

प्रथमे उद्देशके भगवता श्रीऋषभस्वामिना स्वपुत्राणां देशना प्रतिपादिता, इहापि सैवाभिधीयते, तत्रेयमादिमा गाथा—

तयसं व जहाइ से रयं, इति संखाय मुणी ण मज्जती ।

गोयन्नतरे य माहणे, अहऽसेयकरी अन्नेसि इंखिणी ॥ १ ॥

व्याख्या—यथोरगः स्वां ‘त्वचं’ निर्मोकं परित्यागार्हत्वात्परित्यजति, न तत्र प्रतिबन्धं विधत्ते, तथा साधुरपि रज इव रजो-ऽष्टप्रकारं कर्म अकषायित्वेन परित्यजति, एवं कषायाभावात्कर्माभावः, इति ‘सङ्ख्याय’ ज्ञात्वा मुनिर्न माद्यति-मदं न करोति, कथं ? गोत्रेण काश्यपादिना, अन्यतरग्रहणेन शेषाण्यपि मदस्थानानि त्यजेत् ‘माहनः’ साधुः, न केवलं मदं त्यजति, अश्रेयस्करी—पापकारिणि [‘इंखिणि’त्ति] निन्दा, साऽप्यन्येषां न कार्येति गाथार्थः ॥ १ ॥

अथ परनिन्दादोषमधिकृत्याह—

जो परिभवई परं जणं, संसारं परियत्तई चिरं ।
अदु इंखिणीया उ पाविया, इति संखाय मुणी ण मज्जति ॥ २ ॥

व्याख्या—यो ह्यविवेकी परं जनं पराभवति–हीलयति स पुमान् तत्कृतेन कर्मणा चिरं संसारोदधौ 'परिवर्तते' परिभ्रमति 'अदु'त्ति अ[थ]तः परपरिभवादवश्यं संसारे भ्रमणं, अतः 'इंखिणी' निन्दा 'पापिकैव' सदोषैव, अथवा 'इंखिणी' उत्स्थानादधमस्थाने पातयति, इत्येवं 'सङ्ख्याय' ज्ञात्वा मुनिर्जात्यादिभिर्यथाऽहमुत्तमवंशजः श्रुतवांस्तपस्वी, असौ तु मत्तो हीन एवेति न माद्यति–न मदं विधत्त इति गाथार्थः ॥ २ ॥ अथ यद्विधेयं तद्दर्शयितुमाह—

जेयावि अणायगे सिया, जेवि य पेसगपेसए सिया ।
जे मोणपदं उवट्ठिए, णो लज्जे समयं सया चरे ॥ ३ ॥

व्याख्या–अन्यस्तावत्तिष्ठतु, यः कोऽप्यनायकः–यस्यापरः प्रभुः कोऽपि नास्ति, एवंविधश्चक्रवर्त्यादिकः स्यात्–भवेत्, यश्चापि प्रेष्यस्यापि प्रेष्य–स्तस्यैव राज्ञः कर्मकरस्यापि कर्मकरः, सोऽपि येन्मौनपदं–संयमस्तं समाश्रितः सोऽप्यलज्जमान उत्कर्षमकुर्वन् सर्वाः क्रियाः परस्परतो वन्दनप्रतिवन्दनादिका विधत्ते । इदमुक्तं भवति–चक्रवर्तिनाऽपि मौनीन्द्रपदमुपस्थितेन पूर्व[प्रव्रजित]मात्मप्रेष्यमपि वन्दमानेन लज्जा न विधेया [इतरेण चोत्कर्षः], एवं सामान्येनापि विनयवैयावृत्यादिकाः सर्वाः क्रियाः कार्याः, एवं समभावं सदा भिक्षुश्चरेत्–संयमोद्युक्तो भवेदिति गाथार्थः ॥ ३ ॥

क पुनर्व्यवस्थितेन लज्जामदौ न विधेयाविति दर्शयितुमाह—

अन्नयरंमि संजमे, संसुद्धे समणे परिव्वए ।
जे आवकहासमाहिए, दविए कालमकासि पंडिए ॥ ४ ॥

व्याख्या—यः शुद्धः श्रमण-स्तपस्वी सामायिकादिके अन्यतरे +संयमे प्रवर्तमानः समचित्तः लज्जामदपरित्यागेन प्रव्रज्यां यावज्जीवं प्रतिपालयति, कियत्कालं ? यावत्कालं कथा श्रूयन्ते, मरणं यावत्समाधिमान् 'द्रव्यः' रागद्वेषरहितो यदि कालं करोति [तदा] स पण्डित इति गाथार्थः ॥ ४ ॥ अथ किमालम्ब्यैतद्विधेयमित्युच्यते—

दूरं अणुपस्सिया मुणी, तीतं धम्ममणागयं तहा ।
पुट्ठे फरुसेहिं माहणे, अविहण्णु समयंसि रीयती ॥ ५ ॥

व्याख्या—तथा मुनिर्दूरवर्तित्वाद्दूरं-मोक्षं अनुदृश्य-यथा न धर्मं विना मोक्ष इति पर्यालोचयति, तथा अतीतं धर्म-प्रभावं जीवानां उच्चावचगतिस्थानलक्षणं, तथा अनागतं च धर्मस्वभावं अनागतभाविनीं धर्मप्रभावात्सुगतिं च पर्यालोच्य लज्जामदौ न विधत्ते । कथम्भूतो मुनिः ? स्पृष्टः परुषैः परीषहोपसर्गैः 'अविहण्णु' त्ति अपि मार्यमाणः स्कन्दकाचार्यशिष्य-गणवत्समये संयमे रीयत इति गाथार्थः ॥ ५ ॥ पुनरप्युपदेशान्तरमाह—

+ "संयमस्थानानां षट्स्थानपतितत्वादन्यतरस्मिन् संयमस्थाने, सामायिकच्छेदोपस्थापनीयादौ वा सं०" इति हर्षकुलगणिः ।

पण्णसमत्ते सया जए, समताधम्ममुदाहरे मुणी ।
सुहुमे उ सदा अलूसए, णो कुज्झे णो माणि माहणे ॥ ६ ॥

व्याख्या—'प्रज्ञासमाप्तः' पटुप्रज्ञः (अथवा) 'पण्हसमत्थे' प्रश्नविषये प्रत्युत्तरदानसमर्थो वा साधुः सदा जयेत्कषायादिकं (सया) समतया अहिंसालक्षणं धर्ममुदाहरेत्-कथयेन्मुनिः 'सूक्ष्मे' संयमे सदा 'अलूषको' अविराधको हन्यमानो न कुप्येद् पूज्यमानो नापि 'मानी' गर्वितः स्यान्माहन इति गाथार्थः ॥ ६ ॥ अपि च—

बहुजणनमणम्मि संवुडे, सवट्ठेहि नरे अणिस्सिए ।
हरएव सया अणाविले, धम्मं पादुरकासि कासवं ॥ ७ ॥

व्याख्या—बहुजननमनो धर्मः, किमुच्यते ? बहुभिर्जनैरात्मीयात्मीयाभिप्रायेण यथाऽभ्युपगमप्रशंसया स्तूयते-प्रशस्यते, येन यादृशो धर्मः स्वीकृतोऽस्ति स तमेव धर्मं श्लाघते । सर्वोऽप्यात्मानं धार्मिकं मन्यते +, अत एव बहुजननमनो धर्मस्तस्मिन् 'संवृतः' समाहितः सन् 'नरः' पुमान् सर्वबाह्याभ्यन्तरपरिग्रहे अप्रतिबद्धः सन् धर्मं 'प्रादुरकार्षीत्' प्रकाशयेदित्यर्थः । वर्तमाने भूतनिर्देशश्छान्दसत्वात् । कथम्भूतः ? ह्रद इव स्वच्छाम्भसा भृतः 'अनाविलो' जलचरजीव-संक्षोभेणाप्यकलुषः, एवंविधः साधुः क्षान्त्यादिलक्षणं दशविधं 'काश्यपं' तीर्थंकरसम्बन्धिनं धर्मं प्रकाशयेदिति गाथार्थः ॥ ७ ॥

+ अत्राभयकुमारकृतपरीक्षापुण्यपापोपरि धवलेतरप्रासादकथा ज्ञेया ।

अथ मदुत्सननमने धर्मे व्यवस्थितो यादृशं धर्मं प्रकाशयति तद्दर्शयितुमाह—

बहवे पाणा पुढो सिया, पत्तेयं समयं समीहिया। जे मोणपदं उवट्ठिते, विरतिं तत्थ अकासि पंडिए ॥८॥

व्याख्या—बहवो-ऽनन्ताः प्राणिनः पृथक् पृथिव्यादिभेदेन सूक्ष्मबादरपर्याप्तापर्याप्तभेदेन नरकगत्यादिभेदेन वा संसारमाश्रिताः, तत्रस्ते सर्वेऽपि प्राणिनः सुखाभिलाषिणो दुःखद्विष इति पर्यालोच्य यस्तेषु समतां जानाति—आत्मसाम्यं गणयति स साधुः, यः पुनर्मौनीन्द्रपदमुपस्थितस्तेषु प्राणव्यपरोपणरूपादारम्भाद्विरतिं करोति स पण्डित इति गाथार्थः ॥८॥ अपिच—

धम्मस्स य पारए मुणी, आरंभस्स य अंतए ठिए। सोयंति य णं ममाइणो, णो लब्भंति णियं परिग्गहं ॥९॥

व्याख्या—स पूर्वोक्तगुणयुक्तः साधुर्धर्मस्य श्रुतचारित्ररूपस्य पारगः सिद्धान्तपारगामी, स एव सिद्धान्ततत्त्ववेत्ता सम्यक् चारित्रानुष्ठायी वा, चारित्रमधिकृत्याह—'आरम्भस्य' सावद्यानुष्ठानरूपस्य 'अन्ते' प्रान्ते स्थित इति, आरम्भाभिवृत्त इति भावः, एवंविधो मुनिर्भवति। ये पुनर्नैवंविधा भवन्ति ते अकृतसुकृताः सन्तो मरणे दुःखे वा समुपस्थिते आत्मानं शोचन्ति, यदि वा इष्टमरणादावर्थनाशे वा 'ममाइणो'त्ति ममेदमहमस्य स्वामीत्येवमध्यवसायिनः शोचन्ति, ततश्च ते शोचमाना अपि गतं मृतं नष्टं परिग्रहं आत्मीयमभीष्टं वा न लभन्ते—न प्राप्नुवन्ति, यदि वा धर्मस्य पारगं मुनिं आरम्भाभिवृत्तं स्वजना मातापित्रादयो ममत्वयुक्ताः स्नेहालवः शोचन्ति, परं न च तं साधुं निजम्—आत्मीय-परिग्रहबुद्ध्या गृहीतमपि लभन्ते, नात्मसात्कुर्वन्तीति गाथार्थः ॥ ९ ॥ तदेवाह—

इह लोगदुहावहं विऊ, परलोगे य दुहं दुहावहं। विद्धंसणधम्ममेव तं, इति विज्जं कोऽगारमावसे? ॥ १० ॥

व्याख्या—इहलोकेत्यादि, इहलोके परलोके हिरण्यस्वजनादिममत्वोत्पादितकर्मजं दुःखं भवति, तदुपादाने कर्मोपादानं, तथा हिरण्यादिपरिग्रहमुक्ता स्वीक्रियते, परं विध्वंसनधर्म—न चिरावस्थायि, एवं जानन् कः सकर्णो मनुष्यः 'अगारवासं' गृहवासमावसेत्? यतः—"दाराः परिभवकाराः, बन्धुजनो बन्धनं विषं विषयाः। कोऽयं जनस्य मोहो?, ये रिपवस्तेषु सुहृदाशा ॥ १ ॥" इति गाथार्थः ॥ १० ॥

पुनरप्युपदेशान्तरमाह—

महता पलिगोव जाणिया, जावि य वंदणपूयणा इहं। सुहुमे सल्ले दुरुद्धरे, विउमंता पजहेज्ज संथवं ॥ ११ ॥

व्याख्या—इह साधोः स्वजनाद्यभिष्वङ्गो भावतः 'पलिगोपो' कर्दमस्तत्समो जानीहि, यथा महान् पङ्कः प्राणिनां दुरुत्तरस्तथा स्वजनादिस्नेहः, इति ज्ञात्वा राजादिनिकायस्य[या] वन्दनापूजना साऽपि साधोः पलिमन्थकरी—स्वाध्यायादिविघ्नकरी मन्तव्या, तथा साधुना कर्मोपशमजं फलमित्येवं मत्वा राजादिवन्दनपूजनादौ उत्सेको न विधेयः। किमिति? यतो गर्वात्मकमेतद् दुरुद्धरं सूक्ष्मं शल्यं वर्तते, इति ज्ञात्वा विद्वान् साधुस्तेषु 'संस्तवं' परिचयं प्रजह्यात्—त्यजेदिति गाथार्थः ॥ ११ ॥

अत्र नागार्जुनीया अप्येवं पठन्ति + —

+ नेयं निम्नोल्लिखिता गाथा व्याख्याता हर्षकुलगणिभिः।

पलिमंथमहं वियाणिया, जावि य वंदणपूयणा इहं। सुहुमं सल्लं दुरुद्धरं, तं पि जिणे एएण पंडिए ॥११॥

अस्या चायमर्थः—साधोः स्वाध्यायध्यानपरस्यैकान्तनिःस्पृहस्य योऽपि चायं परैर्वन्दनापूजनादिकः सत्कारः क्रियते, असावपि सद्गतेः सदनुष्ठानस्य वा महान् 'पलिमन्थो' विघ्नः, आस्तां तावत्स्वजनादिष्वभिष्वङ्गः—रागस्तमित्येवं परिज्ञाय सूक्ष्मं शल्यं दुरुद्धरं चातस्तमपि जह्यात्—अपनयेत्पण्डित 'एतेन' वक्ष्यमाणेनेति गाथार्थः ॥ ११ ॥

एगे चरे ठाणमासणे, सयणे एगे समाहिए सिया। भिक्खू उवहाणवीरिए, वइगुत्ते अज्झत्तसंवुडे ॥१२॥

व्याख्या—तथा भिक्षुरेक एव द्रव्यत एकाकिविहारी भावतो रागद्वेषरहितश्चरेत्, एवं स्थानासनशयनादिष्वप्येकाक्येव 'समाहितो' धर्मादिध्यानयुक्तः स्यात्, सर्वास्वप्यवस्थासु रागद्वेषविरहात्समाहित एव स्यात्। 'उपधाने' तपस्यनिगूहितबलवीर्यो 'वाग्गुप्तः' सुपर्यालोचिताभिधायी 'अध्यात्मं' मनस्तेन संवृतो भिक्षुर्भवेदिति गाथार्थः ॥ १२ ॥ किञ्च—

णो पिहे णावपंगुणे, दारं सुन्नघरस्स संजए। पुट्ठे ण उदाहरे वयं, ण समुच्छे णो संथरे तणं ॥१३॥

व्याख्या—तथा भिक्षुः क्वापि शयनार्थी शून्यगृहस्थितो द्वारं कपाटादिना न स्थगयति 'णावपंगुणे'त्ति नोद्घाटयेत्, तत्रस्थोऽन्यत्र वा स्थितः केनचिद्धर्मादिकं मार्गादिकं वा पृष्टः सन् सावद्यां वाचं नोदाहरेत्—न ब्रूयात्, जिनकल्पिकादिर्निरवद्यामपि न ब्रूयात्, तथा न समुच्छिन्द्यात्—तृणानि कचवरं वा प्रमार्जनेन नापनयति, नापि स्वापार्थी कश्चिदाभिग्रहिकस्तृणादिकं संस्तरेत्—तृणैरपि संस्तारकं न कुर्यात् किं पुनः कम्बलादिना, अन्योऽपि साधुः शुषिरतृणं न संस्तरेदिति

गाथार्थः ॥ १३ ॥ तथा—

जत्थऽत्थमिए अणाउले, समविसमाइं मुणी हियासए ।

चरगा अदुवा वि भेरवा, अदुवा तत्थ सरीसिवा सिया ॥ १४ ॥

व्याख्या—तथा भिक्षुर्यत्रैव सूर्योऽस्तमुपैति तत्रैव तिष्ठति, तथा 'अनाकुलः' परीषहोपसर्गैरनाकुलो भवति, मुनिर्यथावस्थितसंसारस्वरूपज्ञः समविषमाणि शयनासनादीनि अनुकूलप्रतिकूलानि 'सम्यग्' रागद्वेषरहिततयाऽधिसहेत । तथा 'चरकाः' दंशमशकादयस्तथा 'भैरवा' भयानका अशिवास्तथा 'सरीसृपाः' सर्पादयो भवेयुस्तत्कृतांश्चोपसर्गान् परीषहांश्च सम्यगधिसहेतेति गाथार्थः ॥ १४ ॥

साम्प्रतं त्रिविधोपसर्गाधिसहनमधिकृत्याह—

तिरिया मणुया य दिव्वगा, उवसग्गा तिविहाऽहियासिया ।

लोमादीयंपि न हरिसे, सुन्नागारगते महामुणी ॥ १५ ॥

व्याख्या—तिर्यङ्मनुष्यदेवकृतानुपसर्गानधिसहेत + रोमोद्गममपि न कुर्यात्, × दृष्टिमुखविकारादिपरिग्रहः, क्व स्थितः ? शून्यागारगतः—शून्यगृहव्यवस्थितः, उपलक्षणार्थत्वात्पितृवनादिस्थितो महामुनिर्जिनकल्पिकादिरिति गाथार्थः ॥१५॥ किञ्च—

+ 'लोमादिकमपि न हर्षेत् भयेन' । × 'आदिग्रहणात् दृष्टि०' इति बृहद्वृत्तौ ।

नो अभिकंखेज्ज जीवियं, नो वि य पूयणपत्थए सिया ।
अज्झत्थमुविंति भेरवा, सुन्नागारगयस्स भिक्खुणो ॥ १६ ॥

व्याख्या—स भिक्षुस्तैर्भैरवैरुपसर्गैः पीड्यमानोऽपि जीवितं नाभिकाङ्क्षेत, जीवितनिरपेक्षेणोपसर्गाः सोढव्याः, नैवोपसर्गसहनद्वारेण पूजाप्रार्थकः स्यात्—न पूजाभिलाषी भवेत् । एवं जीवितपूजानिरपेक्षस्य ते उपसर्गाः अभ्यस्तभावं—समीपभावमुपगच्छेयुः, शून्यागारगतस्य साधोरेवं शीतोष्णादिजनिता उपसर्गाः सुसहा भवन्तीति गाथार्थः ॥ १६ ॥

पुनरप्युपदेशान्तरमाह—

उवणीयतरस्स ताइणो, भयमाणस्स विविक्कमासणं ।
सामाइयमाहु तस्स जं, जो अप्पाणे भए ण दंसए ॥ १७ ॥

व्याख्या—येनात्मा ज्ञानादावुपनीततरः, एतावता ज्ञानादौ आत्मा स्थापितोऽस्ति येन, तस्य साधोस्तायिनः—परात्मत्राणनिरतस्य तारकस्य, तथा भजमानस्य 'विविक्तं' स्त्रीपशुपण्डकादिवर्जितमासनं—वसत्यादिसेवमानस्य, तस्यैवम्भूतस्य साधोः सामायिकं समभावरूपमाहुः सर्वज्ञाः । यश्चात्मानं भये परीषहोपसर्गजनिते न दर्शयेत्, सङ्कीर्णं भवेत्तस्य सामायिकमाहुरिति गाथार्थः ॥ १७ ॥ किञ्च—

उसिणोदगतत्तभोइणो, धम्मट्ठियस्स मुणिस्स हीमतो ।

संसग्गि असाहु राइहिं, असमाही उ तहागयस्स वि ॥ १८ ॥

व्याख्या—उष्णोदकतप्तभोजिनः साधो[स्त्रिदण्डोद्वृत्त]उष्णोदकपायिनः, अथवा उष्णमेव पिबति, न शीतलं कृत्वा पिबतीति भावः, धर्मे श्रुतचारित्ररूपे स्थितस्य मुनेः 'ह्रीमतो' लज्जावतः, एवंविधस्य साधो राजादिकसंसर्गोऽप्यसमाधये स्यात्—ध्यानादिविघ्नकृदेव जायत इति गाथार्थः ॥ १८ ॥ पुनरुपदेशान्तरमाह—

अहिगरणकडस्स भिक्खुणो, वयमाणस्स पसज्झ दारुणं।
अट्ठे परिहायती बहू, अहिगरणं न करेज्ज पंडिए ॥ १९ ॥

व्याख्या—'अधिकरणकरस्य' कलहकारस्य भिक्षोः 'प्रसह्य' प्रकटमेव 'दारुणां' कर्कशां वाचं ब्रुवतः 'अर्थो' मोक्षः संयमो वा, स बहु परिहीयते, एतावता कषायवशः कलहं कुर्वतः कर्कशां वाचं ब्रुवतः साधोः संयमार्थो हीयते—संयमो ध्वंसमुपयाति। बहुना कालेन सञ्चितं विकृष्टेन तपसा यन्महत्पुण्यं तत्सर्वमधिकरणं कुर्वतः साधोः क्षयमुपैति। "×जं अज्जियं चरित्तं, देसूणाए य पुव्वकोडीए। तंपि कसाइयमित्तो, हारए नरो मुहुत्तेण ॥ १ ॥ जं अज्जियं

× यदर्जितं चारित्रं देशोनया च पूर्वकोट्या। तदपि कषायितमात्रो हारयेन्नरो मुहूर्तेन ॥ १ ॥ यदर्जितं शमीखलकैस्तपोनियमब्रह्मचर्यमयैः। मा हु तदकलहायन्तस्त्याक्षुः शाकपत्रैः ॥ १ ॥ शमीखलकैरिति "खलो निम्ने धान्यभेदे" इत्यनेकार्थवचनात् धान्यभेदकल्पैः शमीपत्रैरिति।

समीवट्ठरेहिं, तवनियमसंजमरईएहिं । माहु तयं कलहंता, छड्डिज्जइ सागपत्तेहिं ॥ २ ॥" इति ज्ञात्वा मनागप्यधिकरणं न कुर्यात्पण्डितः-साधुरिति गाथार्थः ॥ १९ ॥

सीओदगपडिदुगंछिणो, अपडिण्णस्स लवावसप्पिणो ।
सामाइयमाहु तस्स जं, जो गिहिमत्तेऽसणं न भुंजती ॥ २० ॥

व्याख्या—साधोः शीतोदकजुगुप्सकस्य-सचित्तोदकपरिहारिणः, तथा 'अप्रतिज्ञस्य' निदानं सर्वथाऽप्यकुर्वतः, तथा 'लवावसर्पिणः' लवं-कर्म, तस्मादवसर्पिणः, कर्मबन्धोपादानकारणभूतादनुष्ठानाद्विनिवर्तितस्य साधोः सामायिकमाहुः सर्वज्ञाः । यो 'गृहस्थभाजने' कांस्यपात्रे न भुङ्क्ते तस्य सामायिकं कथयन्ति जिना इति गाथार्थः ॥ २० ॥ किञ्च—

न य संखयमाहु जीवियं, तह वि य बालजणो पगब्भती ।
बाले पावेहिं मिज्जती, इति संखाय मुणी न मज्जती ॥ २१ ॥

व्याख्या—तथा जीवित-मायुः कालपर्यायेण त्रुटितं सत्पुनः 'न च संस्कार्य'मिति 'संस्कर्तुं' तन्तुवत्सन्धातुं न शक्यते, तथापि 'बालो' मूर्खो जनः 'प्रगल्भते' पापं कृत्वा न लज्जते, स च बालः 'पापैः' पापकर्मभिरशोभनकर्मभिर्मीयते-भ्रियते, इत्येवं 'संख्याय' ज्ञात्वा मुनिर्न माद्यति, असदनुष्ठानं कृत्वा मया शोभनं कृतमिति न प्रगल्भते-न धृष्टो भवतीति गाथार्थः ॥ २१ ॥ उपदेशान्तरमाह—

छंदेण पले इमा पया, बहुमाया मोहेण पाउडा। वियडेण पलेति माहणे, सीउण्हं वयसाऽहियासए ॥२२॥

व्याख्या—'छन्दो'ऽभिप्रायस्तेन स्वस्वाभिप्रायेण [इमाः प्रजाः-अयं] लोकः 'पलेति' तासु तासु नरकादिगतिषु पर्यटति, एके दर्शनिनः स्वकदाग्रहिणः अजादिकवधमपि धर्मकारणं ब्रुवते, तथा धनधान्यादिपरिग्रहे पृथिव्याद्यारम्भेऽपि धर्ममेव जानते, एवं लोको 'बहुमायः' कपटप्रधानः (माया) मुग्धजनरञ्जनाय कपटात्मिकाः क्रियाः कुर्वन्ति, परं श्रीवीतरागप्ररूपितं मार्गं सम्यग् न जानन्ति, अज्ञानावृतत्वात्, तेन सत्येतरव्यक्तिं न लभन्ते, इति ज्ञात्वा मुनिर्माहनः 'विकटेन' प्रकटेन अमायेन कर्मणा मोक्षे संयमे वा प्रकर्षेण लीयते-प्रलीयते, शोभनभावयुक्तो भवतीति भावः, शीतोष्णादिपरीषहा 'वयसा' त्रिकरणशुद्ध्या सम्यगधिसहेदिति गाथार्थः ॥ २२ ॥ अपि च—

कुजए अपराजिए जहा, अक्खेहिं कुसलेहिं दीवयं। कडमेव गहाय णो कलिं, नो तेयं नो चेव दावरं ॥२३॥

व्याख्या—'कुजयो' द्यूतकारः अपराजितो 'दीव्यन्' कुशलत्वादन्यैर्न जीयते, अक्षैः-कपर्दकैः रममाणः 'कृतमेव' चतुष्कमेव गृह्णाति, तल्लब्धजयत्वात्तेनैव चतुष्केण दीव्यति, न 'कलिं' एककं, नापि 'त्रेतं' त्रिकं, नापि 'द्वापरं' द्विकं गृह्णाति, चतुष्केणैव लब्धजयत्वादिति गाथार्थः ॥ २३ ॥ अथ दार्ष्टान्तिकमाह—

एवं लोगम्मि ताइणा, बुइए जे धम्मे अणुत्तरे। तं गिण्ह हियंति उत्तमं, कडमेव सेसऽवहाय पंडिए ॥२४॥

व्याख्या—यथा द्यूतकारः प्राप्तजयत्वात्सर्वोत्तमं दीव्यंश्चतुष्कमेव गृह्णाति, एवमस्मिँल्लोके 'तायिना' सर्वज्ञेनोक्तो

योऽयं धर्मः क्षान्त्यादिलक्षणोऽनुत्तरः-प्रधानस्तं स्वीकुरु, यथा द्यूतकारः शेषमेककाद्यपहाय 'कृतं' [कृतयुगं-चतुष्कं] गृह्णाति, एवं 'पण्डितः' साधुरपि गृहस्थ-कुप्रावचनिक-पार्श्वस्थादिभावमपहाय सम्पूर्णं महान्तं सर्वोत्तमं [धर्मं] गृह्णीयादिति गाथार्थः ॥ २४ ॥ पुनरप्युपदेशान्तरमाह—

उत्तर मणुयाण आहिया, गामधम्मा इति मे अणुस्सुयं ।
जंसि विरता समुट्ठिया, कासवस्स अणुधम्मचारिणो ॥ २५ ॥

व्याख्या—'उत्तराः' प्रधानाः-दुर्जेया 'ग्रामधर्माः' शब्दादिपञ्चविषयाः सर्वज्ञेराख्याताः मनुष्याणां, इत्येतन्मया श्रुतं, एते श्रीऋषभस्वामिना स्वपुत्रेभ्यः प्रतिपादितं, ततः पाश्चात्यगणधराः सुधर्मस्वामिप्रभृतयः स्वशिष्येभ्यः प्रतिपादयन्ति, येभ्यो ग्रामधर्मेभ्यो विरताः 'समुत्थिताः' सम्यक्संयमेन ते 'काश्यपस्य' ऋषभस्वामिनो वर्द्धमानस्वामिनो वा यो धर्मस्तदनुचारिण-स्तीर्थंकरप्रणीतधर्मानुष्ठायिनो भवन्तीति गाथार्थः ॥ २५ ॥ किञ्च—

जे एयं चरंति आहियं, नायएण महया महेसिणा ।
ते उट्ठिय ते समुट्ठिया, अन्नोऽन्नं सारिंति धम्मतो ॥ २६ ॥

व्याख्या—ये मनुष्याः ग्रामधर्मेभ्यो विरतिं कुर्वन्ति, आख्यातं महता महर्षिणा-ज्ञातपुत्रेण, ये धर्मं चरन्ति त एव :संयमोत्थानेन कुतीर्थिकपरिहारेणोत्थितास्त एव सम्यक्कुमार्गदेशनापरित्यागेनोत्थिताः, नान्ये, त एव यथोक्तधर्मानुष्ठायिनो,

अन्योऽन्यं-परस्परं 'धर्मतः' धर्ममाश्रित्य धर्मतो वा अत्यन्तं सारयन्ति, पुनरपि सद्धर्मे प्रवर्त्तयन्तीति गाथार्थः ॥ २६ ॥ किञ्च—

मा पेह पुरा पणामए, अभिकंखे उवहिं धुणित्तए। जे दूमणतेहिं णो णता, ते जाणंति समाहिमाहितं ॥

व्याख्या—'पुरा प्रणामकान्' पूर्वं भुक्तान् शब्दादिविषयान् 'मा प्रेक्षस्व' मा स्मर, तेषां स्मरणमपि महतेऽनर्थाय, अनागतांश्च नाकांक्षेत्, अभिकांक्षेत् 'उपधिं' मायां अष्टप्रकारं वा कर्म, तद्धुननाय—तदपनयनायाभिकांक्षे-दभिलषेत्, तदेवानुष्ठानं कुर्याद्येन माया अष्टप्रकारं च कर्म अपयाति। तथा 'जे दूमणएहिं' ति दुष्टमनःकारि[ण उपतापकारि]णो वा शब्दादयो विषयास्तेषु ये महासत्त्वा न नताः, कोऽर्थः? ये पञ्चविधविषयेषु नासक्तास्ते सन्मार्गानुष्ठायिनः आत्मनि माहितं-आत्मनि व्यवस्थितं 'समाधिं' रागद्वेषपरित्यागरूपं धर्मध्यानं जानन्ति, नान्य इति गाथार्थः ॥ २७ ॥

णो काहीएँ होज्ज संजए, पासणीए ण य संपसारए। नच्चा धम्मं अणुत्तरं, कयकिरिए ण यावि मामए ॥२८

व्याख्या-संयतो गोचरचर्यायां भ्रमन् काथिको न भवति—न कथाः कथयति, तथा विरुद्धा-पैशुन्यापादिनी कथादि विकथां वा न कुर्यात्, राजादिना प्रश्नादि पृष्टः सन् प्रश्नादिकथ[कः-प्राश्नि]को न स्यात्, न च सम्प्रसारको-देव-वृष्टिपण्यसमर्घमहर्घादि अर्थकाण्डादिसूचककथाविस्तारको भवेत्। किं कृत्वा? ज्ञात्वा अनुत्तरं धर्मं, सम्यग्ज्ञातस्य धर्म-स्यैतावदेव फलं, यद्विकथापरिहारेण सम्यक्क्रियावान् स्यात्। 'कयकिरिए' त्ति कृतक्रियश्च + ममेदमहमस्य स्वामीत्येवं

+ "कृता-स्वभ्यस्ता 'क्रिया' संयमानुष्ठानरूपा येन स कृतक्रियस्तथाभूतश्च न चापि मामको" इति वृहद्वृत्तौ

परिवर्जको न भवेदिति गाथार्थः ॥ २८ ॥ किञ्च—

छन्नं च पसंस णो करे, न य उक्कोसपगासमाहणे। तेसिं सुविवेगमाहिते, पणता जेहिं सुजोसितं धुयं ॥२९

व्याख्या—साधुः 'छन्नं' माया, प्रशस्यो + लोभस्तं न कुर्यात्, तथा 'उत्कर्षको' मानः 'प्रकाशः' क्रोधस्तं च 'माहनः' साधुर्न कुर्यात्, यैर्महात्मभिः कषायाणां 'विवेकः' परित्याग आहितः—कषायपरित्यागः कृतस्ते धर्मं प्रति प्रणताः। तथा त एव धर्मं प्रति प्रणता यैर्महात्मभिः सुष्ठु 'जुष्टं' सेवितं 'धूतं' × संयमानुष्ठानं, यदि वा यैः सदनुष्ठायिभिः 'सुजोसियं' ति सुष्ठु क्षिप्तं धूननार्हत्वाद्धूतं कर्मेति गाथार्थः ॥ २९ ॥ अपिच—

अणिहे सहिते सुसंवुडे, धम्मट्ठी उवहाणवीरिए। विहरेज्ज समाहिइंदिए, आतहितं सुदुहेण लब्भती ॥३०

व्याख्या—'अणिहे' अस्नेहः—स्नेहरहितः साधुः सहितो ज्ञानादिभिः, तथा 'सुसंवृत' इन्द्रियनोइन्द्रियैर्विस्रोतसिकारहितः। 'धम्मट्ठि' धर्मः श्रुतचारित्राख्यस्तदर्थी। उपधानं—तपस्तत्र वीर्यवान्, स एवम्भूतो विहरेत्समाहितेन्द्रियः—संयतेन्द्रियः। कथमेवं विहरेत्? यतः आत्महितं संसारे पर्यटता प्राणिना (सुष्ठु)दुःखेन प्राप्यते, अकृतधर्मानुष्ठानेन जन्तुना आत्महितं (अति)दुःखेन लभ्यत इति गाथार्थः ॥ ३० ॥

आत्महितं च प्राणिभिर्न कदाचिदवाप्तपूर्वमित्येतद्दर्शयितुमाह—

+ "प्रशस्यते—सर्वैराद्रियते इति"। × "धूयते—क्षिप्यते कर्म येन तद्धूतं" इति हर्षकुलगणिः।

णहि णूण पुरा अणुस्सुतं, अदुवा तं तह णो समुट्ठियं। मुणिणा सामाइयाहितं, णाएणं जगसव्वदंसिणा॥

व्याख्या—यदेतन्मुनिना [जगतः सर्वभावदर्शिना] ज्ञातपुत्रीयेण सामायिकाद्यात्महितं समाख्यातं तन्नूनं—निश्चितं जन्तुभिर्न च—नैव (पुरा—प्राग्भवादौ) अनुश्रुतं, तदात्महितं जीवैः(पुरा) श्रुतमपि नास्ति, कदाचिच्छ्रुतमस्ति तथापि यथाऽवस्थितं 'नानुष्ठितं' न पालितं, अत एव प्राणिनामात्महितं सुदुर्लभमिति गाथार्थः ॥ ३१ ॥

पुनरुपदेशान्तरमाश्रित्याह—

एवं मत्ता महंतरं, धम्ममिणं सहिता बहू जणा।

गुरुणो छंदाणुवत्तगा, विरता तिन्ना महोघमाहितं ॥ ३२ ॥ त्तिबेमि ॥

व्याख्या—एवं आत्महितं सुदुर्लभं 'मत्वा' ज्ञात्वा च महदन्तरं धर्मविशेषं कर्मणो वा विवरं प्राप्य ज्ञानादिसहिता बहवो जनाः लघुकर्माणः सदनुष्ठानं समाश्रिताः सन्तो गुरोश्छन्दानुवर्तिन—स्तीर्थकरोक्तमार्गानुयायिनो विरताः पापकर्मभ्यः सन्तस्तीर्णाः संसारसागरं महौघ—मपारं,एवमाख्यातं मया भवतामपरैश्चार्हद्भिरन्येषां, इति शब्दः परिसमाप्त्यर्थे, ब्रवीमीति गाथार्थः॥३२॥

इति वैतालीयाध्ययनस्य द्वितीयोद्देशकटीका।

उक्तो द्वितीयोद्देशकः, साम्प्रतं तृतीयः समारभ्यते। इहानन्तरोद्देशके विरता इत्युक्तं, तेषां विरतानां च कदाचित्परीषहाः समुदीर्येरन्, ततश्च परीषहाः सोढव्या, इत्यनेन सम्बन्धेनायातस्यास्योद्देशकस्यादि सूत्रम्—

संवुडकम्मस्स भिक्खुणो, जं दुक्खं पुट्ठं अबोहिए। तं संजमओऽवचिज्जई, मरणं हेच्च वयंति पंडिया॥१

व्याख्या–'संवृतानि' रुद्धानि कर्माणि मिथ्यात्वाविरतिप्रमादकषाययोगरूपाणि या यस्य भिक्षोः, यद्दुःख–मसद्वेद्यं, तदुपादानभूतं वाऽष्टप्रकारं कर्म 'स्पृष्टं' बद्धस्पृष्टनिकाचितं, तत्कर्म 'अबोधिना' अज्ञानेनोपचितं सत् संयमतः सप्तदशभेदतोऽपचीयते–प्रतिक्षणं क्षयमुपैति। एतदुक्तं भवति–यथा तडागोदरसंस्थितं वारि निरुद्धापरप्रवेशद्वारादित्यकरसम्पर्कात्प्रत्यहमपचीयते, एवं भिक्षोरपि संवृतात्मनः तपसा प्राग्भवार्जितं कर्म क्षीयते, ततश्च पण्डिताः 'हित्वा' त्यक्त्वा 'मरणं' जातिजरामरणशोकरूपं त्यक्त्वा मोक्षं व्रजन्ति, इति गाथार्थः॥ १॥ येऽपि च तेनैव भवेन मोक्षमाप्नुवन्ति तानधिकृत्याह—

जे विन्नवणाहिँ अजोसिया, संतिण्णेहिँ समं वियाहिया। तम्हा उड्ढं ति पासहा, अद्दक्खु कामाइ रोगवं॥

व्याख्या—कामार्थिभिः पुरुषैर्विज्ञाप्यन्ते–प्रार्थ्यन्ते याः 'विज्ञापनाः' स्त्रिय उच्यन्ते, ये महासत्त्वाः पुरुषाः विज्ञापनाभिः 'अजोसिया' असेविताः, एतावता ये न स्त्रीणां वशे पतितास्ते सन्तीर्णैः–मुक्तैः समं 'व्याख्याताः' कथिताः। को भावः? ते अतीर्णा अपि सन्तस्तीर्णा एवोच्यन्ते ये योषिद्भ्यो विरताः, यतः–"पुप्फफलाणं च रसं, सुराए मंसस्स महिलियाणं च। जाणंता जे विरया, ते दुक्करकारए वंदे॥ १॥" 'तम्हा उड्ढं ति पासह'त्ति 'तस्मात्' योषित्परित्यागादूर्ध्वं यद्भवति तत्पश्यत यूयं, ये च कामान् रोगवत्–व्याधिकल्पान् 'अद्राक्षुः'–दृष्टवन्तस्ते सन्तीर्णसमा व्याख्याताः

---

१ पुष्पफलानां च रसं सुरायाः मांसस्य महिलिकानां च। जानन्तो ये विरतास्तान् दुष्करकारकान्वन्दे॥ १॥

स्ते यतीनां अपि संसारोदन्वत्तटोपान्तवर्तिन एवेति गाथार्थः ॥ २ ॥ पुनरप्युपदेशान्तरमाह—

अग्गं वणिएहिं आहियं, धारंती राईणिया इहं । एवं परमा महव्वया, अक्खाया उ सराइभोयणा ॥ ३ ॥

व्याख्या—वणिग्भिर्देशान्तरादाहित-मानीतं 'अग्र्यं' प्रधानं रत्नाभरणादिकं यौक्तिकं राजानस्तत्कल्पा वा प्रधान-वणिज एव (इह जगति) धारयन्ति, कोऽर्थः ? [यथा] वणिजो देशान्तरात्सुबहुमूल्यं रत्नाभरणादि आनयन्ति, परं तेषां प्रधानरत्नानां राजान एव भाजनं-राजान एव धारयन्ति, ईश्वरा वा बिभ्रति, तथा आचार्यैरानीतानां पञ्चमहाव्रतानां रात्रिभोजन[विरमण]षष्ठानां साधव एव भाजनं, नान्ये इति गाथार्थः ॥ ३ ॥ किञ्च—

जे इह सायाणुगा नरा, अज्झोववन्ना कामेहिं मुच्छिया ।
किवणेण समं पगब्भिया, नवि जाणंति समाहिमाहितं ॥ ४ ॥

व्याख्या—ये इहलोके मनुष्याः 'सातानुगाः' सुखशीलाः गारवत्रयेऽध्युपपन्नाः—गृद्धास्तथा कामेषु शब्दादिषु मूर्च्छिताः 'कृपणा' दीनाः वराकाः इन्द्रियैः पराजिताः 'तत्समा' स्तद्वत्कामासेवने 'प्रगल्भिताः' धृष्टतां गताः, किमनेन स्तोकेन प्रमादेन संयमविराधना भविष्यतीत्येवं प्रमाद्यन्तः कर्त्तव्येषु समस्तमपि संयमं पटवन्मलिनीकुर्वन्ति, ईदृशाश्च ते वीतरागोक्तं समाधिं धर्मध्यानादिकं न जानन्तीति गाथार्थः ॥ ४ ॥ पुनरप्युपदेशान्तरमाह—

वाहेण जहा व विच्छए, अबले होइ गवं पचोइए । से अंतसो अप्पथामए, नाइवहइ अबले विसीयती ॥ ५

व्याख्या—' व्याधेन ' लुब्धकेन यथा ' गव 'त्ति मृगादिः पशुर्विविधमनेकप्रकारेण कूटपाशादिना [क्षतः—] परवशीकृतः श्रमं वा प्रापितः ' प्रतोदितोऽपि ' प्रेरितोऽप्यबलो भवति, आत्मश्रमत्वाद्गन्तुमसमर्थो भवति, यदि वा वाहय-तीति वाहः—शाकटिकस्तेन यथावद्वहन् गौ—वृषभः प्रतोदादिना ' क्षतः ' प्रेरितोऽपि अबलो विषमपथादौ गन्तुमसमर्थो भवति, स चान्ततो—मरणान्तमपि यावदल्पसामर्थ्यो नातीव वोढुं शक्तो भवति, एवम्भूतश्च अबलो भारं वोढुमसमर्थस्तत्रैव पङ्कादौ विषीदतीति गाथार्थः ॥ ५ ॥ दार्ष्टान्तिकमाह—

एवं कामेसणं विऊ, अज्ज सुए पयहेज्ज संथवं। कामी कामे ण कामए, लद्धे वा वि अलद्ध कण्हुई ॥ ६ ॥

व्याख्या—तथा अनन्तरोक्तया नीत्या कामभोगप्रार्थनासक्तः पुमान् अवसीदति, परं कामभोगांस्त्यक्तुं नालं भवति, ईदृशोऽपि यदि परमद्य श्वो वा कामभोगसम्बन्धं संस्तवं प्रजह्यात्, न चैहिकामुष्मिकापायदर्शितया कामी भूत्वोपन-तानपि कामान् जम्बूस्वामिवद्वैरस्वामिवद्वा न कामये—न्नाभिलषेत् क्षुल्लककुमारवद्वा लब्धानपि कामान्महासत्त्वतया अलब्ध-समानमन्यमानो निःस्पृहो भवेदिति गाथार्थः ॥ ६ ॥ किमिति कामपरित्यागो विधेय ? इत्याशङ्क्याह—

मा पच्छ असाधुता भवे, अच्चेही अणुसास अप्पगं । अहियं च असाहु सोयती, से थणती परिदेवती बहुं ॥ ७

व्याख्या—मा पश्चा—न्मरणकाले भवान्तरे वा कामानुषङ्गादसाधुता कुगतिगमनरूपा ' भवेत् ' प्राप्नुयात्, इति विचिन्त्य विषयेभ्य आत्मानं ' अच्चेहि 'त्याजय, तथाऽऽत्मानं शिक्षय, यथा—रे जीव ! असाधु[—रशुभ]कर्मकारी दुर्गतौ

पतितोऽधिकं शोचति, तथा च परमाधार्मिकैश्चात्यर्थं कदर्थ्यते, तिर्यग्गतावपि क्षुत्पिपासाशीतोष्णादिदुःखैः पीड्यमानोऽत्यन्तं 'स्तनति' करुणं क्रन्दति-सशब्दं निःश्वसिति 'परिदेवते' विलपत्याक्रन्दति सुबह्विति-"हा मातर्म्रियत इति, त्राता नैवास्ति साम्प्रतं कश्चित् । किं वा शरणं मे स्या-दिह दुष्कृतचरितस्य पापस्य ॥ १ ॥" इत्येवमादीनि दुःखानि पापकारिणः प्राप्नुवन्ति, तेन विषयाभिष्वङ्गो न विधेय इत्यात्मानुशासनं कुर्वीतेति गाथार्थः ॥ ७ ॥

इह जीवियमेव पासहा, तरुण एव वासस[याउ]तस्स तुट्टती ।
इत्तरवासे य बुज्झह, गिद्धनरा कामेसु मुच्छिया ॥ ८ ॥

व्याख्या—अस्मिन्नसारे संसारे धनधान्यादयोऽन्ये पदार्थाः दूरे तिष्ठन्तु, एवं जीवानामायुरप्यशाश्वतं, यतो वर्षशत-प्रमाणमप्यायुस्तरुणत्वे एव त्रुट्यति, तदाऽऽयुर्वर्षशतप्रमाणमपि सागरोपमापेक्षया मेषोन्मेषप्रमाणं वर्त्तते, स्तोककालावस्थानप्रायं वा समस्ति इति ज्ञात्वा रे जीव ! बुध्यस्व, मा मुह्य । ईदृशेऽप्यायुषि अशाश्वते एके अविवेकिनः 'गृद्धाः' कामभोगेषु मूर्छिता एव तिष्ठन्ति, ततश्च नरकादिषु कदर्थनामाप्नुवन्तीति गाथार्थः ॥ ८ ॥ अपि च—

जे इह आरंभनिस्सिया, आतदंडा एगंतलूसगा । गंता ते पावलोगयं, चिररायं आसुरियं दिसं ॥ ९ ॥

व्याख्या—'इह' मनुष्यलोके ये केचन महामोहाकुलिताः पुरुषा अविवेकिनो हिंसा(दि)सावद्यानुष्ठाने आरम्भे 'निश्रिताः' आसक्ताः सन्ति ते नरा आत्मनो दण्डकाः, ते एकान्तेनैव जन्तूनां 'लूषका' हिंसकाः सदाचारस्य वा ध्वंसका, एवम्भूताश्च

'गन्तारो' यास्यन्ति, क ? पापकर्मकारिणां यो लोको नरकादिस्तत्र चिररात्रमवस्थास्यन्ति, यद्यपि बालतपश्चरणादिना तथाविधदेवत्वावाप्तिस्तथाप्यासुरीं दिशं यान्ति, अपरप्रेष्याः किल्बिषिका देवाधमा भवन्तीति गाथार्थः ॥ ९ ॥ किञ्च—

ण य संखगमाहु जीवियं, तहवि य बालजणो पगब्भती। पच्चुप्पन्नेण कारियं, के दट्ठुं परलोगमागते ? ॥

व्याख्या—'न च' नैव 'संस्कर्तुं' सन्धातुं शक्यते त्रुटितमायु—र्जीवितव्यं, एवमाहुः—सर्वज्ञाः। एवमप्यायुषि सन्धातुमशक्ये 'बालो' मूर्खो जनः असदनुष्ठाने प्रगल्भते, असदाचारे प्रवर्तमानो न लज्जते, स च बालो निर्विवेकतया पापकर्म कुर्वन् केनापि चोदितः सन् धृष्टतया अलीकपाण्डित्याभिमानितया इदमुत्तरमाह—प्रत्युत्पन्नेन—वर्तमानकालभाविना सुखेन मे प्रयोजनं, एवं च सति इहलोक एव विद्यते, न परलोकः, कः परलोकं दृष्ट्वा इहागतः ? परलोकं दृष्ट्वा कश्चिदागतो भवति तदा तद्वचसा ज्ञायते अस्त्येव परलोकः, तस्मान्न विद्यते परलोकः ॥ १० ॥ एवं नास्तिकेनोक्ते सति प्रत्युत्तरमाह—

अदक्खुव ! दक्खुआहितं, (तं)सद्दहसु अदक्खुदंसणा ! ।
हंदि हु सुनिरुद्धदंसणे, मोहणिज्जेण कडेण कम्मुणा ॥ ११ ॥

व्याख्या—अपश्यो—ऽन्धः, कार्याकार्यविवेकचक्षुर्विकलत्वाद्—अन्धस्तस्यामन्त्रणं—हे अपश्यवत्—अन्धसदृश ! 'पश्यकेन' सर्वज्ञेन 'आहितं' कथितं आगमं 'श्रद्धस्व' प्रमाणीकुरु। 'अदक्खुदंसणा' अपश्यको—ऽसर्वज्ञस्तस्य दर्शनं अभ्युपगतमाश्रितं येन तस्यामन्त्रणं अदक्खुदंसणा ! स्वं श्रीवीतरागभाषितं श्रद्धस्व, इहलोकसुखमेव प्रार्थ्यते 'नास्ति परलोक' इति मा वद,

यदि प्रत्यक्षं विना अतीतानागतं न मन्यसे तर्हि पितृपितामहादयोऽपि नाभूवन्, पुत्रपौत्रादिसन्ततेरपि व्यवच्छेदः, अतीतानागतयोरनाश्रयणात् इहलोकव्यवहारः प्रत्यक्षमेव अन्धकारस्थं सर्वव्यवहारविलोपेन इष्टः ! । ततोऽसि, असर्वज्ञाभ्युपगतदर्शनाश्रयणेन सर्वव्यवहारबाह्योऽसि, अतः असर्वज्ञानुयायिन् ! आत्मीयं कदाग्रहं परित्यज्य सर्वज्ञोक्ते मार्गे श्रद्धानं कुरु । किमिति स पुमान् सर्वज्ञोक्ते मार्गे श्रद्धानं न करोति ? तदाह–' हंदि हु सुनिरुद्धदंसणे ' स प्राणी ' हंदी 'ति खेदे, + मोहनीयेन कर्मणा मिथ्यादर्शनेन ज्ञानावरणीयादिकेन कर्मणा वा ' सुनिरुद्धदर्शनः ' स्थगितविवेकचक्षुः, तेन सर्वज्ञोक्तं मार्गे न श्रद्धत्ते, अतस्तन्मार्गश्रद्धानं प्रति प्रोत्साहित इति गाथार्थः ॥ ११ ॥ पुनरप्युपदेशान्तरमाह—

दुक्खी मोहे पुणो पुणो, निव्विंदेज्ज सिलोगपूयणं । एवं सहितेऽहियासते, आयतुलं पाणेहिं संजए ॥१२॥

व्याख्या—' दुःखं ' असातवेदनीयं, तदस्यास्तीति दुःखी प्राणी पुनःपुनर्मोहं याति–सदसद्विवेकविकलो भवति, कोऽर्थः ? असातोदयाद्दुःखमनुभवन्नार्त्तः सन् मूढस्तत्करोति येन पुनःपुनर्दुःखी संसारसागरमनन्तं कालं पर्यटति । एवम्भूतं मोहं परित्यज्य ' निर्विद्येत ' जुगुप्सयेत्परिहरेत् आत्मश्लाघां स्तुतिरूपां तथा पूजनं वस्त्रादिलाभरूपं परिहरेत् । एवं परिवर्त्तमानः × सहितो–ज्ञानादियुक्तो वा ' संयतः ' प्रव्रजितो सुखार्थिभिरात्मतुला–मात्मतुल्यतां दुःखाप्रियत्वं सुखप्रियत्वरूपामधिकं पश्येत्–आत्मतुल्यान् सर्वानपि प्राणिनः पालयेदिति गाथार्थः ॥ १२ ॥ किञ्च—

+ " हु शब्दो वाक्यालङ्कारे, मोहनीयेन स्वकृतेन कर्मणा " । × " सह हितेन वर्तत इति सहितो " इति हर्ष० ।

गारंपि य आवसे नरे, अणुपुव्विं पाणेहिं संजए । समता सव्वत्थ सुव्वते, देवाणं गच्छे स लोगयं ॥ १३ ॥

व्याख्या—गृहवासेऽपि वसन्नरः अनुक्रमेण धर्मं श्रुत्वा व्रतादि प्रतिपद्य सर्वजीवेषु दयालुः सन् सर्वत्र समतापरिणामे वर्तमानो गृहधर्मं पालयन्नपि–गृहस्थोऽपि चेद्देवलोकं व्रजेत्तर्हि यतीनां किमुच्यते ? ॥ १३ ॥

सोच्चा भगवाणुसासणं, सच्चे तत्थ करिज्जुवक्कमं । सव्वत्थऽवणीयमच्छरे, उंछं भिक्खु विसुद्धमाहरे ॥१४॥

व्याख्या—स साधुः ' भगवतः ' श्रीसर्वज्ञस्य ' (अनु)शासनं ' आज्ञां आगमं वा श्रुत्वा, तत्र आगमे संयमे वा, कथम्भूते ? [सद्भ्यो [illegible]] सत्ये उपक्रमं कुर्यात् [illegible] अपनीय [illegible]शरीरनिश्रितः ' उंछं ' भैक्ष्यं ' शुद्धं ' द्विचत्वारिंशद्दोषरहितमाहारं गृह्णीयादभ्यवहरेदिति गाथार्थः ॥ १४ ॥ किञ्च—

सखं नच्चा अहिट्ठए, धम्मट्ठी उवहाणवीरिए । गुत्ते जुत्ते सदा जए, आयपरे परमायतट्ठिते ॥१५॥

व्याख्या—सर्वं हेयोपादेयं ज्ञात्वा सर्वं संवररूपं अधितिष्ठेत्–दाश्रयेत् ' धर्मार्थी ' धर्मप्रयोजनवान् ' उपधाने ' तपस्तत्र वीर्यवान्–अनिगूहितबलवीर्यः, तथा मनोवाक्कायगुप्तो, युक्तो ज्ञानादिभिः सदा यतेत आत्मनि परस्मिंश्च । किं विशिष्टः सन् ? अत आह–' परम ' उत्कृष्ट ' आयतो ' दीर्घः सर्वकालभवनान्मोक्षस्तदर्थिक–स्तदभिलाषी, पूर्वोक्तविशेषणविशिष्टो भवेदिति गाथार्थः ॥ १५ ॥ पुनरुपदेशमाह—

वित्तं पसवो य नाईओ, तं बाले सरणंति मन्नइ । एते मम तेसुवी अहं, नो ताणं सरणं नु विज्जइ ॥१६॥

व्याख्या—‘ वित्तं ’ धनधान्यहिरण्यादि ‘ पशवो ’ गोमहिषीतुरगादयस्तथा स्वजना–मातृपितृपुत्रकलत्रादयस्तदेतत्सर्वं ‘ बालो ’ मूर्खः शरणं मन्यते, एते मम सर्वे परिभोगे उपयोक्ष्यन्ते, अहं त्वेतेषामुपयोगे समेष्यामि, न पुनरेवं जानीते–यदर्थं धनादि मुच्यते तदेव यत्पुरशाश्वतं, क विनाशुपयोगे समेष्यति ? “ रिद्धी सहावतरला, रोगजराभंगुरं हयं सरीरं । दोण्हं पि गमणसीलाणं, किच्चिरं होज्ज संबंधो ? ॥ १ ॥ ” तथा “ मातापितृसहस्राणि, पुत्रदारशतानि च । प्रतिजन्मनि वर्त्तन्ते, कस्य माता पिताऽपि वा ॥ १ ॥ ” ‘ नो ’ नैव वित्तादिकं संसारे कथमपि त्राणं भवति नरकादौ पतितस्य रोगादिना वा पीडितस्य कश्चित्त्राणं (शरणं वा) विद्यत इति गाथार्थः ॥ १६ ॥ एतदेवाह—

अब्भागमितंमि वा दुहे, अहवा उक्कमिते भवंतिए ।
एगस्स गती य आगती, विदुमंता सरणं न मन्नई ॥ १७ ॥

व्याख्या—पूर्वकृतदुष्कर्मोदये दुःखमायाति, तद्दुःखमेक एवानुभवति, तथा मरणेऽप्यागते एक एव म्रियते, एक एव जन्ममरणादिदुःखमनुभवति, गतिरेकस्य आगतिरप्येकस्यैव, संसारे गमनागमनं कुर्वतो नापरः कोऽपि सहायो भवति, दुःखार्त्तस्य वित्ताद्यपि न शरणं, एवं ज्ञात्वा [विद्वान्] न कमपि [तावद्] विनैकं धर्मं शरणतया मन्यत इति गाथार्थः ॥ १७ ॥ किञ्च—

१ ऋद्धिः स्वभावतरला रोगजराभङ्गुरं हतकं शरीरं । द्वयोरपि गमनशीलयोः कियच्चिरं भवेत्स सम्बन्धः ? ॥ १ ॥

सव्वे सयकम्मकप्पिया, अवियत्तेण दुहेण पाणिणो ।
हिंडंति भयाउला सढा, जाइजरामरणेहिऽभिद्दुता ॥ १८ ॥

व्याख्या—सर्वेऽपि संसारिणः प्राणिनः स्वकृतेन कर्मणा 'कल्पिताः' सूक्ष्मबादरपर्याप्तापर्याप्तभेदेन व्यवस्थापिता-स्तेनैव कर्मणा अव्यक्तेन दुःखेन दुःखिताः प्राणिनः 'हिण्डन्ति' पर्यटन्ति भयाकुलाः शठकर्मकारित्वाच्छठाः भ्रमन्ति नवनवासु योनिषु जन्मजरामरणादिदुःखैरभिद्रुता इति गाथार्थः ॥ १८ ॥ किञ्च—

इणमेव खणं वियाणिया, णो सुलभं बोहिं च आहितं ।
एवं सहिएऽहियासए, आह जिणो इणमेव सेसगा ॥ १९ ॥

व्याख्या—इदमेवावसरं ज्ञात्वा यदुचितं तद्विधेयं, तथा[हि–] 'बोधिं च' सम्यग्दर्शनावाप्तिलक्षणां नो सुलभां, इत्येवमवगम्य तथासौ तदनुरूपमेव कुर्यात्, नो सुलभां बोधिं इत्येवमाख्यातामवगम्य सहितो ज्ञानादिभिः परीषहान् उदीर्णान् अधिसहेत, एतदाह 'जिनो' भगवानाभेयोऽष्टापदे सुतानुद्दिश्य, तथाऽन्येऽपि शेषकाः जिना अभिहितवन्त इत्येतदाह ॥ १९ ॥ तथा च—

अभविंसु पुरावि भिक्खवो !, आएसा वि भवंति सुव्वता ।
एयाइं गुणाइं आहु ते, कासवस्स अणुधम्मचारिणो ॥ २० ॥

व्याख्या—सर्वज्ञः स्वशिष्यानेवमामन्त्रयन्ति—भो भिक्षवः ! ये पुरा जिना अभूवन् आगमिष्याश्च ये भविष्यन्ति ते 'सुव्रताः' शोभनव्रता एतानन्तरोदितान् गुणान् आहु—रभिहितवन्तः । अत्र जिनानां न कश्चिन्मतभेदः, अतः सर्वेऽपि जिनाः सदृशमेव भाषन्ते, न जिनानां वचो व्यभिचरति, ते च 'काश्यपस्य' ऋषभस्य वर्द्धमानस्वामिनो वा सर्वेऽप्यनुचीर्णधर्मचारिणः, इत्यनेन च सम्यग्दर्शनज्ञानचारित्रात्मक एव मोक्षमार्ग इति गाथार्थः ॥ २० ॥

तिविहेण वि पाण मा हणे, आयहिए अनियाणसंवुडे ।
एवं सिद्धा अणंतसो, संपइ जे अ अणागयावरे ॥ २१ ॥

व्याख्या—त्रिविधेन योगेन प्राणिनो मा हन्यात् आत्महितः 'अनिदानो' निदानरहितः, तथा 'संवृतः' त्रिगुप्त इत्यर्थः । एवम्भूतश्चावश्यं सिद्धिमवाप्नोतीत्येतद्दर्शयति—एवमनन्तरोक्तानुष्ठानेन अनन्ताः सिद्धाः वर्तमानकाले सिध्यन्ति अनागते च काले सेत्स्यन्ति, नापरः सिद्धिमार्गोऽस्तीति भावः, एवं श्रीसुधर्मस्वामी जम्बूस्वामिप्रभृतिशिष्येभ्यः प्रतिपादयतीति गाथार्थः ॥ २१ ॥

एवं से उदाहु अणुत्तरनाणी, अणुत्तरदंसी अणुत्तरनाणदंसणधरे ।
अरहा नायपुत्ते भगवं, वेसालिए वियाहिए त्ति बेमि ॥ २२ ॥

व्याख्या—एवं स ऋषभस्वामी स्वपुत्राननुदिश्योदाहृतवान्—अनुत्तरज्ञानी [अनुत्तरदर्शी] अनुत्तरज्ञानदर्शनधरः अर्हन्

ज्ञातपुत्रो वर्द्धमानस्वामी विशाल्यां नगर्यां अथवा विशालकुलोद्भवो ऋषभस्वामी एवमुदाहृतवानिति गाथार्थः ॥ २२ ॥

इति श्रीखरतरगच्छमण्डनसाधुरङ्गगणिवरनिर्मितायां श्रीसूत्रकृताङ्गदीपिकायां द्वितीये वैतालीयाध्ययने
तृतीयोद्देशकः समाप्तः । तत्समाप्तौ च वैतालीयाध्ययनं समाप्तमिति ।

उक्तं द्वितीयमध्ययनं, साम्प्रतं तृतीयमारभ्यते, संयमं पालयतां साधूनां परीषहा उत्पद्यन्ते, ते च सम्यक्सोढव्याः, अयमधिकारोऽस्मिन्नध्ययने, तेनेदं परीषहाध्ययनं, तस्येयमादिगाथा—

सूरं मण्णंति अप्पाणं, जाव जेयं न पस्सति । जुज्झंतं दढधम्माणं, सिसुपालोव महारहं ॥ १ ॥

व्याख्या—यथा कश्चिल्लघुप्रकृतिकः पुमान् आत्मानं शूरं मन्यते—न मत्सदृशोऽपरः कश्चित्सुभटोऽस्तीति आत्मश्लाघापरो निस्तोयाम्बुद इव वाग्भिर्विस्फूर्जन् गर्जति तावद्यावत्स्वतोऽप्यधिकतरं निष्कोशीकृतासिं पुरो जेतारं न पश्यति, तस्मिंश्च दृष्टे निर्मदो भवति । अस्मिन्नर्थे दृष्टान्तमाह—यथा शिशुपाल आत्मश्लाघाप्रधानं गर्जितवान्, पश्चाद्युध्यमानं दृढधर्माणं 'महारथं' नारायणं दृष्ट्वा भग्नगर्वो[श्च]प्रधानोऽपि क्षोभं गतः, + एवमुत्तरश्च दार्ष्टान्तिकेन योजयिष्यते, इति गाथार्थः ॥ १ ॥

साम्प्रतं सार्वजनीनं दृष्टान्तमाह—

+ निर्मदो जात इति भावः ।

पयाया सूरा रणसीसे, संगामम्मि उवट्ठिते। मायापुत्तं न याणाइ, जेएण परिविच्छए ॥ २ ॥

व्याख्या—प्रकर्षेण विकटपादपातं 'रणशिरसि' सङ्ग्राममूर्धनि नाशीरत्वे× योजिताः 'शूराः' सुभटंमन्याः। कथम्भूते रणे? सर्वस्याकुलीभूतत्वान्माता स्वकटीतो भ्रश्यन्तं पुत्रं न जानाति, इत्येवममातापुत्रीये सङ्ग्रामे परानीकसुभटेन जेत्रा तीक्ष्णनाराचप्रभृतिभिः शस्त्रैर्विविधं 'क्षतो' हतश्छिन्नो वा यथा कश्चिदल्पसत्त्वो भङ्गमुपयातीति गाथार्थः ॥ २ ॥

अथ दार्ष्टान्तिकमाह—

एवं सेहे वि अप्पुट्ठे, भिक्खायरिया अकोविए। सूरं मन्नति अप्पाणं, जाव लूहं न सेवए ॥ ३ ॥

व्याख्या—यथा यत्र माता स्वकटीतो भ्रश्यन्तं स्तनन्धयं न वेत्ति, एवंविधे विषमे रणशिरसि कश्चिच्छूरंमन्यः परानीकनिशितसायकघोरणीभिः विह्वलीभूतः सन् भङ्गमुपयाति—दीनत्वं भजते, एवं शिष्यकोऽभिनवप्रव्रजितः परीषहैरस्पृष्टः—अनुत्पन्नपरीषहपीडः प्रव्रज्यायां किं दुष्करं? इत्येवं गर्जन् भिक्षाचर्यायामनिपुणः अन्यस्मिन्नपि साध्वाचारे अप्रवीणः सन् आत्मानं शिशुपालवत् शूरं मन्यते यावज्जेतारमिव 'रूक्षं' निरास्वादं वालुकाकवलवत् संयमं न भजते, गृहीते तु संयमे परीषहैरभिद्रुता अल्पसत्त्वाः प्राणिनो भङ्गमुपयान्ति, संयमाद् भ्रश्यन्ते, कण्डरीकवदिति गाथार्थः ॥ ३ ॥

संयमरूक्षत्वप्रतिपादनायाह—

× सेनामुखे।

जया हेमंतमासम्मि, सीतं फुसइ सवायगं । तत्थ मंदा विसीयंति, रज्जहीणा व खत्तिया ॥ ४ ॥

व्याख्या—यदा हेमन्तमासे पौषादौ शीतं सहिमकणवातं 'स्पृशति' लगति, तस्मिन् असह्ये शीते लगति सति एके 'मन्दा' गुरुकर्माणो विषीदन्ति, राज्यभ्रष्टाः क्षत्रिया इव-राजान इवेति गाथार्थः ॥ ४ ॥ अथोष्णपरीषहमाह—

पुट्ठो गिम्हाहितावेणं, विमणे सुपिवासिए । तत्थ मंदा विसीयंति, मच्छा अप्पोदए जहा ॥ ५ ॥

व्याख्या—'ग्रीष्मे' उष्णर्तौ 'अभितापेन' आतपेन व्याप्तो विमनस्कस्तथा 'तृष्णया' उद्धन्यया पराभूतो 'मन्दो'-ऽल्पसत्त्वः संयमाद्व्यपयाति, यथा मत्स्याः अल्पोदके विषीदन्ति-यथा मत्स्यः पानीयविरहे जीवितं त्यजति, तथा साधुरपि कोऽप्यल्पसत्त्वः संयमं त्यक्त्वा दूरे भवतीति गाथार्थः ॥ ५ ॥ अथ याच्ञापरीषहमाह—

सदा दत्तेसणादुक्खं, जायणा दुप्पणोल्लिया । कम्मत्ता दुब्भगा चेव, इच्चाहंसु पुढोजणा ॥ ६ ॥

व्याख्या—यतीनां हि 'सदा' सर्वकालं दन्तशोधनाद्यपि परेण दत्तमेषणीयमुपभोक्तुं कल्पते, ततश्च क्षुधादिवेदनार्तानां यावज्जीवं परदत्तैषणादुःखं भवति, किं? "लाघवं याच्ञा" इति वचनादत्र याच्ञापरीषहे कातराः विषीदन्ति । अथ पश्चार्द्धेन आक्रोशपरीषहं दर्शयति—'प्राकृतपुरुषा' अनार्या एवं भाषन्ते—य एते यतयस्ते जल्लाविलदेहा लुञ्चितशिरसः क्षुधा-ग्रस्ता अदन्तधावनाः पूर्वकृतदुष्कर्मणां फलमनुभवन्ति, यदि वा 'आर्ताः' सर्वकर्मसु 'अशक्ताः' सर्वथा अकिञ्चित्कराः, अत एव जठरपूरणा[र्थ] असमर्थाः सन्तो यतयो जाताः, यतः—" स्वाध्यायध्यानकृच्छ्राणि, भिक्षाभ्रमण एव च ।

प्रायः पौरुषहीनानां, जीवनोपायकौशलम् ॥ १ ॥" इति वचनात् । तथा पुनरेते 'दुर्मेधाः' पुत्रदारादिपरित्यक्ताः निर्गतिकाः सन्तः प्रव्रज्यां प्रतिपन्ना इति गाथार्थः ॥ ६ ॥

एते सद्दे अचायंता, गामेसु नगरेसु वा । तत्थ मंदा विसीयंति, संगामम्मिव भीरुणो ॥ ७ ॥

व्याख्या—एतान् आक्रोशरूपान् शब्दान् सोढुमशक्नुवन्तो ग्रामेषु नगरेषु अरण्यादिषु वा व्यवस्थिता, एके यतयो 'मन्दा' अविवेकिनस्तुच्छप्रकृतयो 'विषीदन्ति' विमनस्का जायन्ते, संयमाद्भ्रंशयन्ति, यथा भीरवो भटाः सङ्ग्रामे चक्र-कलकारं सुभटकोलाहलाकर्णनेन समाकुलाः सन्तो भज्यन्ते, पौरुषं परित्यज्यापयशश्च पुरस्कृत्य निःशङ्काः सङ्ग्रामात्पराङ्मुखा भवन्ति, एवमेके—केचन, न सर्वे, आक्रोशशब्दाकर्णनादसहमाना विषीदन्तीति गाथार्थः ॥ ७ ॥

अप्पेगे खुधितं भिक्खुं, सुणी दंसति लूसए । तत्थ मंदा विसीयंति, तेउपुट्ठा व पाणिणो ॥ ८ ॥

व्याख्या—कश्चिच्छ्वा निर्दयकः-प्रकृत्यैव क्रूरो भषकः 'क्षुधितं' बुभुक्षितं भिक्षामटन्तं साधुं दशति—गात्रावयवान् विलुम्पति त्रोटयति । 'तत्र' तस्मिन् श्वादिभक्षणपरीषहे उदीर्णे सति मन्दा 'विषीदन्ति' दैन्यं भजन्ते, यथा 'तेजसा' अग्निना 'स्पृष्टाः' दह्यमानाः प्राणिनो 'विषीदन्ति' गात्रं सङ्कोचयन्ति एवं साधुरपि क्रूरसत्त्वैरभिद्रुतः संयमाद्भद-पयाति, यथाऽग्निना दह्यमानाः जन्तवो जीवितं त्यजन्तीति गाथार्थः ॥ ८ ॥

दुःसहा ग्रामकण्टकाः पुनरपि तानधिकृत्याह—

अप्पेगे पडिभासंति, पडिपंथियमागता । पडियारगता एते, जे एते एवजीविणो ॥ ९ ॥

व्याख्या—केचन ग्रामीणा अनार्याः पामराः साधुषु द्वेषमभ्युपगताः शत्रुप्राया एवं निष्ठुरं भाषन्ते, यथा—एते वराकाः प्राग्जन्मोपार्जितमशुभकर्मफलमनुभवन्ति, ये इमे परगृहभिक्षयोपजीवन्ति, यद्वाहि प्रस्वेदमलाविला रजोऽवगुण्ठिताः परगृहेषु भिक्षार्थं अटन्ति, य एवंजीविन इति, लुञ्चितशिरसः अदत्तदानाः सर्वथा भोगवञ्चिता दुःखं जीवन्तीति गाथार्थः ॥९॥ किञ्च—

अप्पेगे वइजुंजंति, नगिणा पिंडोलगाहमा । मुंडा कंडूविणट्ठंगा, उज्जल्ला असमाहिता ॥ १० ॥

व्याख्या—अपि 'एके' केचन अनार्या ईदृशं वाचं 'प्रयुञ्जन्ति' भाषन्ते, एते जिनकल्पिकाः नग्नास्तथा 'पिण्डोलग'त्ति पिण्डप्रार्थका अधमा मलाविला 'मुण्डा' मुण्डितशिरसः कण्डूविनष्टाङ्गाः—विकृतशरीराः कुष्ठिनः सनत्कुमारवद्विनष्टदेहाः 'उज्जल्लाः' शुष्कप्रस्वेदवन्तः बीभत्साः दृष्टा वा जन्तूनामसमाधिमुत्पादयन्तीति गाथार्थः ॥१०॥

अथैतद्भाषकाणां विपाकं दर्शयति—

एवं विप्पडिवन्नेगे, अप्पणा उ अजाणया । तमातो ते तमं जंति, मंदा मोहेण पाउडा ॥ ११ ॥

व्याख्या—एवमेके अपुण्यकर्माणः अज्ञानिनो 'विप्रतिपन्नाः' साधुद्वेषिणः स्वयमात्मना अज्ञानिनः अन्येषां विवेकिनां च विशारदानोद्यतानां वचनं अकुर्वन्तस्तमसोऽज्ञानरूपादुत्कृष्टं तमो यान्ति, अथवा अधस्तादप्यधस्तनीं गतिं गच्छन्ति, किमिति ? यतस्ते मन्दा 'मोहेन' अज्ञानेन 'प्रावृता' आच्छादिता मिथ्यादर्शनेन वा स्थगिताः विप्रायाः साधु-

विद्विषः ईदृशा एव भवन्तीति गाथार्थः ॥ ११ ॥ अथ दंशमशकपरीषहमधिकृत्याह—

पुट्ठो य दंसमसएहिं, तणफासमचाइया । न मे दिट्ठे परे लोए, जइ परं मरणं सिया ॥ १२ ॥

व्याख्या—सिन्धुताम्रलिप्तकोङ्कणादिषु देशेषु प्रायो दंशमशकाः स्युः, अथ साधुः कदाचित्तत्र देशे गतः सन् दंशमशकादिभिः 'स्पृष्टो' भक्षितः, तथा वस्त्रप्रावरणादिरहितस्तृणेषु शयानस्तत्परीषहं सोढुमशक्तः सन् कदाचिदार्त्तिवशात् एवं चिन्तयेत्—ईदृश्यो दुष्कराः क्रियाः परलोकाय विधीयमानाः सन्ति, इदमनुष्ठानं परलोकसाधनाय साधुभिर्विधीयते, स तु परलोकः केनापि न दृष्टः, न कोऽपि परलोकं दृष्ट्वा आयातः, मयाऽपि न दृष्टः, (यदि) परमनेन क्लेशेन परलोको न भविष्यति, परं दंशमशकैः पीडितस्य मे मरणं निश्चयेन भविष्यति, अनेन परीषहोपसर्गेण मरणं विना नान्यत् किञ्चित्फलमस्तीति गाथार्थः ॥ १२ ॥ अपि च—

संतत्ता केसलोएणं, बंभचेरपराइया । तत्थ मंदा विसीयंति, मच्छाविट्ठा व केयणे ॥ १३ ॥

व्याख्या—केचन कातराः केशलोचेन 'सन्तप्ताः' पीडिताः सरुधिरकेशोत्पाटनेन महती शिरसि व्यथा जायते, तया च व्यथया व्यथिताः सन्तो 'दूयन्ते' भज्यन्ते संयमात् भग्नचित्ता जायन्ते, तथा ब्रह्मचर्येण—वस्तिनिरोधेन पराजिताः सन्तः केशोत्पाटनेन अतिदुर्जयकन्दर्पदर्पेण वा पराजिताः सन्तो 'मन्दा' जडाः विषीदन्ति—संयमे शैथिल्यं प्रतिपद्यन्ते, यथा 'केतने' मत्स्यबन्धने प्रविष्टाः सन्तो मत्स्याः निर्गतिका जीवितं त्यजन्ति, एवं ते वराकाः कामकदर्थिताः केशोत्पाटन-

पीडया च पीडिताः संयमं त्यजन्तीति गाथार्थः ॥ १३ ॥ किञ्च—

अत्तदंडसमायारा, मिच्छासंठियभावणा । हरिसप्पओसमावन्ना, केइ लूसंतिऽणारिया ॥ १४ ॥

व्याख्या—तथा केचन अनार्याः आत्मदण्डसमाचाराः, येनानुष्ठानेन मुधा आत्मा दण्ड्यते-धर्माद्भ्रंश्यते तेनानुष्ठानेन संयुक्ताः सन्तो मिथ्यासंस्थितभावनाः-मिथ्यात्वोपहतदृष्टयः, तथा 'हर्षप्रद्वेषमापन्ना' रागद्वेषोपहताः, ते एवम्भूताः सदाचारं साधुं क्रीडया प्रद्वेषेण वा क्रूराः कदर्थयन्ति दण्डादिभिर्वाग्भिर्वेति गाथार्थः ॥ १४ ॥ एतदेव दर्शयति—

अप्पेगे पलियंतंसि, चारो चोरोत्ति सुव्वयं । बंधंति भिक्खुयं बाला, कसायवयणेहि य ॥ १५ ॥

व्याख्या—अप्येके अनार्याः पूर्वगाथोक्तगुणयुक्ताः मिथ्यादृशः रागद्वेषवन्तः अनार्यदेशे विचरन्तं साधुं चरोऽयं चौरोऽयमिति बुद्ध्या 'सुव्रतं' सदाचारमपि कदर्थयन्ति, चौरोऽयमिति कृत्वा बध्नन्ति 'बालाः' अज्ञानिनो विवेकविकलाः 'कषायवचनैः' कटुकवचनैर्निर्भर्त्सयन्तीति गाथार्थः ॥ १५ ॥ तथा पुनः—

तत्थ दंडेण संवीते, मुट्ठिणा अदु फलेण वा । नातीणं सरती बाले, इत्थी वा कुद्धगामिणी ॥ १६ ॥

व्याख्या—तथा अनार्यदेशेषु विहरन् साधुः अनार्यैर्दण्डेन वा मुष्टिना वा 'संवीतः' प्रहतोऽथवा फलेन (मातुलिङ्गादिना) खड्गादिना वा कदर्थितो भावितो वा अपरिणतो बालः ज्ञातीनां स्वजनानां वा स्मरति, तद्यथा-यदि कश्चिन्मदीयः स्वजनो भवति तदा नाहमेवं कदर्थनामवाप्नुयामिति, दृष्टान्तमाह-यथा स्त्री 'क्रुद्धा सती' गृहमानुषेभ्यो रुष्टा सती

रोषेण गृहान्निर्गता सती निराश्रया मांसपेशीव सर्वस्पृहणीया सर्वतोऽभिगमनीया चौरादिभिरभिद्रुता सती सञ्जातपश्चात्तापा स्वगृहमानुषाणां स्मरति, एवं साधुरपि अनार्यैः कदर्थितः ज्ञातीनां स्मरतीति गाथार्थः ॥ १६ ॥ उपसंहरन्नाह—

एए भो ! कसिणा फासा, फरुसा दुरहियासया ।
हत्थी वा सरसंवीते, कीवा अवसा गया गिहं तिबेमि ॥ १७ ॥

व्याख्या—भो इति शिष्यामन्त्रणं, एते परीषहाश्च पूर्वोक्ता अनार्यकृताः 'कृत्स्नाः' सम्पूर्णाः 'परुषाः' कर्कशाः अल्पसत्त्वैर्दुःखेनाधिसह्यन्ते, ततश्च असहमानाः लज्जां त्यक्त्वा अश्लाघामङ्गीकृत्य पुनर्गृहवाससमाश्रयन्ते, रणशिरसि शरजालैः संवीताः हस्तिन इव भङ्गमुपयान्ति 'क्लीबाः' असमर्था—अवशाः कर्मायत्ताः पुनर्गृहं गच्छन्तीति, ब्रवीमिति पूर्ववत् ॥ १७ ॥

इत्युपसर्गपरिज्ञायाः प्रथमोद्देशकः समाप्तः ।

अथ द्वितीयः समारभ्यते, तथाहि—उपसर्गा द्विधा, अनुकूलाः प्रतिकूलाश्च, तत्र प्रथमोद्देशके प्रतिकूलाः प्रतिपादिताः, अथ द्वितीये अनुकूलाः प्रतिपाद्यन्ते, तत्रेयमादिगाथा—

अहिमे सुहुमा संगा, भिक्खूणं जे दुरुत्तरा । जत्थ एगे विसीयंति, न चयंति जवित्तए ॥ १ ॥

व्याख्या—अथ (?) अथानन्तरं एते सूक्ष्माः सङ्गाः अनुकूलाः, यथा प्रतिकूलाः शरीरव्यथाकारिणस्ते बादरा अभिधीयन्ते, तथा इमे आन्तरचेतोविकारकारिणः 'सङ्गाः' मातापित्रादिसम्बन्धाः 'भिक्खूणं' साधूनामपि 'दुरुत्तरा' दुर्लङ्घ्या, प्रायो

जीवितान्तकरैः प्रतिकूलोपसर्गैर्मध्यस्थवृत्तिमवलम्ब्य महापुरुषैरवस्थातुं शक्यते, परमेते त्वनुकूलाः साधूनामपि धर्माद्ध्वंसयन्ति, तेनैव दुरुत्तरा इत्युक्तं, अत एतेष्वनुकूलोपसर्गेषु उदीर्णेषु एके अल्पसत्त्वाः 'विषीदन्ति' शीतलविहारिणो भवन्ति—संयमाद्भ्रश्यन्ति, ते कातरा नैवात्मानं संयमे 'यापयितुं' व्यवस्थापयितुं शक्नुवन्ति, न संयमे समर्था भवन्तीति गाथार्थः ॥ १ ॥

अथ तानेव सूक्ष्मान् सङ्गानुपदर्शयति—

अप्पेगे नायओ दिस्स, रोयंति परिवारिया । पोस णे ताय ! पुट्ठोसि, कस्स तात ! जहासि णे ॥ २ ॥

व्याख्या—एके ज्ञातयो मातापित्रादयः प्रव्रजितं प्रव्रजन्तं वा दृष्ट्वा 'परिवार्य' वेष्टयित्वा रुदन्ति एवं [च] वदन्ति दीनं, यथा—अस्माकं पोषको भविष्यसीति बुद्ध्याऽस्माभिराबाल्यात्त्वं पोषितः, अधुना 'णे' अस्मानपि त्वं 'तात' पुत्र ! + 'पोषय' पालय, कस्य कृते—केन कारणेन अस्मांस्त्यजसि ? नास्माकं त्वां विना कश्चिदन्यः पालकोऽस्तीति गाथार्थः ॥ २ ॥ किञ्च—

पिया ते थेरओ तात !, ससा ते खुड्डिया इमा । भायरो ते सगा तात !, सोयरा किं चयासि णे ॥ ३ ॥

व्याख्या—पुत्रा एवं वदन्ति—अहो तात ! तव पिताऽसौ 'स्थविरो' वृद्धः, तथा 'स्वसा' भगिनी 'लघीयसी' इमा पुरः स्थिता, तथा भ्रातरस्ते 'स्वका' निजास्तात ! सोदरा, एतान् पालनार्हान् किमित्यस्मांस्त्यजसीति गाथार्थः ॥ ३ ॥

+ तन्यते—विस्तार्यते कुलसन्ततिर्येनेति व्युत्पत्त्या "तातोऽनुकम्प्ये पितरि चे"ति हैमानेकार्थवचनेनानुकम्पार्हत्वात्पुत्रोऽपि 'तात'शब्देनात्र गृह्यते ।

मायरं पियरं पोस, एवं लोगो भविस्सइ । एयं खु लोइयं ताय !, जे उ पालेंति मायरं ॥ ४ ॥

व्याख्या—मातरं पितरं 'पुषाण' पोषय, एवं च कृते तवोभयलोकसिद्धिः, तात ! इदमेव लौकिकं—अयमेव लोकाचीर्णः पन्थाः, यद्वृद्धयोर्मातापित्रोः पालनं, यतः—"सो च्चिय जयम्मि जाओ, सो च्चिय कुलविमलनहयलमियंको । जो जणणिजणयबंधव-गुरूण आसाओ पूरेइ ॥ १ ॥" इति वचनात् । [इति] गाथार्थः ॥ ४ ॥ अपि च—

उत्तरा महुरुल्लावा, पुत्ता ते ताय ! खुड्डया । भारिया ते णवा ताय !, मा सा अन्नं जणं गमे ॥ ५ ॥

व्याख्या—'उत्तरा' उत्तरोत्तरजाता 'मधुरोल्लापाः' मधुरभाषिणः, तात ! तव पुत्राः मन्मनालापाः क्षुल्लकास्ते लघवः, तथा भार्या ते 'नवीना' नवयौवना, नवोढा च साऽसौ त्वया परित्यक्ताऽन्यं जनं गच्छेत्-उन्मार्गचारिणी मा भूयादयं च महाँल्लोकापवाद इति गाथार्थः ॥ ५ ॥ अपि च—

एहि ताय ! घरं जामो, मा तं कम्मसहा वयं । बितियं पि ताय ! पासामो, जामु ताय ! सयं गिहं ॥ ६ ॥

व्याख्या—जानीमो वयं, यथा—त्वं गृहकार्यभीरुस्तथाप्येह्यागच्छ गृहं यामो, मा त्वं किमपि कर्म कृथाः, अपि तु समुत्पन्ने कार्ये वयं सहाया भविष्यामः, एकवारं त्वं गृहकार्येभ्यो भग्नः परमधुना द्वितीय[मपि]वारं द्रक्ष्यामो यदस्माभिः सहायैस्तव न किञ्चिद्विनश्यति, तदेहि गृहं यामः, एतदस्मद्वचनं कुर्विति गाथार्थः ॥ ६ ॥ किञ्च—

१ स एव जगति जातः स एव कुलविमलनभस्तलमृगाङ्कः । यो जननीजनकबान्धव-गुरूणां आशाः पूरयति ॥ १ ॥

गंतुं ताय ! पुणो गच्छे, ण तेणासमणो सिया । अकामगं परिक्कमंतं, को ते वारेउ अरिहई ? ॥ ७ ॥

व्याख्या—हे तात ! गृहं गत्वा पुनरागच्छेः संयमाय, एकवारं गृहगमनेन अश्रमणो न भविष्यसि 'अकामकं' गृहव्यापारेच्छारहितं स्वमनोरुच्या अनुष्ठानं कुर्वन्तं कस्त्वां वारयिता ? यदि वा अकामगं—वृद्धावस्थायां मदनेच्छारहितं पुनः संयमाय गच्छन्तं कस्त्वां 'निवारयितुं' निषेधयितुमर्हति ? को वारयिष्यतीति गाथार्थः ॥ ७ ॥ अन्यच्च

जं किं चि अणगं तात !, तं पि सव्वं समीकतं । हिरण्णं ववहाराई, तं पि दाहामु ते वयं ॥ ८ ॥

व्याख्या—'तात' पुत्र ! यत्किमपि त्वदीयं ['अणगं'ति] 'ऋणं' देयद्रव्यमासीत्तत्सर्वमस्माभिः सम्यग्विभज्य समीकृतं, यदि वा 'समीकृतं' सुदेयत्वेन व्यवस्थापितं, पुनर्यत्किञ्चिद् हिरण्यं व्यवहाराद्युपयुज्यते तत्सर्वं वयं दास्यामो, निर्धनोऽहमिति मा कृथा भयमिति गाथार्थः ॥ ८ ॥ उपसंहारार्थमाह—

इच्चेव णं सुसेहंति, कालुणीयं समुट्ठिया । विबद्धो नायसंगेहिं, ततोऽगारं पहावई ॥ ९ ॥

व्याख्या—इत्येवं पूर्वोक्तया नीत्या मातापित्रादयः करुणामुत्पादयन्तः स्वयं वा दैन्यमुपस्थितास्तं प्रव्रजितं—'सुसेहंति'त्ति सुष्ठु शिक्षयन्ति—व्युद्ग्राहयन्ति, स चापरिणतधर्मोऽल्पसत्त्वो ज्ञातिसङ्गैर्विबद्धो—मातृपितृपुत्रकलत्रादिमोहितः प्रव्रज्यां परित्यज्य 'अगारं' गृहं प्रति धावतीति गाथार्थः ॥ ९ ॥ किञ्चान्यत्—

जहा रुक्खं वणे जायं, मालुया पडिबंधई । एवं णं पडिबंधंति, णातयो असमाहिणा ॥ १० ॥

व्याख्या–[यथा] अटव्यां जातं वृक्षं 'मालुया' वल्ली 'प्रतिबध्नाति' वेष्टयति, तथा 'ज्ञातयः' स्वजनास्तं यतिं असमाधिना प्रतिबध्नन्ति, ते ज्ञातयस्तथा तथा कुर्वन्ति यथा यथा साधोरसमाधिरुत्पद्यते + इति गाथार्थः ॥ १० ॥

विबद्धो नातिसंगेहिं, हत्थी वा वि नवग्गहे । पिट्ठतो परिसप्पंति, सूयगोव्व अदूरए ॥ ११ ॥

व्याख्या–'विबद्धो' बद्धः–परवशीकृतः [ज्ञातिसङ्गैः–मातापित्रादिसम्बन्धैः] 'ज्ञातयः' स्वजनाः सर्वमनुकूलमनुतिष्ठन्तस्तथा धृतिमुत्पादयन्ति यथा हस्ती नवीनधृतो धृत्युत्पादनार्थमिक्षुशकलैरुपचर्यते, एवमसावपि साधुः सर्वानुकूलैरुपायैरुपचर्यते । दृष्टान्तान्तरमाह–यथा नवप्रसूता गौर्निजवत्सकस्य स्नेहबद्धा 'अदूरगा' समीपवर्तिनी सती पृष्ठत एव 'परिसर्पति' गच्छति, तथा ते स्वजनास्तमुत्प्रव्रजितं पुनर्जातमिव [मन्यमानाः] पृष्ठतोऽनुसर्पन्तीति गाथार्थः ॥ ११ ॥ सङ्गदोषदर्शनायाह—

एते संगा मणूसाणं, पाताला व अतारिमा । कीवा जत्थ य किस्संति, नायसंगेहि मुच्छिया ॥१२॥

व्याख्या—एते पूर्वोक्ताः 'सङ्गाः' स्वजनसम्बन्धाः कर्मबन्धहेतवः, मनुष्याणां 'पाताला इव' समुद्रा इव 'अतारिमा' दुस्तराः, अल्पसत्त्वैर्दुःखेनातिलङ्घ्यन्ते, येषु सङ्गेषु 'क्लीबाः' कातराः क्लेशमनुभवन्ति–संसारे दुःखभागिनो भवन्ति, ज्ञातिसङ्गैर्मूर्च्छिताः–गृद्धाः सन्तो न चिन्तयन्त्यात्मानं संसारान्तर्वर्तिनमिति गाथार्थः ॥ १२ ॥ अपि च—

तं च भिक्खू परिन्नाय, सव्वे संगा महासवा । जीवियं नावकंखिज्जा, सोच्चा धम्ममणुत्तरं ॥ १३ ॥

+ " यदुक्तं–अमित्तो मित्तवेसेण, कंठे घेत्तूण रोयइ । मा मित्ता ! सोग्गइं जाइ, दोवि गच्छाम दुग्गइं ॥१॥ " इति वृ०

व्याख्या—'तं च' ज्ञातिसङ्गं संसारैकहेतुं भिक्षुर्ज्ञात्वा ज्ञपरिज्ञया प्रत्याख्यानपरिज्ञया परिहरेत्, किमिति ? यतस्ते सङ्गाः महाश्रवाः-महाश्रवद्वाराणि वर्त्तन्ते, तत एवंविधैरनुकूलोपसर्गैरुपस्थितैः असंयमजीवितं-गृहवासं 'नाभिकाङ्क्षेत्' नाभिलषेत्, प्रतिकूलोपसर्गैर्जीविताभिलाषी न स्यात्, किं कृत्वा ? श्रुत्वा धर्मं 'अनुत्तरं' प्रधानं मौनीन्द्रमिति गाथार्थः ॥ १३ ॥ अन्यच्च—

अहिमे संति आवट्टा, कासवेणं पवेइया । बुद्धा जत्थावसप्पंति, सीयंति अबुहा जहिं ॥ १४ ॥

व्याख्या—'अथ' इत्यनन्तरं इमे प्रत्यक्षा सर्वजनविदिताः आवर्त्ताः सन्ति, आवर्त्तयन्ति-प्राणिनं भ्रामयन्तीत्यावर्त्ताः, ते च भावावर्त्ता विषयाभिलाषसम्पादक-सम्पत्प्रार्थनाविशेषाः 'काश्यपेन' श्रीमहावीरेण 'वेदिताः' कथिताः, येषु आवर्त्तेषु सत्सु 'बुद्धाः' ज्ञाततत्त्वा अवसर्पन्ति-अप्रमत्ततया तानावर्त्तान् दूरतस्त्यजन्ति, अबुद्धाः पुनर्निर्विवेकतया तेष्ववसीदन्ति-अध्यासक्तिं कुर्वन्तीति गाथार्थः ॥ १४ ॥ तानेवावर्त्तान् दर्शयति—

रायाणो रायमच्चा य, माहणा अदुव खत्तिया । निमंतयंति भोगेहिं, भिक्खुयं साहुजीविणं ॥१५॥

व्याख्या—राजानो राजमन्त्रिणो ब्राह्मणाः क्षत्रियाः स्वाचारव्यवस्थितं [भिक्षुकं] भोगेषु निमन्त्रयन्ति, यथा ब्रह्मदत्तचक्रवर्तिना नानाविधैर्भोगैश्चित्रसाधुर्निमन्त्रितः, यद्वा श्रेणिकेन [अनाथि]निर्ग्रन्थसाधुर्भोगेषु निमन्त्रितः, एवं राजादयो विषयैर्निमन्त्रयन्ति-भोगोपभोगसम्मुखं कुर्वन्ति, कं ? भिक्षुकं साधुजीविनं, साध्वाचारेण जीवतीति तं साधुजीविनमिति

गाथार्थः ॥ १५ ॥ एतदेव दर्शयितुमाह—

हत्थऽस्सरहजाणेहिं, विहारगमणेहि य। भुंज भोगे इमे सग्घे, महरिसी! पूजयामु तं ॥ १६ ॥

व्याख्या—हस्त्यश्वरथयानैः तथा विहारगमनैश्च–उद्यानादौ क्रीडया गमनैः, चशब्दादन्यैरपि मनोऽनुकूलैर्विषयैर्निमन्त्रयन्तीदम्, यथा–भुङ्क्ष्व भोगान् इमान् 'श्लाघ्यान्' मनोहरान् महर्षे! त्वामेतैरुपकरणैः 'पूजयामः' सत्कारयाम इति गाथार्थः ॥ १६ ॥ किञ्चान्यत्—

वत्थगंधमलंकारं, इत्थीओ सयणाणि य। भुंजाहि इमाइं भोगाइं, आउसो! पूजयामु तं ॥ १७ ॥

व्याख्या—वस्त्रगन्धैरलङ्कारैः स्त्रीभिः प्रत्यग्रयौवनाभिः शय्यासनैश्च इमान् भोगान् भुङ्क्ष्व, आयुष्मन्!–साधो! त्वां पूजयाम इति गाथार्थः ॥ १७ ॥

जो तुमे नियमो चिण्णो, भिक्खुभावम्मि सुव्वया!। आगारमावसंतस्स, सव्वो संविज्जए तहा ॥१८॥

व्याख्या—यस्त्वया पूर्वे भिक्षुत्वे 'नियमो' महाव्रतादिरूपश्चीर्णः, हे सुव्रत! स सर्वोऽप्यगारं–गृहं आवसतो गृहस्थत्वेऽपि भवतस्तथैव विद्यत इति, नहि सुचीर्णस्य सुकृतस्य नाशोऽस्ति, सुचीर्णं हि सुकृतं न क्वापि यातीति गाथार्थः ॥१८॥ किञ्च—

चिरं दूइज्जमाणस्स, दोसो दाणिं कुतो! तव। इच्चेव णं निमंतिंति, नीवारेणेव सूयरं ॥ १९ ॥

व्याख्या—चिरकालं संयमानुष्ठानेन 'दूइज्जमाणस्स' विहरतः सतः गृहवासेऽपि साम्प्रतं न ते दोषः, चिरकालं

त्वया संयममनुष्ठितं साम्प्रतं [illegible] न किमपि दूषणं, एवं साधुं भोगैर्निमन्त्रयन्ति—भोगबुद्धिं कारयन्ति, यथा 'नीवारेण' व्रीहिविशेषकणदानेन शूकरं कूटके + प्रवेशयन्ति, एवं साधुमपि प्रलोभयन्तीति गाथार्थः ॥ १९ ॥ अथोपसंहारार्थमाह—

जोइया भिक्खुचरियाए, अचयंता जवित्तए । तत्थ मंदा विसीयंति, उज्जाणंसि व दुब्बला ॥ २० ॥

व्याख्या—'भिक्षुचर्या' दशविधचक्रवालसामाचारी, तया सीदन्तः—तत्करणं प्रति पौनःपुन्येन प्रेर्यन्ते, ततः प्रेरिताः सन्तस्तत्प्रेरणां दीयमानां शिक्षां अशक्नुवन्तः कर्तुं, संयमानुष्ठानेन आत्मानं यापयितुमसमर्थाः सन्तस्तत्र संयमे 'मन्दाः' जडा 'विषीदन्ति' शीतलविहारिणो भवन्ति, संयमं त्यजन्तीत्यर्थः । दृष्टान्तमाह—'उज्जाणंसि' त्ति उद्यानशिरसि—महाविषमे पथि शकटभारे योजिता दुर्बला 'उक्षाणो' वृषभाः ग्रीवामधःकृत्वा नीचैः पतित्वा तिष्ठन्ति, नोत्सहन्ते तं शकटभारमुद्वोढुं, तथा साधवोऽपि पञ्चमहाव्रतभारभग्ना एके कण्डरीकादिवत्संयमधुरमुत्सृज्य दूरे भवन्तीति गाथार्थः ॥२०॥ किञ्च—

अचयंता य लूहेणं, उवहाणेण तज्जिया । तत्थ मंदा विसीयंति, उज्जाणंसि जरग्गवा ॥ २१ ॥

व्याख्या—'रूक्षेण' संयमेन आत्मानं निर्वाहयितुमशक्नुवन्तः, तथा 'उपधानेन' बाह्याभ्यन्तरभेदभिन्नेन तपसा 'तर्जिताः' बाधिताः परीषहैश्च जिता एके अल्पसत्त्वाः संयमे विषीदन्ति । 'उद्यानशिरसि' उच्चकूटमस्तके × दुर्बलो गौरिव,

---

+ पिञ्जरे । × अतिविषमाध्वनि ।

महाविषमे पथि यूनोऽपि अवसीदनं सम्भाव्यते, किम्पुनर्जरद्गवस्य ? तथाऽऽवर्जैरुपसर्गितानां मन्दानां साधूनामवसीदनं युक्तमेवेति गाथार्थः ॥ २१ ॥

एवं निमंतणं लद्धुं, मुच्छिया गिद्ध इत्थिसु । अज्झोववन्ना कामेहिं, चोइज्जंता गया गिहं ति ॥२२॥ त्तिबेमि॰

व्याख्या—एवं पूर्वोक्तप्रकारेण कामभोगेषु निमन्त्रिताः मूर्च्छिताः धनकनकादिषु तथा स्त्रीषु गृद्धाः दत्तावधाना रमणीरागमोहिताः कामेषु अध्युपपन्नाः कामगतचित्ताः संयमेऽवसीदन्तोऽपरैरुद्युक्तविहारिभिः 'चोदिताः' संयमं प्रति प्रोत्साह्यमाना अपि केऽपि गुरुकर्माणः संयमं परित्यज्य अल्पसत्त्वा गृहं गताः—गृहस्थीभूताः, इति परिसमाप्तौ, ब्रवीमीति पूर्ववत्, इति गाथार्थः ॥ २२ ॥

इत्युपसर्गपरिज्ञायां द्वितीयोद्देशकटीका समाप्ता ।

अथ तृतीयोद्देशकः प्रारभ्यते—

जहा संगामकालम्मि, पिट्ठतो भीरु पेहति । वलयं गहणं नूमं, को जाणइ ? पराजयं ॥ १ ॥

व्याख्या—मन्दमतयो हि दृष्टान्तं विना न बुध्यन्ते तेन पूर्वं दृष्टान्तः प्रतिपाद्यते, यथा कश्चिद्भीरुर्युद्धे समुपस्थिते पूर्वमेव परित्राणाय दुर्गादिकं विषमस्थानमवलोकयति, तदेवाह—'वलयं' वलयाकारेण उदकवेष्टितं तथा 'गहनं' धवादिकण्टकिवृक्षैः परिच्छन्नं 'नूमं' ति प्रच्छन्नं गिरिगुहादिकं नाशाय आत्मनो त्राणभूतं तथाविधं किञ्चित्स्थानं गवेषयति,

भग्नः सन् अत्र प्रविक्ष्यामि, को जानाति युद्धे को जयति कः पराजयति "युद्धस्य हि गतिर्द्वैधी, कस्तत्र जयनिश्चयः।" इति वचनात् स्तोकैरपि बहवो जीयन्ते, कार्यसिद्धयो हि दैवायत्ता, इति बुद्ध्या भीरुः पूर्वमेव वलयादिकं विलोकयन्नेव युद्धे प्रविशतीति गाथार्थः ॥ १ ॥ किञ्च—

मुहुत्ताणं मुहुत्तस्स, मुहुत्तो होइ तारिसो । पराजियाऽवसप्पामो, इति भीरू उवेहई ॥ २ ॥

व्याख्या—मुहूर्तानां × मध्ये एकः कोऽपि तादृशो मुहूर्तः + भवेत् यत्र जयश्चिन्त्यते तत्र पराजयोऽपि स्यात्, तदा भङ्गे सति का गतिः स्यात्? इति कातरस्तु पूर्वमेव त्राणाय विषमं स्थानं दुर्गादिकं विलोकयतीति गाथार्थः ॥ २ ॥

अथ दार्ष्टान्तिकं दर्शयति—

एवं तु समणा एगे, अबलं नच्चाण अप्पगं । अणागयं भयं दिस्स, अविकप्पंतिमं सुयं ॥ ३ ॥

व्याख्या—एवं पूर्वोक्तकातरदृष्टान्तेन कोऽपि कातरः श्रमणः स्वं यावज्जीवं संयमभारं उद्वोढुं अबलं ज्ञात्वा, एतावता संयमभारोद्वहनाय असमर्थः सन् अनागतं भयं दृष्ट्वा, यथा अकिञ्चनोऽहं मम वृद्धावस्थायां ग्लानत्वे दुर्भिक्षे वा आजीविकाभयं उत्पत्स्यते इदं श्रुतं व्याकरणं ज्योतिष्कं वैद्यकं मन्त्रादिकं ममावसरे त्राणाय भविष्यतीत्येवं कल्पयन्ति—परिकल्पयन्ति त्राणभूतं मन्यन्ते[कातराः श्रमणाः], एतावता आजीविकाकृते व्याकरणज्योतिष्कादिकं शास्त्रं शिक्षयतीति गाथार्थः ॥ ३ ॥ तथा च—

× "एकस्य वा मुहूर्त्तस्य"। + "कालविशेषः" इति दी०।

को जाणइ ? विउवातं, इत्थीओ उदगाउ वा । चोइज्जंता पवक्खामो, ण णो अत्थि पगप्पियं ॥४॥

व्याख्या—साधुः कातरः सन् एवं चिन्तयति, यथा—को जानाति ? मम कुतोऽपि [‘व्यापातः’] संयमभ्रंशो भविष्यति, न जाने स्त्रीतः सचित्तोदकपरिभोगाद्वा, कर्मणां विचित्रा गतिः, को जानाति ? व्यापातं–संयमजीविताद्ध्वंसं, एवं ते वराकाः अनागतमेव चिन्तां प्रकल्पयन्ति, यथा–पूर्वोपार्जितं नास्माकं किञ्चन द्रव्यजातमस्ति यत्तस्यां वेलायां कार्यं समेति, अन्यथा ज्योतिष्कमन्त्रतन्त्रकुण्डलविण्टलादिकं न विना परपरेण पृष्टाः सन्तः प्रयोक्ष्यामः–कथयिष्यामः, इति विचिन्त्य हीनसत्त्वाः साधवः पापश्रुताद्यौ प्रवर्तन्ते, न च तथापि भाग्यहीनानां कार्यसिद्धिर्भवत इति गाथार्थः ॥ ४ ॥

इच्चेवं पडिलेहंति, वलयप्पडिलेहिणो । वितिगिच्छसमावन्ना, पंथाणं व अकोविया ॥ ५ ॥

व्याख्या—इत्येवं यथा भीरवः सङ्ग्रामे प्रविशन्तः वलयादिप्रत्युपेक्षिणो भवन्ति, एवं प्रव्रजिता अपि अल्पसत्त्वाः आजीविकाभयान्मन्त्रतन्त्रादिकं जीवनोपायत्वेन परिकल्पयन्ति, कीदृशाः सन्तः ? विचिकित्सासमापन्नाः, विचिकित्सा–चित्तविप्लुतिः, यथा वयमेनं संयमभारं निर्वोढुं समर्था उत नेति विकल्पपराः, यथा पान्थाः पन्थानं प्रति ‘अकोविदाः’ मार्गानभिज्ञाः किमयमध्वा विवक्षितं स्थानं यास्यति न वेति चिन्तापरा भवन्ति, तथा साधवोऽपि संयमभारोद्वहने असमर्थाः कुण्डलविण्टलादिकं आजीविकाकृते अभ्यसन्तीति गाथार्थः ॥ ५ ॥ साम्प्रतं महापुरुषचेष्टिते दृष्टान्तमाह—

जे उ संगामकालम्मि, नाता सूरपुरंगमा । नो ते पिट्ठमुवेहिंति, किं परं मरणं सिया ? ॥ ६ ॥

व्याख्या—ये महासत्त्वाः पुरुषाः 'ज्ञाताः' लोके प्रसिद्धिं प्राप्ताः सर्वेषां शूराणां 'अग्रेसराः' प्रधाना अग्रस्कन्धं वहन्तः सङ्ग्रामे प्रविशन्तो न पराङ्मुखमवलोकन्ते, न नाशयोग्यं स्थानमन्वेषयन्ति, केवलमेवं चिन्तयन्ति—मरणादधिकं किमभविष्यति ? परं मङ्क्षु [illegible] यास्ति, [illegible] स्थास्याम इति चिन्तयन्तीति गाथार्थः ॥ ६ ॥

एवं समुट्ठिए भिक्खू, वोसिज्जाऽगारबंधणं । आरंभं तिरियं कट्टु, अत्तत्ताए परिव्वए ॥ ७ ॥

व्याख्या—एवं महासत्त्वपुरुषदृष्टान्तेन साधुरपि संयमे सावधानः संयमयशोरक्षणायोद्यत अगारबन्धनं त्यक्त्वा 'आरम्भं' सावद्यानुष्ठानं तिर्यक्कृत्वा विहायेत्यर्थः, एतावता सर्वं गृहपाशबन्धनादि व्युत्सृज्य 'आत्मा' मोक्षस्तदर्थाय × यतेत, मोक्षाय सावधानो भवेदिति गाथार्थः ॥ ७ ॥

अध्यात्मविषीदनाधिकारो गतः, अथ परवादिवचनं द्वितीयमर्थाधिकारमधिकृत्याह—

तमेगे परिभासंति, भिक्खुयं साहुजीविणं । जे एवं परिभासंति, अंतए ते समाहिए ॥ ८ ॥

व्याख्या—एके असाधवोऽन्यतीर्थिकास्तं भिक्षुं साधुजीविनं—स्वाचारे प्रवर्त्तमानं परिभाषन्ते—साधुनिन्दां कुर्वन्तीत्यर्थः। ये च गोशालकमतीया दिगम्बरा वा एवंविधस्य साधोर्निन्दां कुर्वन्ति ते 'समाधेः' सम्यगनुष्ठानात् मोक्षाद्दूरे ज्ञेया इति गाथार्थः ॥ ८ ॥ अथ यच्च परिभाषन्ते तदाह—

× "आत्मत्वाय-शेषकर्मरहितत्वाय" इति चूर्णि० ।

संबद्धसमकप्पा हु, अन्नमन्नेसु मुच्छिता । पिंडपातं गिलाणस्स, जं सारेह दलाह य ॥ ९ ॥

व्याख्या—ते परतीर्थिका एवं भाषन्ते, भो भिक्षवः ! यूयं 'संबद्धाः' गृहिणस्तत्समकल्पाः–गृहस्थसदृशा इत्यर्थः । कथं ? यथा गृहिणः परस्परमन्योन्यकार्ये वर्तन्ते, यथा माता पुत्रे स्निह्यति तथा पुत्रोऽपि मातरमिति अन्योऽन्यं मूर्च्छिताः परस्परं परोपकारनिरतास्तथा भवन्तोऽपि गुरुशिष्याद्युपकारिणो गृहिवत्, यथा गृहिणः परस्परमुपकारिणो दानादिना, तथा यूयमपीति भावः । तदेव दर्शयति–पिण्डपातं ग्लानस्य 'सारेह' त्ति गवेषय, यथा–ग्लानोपकाराय आहारमानीय दद्ध्वं, एवं परस्परं, गुरोश्च वैयावृत्त्यं कुरुध्वं, एवं भवन्तो गृहस्थसमकल्पा इति गाथार्थः ॥ ९ ॥

अथैतद्भाषिणां दोषदर्शनायाह—

एवं तुब्भे सरागत्था, अन्नमन्नमणुव्वसा । नट्ठसप्पहसब्भावा, संसारस्स अपारगा ॥ १० ॥

व्याख्या—एवं परस्परोपकारेण गृहस्था इव सरागस्थाः–सरागिणः, तथा अन्योन्यं 'वशमुपागताः' परस्परायत्ताः–मिथोऽधीनाः, यतयो हि न कस्याप्यधीना, निस्सङ्गतया स्वाधीना एव भवन्ति, अयं तु गृहिणामाचारो यत्परस्पराधीनत्वं, अत एव नष्टसत्पथसद्भावा यूयं सन्मार्गानभिज्ञाः, अतो न संसारपारगामिन इति गाथार्थः ॥ १० ॥

अयं पूर्वपक्षः, अस्य दूषणायाह—

अह ते परिभासेज्जा, भिक्खू मोक्खविसारए । एवं तुब्भे पभासंता, दुप्पक्खं चेव सेवह ॥ ११ ॥

१०

व्याख्या—अथ भिक्षुस्तान्–परतीर्थिकान् साधुनिन्दापरानुद्दिश्य 'परिभाषेत' ब्रूयात्, कथम्भूतो भिक्षुः? 'मोक्षविशारदः' मोक्षमार्गस्य प्ररूपकः। भो तीर्थिकाः! एवं साधून्निन्दमाना यूयं द्विपक्षासेविनः–रागद्वेषात्मकं पक्षद्वयं सेवध्वं, सदोषस्यात्मपक्षस्य समर्थनाद्रागः साधुनिन्दया तु द्वेषः, एवं द्विपक्षासेविनः, यद्वा बीजोदकोद्दिष्टभोजनाद्गृहस्था वेषमाश्रयणात्तु यूयं प्रव्रजिताश्चेत्येवं पक्षद्वयसेविनः, यदि वा स्वतोऽसदनुष्ठानपरा अपरं च सदनुष्ठानरतं च निन्दथ द्विपक्षसेविनो यूयमिति गाथार्थः ॥ ११ ॥

अथ ते प्रोचुः–कथं वयमसदाचाररताः? इति अधुना तेषामसदाचारं प्रकटयन्नाह—

तुब्भे भुंजह पाएसु, गिलाणा अभिहडंमि य। तं च बीओदगं भोच्चा, तमुद्दिस्सा य जं कडं ॥ १२ ॥

व्याख्या—वयमपरिग्रहा–निष्किञ्चना इति युक्ता कांस्यपात्रेषु भुंक्ध्वं, गृहस्थपात्रेषु भुञ्जानास्तत्परिग्रहात्सपरिग्रहा जाता यूयमिति, तथा ग्लानस्य गृहस्थपार्श्वादाहारानयने अभ्याहृतदोषश्च भवतां प्रकट एव, तथा बीजोदकभोजिन उद्देशिकभोजिनश्च, एवं प्रकटमेव भवतामसदाचारपरत्वमिति गाथार्थः ॥ १२ ॥

लित्ता तिव्वाभितावेणं, उज्झिया असमाहिया। नातिकंडूइयं सेयं, अरुयस्सावरज्झती ॥ १३ ॥

व्याख्या—भो तीर्थिकाः! यूयं षड्जीव[नि]कायविराधनारूपेण साधुनिन्दारूपेण च तीव्रेण सन्तापेन लिप्ताः स्थ, तथा 'उज्झिया' इति विवेकशून्या 'असमाहिया' शुभध्यानरहिताः, यथाऽरुषो[अरुकस्य]व्रणस्यातिकण्डूयनं 'न श्रेयो'

न शोभनं, अतिकण्डूयने हि व्रणो गाढतरं दोषमावहति, तथा अतिसाधुनिन्दा च भवतां न श्रेयसे इति गाथार्थः ॥ १३ ॥

तत्तेण अणुसिट्ठा ते, अपडिन्नेण जाणया । न एस णियए मग्गे, असमिक्खा वदी किती ॥ १४ ॥

व्याख्या—'तत्त्वेन' परमार्थेन यथावस्थितार्थप्ररूपणया ['ते'] गोशालकमतीया बोटिकाश्च 'अनुशासिताः' शिक्षां ग्राहिताः। कथम्भूतेन साधुना? 'अप्रतिज्ञेन' अस्मदपि समर्थनीयमित्येवं प्रतिज्ञारहितेन, पुनः कीदृशेन? 'जानता' हेयोपादेयार्थपरिच्छेदकेन। कथं अनुशासिताः? इत्याह—'न एस नियए मग्गे' एष भवदीयो मार्गो न नियतो—न युक्तिसङ्गतः—अयुक्त इत्यर्थः। कथं? यदस्मानुद्दिश्योक्तं—'यथैवं गृहस्थकल्पाः' तेषा (? भवता) असमीक्ष्याभिहिता अपर्यालोच्योक्तैषा वाग्, तथा 'कृतिः' करणमपि भवदीयं कर्तव्यमपि असमीक्षितमेव—अनालोचितमेव असम्बद्धमेवेति गाथार्थः ॥ १४ ॥ एतदेव दृष्टान्तेनाह—

एरिसा भो ! वई एसा, अग्गवेणुव्व करिसिता। गिहिणो अभिहडं सेयं, भुंजिउं णउ भिक्खुणं ॥१५॥

व्याख्या—भो वादिनः! येयमीदृशी वाग्, यथा—यतिना ग्लानस्यानीय न देयमित्येषा अग्रे 'वेणुवत्' वंशवत्कर्षिता 'तन्वी' दुर्बलेत्यर्थः, युक्तिं न क्षमते। केयं वाग्? यद्भवतोच्यते—ग्लानस्य गृहिणा आनीतमाहारं योग्यं कल्पते, परं यतेर्न यतिना आनीतं कल्पते, इत्येषा वाक् अयुक्ता, वयं तु एवं ब्रूमः—गृहिणा आनीतमुत्सर्गेण ग्लानस्य अकल्पनीयं, साधुना-

ऽनीतं तु कल्पते, साधोरभावे गृहिणाऽप्यानीय देयं ग्लानाय, कारणे न दोषः×, साधुसद्भावे दोष एवेति गाथार्थः ॥ १५ ॥

धम्मपन्नवणा एसा, सारंभाण विसोहिया । ण उ एयाहिं दिट्ठीहिं, पुव्वमासि पगप्पियं ॥ १६ ॥

व्याख्या—या एषा धर्मदेशना भवदीया यतीनां दानादिना गृहिणा उपकर्त्तव्यं, इत्येषा देशना 'सारम्भाणां' गृहस्थानां विशोधिका, गृहिणा दानं देयं "गृही दानेन शुद्धयति" इति वचनात् । परन्तु यतिना दानं न देयं, यतेर्दानाधिकारो नास्ति, यतयः स्वकीयानुष्ठानेन शुद्धयन्ति, इत्येषा [या] भवदीया धर्मदेशना सा न भवदीयतीर्थकरेण प्ररूपिता, न भवतीर्थकरेण प्ररूपितमिदं, यद्गृहस्थैरेव ग्लानावस्थायां यतेरुपकर्तव्यं, न तु यतिभिः परस्परमित्येवं सर्वज्ञैः पूर्व—मादौ प्ररूपितमासीदित्येषा भवद्देशना मिथ्या, यतो न सर्वज्ञा ईदृग्धर्मं प्ररूपयन्ति, यथा भवन्त ईदृग्धर्मदेशनया प्ररूपयन्ति न तथा सर्वज्ञैः प्ररूपितमिति गाथार्थः ॥ १६ ॥

सव्वाहिं अणुजुत्तीहिं, अचयंता जवित्तए । ततो वायं णिराकिच्चा, ते भुज्जोवि पगब्भिया ॥ १७ ॥

व्याख्या—ते सर्वेऽपि गोशालकमतीया बोटिकाश्च सर्वाभिरप्यनुयुक्तिभिः स्वपक्षं यापयितुं-आत्मानं स्वपक्षे स्थापयितुं 'अचयंता' अशक्नुवन्तः, ततो वादं निराकृत्य भूयोऽपि प्रगल्भिताः सन्तो धृष्टत्वं कुर्वन्ति, वादपरित्यागेऽपि धृष्टाः सन्त एवं भाषन्ते—अस्माकं परम्परैव प्रमाणं, यदस्माकं गुरुपरम्परागतं तदेव श्रेयः प्रमाणं "पुराणं [शास्त्रं] मानवो धर्मः,

× 'कारणे सति श्रावकेणानीतमाहारादिकं ग्लानयतेः कल्पते' इत्यक्षरघटना ।

साङ्गो वेदश्चिकित्सितम् । आज्ञासिद्धानि चत्वारि, न हन्तव्यानि हेतुभिः ॥ १ ॥" अत्र धर्मविधौ युक्तयो न विस्तार्यन्ते, युक्तिभिः किं प्रयोजनं ? इति गाथार्थः ॥ १७ ॥ अपि च—

रागद्दोसाभिभूतप्पा, मिच्छत्तेण अभिद्दुता । आउसे सरणं जंति, टंकणा इव पव्वयं ॥ १८ ॥

व्याख्या—तेऽन्यतीर्थिकाः रागद्वेषाभिभूता मिथ्यात्वेन अभिद्रुताः-सद्युक्तिभिर्वादं कर्तुं असमर्थाः आक्रोशवचनानि ब्रुवते तथा दण्डयष्ट्यादिभिश्च घ्नन्ति, यदा युक्तिभिरुत्तरं दातुमसमर्थास्तदा आक्रोशान् दण्डयष्ट्यादिभिश्च हननव्यापारं शरणतया श्रयन्ते, यष्टिमुष्टिप्रहारं कुर्वन्तीत्यर्थः । यथा 'टङ्कणा' म्लेच्छाः शस्त्रादिभिर्युद्धं कर्तुमसमर्थास्तदा पर्वतं शरणं कुर्वन्ति तथा तेऽपि दण्डयष्ट्यादिना हननव्यापारं शरणतया मन्यन्त इति गाथार्थः ॥ १८ ॥

बहुगुणप्पगप्पाइं, कुज्जा अत्तसमाहिए । जेणऽन्ने णो विरुज्झेज्जा, तेण तं तं समायरे ॥ १९ ॥

व्याख्या—बहवो गुणाः स्वपक्षसिद्धि-परदोषोद्भावनादयो माध्यस्थ्यादयो वा प्रकल्पन्ते-प्रादुर्भवन्ति आत्मनि येषु अनुष्ठानेषु तानि बहुगुणप्रकल्पान्याश्रयन्ते साधवः । प्रतिज्ञाहेतुदृष्टान्तोपनयनिगमनादीनि माध्यस्थ्यवचनप्रकाराणि [वा] भाषन्ते तेषां बोधार्थं, न पुनर्वाक्कलहादिकं कुर्वते आत्मसमाधये, यथा स्वपरयोश्चित्तसमाधिः स्यात्तथा वक्तव्यं, न परदुःखोत्पादकं वचो भाषणीयं साधुभिः, शुद्धस्यैव बोधयन्तीति भावः, न च ते आक्रोशपरान्यान्मन्यन्ताऽऽक्रोष्टव्याः, एवं च चिन्तयेद्यथा—" आक्कोसहणणमारण-धम्मब्भंसाण बालसुलभाणं । लाभं मन्नइ धीरो, जहुत्तराणं अभावम्मि

॥ १ ॥ " एवं विधिन्यात्मसमाधिं कुर्वन्ति, येन हेतुदृष्टान्तेनोपन्यस्तेन आत्मसमाधिः स्यात्, येन च भाषितेन अन्ये तीर्थिका न विरुध्यन्ते–न विद्वेषं यान्ति, तद्वचो भाषणीयं तथाऽनुष्ठानं कुर्यादिति गाथार्थः ॥ १९ ॥

तदेवं परमतं निराकृत्य स्वमतस्थापनायाह—

इमं च धम्ममादाय, कासवेणं पवेइयं । कुज्जा भिक्खू गिलाणस्स, अगिलाए समाहिए ॥ २० ॥

व्याख्या—इमं धर्मं समादाय 'काश्यपेन' श्रीमहावीरेण प्ररूपितं चैतत् यथा-साधुना ग्लानस्य वैयावृत्त्यं कार्यं परं अग्लान्या आत्मसमाधिना-यथा आत्मनो ग्लानस्य च समाधिरुत्पद्यते तथा वैयावृत्त्यं कार्यमित्ययं धर्मः श्रीमहावीरेण प्ररूपित इति गाथार्थः ॥ २० ॥

संखाय पेसलं धम्मं, दिट्ठिमं परिनिव्वुडे । उवसग्गे नियामित्ता, आमोक्खाय परिव्वएज्जासि ॥२१॥त्ति बेमि

व्याख्या—सर्वज्ञप्रणीतं धर्मं 'पेशलं' सुकुमारं-मनोहरं 'सङ्ख्याय' ज्ञात्वा 'दृष्टिमान्' यथावस्थितवस्तु-परिच्छेदवान् उपसर्गान् 'नियम्य' संयम्य-निरुध्य 'उपसर्गितोऽपि' कदर्थितोऽपि नासमञ्जसं मन्दो विदध्यादित्येवं साधुरामोक्षाय परिव्रजेत्-संयमानुष्ठानोद्युक्तो भवेदित्यहं ब्रवीमीति पूर्ववदिति गाथार्थः ॥ २१ ॥

इत्युपसर्गपरिज्ञायास्तृतीयोद्देशकः समाप्तः ।

उक्तस्तृतीयोद्देशकः, अधुना चतुर्थ आरभ्यते, यथानुकूल-प्रतिकूलोपसर्गैः साधुः क्षोभं यापासदा अनेन प्रज्ञापना

क्रियते, अनेन सम्बन्धेनायातस्यास्योद्देशकस्यादिसूत्रं—

आहंसु महापुरिसा, पुव्विं तत्ततवोधणा। उदएण सिद्धिमावन्ना, तत्थ मंदे विसीयती ॥ १ ॥

व्याख्या—अविदितपरमार्थाः केचन एवमाहुः–उक्तवन्तः, 'पूर्वं' पूर्वस्मिन् काले महापुरुषास्तारागणर्षिप्रभृतयस्त[प्त]-पोधनाः–पञ्चाग्न्यादितपस्तापका अपि 'शीतोदकेन' सचित्तोदकपरिभोग–कन्दमूलफलाद्युपभोगेन च 'सिद्धिमापन्नाः' सिद्धिगताः, इत्याकर्ण्य 'मन्दः' अज्ञः अस्नानादिपरीषहपराजितः प्रासुकोदकपरिभोगभग्नः संयमानुष्ठाने विषीदति, अप्रासुकोदकमेवाश्रयते, एवं मूढाः न विदन्ति यत्कर्मणां क्षयेन भरतादीनां मोक्षावाप्तिर्जाता, न तु शीतोदकपरिभोगादिति गाथार्थः ॥ १ ॥ किञ्च—

अभुंजिया नमी विदेही, रामगुत्ते य भुंजिया। बाहुए उदगं भोच्चा, तहा नारायणे रिसी ॥ २ ॥

व्याख्या—केचन कुतीर्थिकाः साधुविप्रतारणार्थमेवं भाषन्ते–विदेहदेशीयो नमीराजा अशनादिकमभुक्त्वा सिद्धिं गतः, तथा रामगुप्तो राजर्षिः 'भुक्त्वा' आहारादिपरिभोगं कृत्वा सिद्धिं गतः। तथा बाहुकर्षिः +नारायणर्षिश्च, एतौ द्वावपि शीतलोदकपरिभोगादेव सिद्धाविति गाथार्थः ॥ २ ॥

+ मूलेनार्थसाकल्यं त्वेवमेवास्ति, परं शीतोदकादिपरिभोगं कृत्वा तथा नारायणो नाम महर्षिः परिणतोदकादिपरिभोगात्सिद्ध इति वृद्धवृत्तौ।

आसिले देविले चेव, दीवायणमहारिसी । पारासरे दगं भोच्चा, बीयाणि हरियाणि य ॥ ३ ॥

व्याख्या—एते सर्वेऽपि ऋषयः उदकेन बीजहरितादिकपरिभोगेन सिद्धिं प्राप्ता इति गाथार्थः ॥ ३ ॥

एते पुव्वमहापुरिसा, आहिता इह संमया । भोच्चा बीओदगं सिद्धा, इति मेयमणुस्सुयं ॥ ४ ॥

व्याख्या—एते पूर्वोक्ता महापुरुषाः बीजसचित्तोदकपरिभोगात् सिद्धिं प्राप्ताः, एवं कुतीर्थिका अथवा सुखशीलाः स्वयूथ्याः पार्श्वस्थादयो भाषन्ते—यथाऽस्माभिर्भारतपुराणादौ श्रुतं तथा वयमप्येवमेव सिद्धिं साधयिष्यामः इति गाथार्थः ॥ ४ ॥

तत्थ मंदा विसीयंति, वाहच्छिन्ना व गद्दभा । पिट्ठतो परिसप्पंति, पिट्ठसप्पी व संभमे ॥ ५ ॥

व्याख्या—ईदृशं कुश्रुत्युपदेशं श्रुत्वा मन्दा 'विषीदन्ति' संयमे भग्नचित्ता जायन्ते, न पुनरेवं विदन्ति—यद्बीजोदकसचित्तपरिभोगात् सिद्धिर्न जायते, सिद्धिस्तु जातिस्मरणादिना सम्यग्ज्ञानदर्शनचारित्राराधया च जायते, मरुदेवास्वामिनी—भरत—पृथ्वीचन्द्रगुणचन्द्र—वल्कलचीरिप्रभृतीनामिव, नहि शीतोदक—बीजाद्युपभोगेन जीवोपमर्दप्रायेणानुष्ठानेन कर्मक्षयो जायते । विषीदने दृष्टान्तमाह—'वाहो' भारस्तेन 'छिन्ना' त्रुटिता रासभा इव, यथा रासभा अर्द्धपथ एव भारमुत्सृज्य निपतन्ति, तथा तेऽपि संयमभारं विहाय शीतलविहारिणो भवन्ति । पुनर्दृष्टान्तान्तरमाह—यथा भग्नगतयो मनुष्या अग्न्यादिसंभ्रमे व्याकुलाः नश्यतां मानवानां पृष्ठपरिसर्पिणो भवन्ति, नाग्रगामिनः स्युः, अपितु अग्न्यादिसंभ्रमे विनश्यन्ति, एवं तेऽपि संयमे शिथिलाः सन्तो मोक्षं प्रति प्रवृत्ता अपि न मोक्षगतयो भवन्ति, अनन्तमपि कालं संसारे

पर्यटन्तीति गाथार्थः ॥ ५ ॥ अथ मतान्तरमाह—

इहमेगे उ भासंति, सातं सातेण विज्जती । जे तत्थ आरियं मग्गं, परमं च समाहियं ॥ ६ ॥

व्याख्या—इह एके शाक्यादयः स्वयूथ्या वा लोचादिना पीडिता एवं भाषन्ते, किं तदित्याह—' सातं ' सुखं सातेन स्यात्, एतावता को भावः ? सुखेनैव सुखावाप्तिर्जायते, यत उक्तं—" सर्वाणि सत्त्वानि सुखे रतानि, सर्वाणि दुःखाच्च समुद्विजन्ते । तस्मात्सुखार्थी सुखमेव दद्यात्, सुखप्रदाता लभते सुखानि ॥ १ ॥ " यतः कारणानुरूपं कार्यमुत्पद्यते, यथा शालिबीजाच्छाल्यङ्कुरो, न यवाङ्कुरः, तथा सुखात्सुखं दुःखाद्दुःखं, न च लोचादिकष्टान्मुक्तिरिति, एवं ये स्वयूथ्याः शाक्यादयो वा भाषन्ते ते आर्यमार्गं सर्वज्ञभाषितं परिहरन्ति, तथा परमं च समाधिं ज्ञानदर्शनचारित्रात्मकं ये त्यजन्ति ते मन्दा—मूढमतयो भवोदधौ पर्यटन्तीति गाथार्थः ॥ ६ ॥

मा एयमवमन्नंता, अप्पेणं लुंपहा बहुं । एतस्स अमोक्खाए, अओहारिव जूरह ॥ ७ ॥

व्याख्या—एतमार्यमार्गं सर्वज्ञभाषितं ' सुखं सुखेनैव जायते ' इति भाषमाणा मोहमोहिताः भो तीर्थिकाः ! यूयं ' अवमन्यमानाः ' सर्वज्ञभाषितं मार्गं परिहरन्तः अल्पेन सांसारिकसुखेन बहुं परमार्थसुखं मोक्षाख्यं मा लुम्पथ—मा विध्वंसथ, एवंविधस्यासत्पक्षस्य ' अमोक्षे ' अपरित्यागे अयोहारवज्झूरयिष्यथ, यथा लोहवाहकः मार्गान्तराले रूप्यसुवर्णरत्नादिलाभेऽपि दूरमानीतमिति कृत्वा लोहं नोज्झितवान्, पश्चात्स्वस्थानं प्राप्तः अल्पलाभे आत्मानं पश्चात्तापेन दह्यमानो निनिन्द

पश्चात्तापं कृतवान्, एवं भवन्तोऽपि झूरयिष्यन्तीति गाथार्थः ॥ ७ ॥ पुनरपि शाक्यादीनां दोष दर्शनायाह—

पाणाइवाए वट्टंता, मुसावाए असंजया । अदिन्नादाणे वट्टंता, मेहुणे य परिग्गहे ॥ ८ ॥

व्याख्या—एतेषु प्राणातिपातादिषु वर्तमानाः यूयमेकान्तेन असंयता अल्पेन विषयसुखेन बहुं मोक्षसुखं विलुम्पथ, यथाहि—पचनपाचनादिक्रियां कुर्वतां भवतां सावद्यानुष्ठानारम्भतया प्राणातिपातापत्तिः, तथा वयं प्रव्रजिता इति ब्रुवतां पुनर्गृहस्थाचरणान्मृषावादः, त्रसस्थावरजीवानां शरीरोपभोगे तानि शरीराणि तत्स्वामिभिरदत्तानि, अतोऽदत्तग्रहणमापन्नं भवतां, गोमहिष्य[आ]गजोष्ट्रादिपरिग्रहात्तन्मैथुनानुमोदनादब्रह्म, धनधान्यादिपरिग्रहात्परिग्रहः । अत एव यूयमेकान्तेनासंयता इति गाथार्थः ॥ ८ ॥ अथ पुनरपि परमतं दूषयितुमाह—

एवमेगे उ पासत्था, पन्नवंति अणारिया । इत्थीवसं गया बाला, जिणसासणपरम्मुहा ॥ ९ ॥

व्याख्या—एवमनेन प्रकारेण एके पार्श्वस्थादयः अनार्याः 'प्रज्ञापयन्ति' प्ररूपयन्ति स्त्रीणां वशङ्गताः—स्त्रीणां वशवर्तिनो 'बाला' अज्ञाः—विवेकविकलाः स्त्रीपरीषहं सोढुमसमर्थाः शासनपराङ्मुखाः—जिनशासनविद्विषः एवं भाषन्ते इति गाथार्थः ॥ ९ ॥ किं भाषन्ते ? तदेवाह—

जहा गंडं पिलागं वा, परिपीलेज्ज मुहुत्तगं । एवं विन्नवणित्थीसु, दोसो तत्थ कओ सिया ? ॥१०॥

व्याख्या—यथा कश्चित्पुरुषो 'गण्डं' स्फोटकं समुत्थितं ज्ञात्वा तत्पीडोपशमार्थं तत्पिटकं परिपीड्य पूति रुधिरादिकं

निर्भिद्य मुहूर्तं सुखितो भवति, न च कोऽपि दोषः समुत्पद्यते, मुहूर्तमात्रं सुखं विन्दति, तथा स्त्रीविज्ञापनायां–स्त्रीसेवायां गण्डपरिपीडनकल्पो दोषः ? अपितु न कोऽपि, स्यादपि यदि काऽपि पीडोत्पद्यते, न चासाविहास्तीति गाथार्थः ॥ १० ॥

जहा मंधाद(णे)ए (?) नाम, थिमितं भुंजती दगं। एवं विन्नवणित्थीसु, दोसो तत्थ कओ सिया ? ॥११॥

व्याख्या—नाम इति सम्भावनार्थो, यथा [मन्धादन] 'मन्धादो' मेषः स्तिमितं–अनालोडयन्नुदकं पिबति न च उदकं पीडयति आत्मानं च पुनः प्रीणयति, एवं स्त्रीसम्बन्धे न कस्यचिदन्यस्य पीडा आत्मनश्च प्रीणनमतः स्त्रीसेवायां कुतो दोषः ? अपि तु न कोऽपीति गाथार्थः ॥ ११ ॥ दृष्टान्तान्तरमाह—

जहा विहंगमा पिंगा, थिमितं भुंजती दगं । एवं विन्नवणित्थीसु, दोसो तत्थ कओ सिया ? ॥१२॥

व्याख्या—यथा 'पिङ्गाः' कपिञ्जला 'विहङ्गमाः' पक्षिणी आकाशस्था स्तिमितमुदकमापिबति, एवमत्रापि गर्भप्रदानपूर्विकया पुत्रार्थं स्त्रीसम्बन्धं कुर्वतोऽपि न दोष इति गाथार्थः ॥ १२ ॥

एवमेगे उ पासत्था, मिच्छदिट्ठी अणारिया । अज्झोववन्ना कामेहिं, पूयणा इव तरुणए ॥ १३ ॥

व्याख्या—एवं गण्डपीडनादिफलेन निर्दोषं मैथुनमिति मन्यमानाः एके पार्श्वस्थादयो मिथ्यादृष्टयोऽनार्याः कामेषु 'अध्युपपन्नाः' मूर्च्छिताः विषयैषिणो मूर्च्छिताः भवन्ति, अस्मिन्नर्थे दृष्टान्तमाह–'पूयण'त्ति+ गड्डरिका आत्मीयेऽपत्ये

+ "पूयणा'–डाकिनी 'तरुणके' स्तनन्धयेऽभ्युपपन्ना." इति बृहद्वृत्तौ ।

मूर्च्छिता भवति, सर्वासु तिर्यग्जातिषु गड्डरिकाया अपत्यस्नेहो महान् भवति, यथा किल सर्वपशूनामपत्यानि निरुदके कूपे अपत्यस्नेहपरीक्षार्थं क्षिप्यन्ते, तत्र चापरा मातरः स्वकीयस्वतनयशब्दाकर्णनेऽपि कूपतटस्था रुदन्त्यस्तिष्ठन्ति, उरभ्री त्वप-त्यस्नेहेनान्धा अपायमनपेक्ष्य तत्रैवात्मानं क्षिप्तवतीत्यतोऽपरपशुभ्यः स्वापत्ये मूर्च्छिता भवति, तथा तेऽपि पार्श्वस्थादयो विषयेषु मूर्च्छिता इति गाथार्थः ॥ १३ ॥

अपि चैवं दोषं दर्शयति---

अणागयमपस्संता, पच्चुप्पन्नगवेसगा । ते पच्छा परितप्पंती, खीणे आउम्मि जोव्वणे ॥ १४ ॥

व्याख्या—कामभोगेभ्यो ये न निवृत्तास्ते आगामिनि काले नरकादिषु महद्दुःखमपश्यन्तस्तथा 'प्रत्युत्पन्नं' वर्त-मानमेव वैषयिकं सुखाभासं गवेषयन्तो नानाविधैरुपायैर्भोगान् प्रार्थयन्त पश्चात् गते यौवने क्षीणे च स्वायुषि परितप्यन्ते-पश्चात्तापं विदधति, यथा-" कीरंति जाइजुव्वण-मएण अविचारिऊण कज्जाइं । वयपरिणामे सरियाइं, ताइं हियए खुडुक्कंति ॥ १ ॥ " किञ्च-" हतं मुष्टिभिराकाशं, तुषाणां कण्डनं कृतम् । यन्मया प्राप्य मानुष्यं, सदर्थे नादरः कृतः ॥ २ ॥ " [इति गाथार्थः ॥ १४ ॥] ये तु द्राक्षामिव बाल्येऽपि मधुरा विवेकिनस्तपश्चरणादि कुर्वन्ति न ते पश्चाच्छोचन्तीति दर्शयति—

जेहिं काले परिक्कंतं, न पच्छा परितप्पए । ते धीरा बंधणुम्मुक्का, नावकंखंति जीवियं ॥ १५ ॥

व्याख्या—यैर्विवेकिभिः 'काले' धर्मार्जनावसरे 'पराक्रान्तं' धर्मोद्यमो विहितस्ते 'पश्चात्' मरणकाले न परितप्यन्ते—न शोचन्ते, ये च बाल्यात्प्रभृति विषयेभ्यो निवृत्तास्ते धीरा 'बन्धनेन' स्नेहरागेण मुक्ता असंयमजीवितं नाभिकाङ्क्षन्ति, अथवा जीविते मरणे वा निस्पृहाः संयमोद्यममतयो भवन्तीति गाथार्थः ॥ १५ ॥ अन्यच्च—

जहा नई वेयरणी, दुत्तरा इह संमता । एवं लोगंसि नारिओ, दुत्तरा अमईमया ॥ १६ ॥

व्याख्या—यथा सर्वनदीभ्यो वैतरणी दुस्तरा 'सम्मता' सर्वजगत्प्रसिद्धा चैषा वार्ता, तथा लोके नारी निर्विवेकिभिः पुरुषैः दुस्तरा—दुर्लङ्घनीया ज्ञातव्येति गाथार्थः ॥ १६ ॥

जेहिं नारीण संजोगा, पूयणा पिट्ठओ कया । सव्वमेयं निराकिच्चा, ते ठिया सुसमाहिए ॥१७॥

व्याख्या—यैर्महासत्त्वैर्नारीणां संयोगाः परित्यक्ताः, तथा तत्सङ्गार्थमात्मनः पूजना—वस्त्रालङ्कारमाल्यादिभिर्विभूषा 'पृष्ठतः कृता' परित्यक्ता 'सर्वमेतत्' स्त्रीसङ्गविभूषादिकं क्षुत्पिपासाद्यनुकूलप्रतिकूलोपसर्गादिकं च निराकृत्य, महापुरुषसेवितं पन्थानमाश्रिताः, सुसमाधिना—स्वस्थचित्तवृत्तिरूपेण व्यवस्थिता ज्ञेया इति गाथार्थः ॥ १७ ॥ परीषहजयस्य फलमाह—

एए ओघं तरिस्संति, समुद्दं ववहारिणो । जत्थ पाणा विसन्नासि, किच्चंति सयकम्मुणा ॥ १८ ॥

व्याख्या—एते अनन्तरोक्तपरीषहोपसर्गजेतारः 'ओघं' संसारं दुस्तरमपि तरिष्यन्ति, यथा व्यवहारिणो यानपात्रेण समुद्रं तरन्ति, 'यत्र' भावौघे—संसारसागरे प्राणिनः स्त्रीविषयसङ्गाद्विषण्णाः सन्तः 'कृत्यन्ते' छिद्यन्ते स्वकृतेन

११

पापकर्मणा असातावेदनीयोदयरूपेणेति गाथार्थः ॥ १८ ॥

तं च भिक्खू परिन्नाय, सुव्वते समिते चरे । मुसावायं च वज्जिज्जा–ऽदिन्नादाणं च वोसिरे ॥ १९ ॥

व्याख्या—स च भिक्षुः संयमवान् एतत् पूर्वोक्तं वैतरणीनदीवद्दुस्तरा नार्यो यः परित्यक्तास्ते समाधिस्थाः संसारं तरन्ति, अन्ये परीषहपराजिताः स्वकृतेन कर्मणा पीड्यन्ते, इत्यादि सर्वं ज्ञपरिज्ञया ज्ञात्वा प्रत्याख्यानपरिज्ञया परिहरन् चरेत्–संयमानुष्ठानं विदध्यात् । कथम्भूतो भिक्षुः ? 'सुव्रतः' पञ्चमहाव्रतयुक्तः समितः पञ्चसमितिभिः, एवंविधः संयमानुष्ठानं विदध्यात्, मृषावादं वर्जयेत् । अदत्तादानं–दन्तशोधनमात्रमप्यदत्तं न गृह्णीयात् । एवं मैथुनपरिग्रहादपि त्यजन् संयमानुष्ठानं कुर्यादिति गाथार्थः ॥ १९ ॥ अथापरव्रतानां वृत्तिकल्पत्वादहिंसायाः प्राधान्यख्यापनार्थमाह—

उड्ढमहे तिरियं वा, जे केइ तसथावरा । सव्वत्थ विरयं कुज्जा, संतिनिव्वाणमाहियं ॥ २० ॥

व्याख्या—ऊर्ध्वमधस्तिर्यक् सर्वलोके ये केचन त्रसाः स्थावराश्च जन्तवः सन्ति, तेषां सर्वेषां विरतिं कुर्यान्मनोवाक्कायैः करणकारणाऽनुमतिभिश्च प्राणातिपातविरतिं कुर्यात् । शान्तिरिति शान्तिकर्म एतदेव निर्वाणमप्येतदाख्यातं यत्सर्वप्राणिनां प्राणरक्षणमिति गाथार्थः ॥ २० ॥ समस्ताऽध्ययनार्थोपसंहारार्थमाह—

इमं च धम्ममादाय, कासवेण पवेइयं । कुज्जा भिक्खू गिलाणस्स, अगिलाए समाहितं ॥ २१ ॥

व्याख्या—इमं 'काश्यपेन' श्रीमहावीरेण 'प्रवेदितं' कथितं धर्ममादाय–गृहीत्वा भिक्षुर्ग्लानस्य वैयावृत्त्यमग्ला-

[नतया]नेन (?) कुर्यात् । आत्मना समाधिं मन्यमानः धन्योऽहं यत् साधोर्वैयावृत्त्यं करोमि, कृतकृत्योऽहमिति मन्यमानो वैयावृत्त्यं कुर्यादिति गाथार्थः ॥ २१ ॥

संखाय पेसलं धम्मं, दिट्ठिमं परिनिव्वुडे । उवसग्गेऽहियासित्ता, आमोक्खाए परिव्वएज्जासि त्ति बेमि ॥

व्याख्या—सम्यक् ज्ञात्वा स्वसंमत्या जातिस्मरणादिना अन्यतो वा श्रुत्वा 'पेशलं' सुकुमारं धर्मं श्रुतचारित्रात्मकं श्रुत्वा ज्ञात्वा 'दृष्टिमान्' सम्यग्दर्शनी परिनिर्वृतः—कषायपरित्यागाच्छीतीभूतः उपसर्गानधिसह्य आमोक्षं यावत् परिव्रजेत् । संयमानुष्ठाने गच्छेदिति; परिसमाप्त्यर्थे, ब्रवीमीति पूर्ववत् ।

इति श्रीपरमसुविहितखरतरगच्छविभूषणमहोपाध्याय–श्रीमत्साधुरङ्ग–गणिविगुम्फितायां श्रीसूत्रकृताङ्गदीपिकाया-मुपसर्गपरिज्ञायाश्चतुर्थोद्देशकः समाप्तस्तत्समाप्तौ च समाप्तमुपसर्गपरिज्ञाख्यं तृतीयमध्ययनम् ॥

अथ स्त्रीपरिज्ञाख्यं चतुर्थमारभ्यते ॥

प्राक्तने अध्ययने अनुकूलाः प्रतिकूला उपसर्गाः प्रतिपादितास्तेष्वपि स्त्रीपरीषहो दुर्जयः, अतस्तज्जयार्थमिदं स्त्रीपरीषहाध्ययनं प्रारभ्यते । तत्रेयमादिगाथा ॥

जे मायरं च पियरं च, विप्पजहाय पुव्वसंजोगं । एगे सहिते चरिस्सामि, आरतमेहुणो विवित्तेसी ॥ १ ॥

व्याख्या—यो भिक्षुर्मातापित्रादीनां पूर्वसंयोगं श्वशुरादीनां च पश्चात् संयोगं त्यक्त्वा, ज्ञानदर्शनचारित्रसहितः संयमं पालयिष्ये, एवं कृतप्रतिज्ञः चरिष्यामि, कथम्भूतो भिक्षुः—'आरतमेहुणो' विरतमैथुनः 'विवित्तेसी' स्त्रीपशुपण्डकरहितोपाश्रयं गवेषयन् विचरतीति गाथार्थः ॥ १ ॥

एवंविधस्यापि साधोरविवेकिस्त्रीजनाद्यद्भवति, तदाह ।

सुहुमेणं तं परक्कम्म, छन्नपएण इत्थिओ मंदा ।
उवायं पि ताउ जाणंसु, जहा लिस्संति भिक्खुणो एगे ॥ २ ॥

व्याख्या—'तं' महापुरुषं साधुं 'सूक्ष्मेण' अपरकार्यमिषेण 'छन्नपदेन' छद्मना-कपटजालेन 'पराक्रम्य' तत्समीपमागत्य, स्त्रियो नानाविधकपटशतपूरिताः साधुसमीपमागत्य संयमाद्ध्वंसयन्ति । 'मन्दा' मायाविन्यः उपायमपि जानन्ति येनोपायेन साधुः संयमाद्भ्रश्यति । एवंविधाः स्त्रियः हावभावविब्बोकवत्य उपसाधुमागत्य उपविशन्ति, तथा

भाषन्ते मायाप्रधाना विलासवचनानि, यथा मागधिकावचनैः कूलवालकवत्साधुः संयमाद् भ्रंशमुपयातीति गाथार्थः ॥ २ ॥

अथ तानेव सूक्ष्मविप्रतारणोपायान् दर्शयितुमाह—

पासे भिसं णिसीयंति, अभिक्खणं पोसवत्थं परिहिंति ।
कायं अहे वि दंसंति, बाहुमुद्धट्टु कक्खमणुव्वजे ॥ ३ ॥

व्याख्या—विभ्रममुत्पादनार्थं पार्श्वे समागत्य निषीदन्ति । साधूपतारणार्थं + परिधानं शिथिलीकृत्य पुनर्बध्नन्ति । तथा अधःकायमूर्वादिकमनङ्गोद्दीपनाय दर्शयन्ति–प्रकटयन्ति । तथा 'बाहुमुद्धृत्य' कक्षामादर्श्य अनुकूलं साध्वभिमुखं व्रजेदिति गाथार्थः ॥ ३ ॥

सयणासणेहिं जोग्गेहिं, इत्थीओ एगया निमंतंति । एताणि चेव से जाणे, पासाणि विरूवरूवाणि ॥४॥

व्याख्या—काचित् स्त्री शयनासनैः एकदा सस्नेहवचनैर्निमन्त्रयति, तदा स साधुः तानि शयनासनानि 'विरूपरूपं' नानाप्रकारं 'पाशं' बन्धनस्थानं जानाति, यतश्च एतद्वचनैरुपविष्टस्तदा पाशे पतित एवेति चिन्तयतीति गाथार्थः ॥ ४ ॥

नो तासु चक्खुं संधिज्जा, नो विय साहसं समभिजाणे । णो सहियंपि विहरेज्जा, एवमप्पा सुरक्खिओ होज्जा॥

व्याख्या—साधुर्नो तासु स्त्रीषु चक्षुः सन्धयेत्–न तासु सम्मुखं विलोकयेत्–न तद्दृशौ दृष्टिं निवेशयेत् न च साहसम-

+ 'अभीक्ष्णं' अनवरतं 'पोषवस्त्रं'।

कार्यकरणादि समनुजानीयात्—अकार्यकरणं न प्रतिपद्यते, तथा नैव स्त्रीभिः सार्द्धं ग्रामादौ विहरेत्—न ताभिः सार्द्धं विविक्तासनो भवेत्। एवं स्त्रीसङ्गवर्जनेनात्मा सर्वापायस्थानेभ्यः सुरक्षितो भवतीति गाथार्थः ॥ ५ ॥

आमंतिय ओसविया, भिक्खुं आयसा निमंतंति । एताणि चेव से जाणे, सद्दाणि विरूवरूवाणि ॥६॥

व्याख्या—स्त्रियः साधुमामन्त्रयन्ति, यथाऽहममुककवेलायामागमिष्यामि, इत्येवं सङ्केतं ग्राहयित्वा, ओसवियत्ति संस्थाप्य—उच्चावचैर्विस्रम्भजनकैरालापैर्विश्वास्य आत्मोपभोगाय साधुं निमन्त्रयन्ति। यदि वा साधोर्भयापहरणार्थं कथयन्ति, नहि मद्भर्तुस्त्वया कापि शङ्का विधेया, तत्संमतेनैवेहागताऽस्मि, त्वया निर्भीकेन भाव्यं, इत्यादिवचोभिर्विश्रम्भमुत्पादयन्ति, तत्र यत्किञ्चिल्लघु वा महद्वा कार्यमुत्पद्यते तत्राहं नियोजनीया, सर्वं साधयिष्यामि । एवं प्रलोभयन्ति, स चावगततत्त्वो भिक्षुरेतान् विरूपरूपान् शब्दादीन् विषयान् ज्ञपरिज्ञया जानीयाद्यथैते शब्दादयो विषयाः दुर्गतिगमनैकहेतवः, इत्येवमवबुध्य प्रत्याख्यानपरिज्ञया परिहरेदिति गाथार्थः ॥ ६ ॥ तथा—

मणबंधणेहिं णेगेहिं, कलुणविणीयमुवगसित्ताणं । अदु मंजुलाइं भासंति, आणवयंति भिन्नकहाहिं ॥

व्याख्या—मनसो बन्धनभूतानि मनोबन्धनानि—मञ्जुलालापस्निग्धावलोकनाङ्गप्रत्यङ्गप्रकटनादीनि, तैस्तथा करुणालापविनयपूर्वकं उपसंश्लिष्य—समीपमागत्य, अथवा मञ्जुलानि—पेशलानि विश्रम्भकारीणि भाषन्ते तथा भिन्नकथाभी-रहस्यालापैः साधोश्चित्तमादाय अकार्यकरणं प्रत्याज्ञापयन्ति, कर्मकरवदाज्ञां कारयन्तीति गाथार्थः ॥ ७ ॥

सीहं जहा व कुणिमेणं, निब्भयमेगचरं ति पासेणं । एवं इत्थियाउ बंधंति, संवुडमेगतियं अणगारं ॥८॥

व्याख्या—यथा बन्धनविधिज्ञाः सिंहं मांसादिना प्रलोभ्य निर्भयत्वादेकचरं पाशेन—गलयन्त्रादिना बध्नन्ति । बध्वा च बहुप्रकारं कदर्थयन्ति । एवं स्त्रियोऽपि 'एगतियं' एकं कञ्चन तथाविधमनगारं मञ्जुलभाषणादिभिः संवृतमपि बध्नन्ति, असंवृतस्य पुनः किं वाच्यमिति गाथार्थः ॥ ८ ॥

अह तत्थ पुणो नमयंति, रहकारो व णेमि आणुपुव्वीए । बद्धे मिए व पासेणं, फंदंतेणं न मुच्चए ताहे ।

व्याख्या—यथा 'रथकारो' सूत्रधारः नेमिकाष्ठं चक्रबाह्यभ्रमिरूपं आनुपूर्व्या नामयति एवं ताः स्त्रियोऽपि साधुं स्वाभिप्रेतवस्तुनि नमयन्ति—स्वकार्ये प्रवर्तयन्ति, स च साधुर्मृगवत्पाशबद्धो मोक्षार्थं प्रयत्नं कुर्वन्नपि न मुच्यते इति गाथार्थः ॥९॥

अह सेऽणुतप्पती पच्छा, भोच्चा पायसं व विसमिस्सं । एवं विवेगमायाय, संवासो न कप्पए दविए ॥

व्याख्या—स साधुः स्त्रीपाशे पतितः सन् पश्चात्तापं करोति, यो गृहवासे पतितस्तस्यैतच्छोककरं, स्त्रीपाशे पतितानां किञ्चित् धनतरं विलोक्यते एवं अनुतप्यते, यथा कश्चित् विषमिश्रितं पायसं भुक्त्वा पश्चादनुतप्यते, किमिति मया मन्दबुद्धिना विषमिश्रितमिदं बुभुजे ?, तथा साधुरपि स्ववशं नीतः कर्मकरवद्दासां प्रापितः ऐहिकामुष्मिकभ्रष्टः अहर्निशं तदावर्जनव्याकुलितमतिः परितप्यते । अथ तेन विवेकमादाय स्त्रीभिः सार्द्धं संवासोऽवश्यं विवेकिनामपि सदनुष्ठानविघातकारीति मत्वा परिहार्यः । 'दविए' मुक्तिगमनयोग्यः साधुरिति गाथार्थः ॥ १० ॥

तम्हा उ वज्जए इत्थी, विसलित्तं व कंटगं नच्चा । ओए कुलाणि वसवत्ती, आघाते ण से वि णिग्गंथे ॥११॥

व्याख्या—यस्माद्विपाककटुकाः स्त्रियस्तस्मात्ता विषलिप्तकण्टकवद्दूरतस्त्यजेत् । यथा विषकण्टको भग्नः सन्ननर्थं जनयति तथा स्त्रियोऽप्यनर्थहेतव इति मत्वा दूरतस्त्यजेत् । तथा ओज—एकोऽद्वितीयः सन् कुलानि—गृहिणां गृहाणि गत्वा स्त्रीवशवर्ती अवेलायां धर्मकथां करोति, सोऽपि न निर्ग्रन्थः—निषिद्धाचरणसेवनेन न सम्यक् प्रव्रजितः, कदाचित् कारणे धर्मोपदेशं दातुं याति तदा द्वितीयं साधुं सहायं कृत्वा याति, तदभावे एकाक्यपि बहुपरिवारयुतायाः पुरः स्त्रीनिन्दाविषयजुगुप्साप्रधानं वैराग्योत्पादकं विधिना धर्मं कथयेदपीति गाथार्थः ॥ ११ ॥

जे एयं उंछं अणुगिद्धा, अन्नयरा हुंति कुसीलाणं । सुतवस्सिए वि से भिक्खू, नो विहरे सह णमित्थीसु ॥१२

व्याख्या—ये भिक्षवः एतत् 'उञ्छं' गर्हणीयं स्त्रीसम्बन्धादिकं एकाकिनी स्त्रीपुरो धर्मकथनादिकं वा, तं प्रति ये 'गृद्धा' आसक्तास्ते 'कुशीलानां' पार्श्वस्थादिपञ्चप्रकाराणां मध्ये अन्यतरा भवन्ति, तेऽपि पार्श्वस्थादिमध्ये गण्यन्ते । अतः 'सुतपस्व्यपि' महातपा अपि स्त्रीभिः सह न विहरेत्, ज्वलिताङ्गारवद्दूरतः स्त्रियो वर्जयेत्, स इति भिक्षुः, णमिति वाक्यालङ्कारे इति गाथार्थः ॥ १२ ॥

अवि धूयराहिं सुण्हाहिं, धातीहिं अदुव दासीहिं । महतीहिं वा कुमारीहिं, संथवं न कुज्जा से अणगारे॥१३

व्याख्या—'दुहितृभिरपि' सुताभिः सह न विहरेत्, तथा स्नुषाभिः, तथा पञ्चप्रकाराः धात्र्यो जननीकल्पास्ताभिश्च

सार्धमेकान्ते न स्थेयं । किं बहुना ? या 'दास्यः' कर्मकर्यस्ताभिः सह संसर्गं परिहरेत् । महतीभिर्वृद्धाभिर्वा कुमारीभिः सह सम्पर्कं सोऽनगारो न कुर्यात् "मात्रा स्वस्रा दुहित्रा वा, न विविक्तासनो भवेत् । बलवानिन्द्रियग्रामः, पण्डितोऽप्यत्र मुह्यति ॥ १ ॥" "जइ वि न से वयभंगो, तहवि कुसंगाओ होइ अववाओ । दोस-निहालणनिउणो, सव्वो पायं जणो जेण ॥ २ ॥" तेन तत्संसर्गः सर्वथा त्याज्य एवेति गाथार्थः ॥ १३ ॥

अदु णाइणं च सुहीणं वा, अप्पियं दट्ठु एगता होंति । गिद्धा सत्ता कामेहिं, रक्खणपोसणे मणुस्सोसि ? ॥१४

व्याख्या—एकान्ते योषिता सार्धमनगारमेकदा दृष्ट्वा ज्ञातीनां सुहृदां च मनसि अप्रियं भवति, एवम्भूतां मलिनांशुको भिक्षा-भोज्यप्यनया सह निःशङ्कस्तिष्ठति "मुण्डं शिरो वदनमेतदनिष्टगन्धं, भिक्षाटनेन भरणं च हतोदरस्य । गात्रं मलेन मलिनं गतसर्वशोभं, चित्रं तथापि मनसो मदनेऽस्ति वाँछा ॥१॥" ततश्च तं भिक्षुं योषिद्वदनावलोकनासक्तं दृष्ट्वा एवं भाषन्ते—भो भिक्षो ! त्वमस्याः स्त्रियो [रक्षणपोषणे] मनुष्योऽसि—पतिरसि ? यस्त्वमनया सार्धं विमुक्तान्यव्यापारस्तिष्ठसि एषापि त्वया सार्धमेकाकिन्यहर्निशं परित्यक्तसर्वव्यापारा तिष्ठति । एवं लोकनिन्दा स्यादिति गाथार्थः ॥१४॥ किञ्चान्यत्—

समणंपि दट्ठुदासीणं, तत्थ वि ताव एगे कुप्पंति । अदुवा भोयणेहिं णत्थेहिं, इत्थीदोससंकिणो होंति ॥१५

व्याख्या—श्रमणं उदासीनमपि—रागद्वेषविगमान्मध्यस्थमपि [रहसि] स्त्रिया सहालापं कुर्वाणं दृष्ट्वा एके तावत्

---

१ यद्यपि न तस्य व्रतभङ्गस्तथापि कुसङ्गाद्भवत्यपवादः । दोषनिभालननिपुणः सर्वः प्रायो जनो यस्मात् ॥ १ ॥

कुप्यन्ति, किं पुनः कृतविकारमिति, अथवा मनस्यासङ्गमानयन्ति-नानाविधैर्भोज्यैर्भक्ष्यैः-साक्षाद्यमुपकल्पितैरियमेन- मुपचरति, तेनायं भिक्षुः सदाऽत्रैवायाति, यथापि न कुशीला, या एवं विविधाहारैः पोषयति, एषाऽप्यनेन स्वायत्तीकृताऽस्ति, एवं वदेरन् । अथवा श्वशुरादीनां अर्द्धपरिवेषिते भोजने साध्वागमने सा वधूः समाकुलीभूताऽन्यस्मिन् दातव्येऽन्यस्य परिवेषयति, तथापि स्त्रीदोषशङ्किनो भवन्ति, यथेयं दुःशीलेति गाथार्थः ॥ १५ ॥ किञ्च—

कुव्वंति संथवं ताहिं, पब्भट्ठा समाहिजोगेहिं । तम्हा समणा ण समेंति, आयहिताए सन्निसेज्जाओ ॥१६॥

व्याख्या-स्त्रीसंसर्गं कुर्वन्ति ये ते श्रमणाः समाधि[योगेभ्यः]-शुद्धमार्गतो प्रभ्रष्टाः, एतावता स्त्रीसंसर्गकारिणः समाधियोगेभ्यो भ्रश्यन्त एव, एवं ज्ञात्वा श्रमणः आत्महिताय स्त्रिया सह निषद्या-आसनादिपरिचयं न करोतीति गाथार्थः ॥ १६ ॥

बहवे गिहाइं अवहट्टु, मिस्सीभावं पत्थुया एगे । धुवमग्गमेव पवयंती, वायावीरियं कुसीलाणं ॥१७॥

व्याख्या—बहवो मनुष्याः गृहं त्यक्त्वा चारित्रं प्रतिपद्य मोहोदयात् पुनरपि मिश्रीभावं प्रपद्यन्ते, द्रव्यलिङ्गिनो भवन्ति, न गृहिणो न वा प्रव्रजिता इति, तदेवम्भूता अपि एवं भाषन्ते, यथाऽयमेवास्मदारब्धो मध्यमः पन्था एव श्रेयान्, अस्मिन्नपि प्रवृत्तानां प्रव्रज्या सुखेन निर्वहति । तथाहि-ते द्रव्यलिङ्गधारिणो वाङ्मात्रेणैव 'वयं प्रव्रजिताः' इति ब्रुवते, न तु

× "यथा कयाचिद्वध्वा ग्रामसम्भ्रमात्कवनटप्रेक्षणगतचित्तया पतिश्वशुरयोर्भोजनार्थमुपविष्टयोस्तण्डुला इति कृत्वा राइकाः संस्कृत्य दत्ताः । ततश्चासौ श्वशुरेणोपलक्षिता यथा कुक्कुरेण ताविताऽन्यगतचित्तेयाशङ्कया गृहान्निष्कासितेति" हर्ष० ।

तेषां शीतलविहारिणां सदनुष्ठानकृतं वीर्यं नास्ति । 'ध्रुवमार्गः' मोक्षः संयमो वा अस्मदीयादेव मार्गात् इति कुशीलानां वाचा कृतं वीर्यं नानुष्ठानकृतमिति गाथार्थः ॥ १७ ॥

सुद्धं रवइ परिसाए, अह रहस्संमि दुक्कडं करेति । जाणंति य णं तहाविया, माइल्लं महासढेऽयं ति ॥१८

व्याख्या–सः कुशीलः पर्षन्मध्ये आत्मानं शुद्धं 'रौति' भाषते, अथ रहस्येकान्ते 'दुष्कृतं' अनाचारं करोति । तस्य तद्-आचारं गोपायतोऽपि जानन्ति, [तथाविदः] 'कोविदाः' इङ्गिताकारकुशला निपुणाः, स प्रच्छन्नाकार्यकारी एवं जानाति–न मां कोऽपि वेत्ति, रागान्ध एवं मन्यते । एतदुक्तं भवति–यद्यप्यपरः कश्चिदकर्त्तव्यं न वेत्ति, प्रच्छन्नकृतत्वात्, तथापि सर्वज्ञा विदन्ति । असौ मायावी महाशठश्चायं, इति सर्वज्ञास्तत्कृतमकर्त्तव्यं च प्रच्छन्नकृतमपि जानन्तीति । अथवा आत्म-कृतमनाचारमात्मा जानाति यन्मयैतदकर्त्तव्यं कृतमिति । अन्ये च ज्ञानिनो वा सर्वे विदन्ति, [तथा चोक्तं] " न य लोणं लोणिज्जई, ण य तुप्पिज्जइ घयं व तेल्लं वा । किह सक्को [१] वंचेउं, अत्ता अणुहूयकल्लाणो ॥ १ ॥ " इति वचनात् । प्रच्छन्न कृतमकार्यं आत्मैव जानाति सर्वज्ञो वेति गाथार्थः ॥ १८ ॥ किञ्चान्यत्—

सयं दुक्कडं च न वदति, आइट्ठो वि पकत्थती बाले । वेयाणुवीइ मा कासी, चोइज्जंतो गिलाइ से भुज्जो ॥१९

व्याख्या—स प्रच्छन्नाकार्यकारी अपरेणाऽऽचार्यादिना वा पृष्टो न वदति यथैतदकृत्यं मया कृतमिति । स च प्रच्छन्नकृत-

---

१ न च लवणं लवणीयते न च म्रक्ष्यते घृतं वा तैलं वा । कथं शक्यो ? वञ्चयितुं आत्माऽनुभूतकल्याणः ॥ १

पापो मायावी परेण 'आदिष्टः' शिक्षितः सन् 'बालो' मूढः आत्मानं श्लाघमानोऽकार्यमपलपति, वदति च यथा—नाहमीदृशमकार्यं करिष्ये, इत्येवं धाष्टर्यात्प्रकत्थते। तथा पुनरपि केनापि हितेन प्रोक्तं—भो महाभाग! 'वेयाणुवीइ' त्ति वेदः-पुंवेदोदयस्तस्यानुवीचिरानुकूल्यं-मैथुनाभिलाषं मा कार्षीरिति, एवं केनापि शिक्षिते 'ग्लायति' ग्लानिमुपयाति, × शृणोत्यपि न, मर्मविद्धो वा सखेदमिव भाषते इति गाथार्थः ॥ १९ ॥

ऊसिया वि इत्थिपोसेसु, पुरिसा इत्थिवेदखेदन्ना। पन्नासमन्निया वेगे, नारीणं वसं उवकसंति ॥२०॥

व्याख्या—ये पुरुषाः स्त्रीपोषकेष्वनुष्ठानविशेषेषु उषिताः भुक्तभोगिनोऽपि 'स्त्रीवेदखेदज्ञाः' स्त्रीवेदो मायाप्रधानः, स्त्रियो हि मायायाः अप्रधानभूताः, एवं जानन्तोऽपि 'प्रज्ञासमन्विताः' बुद्धिमन्तोऽपि [एके] पुरुषाः मोहोदयात् स्त्रीणां वशे वर्तन्ते। किमुक्तं भवति? एके पुरुषाः बहुशो भुक्तभोगा अपि 'स्त्रियो हि संसारहेतवः कारणं परमं' एवं जानन्तोऽपि मोहोदयात्पुनरपि स्त्रीणां वशे पतन्ति, ताः यत्कथयन्ति तत् किङ्करा इव कुर्वन्ति इति गाथार्थः ॥ २० ॥

अथेहलोकेऽपि स्त्रीसम्बन्धविपाकं दर्शयितुमाह—

अवि हत्थपायछेदाए, अदुवा वद्धमंसउक्कंते। अवि तेयसाऽभितावणाइं, तच्छियखारसिंचणाइं च ॥२१॥

व्याख्या—कुशीलिनः पुरुषाः हस्तपादच्छेदादिकं प्राप्नुवन्ति, अथवा चर्ममांसोत्कर्त्तनमपि तेजसा—ऽग्निनाऽभितापनानि-

× श्रुतमश्रुतं विधत्त इति भावः, क:।

स्त्रीसम्बन्धिभिः पुरुषैरुपार्जितैः राजपुरुषैर्भटैश्चिकाण्यपि क्रियन्ते पारदारिकास्तथा। वाऽन्यान्विना तयित्वा शारीरक्लेशनानि च प्रापयन्तीति गाथार्थः ॥ २१ ॥ अपि च—

अच्छि कण्णनासच्छेज्जं, कंठच्छेदणं तितिक्खंती। एत्थ पावसंतत्ता, न य विंति पुणो न काहिंति ॥२२

व्याख्या—पारदारिकाः स्वकृतदुष्कृतेन कर्णनासाच्छेदादिकं प्राप्नुवन्ति, दुस्सहां विडम्बनामस्मिन्नेव जन्मनि स्वकृतपापकर्मोदयात् संतप्ता नरकादितिरिक्तां वेदनामनुभवन्ति, न पुनरेवंविधमकृत्यं न करिष्याम इत्येवं विरतिं कुर्वन्ति, गुरुकर्माणो हि एवंविधां विडम्बनां प्राप्नुवन्तोऽपि न विरतिं प्रतिपद्यन्ते इति गाथार्थः ॥ २२ ॥

सुतमेयमेवमेगेसिं, इत्थीवेदेत्ति हु सुअक्खायं। एवं पि ता वदित्ताणं, अदुवा कम्मुणा अवकरिंति ॥२३

व्याख्या—एतत् पूर्वोक्तं स्त्रीप्रकृतिफलं+ गुरुसमीपे श्रुतं लोकतो वा एतत् स्त्रियो निर्विवेकिन्यो निसर्गा दुर्विज्ञेयचित्ताः

+ "सुत—सुपलब्धं गुर्वादेस्सकाशाल्लोकतो वा एतदिति—यत्पूर्वमाख्यातं, तद्यथा—दुर्विज्ञेयं स्त्रीणां चित्तं, दारुणः स्त्रीसम्बन्धविपाकस्तथा चपलस्वभावाः स्त्रियो दुष्प्रतिचारा अदीर्घप्रेक्षिण्यः प्रकृत्या लघ्व्यो भवन्त्यात्मगर्विताश्चेत्येवमेकेषां स्वाख्यातं भवति, लोकश्रुतिपरम्परया चिरन्तनाख्यायिकासु वा परिज्ञातं भवति, तथा स्त्रियं यथाऽवस्थितस्वभावतस्तत्संबन्धविपाकतश्च 'वेदयति' ज्ञापयतीति स्त्रीवेदो—वैशिकादिकं स्त्रीस्वभावाविर्भावकं शास्त्रमिति। × × × × किञ्च—अकार्यमहं न करिष्यामीत्येवमुक्त्वाऽपि वाचा अदुव 'त्ति'अथवा 'कर्मणा' क्रियया ऽपकुर्वन्तीति—विरूपमाचरन्ति। यदि वाऽग्रतः प्रतिपद्यापि शास्तुरेवापकुर्वन्तीति।" इत्यवचूर्णौ।

आत्मगर्वितास्थ, अथवा चिरन्तनाऽऽख्यायिकासु वा परिज्ञातं, इति ज्ञात्वाऽपि ये तत्र रज्यन्ते तत्र कर्मैव कारणमिति गाथार्थः ॥ एतस्याः गाथायाः सम्यगर्थो नावगतस्तेन सविस्तरो न लिखितोऽस्ति, न्यूनं किमपि न प्रकाश्यमिति ॥ २३ ॥

अथ सूत्रकार एव तत्स्वरूपाविष्करणायाह—

अन्न मणेण चिंतिंति, वाया अन्नं च कम्मुणा अन्नं । तम्हा न सद्दहे भिक्खू, बहुमायाओ इत्थिओ णच्चा ॥२४

व्याख्या—स्वभावेन स्त्री अन्यत् मनसि चिन्तयति, अन्यद्भाषते वचनेन कायेन चान्यदेव करोति, एवं वनिता मायाबहुला, अत एव भिक्षुस्तत्कृतां मायां न श्रद्दधाति, तद्वचसि न विश्वसिति, तद्वचो नाद्रियत इति गाथार्थः ॥ २४ ॥

किञ्चान्यत्—

जुवती समणं बूया, विचित्तऽलंकारवत्थगाणि परिहित्ता ।
विरता चरिस्सऽहं लूहं, धम्ममाइक्ख णे भयंतारो ! ॥ २५ ॥

व्याख्या—काचिद्युवती विचित्रालङ्कारवस्त्रादि परिधाय नवयौवनाऽभिरामा साधुसमीपमागत्य भाषते, भो भिक्षो ! विरक्ताऽहं गृहपाशात्, भर्ता मां नाद्रियते, यद्वा मत् प्रियो दुर्भगः अतो मे न रोचते, तस्मादहं विरक्ता तेन वाऽहं त्यक्ता, नालापयति मां प्रियवचनैः, अतो विरक्ता संसारात् ! अहं धर्मार्थिनी ' रूक्षं ' संयमं चरिष्यामि । धर्मं कथय भगवन् ! एवं मायाप्रपञ्चाभिकटवर्तिनी भूत्वा कूलवालकमिव साधुं धर्माद्भ्रंशयतीति गाथार्थः ॥ २५ ॥

अदु सावियापवाएणं, अहमंसि साहम्मिणी तु समणाणं। जउकुंभे जहा उवजोई, संवासेवि उ विसीएज्जा

व्याख्या—अथवा सा योषित् अमुना 'प्रवादेन' पाखण्डेन साधुं समेत्य वक्ति, यथाहं श्राविका साधूनां साधर्मिका, इत्यादिप्रपञ्चेन साधुं धर्माद् भ्रंशयति। यथा जातुषः कुम्भो ज्योतिषो-ऽग्नेः समीपव्यवस्थितः-उपज्योतिर्वर्ती विलीयते, एवं योषितां संनिधाने विद्वानपि साधुर्धर्मानुष्ठानं प्रति विषीदेत्, संयमात् शिथिलीभवतीति गाथार्थः ॥ २६ ॥

समीपवर्तिन्याः स्त्रियो दोषं प्रकाश्य अथ तत् संस्पर्शदोषं दर्शयति—

जउकुंभे जोइ उवगूढे, आसुऽभितत्ते णासमुवयाति। एवित्थियाहिं अणगारा, संवासेण णासमुवयंति ॥

व्याख्या—यथा जातुषः कुम्भो अग्निनोपगूढो-ऽग्निनाऽभितप्तः क्षिप्रं नाशमुपयाति-विलीयते क्षिप्रमेव, एवं स्त्रीभिः सह संवसनेन-परिभोगेन अनगारा नाशमुपयान्ति। सर्वथा जातुषकुम्भवद्व्रतकाठिन्यं परित्यज्य संयमशरीराद्भ्रश्यन्तीति गाथार्थः ॥ २७ ॥ अपि च—

कुव्वंति पावगं कम्मं, पुट्ठा वेगे एवमाहंसु। नोहं करेमि पावं ति, अंके साइणी ममेस त्ति ॥ २८ ॥

व्याख्या—एकः कोऽपि मोहोदयेन 'अनाचारं' मैथुनं सेवते, ततः केनापि गुर्वादिना पृष्टो भाषते, नाऽहमीदृग्विधमनाचारं सेवे, अहं तु कुलीनोऽस्मि, एषा तु मम दुहितृसमाना, एषा शिशुत्वेऽपि ममाङ्कशायिन्येवाभूत्, अधुनापि पूर्वपरिचयान्ममाङ्कमागत्य स्वपिति, परं नाहं प्राणात्ययेऽपि व्रतभङ्गं करोमीति गाथार्थः ॥ २८ ॥ किञ्च—

बालस्स मंदयं बितियं, जं च कडं अवजाणई भुज्जो । दुगुणं करेइ से पावं, पूयणकामी विसण्णेसी ॥ २९ ॥

व्याख्या—'बालस्य' अज्ञानिनोऽविवेकिनः एतद् द्वितीयं 'मन्दत्वं' बालत्वं, एकं तावदकार्यकरणेन चतुर्थव्रतभङ्गः कृतः, द्वितीयं तदपलपनेन मृषावादः, तदेव दर्शयति—अकार्याचरणं कृत्वा अपरेण पृष्टोऽपलपति—नैतन्मया कृतं, एवं स तदपलपनेन द्विगुणं पापं करोति, किमर्थमपलपति ? पूजासत्कारकामी सन्, मा लोके अवर्णवादः स्यादित्यकार्यं प्रच्छादयति, स एवम्भूतो विषण्णो—असंयमस्तदन्वेषीति गाथार्थः ॥ २९ ॥ किञ्चान्यत्—

संलोकणिज्जमणगारं, आयगयं निमंतणेणाहंसु । वत्थं वा तायि ! पायं वा, अन्नं पाणगं पडिग्गहे ॥३०॥

व्याख्या—'संलोकनीयं' सुन्दराकारं सुरूपमनगारं दृष्ट्वा काश्चन स्वैरिण्यो 'निमन्त्रणेन' निमन्त्रणापूर्वमेवमाहुः—उक्तवत्यः—अहो त्रायिन् ! वस्त्रपात्रादिकं येनकेनचिद्भवतः प्रयोजनं तदहं सर्वं सम्पादयिष्यामि, मद्गृहमागत्य प्रत्यहं प्राशमशनं पानकं भेषजादि, सर्वं भवते दास्यामीति गाथार्थः ॥ ३० ॥

नीवारमेयं बुज्झिज्जा, णो इच्छे अगारमागंतुं । बद्धे विसयपासेहिं, मोहमावज्जइ पुणो मंदे ॥३१॥ त्ति बेमि

व्याख्या—एतद्योषितां वस्त्रपात्रादिकेन निमन्त्रणं नीवारकल्पं 'बुध्येत' जानीयात्, यथा 'नीवारेण' भक्ष्यविशेषेण शूकरादिर्वशमानीयते, एवं निमन्त्रणेन साधुरपि वशमानीयते । अतोऽसौ साधुरपि तन्निमन्त्रणं नीवारकल्पं ज्ञात्वा तद्गृहं गन्तुं नेच्छेत् । यदि तद्गृहे गच्छति तदा विषयपाशैर्बध्यते, ततो मोहावर्ते पतति ततः स्नेहपाशं त्रोटयितुम-

समर्थो द्रष्टुं व्याधिसंघाकुलत्वमागच्छति। किंकर्तव्यतामूढो भवति, पौनःपुन्येन 'मन्दो' जडः। इतिः परिसमाप्तौ ब्रवीमीति पूर्ववत् ॥ ३१ ॥

॥ इति स्त्रीपरिज्ञायां प्रथमोद्देशकः समाप्तः ॥

॥ अथ द्वितीयः प्रारभ्यते ॥

ओए सदा न रज्जेज्जा, भोगकामी पुणो विरज्जेज्जा। भोगे समणाण सुणेह, जह भुंजंते भिक्खुणो एगे ॥१॥

व्याख्या—सुसाधुः 'ओज' एकाकी, रागद्वेषरहितत्वात् 'सदा' सर्वकालमनर्थखनिषु वनितासु न रज्येत। तथा यदि कदाचिन्मोहोदयाद्भोगाभिलाषी स्यात्तथापि परलोके इहलोके च महापायपरिभीत्या पुनस्ताभ्यो विरज्येत, भोगाभिलाष्यपि ज्ञानाङ्कुशेन उत्पथान्मनोद्विरदं निवर्तयेत्। तथा श्रमणानामपि भोगा इत्येतच्छृणुत यूयं, गृहिणामपि विडम्बनाः प्रायाः भोगाः यतीनां तु किं वाच्यं ? यथा भोगान् एके-श्रमणा अपुष्टधर्माणो विडम्बनाप्रायान् भुञ्जते तथा शृणुत अग्रेतनोद्देशकगाथासूत्रेण वक्ष्यमाणेनेति गाथार्थः ॥ १ ॥

अह तं तु भेदमावन्नं, मुच्छितं भिक्खुं काममतिवट्टं। पलिभिंदियाणं तो पच्छा, पादमुद्धु मुद्धे पहणंति॥

व्याख्या—अथ सा स्त्री 'तं' भिक्षुं 'भेदमापन्नं' चारित्रस्खलितं ज्ञात्वा 'कामगृद्धं' आत्मवशवर्तिनं ज्ञात्वा, इत्यमित्थं मया तवोपकृतं, मया लज्जाधर्मादीन् परित्यज्य तव जुगुप्सनीयस्य आत्मा दत्तः, त्वं पुनरकिञ्चित्कर इत्यादि यदा

कुपिता सती भाषते तदा स विषयवाहितः सन् तस्याः कुपितायाः प्रसादनार्थं पादयोर्निपतति, ततश्च सा एवं जानाति यदसौ ममायं कृष्णश्वेतप्रतिपन्नः ब्रह्मचारी, यदहं वच्मि तदसौ करिष्यति, ततश्च सा(ज्ञा) आत्मवशगं ज्ञात्वा, वामपादमुत्कृत्य मूर्ध्नि ' प्रघ्नन्ति ' ताडयन्ति । इत्यादि विडम्बनां दर्शयन्ति इति गाथार्थः ॥ २ ॥ अन्यच्च—

जइ केसि[या]ता णं मए भिक्खु !, णो विहरे सह णमित्थीए ।
केसाणि वि हं लुंचिस्सं, नन्नत्थ मए चरिज्जासि ॥ ३ ॥

व्याख्या—यदि काचित् स्त्री एवं मायावचनं भाषते, भो श्रमण ! यदि त्वं मया केशवत्या सह विहरन् 'लज्जसे' लज्जसे तर्ह्यहं केशानपनयिष्यामि । एवं कथयिष्यसि तदहं सर्वं करिष्यामि एकमेतत् प्रार्थये—मया विना न क्वापि त्वया विहर्तव्यं, अहमपि त्वदायत्तास्मि, इत्यादिवचनैर्विश्वासमुत्पाद्य कपटनाटकनायिकास्तास्तं साधुमात्मवशगं ज्ञात्वा कर्मकरव्यापारैरपवादैः 'प्रेरयन्ति' नियोजयन्ति ॥ ३ ॥ तानेव दर्शयितुमाह—

अह णं से होई उवलद्धो, तो पेसिंति तहाभूतेहिं । अलाउच्छेदं पेहाहि, वग्गुफलाइं आहराहि त्ति ॥ ४ ॥

व्याख्या—अथ स भिक्षुस्ताभिरुपलब्धः यदसावस्माकं कर्मकरप्रायो जातः, ततश्च ताः तथाभूतैः कर्मकरव्यापारैः प्रेषयन्ति, एतावता दासत्वमापयन्ति । कर्मकरव्यापारान् दर्शयितुमाह 'लाउ'त्ति अलाबुच्छेदनयोग्यं शस्त्रं 'प्रेक्षस्व' निरूपय—कुतोऽप्यानय, येन अलाबुपात्रकमुखं समारचयामः, अथवा ' वल्गूनि ' फलानि—नालिकेरादीनि ' आहराहि 'त्ति आनय,

अथवा चारुफलानि धर्मकथादिना लब्धानि वस्त्रादिलाभरूपाणि, तान्याहर-आनयेति गाथार्थः ॥ ४ ॥ अपि च—

दारूणि सागपागाए, पज्जोओ वा भविस्सई राओ। पायाणि य मे रयावेहि, एहि ता मे पिट्ठओ मद्दे ॥५॥

व्याख्या—'दारूणि' इन्धनान्यानय येन शाकपाकः क्रियते, अथवेन्धनान्यानय येनाग्निः प्रज्वाल्यते रात्रावुद्द्योतः स्यात्। तथा मदीयानि पात्राणि रञ्जय लेपादिना, येनाहारं सुखेन आनये+, तथेहागच्छ, उपविश, मदीयमङ्गं दुष्यति तेन संवाहय पृष्ठिं, इत्यादिष्वधर्मेषु कार्येषु नियोजयन्तीति गाथार्थः ॥ ५ ॥

वत्थाणि य मे पडिलेहेहि, अन्नं पाणमाहराहि त्ति। गंधं च रओहरणं च, कासवगं मे समणुजाणाहि ॥६॥

व्याख्या—वस्त्राणि मम जीर्णानि जातानि, अन्यानि नवीनानि 'प्रतिलेखय' गवेषय, यदि वा मलिनानि रजकस्य समर्पय। तथा अन्नपानकादि 'आहराहि' आनय, गन्धं कर्पूराद्यानय, रजोहरणमानय, लोचं कारयितुमहमशक्ता, ततो मस्तकमुण्डनाय नापितमानयेति गाथार्थः ॥ ६ ॥

अदु अंजणिं अलंकारं, कुक्कयं च मे पयच्छाहि। लोद्धं च लोद्धकुसुमं च, वेणुपलासियं च गुलियं च ॥७॥

व्याख्या—अथवा प्रकारान्तरेण दर्शयति—पूर्वं यतिवेषोपकरणान्यधिकृत्य दर्शितं, अथ गृहस्थोपकरणमधिकृत्य कथ्यते। 'अञ्जनिकां' कज्जलभाजनमानय, तथाऽलङ्कारं वा कटककुण्डलकेयूरादिमानय, 'कुक्कयं' खुंखुणकं× 'मे' मम प्रयच्छ, येनाहं

+ "अथवा (मम) पात्रे रञ्जयालक्तकादिना" इति दर्श०। × आभरणविशेषम्।

विभूषिता सती वीणां वादयामि स्वरपुष्ट-तयाऽतः, तथा लोध्रं लोध्रकुसुमं च, तथा 'वेणुपलासियं' वंशमयी काष्ठिका, सा दन्तैर्वामहस्तेन [वा] प्रगृह्य दक्षिणहस्तेन वीणावद्वाद्यते। तथौषधगुटिकां [तथाभूतां] आनय, येनाऽहमविनष्टयौवना सुखेन तिष्ठामीति गाथार्थः ॥ ७ ॥

कुट्ठं अगरं तगरं च, संपिट्ठं सम्मं उसीरेण। तेल्लं मुहभिंजाए, वेणुफलाइं संनिधाणाए ॥ ८ ॥

व्याख्या— कुष्ठं [ति कुष्ठमुत्पलं] अगरं तगरं चानय, सुगन्धिद्रव्यं, एतच्च 'उसीरेण' वालकेन पिष्टं सुगन्धि भवति। तथा तैलं लोध्रकुङ्कुमादिना संस्कृतं मुखाऽभ्यंगाय आनय, तेन मुखमभ्यक्तं कान्तिमत् जायते। 'वेणुफलाइं'ति वंशकरण्डकपेटिकादीनि वस्त्रादेः संनिधानं-व्यवस्थापनं, तदर्थमानयेति गाथार्थः ॥ ८ ॥

नंदीचुण्णगाइं पाहराहि, छत्तोवाणहं च जाणाहि। सत्थं च सूवच्छेयाए, आनीलं च वत्थं रयावेहि ॥ ९ ॥

व्याख्या—नन्दीचूर्णं तु द्रव्यसंयोगनिष्पादित ओष्ठम्रक्षणार्थं चूर्णविशेषस्तदानय, तथाऽऽतपे दृष्टितेजो रक्षणार्थं छत्रं तथा उपानहौ च 'अनुजानीहि' आनय। तथा शस्त्रं पूर्वदेशादि (!) पत्रशाकच्छेदनार्थं दात्रादि वा ढौकय। तथा वस्त्रं गुलिकादिना रञ्जय, यथाऽयं नीलं स्यात्, मञ्जिष्ठादिना वा रञ्जयेति गाथार्थः ॥ ९ ॥

सुफणिं च सागपागाए, आमलगाइं दगाहरणं च।
तिलगकरणिमंजणसलागं, उसिणे विधूणयं विजाणाहि ॥ १० ॥

व्याख्या—'सुफणिं' स्थालीपिठरादिशाकपाकार्थमानय, आमलकानि स्नानार्थं पित्तोपशमाय [वा] अभ्यवहारार्थमानय, उदकाहरणं घटादिघृततैलाद्याहरणं सर्वं गृहोपकरणमानय, तिलकः क्रियते यया सा तिलककरणी, दन्तमयी सुवर्णमयी वा शलाका, यया गोरोचनादियुक्तया तिलकः क्रियते । अञ्जनशलाका—रजतमयीशलाका अक्ष्णो रञ्जनार्थमानय, तथा उष्णे तापनिवारणाय 'विधूनकं' व्यजनकमानयेति गाथार्थः ॥ १० ॥

संडासगं च फणिहं च, सीहलिपासगं च आणाहि । आदंसगं च पयच्छाहि, दंतपक्खालणं पवेसाहि ॥११॥

व्याख्या—'संडासिकं' नासिकाकेशोत्पाटनं 'फणिहं' केशसंयमनार्थं कङ्कतकं, तथा 'सीहलिपासगं'ति वेणीसंयमनार्थमूर्णामयं कङ्कणं, तथानय, 'आदर्शं' दर्पणं प्रयच्छ 'दंतपक्खालणं' दन्तधावनं मदन्तिके प्रवेशयेति गाथार्थः ॥ ११ ॥

पूयफलं तंबोलं, सूयं सुत्तगं च जाणाहि । कोसं च मोयमेहाए, सुप्पुक्खलगं च खारगालणं च ॥१२॥

व्याख्या—पूगीफलं, ताम्बूलं, सूचीं तथा सूत्रं 'जानीहि' ददस्व । 'मोयमेहाए'त्ति 'मोकः' प्रस्रवणं—कायिका, तस्मै प्रस्रवणार्थं वारकादिभाजनं (पाळो इति लोकविश्रुतं) आनय, बहिर्गन्तुमसमर्था रात्रौ भयादसौ मम यथा बहिर्गमनं न भवति तथा कुरु । अन्यस्मिन्नप्येवमकार्ये नियोजयन्ति । सूर्पं उदूखलं तथा सर्जिकादेः क्षारस्य गालनकमित्येवमाद्युपकरणं सर्वमप्यानयेति गाथार्थः ॥ १२ ॥

चंदालगं च करगं च, वच्चघरं च आउसो! खणाहि । सरपायं च जायाए, गोरहगं च सामणेराए ॥१३॥

व्याख्या—'चन्दालगं' देवताद्यर्चनार्थं ताम्रमयं भाजनं, तथा 'करको' जलाधारो मदिराभाजनं वा, तदानय, तथा वर्चोगृहं युष्मन् मदर्थं च 'खन' संस्कुरु। तथा 'शरपातं' धनुः 'जाताय' मम पुत्राय ढौकय, तथा 'गोरहगं'ति त्रिवर्षं बलीवर्दं ढौकय, 'सामणेराए'त्ति श्रमणपुत्राय गन्त्र्यादिकृते भविष्यतीति गाथार्थः ॥ १३ ॥

घडिगं च सडिंडिमयं च, चोलगोलं कुमारभूयाए। वासं समभियावन्नं, आवसहं च जाण भत्तं च ॥१४॥

व्याख्या—घटिकां मृण्मयकुल्हडिकां डिण्डिमेन—पटहिकादिवादित्रविशेषेण सहितामानय, तथा 'चोलगोलं'ति वस्त्रात्मकं कन्दुकं 'कुमारभूताय' [क्षुल्लकरूपाय राजकुमारभूताय] वा मत्पुत्राय क्रीडनार्थमानय, तथा च वर्षा समापन्नो-ऽभिमुखः, अतः 'आवसथं' गृहं वर्षाकालनिवासयोग्यं तथा भक्तं च वर्षाकालयोग्यं [तण्डुलादि] आनीहि, तादृशं गृहं वर्षाकालयोग्यं प्रच्छादय येन वर्षाकालं सुखेनाऽतिवाह्यते ॥ १४ ॥

आसंदियं च नवसुत्तं, पाउल्लाइं संकमट्ठाए। अदु पुत्तदोहलट्ठाए, आणप्पा हौंति दासा वा ॥ १५ ॥

व्याख्या—'आसन्दिकां' उपवेशनयोग्यां मञ्चिकां नवसूत्रां—नवीनेन सूत्रेण स्यूतां आनय, वध्रचर्मावनद्धां वा निरूपय, एवं 'पाउल्लाइं'ति मोचकाः काष्ठपादुके वा सङ्क्रमणार्थं—चङ्क्रमणार्थमानय, यतो नाहं निरावरणपादा भूमौ पदमपि दातुमलं, अथवा पुत्रे गर्भस्थे 'दोहदः' अन्तर्वर्त्नीफलाद्यभिलाषविशेषः, तत्पूरणार्थं। पुरुषाः स्त्रीभिर्वशीकृताः 'दासा इव' मौल्यगृहीता इव आज्ञाप्या—आज्ञाप्यन्ते, नीचेऽपि कर्मणि अलज्जितैर्दासा इव नियोज्यन्ते, तथा विषयार्थिनः पुरुषाः

वनिताभिर्यादृशे यादृशेऽपि कर्मणि वाह्यन्त इति गाथार्थः ॥ १५ ॥

जाए फले समुप्पन्ने, गेण्हसु वा णं अहवा जहाहि । अह पुत्तपोसिणो एगे, भारवहा हवंति उट्टा वा ॥१६

व्याख्या—गृहवासतरोः फले पुत्रे जाते सति यादृग्विडम्बनाः भवन्ति ताः दर्शयति—अमुं पुत्रं गृहाण, अहं तु गृहव्यापारव्यापृता, न मे अवकाशमस्ति, अथवा एनं 'जहाहि' परित्यज, नाहमस्य वार्तामपि पृच्छामि, एवं कुपिता सती ब्रूते, मया नवमासानुदरेण व्यूढस्त्वं पुनस्तोककालमुत्सङ्गेऽप्युद्वहन्नुद्विजसे ततः स कोपवशो ऽनुग्रहं मन्यमानो मुदितः संदिष्टादेशं दासवदिच्छयाति, तथान्ये पुत्रपोषिणो जायन्ते, सर्वादेशकारिणो 'भारवाहा' उष्ट्रा इव परवशा भवन्तीति गाथार्थः ॥१६ ।

राओ वि उट्ठिया संता, दारगं संठवेंति धाती वा । सुहिरीमणा वि ते संता, वत्थधुवा हवंति हंसा वा ॥१७

व्याख्या—रात्रावुत्थिताः सन्तो धात्रीवद्रुदन्तं पुत्रं संस्थापयन्ति । अनेकैरुल्लापनैरुल्लापयन्ति, स्त्रीवशाः पुरुषास्तत्कुर्वन्ति येन सर्वेषामुपहसनीया भवन्ति । 'सुह्रीमनसोऽपि' ये महालज्जावन्तस्तेऽपि हास्यजनकं जुगुप्सनीयं कर्म कुर्वन्ति । तदेव दर्शयति—'वत्थधुव' त्ति वस्त्रधावकाः-[वस्त्र]क्षालका 'हंसा इव' रजका इव भवन्ति । किं बहुनोक्तेन ? उदकवहनादिकमपि कुर्वन्ति दासा इव पुरुषाः लज्जालवोऽपि, स्त्रियो हि जघन्येऽपि कर्मणि प्रेरयन्ति किं ? येनैवमभिधीयते—सर्वं ताः प्रेरयन्ति, ते तु कुर्वन्ति दासा इवेति गाथार्थः ॥ १७ ॥ तदेवाह—

एवं बहूहिं कयं पुव्वं, भोगत्थाए जेऽभियावन्ना । दासे मिते व पेसे वा, पसुभूते व से ण वा केई ॥१८॥

व्याख्या—ए[तमे]तत् पूर्वोक्तं स्त्रीकिङ्करत्वं बहुभिः पुरुषैः कृतं, बहवः कुर्वन्ति, करिष्यन्ति च परे। ये पुरुषाः भोगाऽभिमुखास्ते एवं दासप्रायाः रागान्धाः स्त्रीणां वशवर्तिनः त(य)था वागुरापतितः परवशो मृग इव (?) न स्पन्दितुमपि शक्नोति, तथाऽसावपि परवशत्वाद्भोजनादि क्रिया अपि कर्तुं न लभते। तथा 'प्रेष्य इव' मौल्यगृहीतकिङ्कर इव वर्चःशोधनादावपि नियोज्यते। तथा स स्त्रीवशः पुमान् पशुभूत इव कर्तव्याकर्तव्यविवेकरहितत्वात् हिताऽहितप्राप्तिपरिहारशून्यत्वाच्च, यदि वा स स्त्रीवशको दासमृगप्रेष्यपशुभ्योऽप्यधमत्वान्न कश्चित्, सर्वाधमत्वाच्च कस्याऽपि समः, वा काऽप्युपमा नास्ति याऽसावुपमीयत इति गाथार्थः ॥ १८ ॥ उपसंहारमाह —

एवं खु तासु विन्नप्पं, संथवं संवासं च वज्जिज्जा। तज्जातिया इमे कामा-ऽवज्जकरा य एवमक्खाया ॥१९॥

व्याख्या—इत्येतत् पूर्वोक्तं स्त्रीणां विज्ञप्यं सर्वं मायाप्रपञ्चकारणं, अतस्ताभिः सह संवासः परिचयो वा विवेकिना नरेण त्याज्य एव। स्त्रीसंसर्गादुत्पन्नाः कामभोगाः 'अवद्यकराः' पापहेतवः, अधोगतिदायकाश्चेत्येतत् तीर्थंकरगणधरैरभिहितमिति गाथार्थः ॥ १९ ॥

एयं भयं ण सेयाय, इइ से अप्पगं निरुंभित्ता। नो इत्थिं णो पसुं भिक्खू, णो सयं पाणिणा णिलिज्जेज्जा ॥

व्याख्या—एवं पूर्वोक्तं स्त्रीसङ्गादिकं सर्वं भयकारणं, न श्रेयस्कारणं, एतावता स्त्री सम्पर्को न श्रेयसे, इति ज्ञात्वा स्त्रीसम्पर्कादात्मानं निरुध्य सन्मार्गे व्यवस्थाप्य यत् कुर्यात्तद्दर्शयति—न स्त्रियं नाऽपि पशुं 'लीयेत' आश्रयेत—स्त्रीपशुभ्यां

सह संवासं परित्यजेत्, स्त्रीपश्वादिकं स्वेन पाणिना न स्पृशेदिति गाथार्थः ॥ २० ॥

सुविसुद्धलेसे मेहावी, परकिरियं च वज्जए नाणी । मणसा वयसा काएणं, सव्वफाससहे अणगारे ॥२१॥

व्याख्या—सुविशुद्धलेश्यो 'मेधावी' पण्डितः परक्रियां संवाहनादिकां वर्जयेत् 'ज्ञानी' विदितवेद्यः । किमुक्तं भवति ? अन्यस्य किमपि विषयार्थिना [न]विधेयं नाऽप्यात्मना स्त्रिया पादधावनादिकं कारयेत्, मनसा वाचा कायेन करणकारणाऽनुमतिभेदेनाऽपि वर्जयेत् । तथा सर्वानपि परीषहान् अधिसहेत । एवं सर्वस्पर्शसहोऽनगारः—साधुर्भवतीति गाथार्थः ॥ २१ ॥

क एवमाहेति दर्शयति—

इच्चेवमाहु से वीरे, धुयरए धुयमोहे से भिक्खू ।
तम्हा अज्झत्थविसुद्धे सुविमुक्के, आमोक्खाए परिव्वएज्जासि ॥ २२ ॥ त्ति बेमि

व्याख्या—इत्येतत् पूर्वोक्तं सर्वं स्त्रीसंस्तवपरिहरणादिकं श्रीवीरो भगवान् 'आह' उक्तवान् । धुतरजा धुतमोहः, यत एवं तस्मात्स भिक्षुरध्यात्मविशुद्धः (सु)विमुक्तः स्त्रीसंसर्गेण, आमोक्षाय—अशेषकर्मक्षयं यावत् संयमोद्योगवान् भवेत्, इतिः परिसमाप्तौ, ब्रवीमीति पूर्ववत् ॥ २२ ॥ स्त्रीपरिज्ञाध्ययनं चतुर्थं परिसमाप्तम् ॥ ४ ॥

इति श्रीपरमसुविहितखरतरगच्छविभूषणश्रीमत्साधुरङ्गगणिवरगुम्फितायां श्रीमत्सूत्रकृताङ्गदीपिकायां चतुर्थे स्त्रीपरिज्ञाध्ययने द्वितीयोद्देशकः समाप्तस्तत्समाप्तौ च समाप्तमिदं चतुर्थमध्ययनम् ।

अथ पञ्चमं नरकविभक्त्याख्यमध्ययनम् ।

उक्तं चतुर्थमध्ययनं, साम्प्रतं पञ्चमं प्रारभ्यते । तथा चतुर्थेऽध्ययने 'सम्यक् स्त्रीपरीषहः सोढव्यः' इत्येतत् प्रतिपादितं, साम्प्रतमुपसर्गभीरोः स्त्रीवशगस्य ध्रुवं नरकपातः स्यात्, तत्र च यादृश्यो वेदनाः प्रादुर्भवन्ति ताः पञ्चमाध्ययने नरकविभक्त्याख्ये प्रतिपाद्यन्ते, तत्रेयमादिगाथा—

पुच्छिस्सऽहं केवलियं महेसिं, कहंऽभितावा ? णरगा पुरत्था ।
अजाणतो मे मुणि ! बूहि जाणं, कहं नु बाला नरयं उवेंति ? ॥ १ ॥

व्याख्या—जम्बूस्वामिना सुधर्मस्वामी पृष्टः—भगवन् ! किम्भूता नरकाः ? कैर्वा कर्मभिस्तत्रोत्पादः प्राणिनां जायते ? कीदृश्यो वा तत्र वेदनाः ? इत्येवं पृष्टः सुधर्मस्वाम्याह—यदेतद्भवता अहं पृष्टः, तदेतत् केवलिनं महर्षिं श्रीवर्द्धमानस्वामिनं पूर्वमहमपि पृष्टवानस्मि । यथा—'कथं' किम्भूता अभितापाग्निना नरकावासाः भवन्ति ? इत्येतदजानतो 'मे' मम मुने ! त्वं जानन् केवलज्ञानेन ब्रूहि । कथं—केनाऽनुष्ठानेन 'बाला' अज्ञानिनो विवेकरहिताः ['नु' वितर्के] नरकेषूपसामीप्येन यान्ति ? कथम्भूताश्च तत्र वेदना ? इत्यादि यथा त्वं मां पृच्छसि, तथैव मयाऽपि भगवान् पृष्ट इति गाथार्थः ॥ १ ॥

एवं मए पुट्ठे महाणुभावे, इणमब्बवी कासवे आसुपन्ने ।
पवेदइस्सं दुहमट्ठदुग्गं, आदीणियं दुक्कडियं पुरत्था ॥ २ ॥

व्याख्या—एवं मया महानुभावः श्रीमहावीरः पृष्ट आशुप्रज्ञ, स चैवं पृष्टो भगवानिदमाह—यदेतद्भवता पृष्टस्तदहं प्रवेदयिष्यामि—कथयिष्यामि, त्वं दत्ताऽवधानः शृणु। तदेवाह—दुःखमिति नरकं, अथवा दुःखमेव अर्थो यस्मिन् दुःखार्थो नरकः, स च 'दुर्गो' विषमो, दुरुत्तरत्वादादीनीयं—अत्यन्तदीनसत्त्वाश्रयं, तथा 'दुष्कृतं' असदनुष्ठानं पापं वा, तत्फलं वा असातावेदनीयोदयरूपं, तद्विद्यते यस्मिंस्तद् दुष्कृतिकं 'पुरस्ता'दग्रतः प्रतिपादयिष्ये, इति गाथार्थः ॥ २ ॥

यथाप्रतिज्ञातमेवाह—

जे केइ बाला इह जीवियट्ठी, पावाइं कम्माइं करिंति रुद्दा।
ते घोररूवे तिमिसंधयारे, तिव्वाऽभितावे नरए पडंति ॥ ३ ॥

व्याख्या—ये केचन 'बालाः' अज्ञा—अविवेकिनो मूर्खाः, महाऽऽरम्भपरिग्रहपञ्चेन्द्रियवधपिशितभक्षणादिके सावद्यानुष्ठाने प्रवृत्ताः, असंयमजीवितार्थिनः पापोपादानभूतानि कर्माणि 'रौद्राः' भयानका हिंसाऽनृतादीनि कर्माणि कुर्वन्ति। ते एवम्भूतास्तीव्रपापोदयवर्तिनो 'घोररूवे' अत्यन्तभयानके 'तिमिसंधयारे'त्ति बहलान्धकारे यत्रात्मापि नोपलभ्यते। केवलमवधिनाऽपि मन्दं मन्दमुलूका इवाह्नि पश्यन्ति। तस्मिन्नेवम्भूते नरके पतन्ति, कथम्भूते? तीव्राऽभितापे, तीव्रो—दुस्सहः खादिराङ्गारमहाराशितापादनन्तगुणोऽभितापः—सन्तापो यस्मिन् स तीव्राभितापस्तस्मिन्—एवम्भूते बहुवेदने नरके पतन्तीति गाथार्थः ॥ ३ ॥ किञ्च—

तिव्वं तसे पाणिणो थावरे य, जे हिंसती आयसुहं पडुच्च।
जे लूसए होइ अदत्तहारी, ण सिक्खती सेयवियस्स किंचि ॥ ४ ॥

व्याख्या—तथा ये पुरुषाः हिंसारसिकाः आत्मसुखार्थिनः, आत्मसुखहेतवे त्रसस्थावरान् प्राणिनो घ्नन्ति। तथा ये प्राणिनां लूषकाः—ध्वंसकाः, अदत्तहारिणः, परद्रव्यापहारिणः, तथा 'सेयवियस्स'त्ति प्रत्याख्यानादिकमपि नाऽभ्यसन्ति, अविरताः अप्रत्याख्यानिनः काकमांसादेरप्यनिवृत्ता इति गाथार्थः ॥ ४ ॥

पागब्भिपाणे बहुणेतिवाती, अनिव्वुते घातमुवेति बाले।
णिहोणिसं गच्छति अंतकाले, अहोसिरं कट्टु उवेइ दुग्गं ॥ ५ ॥

व्याख्या—य ईदृशो भवति स अधोगतिं याति, अधः शिरः कृत्वा 'दुर्गं' विषमं यातनास्थानमुपैति, स इति कः? यः 'प्रागल्भी' धृष्टः प्राणिनामतिपाति—विनाशकः, अतिपात्याऽपि प्राणिनो धार्ष्ट्याद्वदति, यथा वेदाऽभिहिता हिंसा हिंसैव न भवति इत्यादि धार्ष्ट्यमवलम्बते। तथा 'अनिर्वृतः' कदाचिदप्यनुपशान्तः क्रोधाग्निना प्रज्वलन्नेवास्ते यो बालो रागद्वेषोदयवर्ती, सोऽन्तकाले—मरणकाले 'णिहो'त्ति, न्यक्—अधस्तात् 'णिसं'ति अन्धकारमधोऽन्धकारं गच्छति, अधःकृतशिरा नरके पततीत्यर्थः ॥ ५ ॥ अथ नारका यदनुभवन्ति तद्दर्शयितुमाह—

हण छिंदह भिंदह णं दहेह, सद्दे सुणित्ता परहम्मियाणं।

ते नारगा ऊ भयभिन्नसन्ना, कंखंति कं नाम दिसं वयामो ? ॥ ६ ॥

व्याख्या—महापापकारिणस्तिर्यङ्मनुष्याः नरकेषूत्पद्यन्ते। ते चान्तर्मुहूर्तेन निर्लूनाण्डजसन्निभानि शरीराणि निष्पादयन्ति। पूर्वमपर्याप्तकास्ततोऽन्तर्मुहूर्तेन पर्याप्तका जायन्ते। ततश्च नरकोत्पन्नाः परमाधार्मिकानां भयानकान् शब्दान् शृण्वन्ति। तद्यथा—हण, छिन्द, भिन्द—इत्यादिकान् कर्णाऽसुखप्रदान् शब्दान् श्रुत्वा भयोद्भ्रान्तलोचनाः—भयेन नष्टसंज्ञाः, कां दिशं व्रजामः ? कं शरणं व्रजामः ? कुत्र गतानामस्माकमेवम्भूतस्यास्य महाघोरारवदारुणस्य दुःखस्य त्राणं स्यादित्येवं भयोद्भ्रान्ताः कांक्षन्तीति गाथार्थः ॥ ६ ॥

ते च भयोद्भ्रान्ताः नश्यन्ति—इतस्ततः पलायन्ते, ततश्च यदनुभवन्ति तद्दर्शयितुमाह—

इंगालरासिं जलियं सजोतिं, ततोवमं भूमिमणुक्कमंता।
ते डज्झमाणा कलुणं थणंति, अरहस्सरा तत्थ चिरट्ठितीया ॥ ७ ॥

व्याख्या—'ज्वलितं' खादिराङ्गारज्वलितज्वालाकुलं सह 'ज्योतिषा' उद्द्योतेन वर्तत इति सज्योतिर्भूमिस्तदुपमां अङ्गारसन्निभां भूमिमाक्रमन्तस्ते नारकाः दन्दह्यमानाः 'करुणं' दीनं 'स्तनन्ति' आक्रन्दन्ति। ते च नारका महानगरदाहाऽधिकेन तापेन दह्यमानाः 'अरहःस्वराः' प्रकटस्वराः महाक्रन्दस्वराः, 'तत्र' नरकावासे चिरस्थितिकाः—उत्कृष्टतस्त्रयस्त्रिंशत्सागरोपमानि जघन्यतो दशवर्षसहस्राणि यावत्तिष्ठन्तीति गाथार्थः ॥ ७ ॥

जइ ते सुया वेयरणीभिदुग्गं, णिसिओ जहा खुर इव तिक्खसोया।
तरंति ते वेयरणीं भिदुग्गं, उसुचोइया सत्तिसुहम्ममाणा ॥ ८ ॥

व्याख्या—सुधर्मस्वामी जम्बूस्वामिनं प्रति इदमाह—यदि 'ते' त्वया श्रुता वैतरणी नाम क्षारोष्णरुधिराकारजलवाहिनी नदी 'अभिदुर्गा' दुःखोत्पादिका, तथा निशितो यथा क्षुरस्तीक्ष्णो भवति तादृशानि तीक्ष्णानि स्रोतांसि यस्याः सा तथा, ते च नारका उदन्यया पीड्यमानास्तप्तायां च भूम्यां तापसमाकुलाः सन्तो जलपानाय तापापनोदाय स्नानार्थिनस्तां क्षारोष्णरुधिराकारजलां वैतरणीं तरन्ति। परमाधार्मिकैः शरपातैः—इषुभिः प्रेर्यमाणाः शक्तिभिश्च हन्यमानास्तां नदीं प्रविशन्तीति गाथार्थः ॥ ८ ॥ किञ्च—ते नारकाः नद्याः कष्टेन पीड्यमानाः अशरणा नारका अगाधां तां तरितुमशक्ताः नावं वाञ्छन्ति, तत्र गाढतरं दुःखिताः सम्भवन्ति। तदेवाह—

कीलेहिं विज्झंति असाहुकम्मा, नावं उवेंति सइविप्पहीणा।
अन्ने तु सूलाहिं तिसूलियाहिं, दीहाहिं विद्धूण अहे करिंति ॥ ९ ॥

व्याख्या—ते असाधुकर्माणो नारकाः [नावमुपयान्तः पूर्वारूढैः परमाधार्मिकैः] नानालोहकीलकैस्तीक्ष्णैर्विध्यन्ते। ततश्च स्मृतिविहीना—भ्रष्टस्मृतिकाः अपगतकर्तव्यविवेका जायन्ते। अन्ये पुनः परमाधार्मिकाः नश्यन्तो नारकान् दृष्ट्वा त्रिशूलिकाभिः शूलाभिः दीर्घाभिर्विद्ध्वा 'अधो' भूमौ कुर्वन्ति, अधोमुखान्क्षिपन्तीति गाथार्थः ॥ ९ ॥

केसिं च बंधित्तु गले सिलाओ, उदगंसि बोलंति महालयंसि ।
कलंबुयावालुयमुम्मुरे य, लोलेंति पच्चंति तत्थ अन्ने ॥ १० ॥

व्याख्या—ते परमाऽधार्मिकास्तेषां नारकाणां गले शिलां बद्ध्वा महत्युदके 'बोलंति'त्ति निमज्जन्ति । पुनस्तत उत्क्राथ्य वैतरणीनद्याः कदम्बवालुकायां मुर्मुराग्नौ च लोलयन्ति—चणकानिव तप्तवालुकायामितस्ततो घोलयन्ति । अन्ये नरकपालास्तान् दीनान् मांसपेशीवत् कटाहके क्षिप्त्वा पचन्ति—भर्जयन्तीति गाथार्थः ॥ १० ॥

असूरियं नाम महाहितावं, अंधं तमं दुप्पतरं महंतं ।
उड्ढं अहेयं तिरियं दिसासु, समाहिओ जत्थऽगणी झियाई ॥ ११ ॥

व्याख्या—न यत्र सूर्यः, एवंविधे असूर्ये—महाऽन्धकारे कुम्भिकाऽऽकृतिनरकावासे, सर्वोऽपि नरकावासोऽसूर्य एव, तस्मिन् नरकावासे तमेवम्भूतं महाऽभितापं महाऽन्धतमसं 'दुष्प्रतरं' दुरुत्तरं 'महान्तं' विशालं नरकं महापापोदया-द्व्रजन्ति । तत्र च नरके ऊर्ध्वमधस्तिर्यक्षु समाहितो—व्यवस्थापितोऽग्निः समुच्छ्रितः प्रज्वलति, तस्मिन् महाऽग्निकष्टे पतन्तीति गाथार्थः ॥ ११ ॥ किञ्चान्यत्—

जंसी गुहाए जलणाइवट्टे, अविजाणओ डज्झइ लुत्तपन्नो ।

सया य कलुणं पुण धम्मठाणं, गाढोवणीयं अइदुक्खधम्मं ॥ १२ ॥

व्याख्या—तस्मिन्नरके पतितो जन्तुरिङ्गिकाऽऽकृतौ गुहायां ज्वलनावर्ते स्वकृतं दुश्चरितमजानन् 'लुप्तप्रज्ञो' नष्टस्मृतिको दन्दह्यते 'सदा' सर्वकालं करुणप्रायं दुःखरूपं पापकर्मणा ढौकितं ईदृशं [घर्म]स्थानं ते वराका अकृतधर्माणः प्राप्नुवन्तीति गाथार्थः ॥ १२ ॥

चत्तारि अगणीओ समारभित्ता, जहिं कूरकम्माऽभितवेंति बालं ।

ते तत्थ चिट्ठंतिऽभितप्पमाणा, मच्छा व जीवंतुवजोतिपत्ता ॥ १३ ॥

व्याख्या—चतसृषु दिक्षु चतुरोऽग्नीन् 'समारभ्य' प्रज्वाल्य यत्र नरकावासे 'क्रूरकर्माणो' नरकपालाः नारकानभितापयन्ति, भटित्रवत्पचन्ति। ते तु नारका जीवा एवमभितप्यमानाः—कदर्थ्यमानाः स्वकर्मनिगडबद्धास्तत्रैव प्रभूतं कालं नरके तिष्ठन्ति। दृष्टान्तमाह—यथा जीवन्तो मत्स्याः अग्नेः समीपं प्राप्ताः परवशत्वादन्यत्र गन्तुमसमर्थास्तत्रैव तिष्ठन्ति, मत्स्या हि अग्नितापेऽत्यन्तमाकुला भवन्ति, तथा तेऽपि अभितप्यमाना महादुःखमनुभवन्तीति गाथार्थः ॥ १३ ॥

संतच्छणं नाम महाहितावं, ते नारया जत्थ असाहुकम्मा ।

हत्थेहि पाएहि य बंधिऊणं, फलगं व तच्छंति कुहाडहत्था ॥ १४ ॥

व्याख्या—संतक्षणं नाम स्थानमस्ति यत्र नारकाः 'सन्तक्ष्यन्ते' छिद्यन्ते, तत्र नरकावासे निरनुकम्पाः 'कुठार-

हस्ताः' परमाधार्मिका नरकपालाः अत्राणान् नारकान् हस्तैः पादैश्च बद्ध्वा 'फलकमिव' काष्ठखण्डमिव 'तक्षुवन्ति' छिन्दन्तीति गाथार्थः ॥ १४ ॥ अपि च—

रुहिरे पुणो वच्चसमुस्सियंगे, भिन्नुत्तमंगे परिवत्तयंता ।
पयंति णं ते नरए फुरंते, सजीवमच्छे व अओकवल्ले ॥ १५ ॥

व्याख्या—ते परमाऽधार्मिकास्तान् नारकान्स्वकीये रुधिरे तप्तकवल्यां प्रक्षिप्ते पुनः पचन्ति । कथम्भूतान् ? 'वर्चः' अमेध्यं, तेन समुच्छ्रितगात्रान्, पुनः कथम्भूतान् ? भिन्नोत्तमाङ्गान्–चूर्णीकृतशिरसः, कथं पचन्ति ? परिवर्तयन्तः–उत्तानान् अवाङ्मुखान् वा कुर्वन्तः, "ण" मिति वाक्याऽलङ्कारे, फुरन्तः–इतस्ततो विह्वलमात्मानं निक्षिपन्तः सजीवमत्स्यान् आयसकवल्यामिवेति गाथार्थः ॥ १५ ॥

नो चेव ते तत्थ मसी भवंति, ण मिज्जती तिव्वऽभिवेयणाए ।
तमाणुभावं अणुवेदयंता, दुक्खंति दुक्खी इह दुक्कडेणं ॥ १६ ॥

व्याख्या—ते नारका एवं पच्यमाना अपि नैव भस्मीभवन्ति–न भस्मसादापद्यन्ते । तत्र तेषां या वेदना प्रादुर्भवति, यथाऽन्या सा काऽपि वेदना नास्ति या तया उपमीयते । एतावता तीव्रां वेदनां वाचामगोचरामसह्यामनुभवन्ति । ते तु वेदनाऽभिभूता अपि न म्रियन्ते, कृताऽनेकदुष्कर्मत्वात् । प्रभूतमपि कालं छेदन, भेदन, दहन, तक्षण, शूलारोपण, कुम्भी-

पाक, स्वाप्नरयाऽऽरोहणादिकं परमाधार्मिककृतं परस्परोदीरितं च कर्मणां विपाकमनुभवन्तस्तिष्ठन्ति। स्वकृतेनाऽष्टादशपापस्थानरूपेण सततोदीर्णरूपेण दुःखेन पीड्यन्ते, नाऽक्षिनिमेषमपि कालं सुखमनुभवन्तीति गाथार्थः ॥ १६ ॥

किञ्चाऽन्यत्—

तहिं च ते लोलणसंपगाढे, गाढं सुतत्तं अगणिं वयंति।
न तत्थ सातं लभतीभिदुग्गे, अरहिताभितावे तहवी तविंति ॥ १७ ॥

व्याख्या—तस्मिन्नरकावासे महायातनास्थाने नारकाणां लोलने प्रगाढे व्याप्ते तस्मिन्नरके ते नारकाः शीतार्ताः सन्तो गाढं अत्यर्थं सुतप्तं अग्निं व्रजन्ति। तत्राऽप्यतिदुर्गेऽग्निस्थाने दह्यमानाः सातं सुखं मनागपि न लभन्ते। अरहितो-निरन्तरोऽभितापो-महादाहोऽस्ति, तथाऽपि नरकपालास्तापयन्ति, तप्ततैलाऽग्निना दहन्तीति गाथार्थः ॥ १७ ॥

से सुव्वई नगरवहे व सद्दे, दुहोवणीयाणि पयाणि तत्था।
उदिन्नकम्माण उदिन्नकम्मा, पुणो पुणो ते सरहं दुहिंति ॥ १८ ॥

व्याख्या—तस्मिन्नरके तेषां नारकाणां नरकपालैः कदर्थ्यमानानां भयानको महान् हाहारवप्रचुरः आक्रन्दरवः श्रूयते, महानगरवध इव समाकर्ण्यते, यथा महानगरवधे लोकानां महान्कोलाहलः श्रूयते, तथाऽत्राऽपि, कीदृशो हाहारवः? दुहोवणीयाणि 'दुःखेन' पीडया 'उपनीतानि' उच्चरितानि करुणाप्रधानानि, यथा हा तात! हा मात!

कष्टमनाथोऽहं शरणागतस्तव, त्रायस्व माम् इत्येवमादीनां पदानां शब्दः श्रूयते । ‘उदीर्णे’ उदयप्राप्तं कटुविपाकं कर्म येषां नारकाणां, तथा उदीर्णकर्माणो नरकपालाः पुनः पुनः ‘सहर्ष’ंति ‘सप्रमदं’ सोत्साहं नारकान् ‘दुहंति’ दुःखयन्त्यसह्यं दुःखमुत्पादयन्ति नानाविधैरुपायैरिति गाथार्थः ॥ १८ ॥

पाणेहि णं पावे विओजयंति, तं भे पवक्खामि जहातहेणं ।
दंडेहिं तत्था सरयंति बाला, सव्वेहिं दंडेहिं पुराकएहिं ॥ १९ ॥

व्याख्या—ते नरकपालाः ‘पापाः’ पापकर्माणो नारकाणां प्राणान् ‘वियोजयन्ति’ शरीराऽवयवानां पाटनादिभिः प्रकारैर्विकर्त्तनादवयवान् विश्लेषयन्ति । किमर्थमेवं ते कुर्वन्ति ? इत्याह—तद्दुःखकारणं ‘भे’ युष्माकं प्रवक्ष्यामि ‘याथातथ्येन’ अवितथं प्रतिपादयामि । दण्डैः—दुःखविशेषैर्नारकाणामापादितैः ‘बाला’ निर्विवेकाः नरकपालाः पूर्वकृतं स्मारयन्ति । तद्यथा—तदा हृष्टस्त्वं खादसि ? समुत्कृत्योत्कृत्य प्राणिनां मांसं, तथा तद्रसं मद्यं च पिबसि, गच्छसि परदारान्, तत्कर्म साम्प्रतमुदयप्राप्तं तव, स्वकृतं कर्म भुञ्जन् किमेवं प्रकरोषि ? एवं ते नरकपालाः पुराकृतं दुष्कृतं स्मारयन्तस्तादृगेव दुःखविशेषमुत्पादयन्तो पीडयन्तीति गाथार्थः ॥ १९ ॥

ते हम्ममाणा नरगे पडन्ति, पुण्णे दुरूवस्स महाऽभितावे ।
ते तत्थ चिट्ठंति दुरूवभक्खी, तुट्टंति कम्मोवगया किमीहिं ॥ २० ॥

व्याख्या—ते नारकाः परमाधार्मिकैर्हन्यमानाः नंष्ट्वा, पुनर्नारकैः पूर्णे नरके अन्यस्मिन् पतन्ति महादुःखरूपे, तस्मिन् नारका अशुचिमेवाऽऽहारयन्तश्चिरं तिष्ठन्ति। महाऽभितापे–महासन्तापोपेते नारकाः स्वकर्मावबद्धाः कृमिभिर्नरकपाल-विकुर्वितैः परस्परोदीरितैः स्वकर्मढौकितैः खुद्यन्ते–भक्ष्यन्त, इति गाथार्थः ॥ २० ॥

सदा कसिणं पुण घम्मठाणं, गाढोवणीयं अतिदुक्खधम्मं।

अंदूसु पक्खिप्प विहत्तु देहं, वेहेण सीसं सेऽभितावयंति ॥ २१ ॥

व्याख्या—'सदा' सर्वकालं 'कृत्स्नं' प्रतिपूर्णं तत्र नरके घर्मप्रधानं स्थितिः–स्थानं नारकाणामस्ति। तच्च–प्रलयाऽतिरिक्ताऽग्निवालादीनामत्यन्तोष्णरूपत्वात् ह्यकर्मिकाचितास्वयं कर्मभिर्नारकाणामुपढौकितं, अतीव दुःखं असातावेदनीयं 'धर्मः' स्वभावो यस्य, तस्मिन्नेवंविधे घर्मप्रधाने स्थाने स्थितो जन्तुः 'अन्दुषु' निगडेषु देहं 'विहत्य' प्रक्षिप्य शिरश्च 'से' तस्य नारकस्य 'वेधेन' रन्ध्रोत्पादनेन शिरोऽभितापयन्तीति, कीलकैश्च सर्वाण्यप्यङ्गानि वितत्य चर्मवत्कीलयन्तीति गाथार्थः ॥ २१ ॥ अपि च—

छिंदंति बालाय खुरेण नक्कं, उट्ठे वि छिंदंति दुवे वि कण्णे।

जिब्भं विणिक्कस्स विहत्थिमेत्तं, तिक्खाहिं सूलाहिऽभितावयंति ॥ २२ ॥

व्याख्या—ते परमाधार्मिकाः बालाः अज्ञानित्वात् सर्वदा वेदनाव्यथितस्य पूर्वदुश्चरितस्मारणपूर्वकं क्षुरेण नासिका

छिन्दन्ति, ओष्ठौ कर्णावपि छिन्दन्ति । तथा मद्यमांसरसगृद्धस्य मृषाभाषिणश्च जिह्वां वितस्तिमात्रामाकृष्य तीक्ष्णशूलाभिरभितापयन्ति—विध्यन्ति अपनयन्ति चेति गाथार्थः ॥ २२ ॥

ते तिप्पमाणे तलसंपुडव, राइंदियं तत्थ थणंति बाला ।
गलंति ते सोणियपूयमंसं, पज्जोइया खारपदिद्धियंगा ॥ २३ ॥

व्याख्या—ते नारकाश्छिन्ननासिकौष्ठकर्णाः रुधिरं 'क्षरन्तो' क्षरन्तो यस्मिन्प्रदेशे रात्रिंदिवं गमयन्ति, तत्र 'बाला' अज्ञास्तालसम्पुटा इव—पवनेरिताः शुष्कतालपत्रसञ्चया इव 'स्तनन्तो' दीर्घमाक्रन्दन्तस्तिष्ठन्ति । 'प्रद्योतिता' वह्निना तापिताः क्षारेण [प्र]दिग्धाङ्गाः शोणितं पूयं मांसं च गलन्तीति गाथार्थः ॥ २३ ॥ किञ्च—

जइ ते सुता लोहितपूयपाई, बालागणीतेयगुणा परेणं ।
कुंभी महंताहियपोरसीया, समूसिया लोहियपूइपुण्णा ॥ २४ ॥

व्याख्या—पुनः सुधर्मस्वामी जम्बूस्वामिनं प्रत्याह—त्वया 'श्रुता' आकर्णिता ? श्रीमहावीरप्रतिपादिता लोहितपूयपाचिनी कुम्भी, यस्यां लोहितं पूतिसहितं पच्यते, एवंविधा कुम्भी त्वया श्रुता । परं—कथम्भूता कुम्भी ? बालाऽग्नितेजोगुणा—प्रकर्षेण तप्ता, 'महती' बृहत्तरा 'पोरसीय'त्ति पुरुषप्रमाणा अधिकं समुच्छ्रिता उष्ट्रिकाऽऽकृतिः समन्ततोऽग्निना प्रज्वालिता बीभत्सदर्शना, एवंविधा कुम्भी श्रीमहावीरेण प्रतिपादिता त्वया श्रुतेति गाथार्थः ॥ २४ ॥

१४

अथ तस्यां यत् क्रियते तद्दर्शयितुमाह—

पक्खिप्प तासुं पययंति बाले, अट्टस्सरे ते कलुणं रसंते ।

तण्हाइया ते तउतंबतत्तं, पज्जिज्जमाणाऽट्टतरं रसंति ॥ २५ ॥

व्याख्या—ते परमाऽधार्मिकास्तान्नारकान् आर्त्तस्वरान् करुणं रसन्तः, दीनं प्रलपन्तस्तासु कुम्भीषु प्रदीप्ताग्नितप्तासु किल्बिषपूर्णासु बीभत्सासु प्रक्षिपन्ति, प्रक्षिप्य च पचन्ति । ते पच्यमानाः विरसमाक्रन्दन्तः तृष्णया व्याप्ताः सलिलं *प्रार्थयन्ति । ततस्ते नरकपालाः मद्यं तवाऽतीव प्रियमासीदिति स्मारयित्वा तप्तं त्रपुः पाययन्ति । ते च तप्तं त्रपु पाय्यमाना* आर्त्ततरं 'रसन्ति' रारटन्तीति गाथार्थः ॥ २५ ॥ अथोद्देशकार्थोपसंहारार्थमाह—

अप्पेण अप्पं इह वंचयित्ता, भवाहमे पुव्वसते सहस्से ।

चिट्ठंति तत्था बहुकूरकम्मा, जहा कडे कम्म तहा सि भारे ॥ २६ ॥

व्याख्या—'इह' मनुष्यभवे आत्मना परवञ्चनप्रवृत्तेन परमार्थतः आत्मानं वञ्चयित्वा अल्पेन परोपघातसुखेन आत्मैव वंच्यते । तत्र आत्मानं परवञ्चनेन वञ्चयित्वा अधमभवान्—वधकलुब्धकादीनां भवाऽधमान् शतसहस्रशः समनुभूय विषयोन्मुखतया सुकृतपराङ्मुखाः नरकेषु पतन्ति । तत्र घोराऽतिदारुणं नरकवासं प्राप्य प्रभूतकालं यावत्तिष्ठन्ति । पूर्वजन्मनि यादृग्भूतानि कर्माणि कृतानि 'तथा' तेनैव प्रकारेण[से] तस्य[भारे] वेदनाः प्रादुर्भवन्ति स्वतः परत उभयतो वा ।

तथाहि—मांसादानां नारकाणां शरीरेभ्यो मांसखण्डानुत्कृत्य वह्निना प्रताप्य मुखे दीयन्ते। मांसरसपायिनां तप्तत्रपूणि पाय्यन्ते। मत्स्यघातकलुब्धकादयस्तथैव छिद्यन्ते। भिद्यन्ते—मार्यन्ते। अनृतभाषिणां जिह्वा छिद्यन्ते। परद्रव्यहारिणामङ्गोपाङ्गानि छिद्यन्ते, पारदारिकाणां वृषणच्छेदः, शाल्मल्युपगूहनानि कार्यन्ते, इत्यादिप्रकारेण पूर्वकृतदुष्कृतस्मारणेन तादृग्विधमेव दुःखमुत्पाद्यते, तेन सुष्ठूक्तं तादृग्भूत एव कर्मविपाकापादितो भार उदेति इति गाथार्थः ॥ २६ ॥ किञ्च—

समज्जिणित्ता कलुसं अणज्जा, इट्ठेहि कंतेहि य विप्पहूणा ।
ते दुब्भिगंधे कसिणे य फासे, कम्मोवगा कुणिमे आवसंति त्ति बेमि ॥ २७ ॥

व्याख्या—ते नारकाश्चिरं त्रयस्त्रिंशत्सागराणि यावदुत्कृष्टतः, जघन्यतो दशवर्षसहस्राणि यावन्नरके तिष्ठन्ति। दुर्गन्धे बीभत्से अशुभस्पर्शे इष्टैः कान्तैरभीष्टैर्विरहिता एकाकिनः महाभयङ्करैः कर्मादानैरष्टादशपापस्थानैः कलुषं समर्ज्य 'अनार्याः' क्रूरकर्माणो दुरभिगन्धे नरके आवसन्ति। यदर्थं पातकं विहितं तैर्विरहितास्तत्र पच्यन्ते। यदर्थमशुभं कृतं ते स्वजनयशोऽर्थकाः स एकाक्येव तत्र पीड्यते। चिरं तत्र आवसन्तीति गाथार्थः ॥ २७ ॥ इतिः परिसमाप्त्यर्थे, ब्रवीमीति पूर्ववत् ।

इति नरकविभक्तेः प्रथमोद्देशकः परिसमाप्तः ।

अथ द्वितीयोद्देशकः ।

उक्तः प्रथमोद्देशकः, अथ द्वितीयः समारभ्यते—

अहावरं सासयदुक्खधम्मं, तं भे पवक्खामि जहातहेणं ।
बाला जहा दुक्कडकम्मकारी, वेदंति कम्माइं पुरे कडाइं ॥ १ ॥

व्याख्या—अथाऽनन्तरं शाश्वतदुःखधर्मं-अक्षिनिमेषमपि कालं अविद्यमानसुखलेशं यावदायुस्तावद्दुःखमेवास्ति, तदहं 'याथातथ्येन' यथा व्यवस्थितं तथा वक्ष्ये 'बालाः' परमार्थमजानानाः यथा कृतानि पुरा कृतानि दुष्कृतानि तथैव वेदयन्ति-अनुभवन्ति । तथैव कथयामीति गाथार्थः ॥ १ ॥ तदेवाह—

हत्थेहिं पादेहिं य बंधिऊणं, उदरं विकत्तंति खुरासियेहिं ।
गिण्हित्तु बालस्स विहत्तु देहं, वद्धं थिरं पिट्ठितो उद्धरंति ॥ २ ॥

व्याख्या—ते परमाधार्मिकाः-नारकान् हस्तपादेषु बद्ध्वा क्षुरप्रासिभिर्नानाविधैरायुधविशेषैर्विदारयन्त्युदरम् । तथा 'बालस्य' अकिञ्चित्करस्याऽत्राणस्य लकुटादिभिर्विविधं हत्वा देहं गृहीत्वा च पृष्ठिदेशे 'वर्ध्रं' चर्म 'उद्धरन्ति' विकर्तयन्ति वामतो दक्षिणतः पृष्ठितोऽग्रतश्च शरीरस्य चर्म पातयन्तीति गाथार्थः ॥ २ ॥

बाहूं पकत्तंति समूलतो से, मुहं(थूलं) वियासं मुहे आदहंति ।
रहंसि जुत्तं सरयंति बालं, आरुस्स विंधंति तुदेण पिट्ठे ॥ ३ ॥

व्याख्या—ते परमाऽधार्मिकास्तिसृषु नरकपृथिवीषु नारकाणां मूलत आरभ्य बाहून् प्रकर्तयन्ति । अपरासु चतसृषु परमाऽधार्मिकाऽभावान्नारका एव नारकाणां बाहून् छिन्दन्ति । तथा—अनिच्छतोऽपि नारकस्य × मुखं विदार्य बृहत्तप्ता-ऽयोगोलं बलादपि मुखे प्रक्षिपन्ति× आसमन्ताद्दहन्ति । तथा—रथेऽग्निवर्णे योजयन्ति । प्राग्जन्मकृतं दुष्कृतं स्मारयन्ति । मधुपानावसरे त्वं मद्यपश्चासीः, स्वमांसभक्षणावसरे तव मांसमतीव प्रियमासीदित्येवं स्मारयन्तीति । 'आरुष्य' कोपं कृत्वा प्रतोदेन पृष्ठदेशे विध्यन्तीति गाथार्थः ॥ ३ ॥

अयं व तत्तं जलियं सजोयं, तऊवमं भूमिमणुक्कमंता ।
ते डज्झमाणा कलुणं थणंति, उसुचोइया तत्तजुगेसु जुत्ता ॥ ४ ॥

व्याख्या—तप्तायोगोलकसदृशीं ज्वलितां ज्योतिर्भूतां तत्त्रपूपमां वा भूमिं गच्छन्तस्ते दह्यमानाः करुणं 'स्तनन्ति' आरटन्ति । तथा तप्तेषु युगेषु युक्ताश्चक्षुमितुमशक्ताः गलिबलीवर्दा इवेषुणा-प्रतोदादिना प्रेरिताः विध्यन्तः करुणमारट-न्तीति गाथार्थः ॥ ४ ॥

× × एतच्चिह्नान्तर्गतपाठस्थाने "मुखे विकाशं कृत्वा 'स्थूलं' बृहत्तप्तायोगोलादिकं प्रक्षिपन्त" एवमस्ति हस्तप्रतौ ।

बाला बला भूमिमणुक्कमंता, पविज्जलं लोहपहं व तत्तं ।

जंसीऽभिदुग्गंसि पवज्जमाणा, पेसे व दंडेहिं पुरा करेंति ॥ ५ ॥

व्याख्या—ते 'बालाः' निर्विवेकिनः प्रज्वलितलोहपथमिव तप्तां भुवं 'पविज्जलं'ति रुधिरपूयादिना पिच्छिलां बलादनिच्छन्तोऽपि प्रेर्यमाणा विरसमारसन्ति । तथाभिदुर्गे मार्गे प्रेर्यमाणाः न सम्यग्गच्छन्ति ततस्ते नरकपालाः 'प्रेष्यानिव' कर्मकरानिव बलीवर्दानिव वाहयित्वा परिश्रमं कुर्वन्ति । न ते स्वेच्छया गन्तुं स्थातुं वा लभन्ते वराका इति गाथार्थः ॥ ५ ॥

ते संपगाढंसि पवज्जमाणा, सिलाहि हम्मंतिऽभिपातिणीहिं ।

संतावणी नाम चिरट्ठितीया, संतप्पती जत्थ असाहुकम्मा ॥ ६ ॥

व्याख्या—ते नारकाः 'सम्प्रगाढे' बहुवेदनाऽऽक्रान्ते नरके मार्गे वा वहन्तः असुरैः सम्मुखपातिनीभिः शिलाभिरभिहन्यन्ते । तथा सन्तापिनी—कुम्भी, सा च चिरस्थितिका, तत्र पतितो जन्तुर्बहुवेदनाग्रस्त आस्ते, यत्र च पीड्यतेऽसाधुकर्मा, जन्मान्तरकृताऽशुभाऽनुष्ठानवशादिति गाथार्थः ॥ ६ ॥

कंदूसु पक्खिप्प पयंति बालं, ततो विदड्ढा पुण उप्पयंति ।

ते उड्ढकाएहिं पखज्जमाणा, अवरेहिं खज्जंति सणप्फएहिं ॥ ७ ॥

व्याख्या—तं बालं नारकं ' कन्दुषु ' भ्राष्ट्रेषु प्रक्षिप्य चणकवत्पचन्ति । ते पच्यमाना ऊर्ध्वमुच्छलन्ति । तत्र ऊर्ध्वमु-

ऊर्ध्वो [उड्ढपाएहिं] क्रोशैः कर्त्तिकाभिः सखड्गकाभिः अन्यतो नष्टाः सन्तः 'सणप्फएहिं'ति सिंहव्याघ्रादिभिर्भक्ष्यन्त इति गाथार्थः ॥ ७ ॥ किञ्च—

समूसियं नाम विधूमठाणं, जं सोयतत्ता कलुणं थणंति ।
अहोसिरं कट्टु विगत्तिऊणं, अयं व सत्थेहिं समोसवेंति ॥ ८ ॥

व्याख्या—'समुच्छ्रितं' चिताकृतिः विधूमोऽग्निस्थानं, एवंविधानि नरकेषु यातनास्थानानि विद्यन्ते, तत्र ते नारकाः शोकवितप्ताः सन्तः पतिताः करुणं स्तनन्ति, तथा अधःशिरः कृत्वा देहं विकृत्य शस्त्रैश्च, अयोवक्त्रादिवत् खण्डशः खण्डयन्तीति गाथार्थः ॥ ८ ॥ अपि च—

समूसिया तत्थ विसूणियंगा, पक्खीहिं खज्जंति अओमुहेहिं ।
संजीविणी नाम चिरट्ठितीया, जंसी पया हम्मइ पावचेया ॥ ९ ॥

व्याख्या—तत्र नरके नारका ऊर्ध्वबाहवोऽधःशिरसः स्तम्भादौ परमाधार्मिकैर्लम्ब्यन्ते, सौनिकैः पशव इव लम्बिताः सन्तो 'विसूणियंग'त्ति उत्कृत्ताङ्गा—अपगतत्वचः कृताः सन्तः, पक्षिभिरयोमुखैः—वज्रचञ्चुभिर्भक्ष्यन्ते । एवं कदर्थ्यमाना अपि न म्रियन्ते । अतो नरकभूमिः सञ्जीवनी—जीवितदात्री नरकभूमिस्तत्र गतः खण्डशश्छिन्नोऽपि न म्रियते, स्वायुषि सतीति, सा च सञ्जीवनीभूमिश्चिरस्थितिका, उत्कृष्टतस्त्रयस्त्रिंशत्सागरोपमाणि यावत् 'प्रजाः' सत्त्वाः प्राणिनः पापचेतसो

हन्यन्ते मुद्गरादिभिरत्यन्तं पिष्टा अपि मुमूर्षवोऽपि न म्रियन्ते, अपितु पारदवन्मिलन्तीति गाथार्थः ॥ ९ ॥ अपि च—

तिक्खाहिं सूलाहिऽभितावयंति, वसोवगं सावययं व लद्धुं ।
ते सूलविद्धा कलुणं थणंति, एगंतदुक्खं दुहओ गिलाणा ॥ १० ॥

व्याख्या—ते नरकपालाः दुष्कृतकारिणं नारकं तीक्ष्णाभिरयोमयीभिः शूलाभिरभितापयन्ति, यथा व्याधाः श्वापदं कालपृष्ठसूकरादिकं स्ववशं कृत्वा कदर्थयन्ति, तथा तेऽपि नारकान् कदर्थयन्ति, ते शूलाभिर्विद्धा अपि न म्रियन्ते । केवलं करुणं 'स्तनन्ति' आक्रन्दन्ति । तथा एकान्तेनाऽन्तर्बहिश्च ग्लानाः—अपगतप्रमोदाः सदा दुःखमनुभवन्तीति गाथार्थः ॥ १० ॥

सदा जलं नाम निहं महंतं, जंसी जलंतो अगणी अकट्ठो ।
चिट्ठंति बद्धा बहुकूरकम्मा, अरहस्सरा केइ चिरट्ठितीया ॥ ११ ॥

व्याख्या—तत्र नरके × 'निह' माघातस्थानं विद्यते, यत्र कर्मवशगाः प्राणिनो हन्यन्ते । तत्कथम्भूतं ? सदा 'ज्वलत्' देदीप्यमानं उष्णं, महद्विस्तीर्णं, यत्राऽग्निरकाष्ठः प्रज्वलयति । तत्रैवंविधे स्थाने बहुक्रूरकर्माणो 'अरहःस्वराः' बृहदाक्रन्दशब्दाश्चिरस्थितिकाः—प्रभूतकालस्थितयस्तिष्ठन्तीति गाथार्थः ॥ ११ ॥

चिया महंतीउ समारभित्ता, छुब्भंति ते तं कलुणं रसंतं ।

× " निहन्यन्ते प्राणिनो यस्मिन् " इति वृ० ।

आवट्टती तत्थ असाहुकम्मा, सप्पी जहा पडियं जोइमज्झे ॥ १२ ॥

व्याख्या—तत्र परमाऽधार्मिकाः अग्निमयीं महतीं चितां निष्पाद्य महाराटिशब्दं कुर्वाणं, प्रत्कुर्वन्तमपि नारकमग्निचितायां प्रक्षिपन्ति । ततस्ते नारकाः वराकाः विलीयन्ति. कृताऽसाधुकर्माणोऽनाचारिणो नारकाः, यथा सर्पिः—घृतं अग्निमध्ये पतितं सद्य एव विलीयते, सर्वथा विलयं याति । परं नारका न म्रियन्त एव, पारदवत्पुनः सम्मिलन्तीति गाथार्थः ॥१२॥

अथ पुनरन्यदुःखप्रकारं दर्शयति—

सदा कसिणं पुण घम्मठाणं, गाढोवणीयं अइदुक्खधम्मं ।

हत्थेहिं पाएहिं य बंधिऊणं, सत्तुं व दंडेहिं समारभंति ॥ १३ ॥

व्याख्या—तत्र गाढोपनीतं कर्मभिरेवंविधं घर्मस्थानमस्ति । तत्र ते नरकपालाः नारकान् हस्तपादेषु बद्ध्वा शत्रुमिव दण्डैस्ताडयन्तीति गाथार्थः ॥ १३ ॥

भंजंति बालस्स वहेण पुट्ठिं, सीसंपि भिंदिंति अओघणेहिं ।

ते भिन्नदेहा फलगं व तट्ठा, तत्ताहिं आराहिं नियोजयंति ॥ १४ ॥

व्याख्या—ते परमाऽधार्मिकाः 'बालस्य' अज्ञानिनो नारकस्य दण्डादिभिः पृष्ठिं भञ्जन्ति । शिरोऽप्ययोमयेन घनेन भिन्दन्ति—चूर्णयन्ति । ततस्ते नारकाः भिन्नदेहा—चूर्णिताऽङ्गोपाङ्गाः फलकमिव उभाभ्यां पार्श्वाभ्यां तक्षिताः—तनूकृताः

सन्तः [तप्ताभिः] आराभिर्विध्यमाना युग्यपानादिके कर्मणि विनियोज्यन्ते—व्यापार्यन्ते इति गाथार्थः ॥ १४ ॥ किञ्च—

अभिजुंजिया रुद्द असाहुकम्मा, उसुचोइया हत्थिवहं वहंति ।
एगं दुरूहित्तु दुवे ततो वा, आरुस्स विज्झंति ककाणओ से ॥ १५ ॥

व्याख्या—ते नरकपालाः नारकान् हस्तिवाहं वाहयन्ति, यथा हस्ती वाह्यते समारुह्य, एवं तानपि वाहयन्ति । जन्मान्तरकृतं रौद्रं सत्त्वोपघातादिकं कर्म स्मारयित्वा, कथं वाहयन्ति ? तस्य नारकस्योपरि एकं द्वौ त्रीन् वा समारुह्य, अतिभारारोपणेन अवहन्तं ' आरुष्य ' कोपं कृत्वा अङ्कुशेन विध्यन्ति । ' से ' तस्य नारकस्य ' ककाणओ ' त्ति मर्माणि विध्यन्ति । एवं उष्ट्रवाहं वाहयन्ति । पृष्ठेऽधिकभारारोपणं कृत्वा स्वयं द्वौ त्रीन् वा समारुहन्ति । अवहन्तं आरटन्तं च कुट्टयन्तीति गाथार्थः ॥ १५ ॥

बाला बला भूमिमणुक्कमंता, पविज्जलं कंटइलं महंतं ।
विबद्धतप्पेहि विवण्णचित्ते, समीरिया कोट्ट बलिं करिंति ॥ १६ ॥

व्याख्या—ते ' बाला ' अज्ञानिनो नारकाः बलात् रुधिरकर्दमाविलां भूमिमाक्रमन्तः, कण्टकाकुलां च भूमिमतिक्रमितुमशक्नुवन्तो नरकपालैः प्रेर्यन्ते । ततो (विपन्नचित्ताः—)विषण्णाः मूर्छितास्ते वराका(स्तर्पकैः) बध्यन्ते । ततस्ते नरकपालाः समीरिताः—पापेन कर्मणा प्रेरितास्तान्नारकान् कुट्टयित्वा—शरीरं खण्डशः कृत्वा ' बलिं करिंति ' नगरबलिवच्चतुर्दिक्षु

विक्षिपन्तीति गाथार्थः ॥ १६ ॥ किञ्च—

वेतालिए नाम महाभितावे, एगायते पव्वयमंतलिक्खे ।

हम्मंति तत्था बहुकूरकम्मा, परं सहस्साण मुहुत्तगाणं ॥ १७ ॥

व्याख्या—नामशब्दः सम्भावनायां । नरकेषु एको महान् [दीर्घः] एकशिलाघटितो नरकपालैरेव वैक्रियो निष्पादितः, अन्तरिक्षे पर्वतोऽस्ति । दीर्घोऽतिविस्तृतः अत्युच्चः, तत्र च नरके तमोबाहुल्यम् । ततो नारकाः परमाऽधार्मिकैः प्रेर्यन्ते । आरोहन्तु विषममिमं गिरिं, ततस्ते तमोरूपत्वाद् [illegible] हन्यन्ते । बहुक्रूरकर्माणो नारकाः, सहस्रसंख्यानां मुहूर्तानां परं प्रकृष्टं कालं, एतावता प्रभूतं कालं यावत् हन्यन्त इति गाथार्थः ॥ १७ ॥

संबाहिया दुक्कडिणो थणंति, अहो य राओ परितप्पमाणा ।

एगंतकूडे नरए महंते, कूडेण तत्था विसमे हताओ ॥ १८ ॥

व्याख्या—ते नारकाः बहुपापोपचयाः 'दुष्कृतिनो' महापापाः अहर्निशं परितप्यमानाः-अतिदुःखेन पीड्यमानाः, असुरैश्च हन्यमानाः करुणं दीनं 'स्तनन्ति' आक्रन्दन्ति । कथम्भूते नरके ? एकान्तकूटे-दुःखोत्पत्तिस्थाने, महति विस्तीर्णे पतिताः प्राणिनः 'कूटेन' गलयन्त्रपाशादिना पाषाणसमूहेन वा हताः सन्तो, नवरमाक्रन्दमेव कुर्वन्ति इति गाथार्थः ॥१८॥

भंजंति णं पुव्वमरी सरोसं, समोग्गरे ते मुसले गहेउं ।

ते भिन्नदेहा रुहिरं वमंता, उम्मुद्धगा धरणितले पडंति ॥ १९ ॥

व्याख्या—पूर्वभवस्य इव—जन्मान्तरवैरिण इव परमाऽधार्मिकाः, अथवा जन्मान्तरवैरिणो वा नारकाः, नारकाणां सर्वाणि शरीराणि, समुद्गराणि मुशलानि गृहीत्वा भञ्जन्ति—गाढप्रहारैश्चूर्णयन्ति । ते तु पुनस्त्राणाः शस्त्रप्रहारैः रुधिरमुद्वमन्तो अधोमुखा धरणीतले पतन्तीति गाथार्थः ॥ १९ ॥

अणासिया नाम महासियाला, पागब्भिणो तत्थ सया सकोवा ।
खज्जंति तत्था बहुकूरकम्मा, अदूरया संकलियाहि बद्धा ॥ २० ॥

व्याख्या—तस्मिन्नरके एवंविधाः महाशृगालाः सन्ति, एते वैक्रियाः परमाऽधार्मिकरचिताः, कथम्भूताः ? महादेहप्रमाणाः 'अनशिताः' बुभुक्षिताः 'प्रगल्भिताः' अतिरौद्ररूपाः अतिधृष्टाः निर्भयाः सन्ति । सदा कुपितैस्तैः शृगालैस्ते नारका भक्ष्यन्ते—खण्डशः क्रियन्ते । शृंखलादिभिर्बद्धाः—अयोमयनिबद्धनिगडिताः, अदूरगाः—परस्परसमीपवर्तिनस्तैः शृगालैर्भक्ष्यन्त इति गाथार्थः ॥ २० ॥ किञ्च—

सयाजला नाम नदीभिदुग्गा, पविज्जलं लोहविलीणतत्ता ।
जंसीभिदुग्गंसि पवज्जमाणा, एगायताणुक्कमणं किरंति ॥ २१ ॥

व्याख्या—तत्र तस्मिन्नरके, सदाजला नाम नित्यवाहिनी अगाधा अलब्धपारा महाविषमा नदी समस्ति, अग्निवर्णं,

सविलीनं-द्रवीभूतं यल्लोहं-अयस्तादृशजला । द्रवीभूतोष्णलोहसदृशपानीया सदाजला वहति, तस्यां च अतिदुर्गमायां नद्यां प्रपद्यमानाः नारका [एकाकिनो] अत्राणाः अनुक्रमणं—तस्यां गमनं प्लवनं कुर्वन्तीति गाथार्थः ॥ २१ ॥

पुनर्नारकाणां दुःखविशेषं दर्शयितुमाह—

एयाइं फासाइं फुसंति बालं, निरंतरं तत्थ चिरट्ठितीयं ।
ण हम्ममाणस्स उ होइ ताणं, एगो सयं पच्चणुहोइ दुक्खं ॥ २२ ॥

व्याख्या—एतानि पूर्वोक्तानि 'स्पर्शानि' दुःखानि 'बालं' नारकं बहुकालं यावत् 'स्पृशन्ति' दुःखयन्ति । 'निरन्तरं' विश्रामरहितं × "अच्छिनिमीलणमित्तं पि, नत्थि सुहं दुक्खमेव अणुबद्धं । नरए नेरईयाणं, अहोनिसं पच्चमाणाणं ॥ १ ॥" इति वचनात्तत्रस्थो नारकः 'एको' असहाय एव, यदर्थं पापकर्मार्जितं ते तु दूरे स्थिताः, स त्वेकाक्येव नरकाऽनले पच्यते । स्वकर्मफलभुजो हि जन्तवः, न कोऽपि दुःखं संविभज्य गृह्णाति । यतो "मया परिजनस्यार्थे, कृतं कर्म सुदारुणम् । एकाकी तेन दह्येऽहं, गतास्ते फलभोगिनः ॥ २ ॥" इति गाथार्थः ॥ २२ ॥ किञ्चाऽन्यत्—

× "तत्र चिरस्थितिकं तं हन्यमानस्य नारकस्य न किञ्चित्त्राणं स्यात्, यथा सीतेन्द्रेण लक्ष्मणस्य नरकदुःखमनुभवतस्त्राणोपायेनापि न त्राणं कृतमिति ।" हर्ष० ।

१ अक्षिनिमीलनमात्रमपि नास्ति सुखं दुःखमेवानुबद्धम् । निरये नैरयिकाणां अहर्निशं पच्यमानानाम् ॥ १ ॥

जं जारिसं पुव्वमकासि कम्मं, तमेव आगच्छति संपराए ।

एगंतदुक्खं भवमज्जिणित्ता, वेदंति दुक्खी तमणंतदुक्खं ॥ २३ ॥

व्याख्या—येन यादृशं यत् स्थितिकं येन येन भावेन पूर्वभवे कर्म बद्धं, तत् कर्म तादृग्भूतमेव ('सम्पराये' संसारे) जन्तोरुदयमायाति। परं नरके निःकेवलं दुःखरूपं भवमर्जयित्वा असातावेदनीयरूपमनन्त-मन्त्येन नोपशमनीयमप्रतीकारं दुःखं वेदयन्तीति गाथार्थः ॥ २३ ॥

अथोपदेशस्वरूपं दर्शयति—

एयाणि सोच्चा णरगाणि धीरे, न हिंसए किंचण सव्वलोए ।

एगंतदिट्ठी अपरिग्गहे उ, बुज्झेज्ज लोयस्स वसं न गच्छे ॥ २४ ॥

व्याख्या—'एतान्' पूर्वोक्तान् दुःखविशेषान् श्रुत्वा 'धीरः' प्राज्ञ एतत् कुर्यात्तद्दर्शयति—सर्वस्मिन्नपि लोके न कमपि प्राणिनं हिंस्यात्—न व्यापादयेत्, एकान्तदृष्टि-र्निश्चलसम्यक्त्वः, तथाऽपरिग्रहः, एवंविधो न कमपि त्रसं वा स्थावरं वा प्राणिनं हिंस्यान्न व्यापादयेत्, तथा लोकमशुभकर्मकारिणं तद्विपाकफलं भुञ्जन्तं वा 'बुध्येत' जानीयात् यन्महापाप-कारिणो नरकेष्वनेकधा कदर्थ्यन्ते। तत्कदर्थनां चावगम्य न तस्य वशं गच्छेत्—अशुभं कर्म न समाचरणीयं। यदि वा लोकं-कषायलोकं बुध्येत " चिंति कसाया भवमणंतं " इति ज्ञात्वा कषायवशं न गच्छेदिति गाथार्थः ॥ २४ ॥

एवं तिरिक्खे मणुयामरेसुं, चतुरंतणंतं तयणूविवागं ।
स सव्वमेयं इति वेदइत्ता, कंखेज्ज कालं धुवमायरेज्ज त्ति बेमि ॥ २५ ॥

व्याख्या—एवमशुभकर्मकारिणां प्राणिनां तिर्यग्मनुष्याऽमरेष्वपि 'चतुरन्तं' चतुर्गतिकमनन्तं (तदनुरूपं) दुःखविपाकं (स बुद्धिमान्) सर्वमेतत्-पूर्वोक्तस्वरूपं 'विदित्वा' ज्ञात्वा 'ध्रुवं' संयममाचरन् मृत्युकालमाकाङ्क्षेत् । को भावः ? संसारान्तर्गतानां प्राणिनां केवलं दुःखमेव, अतो 'ध्रुवो' मोक्षः संयमो वा, तदुद्यमो विधेयो यावज्जीवमिति गाथार्थः ॥ २५ ॥ इतिः परिसमाप्तौ, ब्रवीमीति पूर्ववत् ।

इति श्रीपरमसुविहितखरतरगच्छविभूषणश्रीमत्साधुरङ्गगणिवरगुम्फितायां श्रीमत्सूत्रकृताङ्गदीपिकायां
पञ्चमे नरकविभक्त्याख्येऽध्ययने द्वितीयोद्देशकः समाप्तस्तत्समाप्तौ च नरकविभक्त्यध्ययनं
पञ्चमं परिसमाप्तमिति ।

अथ षष्ठं वीरस्तुत्यध्ययनम् ।

उक्तं पञ्चमाऽध्ययनं, साम्प्रतं षष्ठं प्रारभ्यते । तत्र नरकविभक्त्यध्ययनं श्रीमहावीरवर्द्धमानस्वामिना प्रतिपादितं, तस्याऽनेन गुणकीर्तनद्वारेण चरितं प्ररूप्यते, प्रणेतुर्महिमाख्याने शास्त्रस्याऽपि महिमैव दीप्यते, अत एव श्रीवीरस्तवनं प्रारभ्यते । तत्रेयमादिगाथा—

पुच्छिस्सु णं समणा माहणा य, अगारिणो या परतित्थिया य ।
से के ? इमं नितियं धम्ममाहु, अणेलिसं साहुसमिक्खयाए ॥ १ ॥

व्याख्या—नरकविभक्तिं श्रुत्वा संसारादुद्विग्नमनसः श्रीसुधर्मस्वामिनमप्राक्षुः—पृष्टवन्तः, यथा केनैवम्भूतो धर्मः संसारोत्तरणसमर्थः प्रतिपादितः ? अथ के पृष्टवन्तः ? णमिति वाक्याऽलङ्कारे, श्रमणाः ब्राह्मणास्तथाऽगारिणः क्षत्रियादयः, ये च शाक्यादयः परतीर्थिकास्ते पृष्टवन्तः । किम् ? तदिति दर्शयति । 'से के इमं' ति स कः ? य इमं धर्मं भवजलनिधितारणतरण्डप्रायं 'आह' उक्तवान् । ईदृशमनन्यसदृश-मतुल्यमित्यर्थः । 'साधुसमीक्षया' तत्त्वपरिच्छित्त्या यदि वा 'साधुसमीक्षया' समतयोक्तवान् इति गाथार्थः ॥ १ ॥ अथ तस्यैव ज्ञानादिगुणाऽवगतये प्रश्नमाह—

कहं च णाणं कह दंसणं से, सीलं कहं नायसुतस्स आसी ? ।

जाणासि णं भिक्खु ! जहातहेणं, अहासुतं ब्रूहि जहा णिसंतं ॥ २ ॥

व्याख्या—कथम्भूतं तस्य भगवतो ज्ञानं ? कथम्भूतं च 'से' तस्य दर्शनं ? शीलं च यमनियमरूपं, कीदृग् 'ज्ञात-सुतस्य' भगवतो महावीरस्याऽऽसीदभूत् ? यदेतन्मया पृष्टं तद्भिक्षो-सुधर्मस्वामिन् ! याथातथ्येन त्वं जानासि, यथा सम्यगवगच्छसि, णमिति वाक्यालङ्कारे, तदेतत्सर्वं यथा श्रुतं त्वया, यथाऽवधारितं, यथा दृष्टं तथा सर्वं 'ब्रूहि' कथय । एवं पृष्टः सुधर्मस्वामी जम्बूस्वाम्यादिपृच्छकानां पुरः श्रीवर्द्धमानस्वामिनो गुणान् कथयतीति गाथार्थः ॥ २ ॥ तदेवाह—

खेयन्नए से कुसले महेसी, अणंतनाणी य अणंतदंसी ।
जसंसिणो चक्खुपहे ठियस्स, जाणाहि धम्मं च धिइं च पेहा ॥ ३ ॥

व्याख्या—स भगवान् खेदज्ञः-संसारान्तर्वर्तिनां जन्तूनां कर्मविपाकजं दुःखं वेत्ति तेन खेदज्ञः, कर्मविपाकजनित-दुःखश्रमं सर्वेषां जानातीति । अथवा क्षेत्रज्ञः-यथाऽवस्थिताऽऽत्मस्वरूपपरिज्ञानादात्मज्ञः, अथवा क्षेत्र-माकाशं, तज्जानातीति क्षेत्रज्ञः-लोकाऽलोकस्वरूपज्ञाता । तथा 'कुशलः' प्राणिनां कर्मोच्छेदनविधौ निपुणः, तथा महर्षिस्त(पश्चरणानुष्ठायी, त)थाऽनन्तज्ञानी अनन्तदर्शी च । तथा त्रिभुवनव्यापकं यशोऽस्येति यशस्वी, तस्य लोकस्य चक्षुष्पथे स्थितस्य, भवस्थकेवलाव-स्थायामिति । सर्वपदार्थाऽऽविर्भावनेन चक्षुर्भूतस्य भगवतः प्ररूपितं धर्मं जानीहि । तथा धृतिं रतिं च संयमे तस्य भगवतो महोपसर्गैरप्यचलितसत्त्वस्य जानीहि-प्रेक्षस्व, एवंविधो भगवान् आसीत्तेनाऽयं धर्मः प्ररूपित इति गाथार्थः ॥ ३ ॥

पुनस्तद्गुणान् कथयितुमाह—

उड्ढं अहेयं तिरियं दिसासु, तसा य जे थावर जे य पाणा ।
से णिच्चणिच्चेहि समिक्ख पन्ने, दीवेव धम्मं समियं उदाहु ॥ ४ ॥

व्याख्या—ऊर्ध्वमधस्तिर्यग्दिशासु ये जन्तवस्त्रसास्तथा स्थावराश्च, तान् सर्वानपि(स) भगवान् केवलज्ञानित्वाज्जानाति । कथं जानाति ? नित्यानित्यभेदेन, द्रव्यार्थिकतया नित्यान् पर्यायार्थिकतया त्वनित्यान् समीक्ष्य 'प्रज्ञः' केवलज्ञानेन सम्यग् ज्ञात्वा, भगवान् द्वीप इव संसारार्णवपतितानामाश्वासहेतुत्वाद्द्वीप इव, यदि वा। सर्वपदार्थप्रकाशकत्वाद्दीप इव, संसारार्णवतारणक्षमं धर्मं समतया 'उदाहुः' उदाहृतवानिति गाथार्थः ॥ ४ ॥

से सव्वदंसी अभिभूय नाणी, णिरामगंधे धिइमं ठितप्पा ।
अणुत्तरे सव्वजगंसि विज्जं, गंथाअतीते अभए अणाऊ ॥ ५ ॥

व्याख्या—यो धर्मं प्ररूपितवान् स भगवान् कीदृशः ? 'से सव्वदंसी' स वर्द्धमानस्वामी सर्वदर्शी, परीषहान् 'अभिभूय' जित्वा ज्ञानी जातः, तथा निरामगन्धः, अपगतः 'आमो' अविशोधिकोट्याख्यो 'गन्धो' विशोधिकोट्याख्यो यस्मात् स निरामगन्धः, मूलोत्तरगुणविशुद्धसंयमपालक इत्यर्थः । तथा संयमे 'धृतिमान्' दृढः । तथा स्थितात्मा अशेषकर्मक्षया(द्) व्यवस्थितः आत्मा स्वरूपे यस्य, सर्वजगति 'अनुत्तरः' प्रधानः, तथा 'विद्वान्' सर्वज्ञस्तथा—

'अग्रन्थः' बाह्याभ्यन्तरग्रन्थरहितः, अभयः-सप्तभयरहितः, 'अणाऊ' अनायुर्दग्धकर्मबीजत्वात् संसारे पुनरनुत्पादादेवंविधो भगवान् शुद्धधर्मप्ररूपक इति गाथार्थः ॥ ५ ॥

से भूतिपन्ने अणिए अ चारी, ओहंतरे धीरे अणंतचक्खू ।
अणुत्तरं तप्पति सूरिए वा, वइरोयणिंदे व तमं प(गासे)भासे ॥ ६ ॥

व्याख्या—स भगवान् भूतिप्रज्ञः-अनन्तज्ञानवानित्यर्थः। अनियतचारी-अप्रतिबद्धविहारी, परिग्रहत्यागात्-'ओहंतरे' संसारसागरतरणशीलः, धीरो-धीर्बुद्धिस्तया राजते, परीषहोपसर्गाक्षोभ्यो वा धीरः, तथा अनन्तचक्षुः-अनन्तं केवलज्ञानात्मकं चक्षुर्यस्य (स) तथा, यथा सूर्योऽनुत्तरं सर्वमहद्भ्योऽधिकं तपति, तस्माच्च कश्चिदधिकस्तेजसा, तथा भगवानपि सर्वोत्तमः। तथा वैरोचनोऽग्निः, स एव दीप्तत्वादिन्द्रः, यथाऽसावग्निस्तमोऽपनीय प्रकाशयति तथा भगवानपि तमोऽपनीय यथाऽवस्थितपदार्थप्रकाशनं करोतीति गाथार्थः ॥ ६ ॥

अणुत्तरं धम्ममिणं जिणाणं, णेया मुणी कासव आसुपन्ने ।
इंदेव देवाण महाणुभावे, सहस्सणेता दिविणं विसिट्ठे ॥ ७ ॥

व्याख्या—त(य)था 'जिनानां' ऋषभादितीर्थकृतां धर्मोऽयमनुत्तरः-सर्वोत्कृष्टः, तथा 'मुनिः' श्रीवर्द्धमानस्वामी काश्यपगोत्रीयो धर्मप्रणेता उत्पन्नदिव्यज्ञानः सर्वोत्तमो ज्ञेय इति। यथा स्वर्गे देवसहस्राणां नायको महानुभावो-महा-

न्याक्य मेखलायां नन्दनं, ततो द्विषष्टियोजनसहस्राणि पञ्चशताधिकानि अतिक्रम्यते, तत्र सौमनसं वनं ३, ततः षट्त्रिंशत्सहस्राणि गम्यते, तत्र शिखरे पाण्डुकवनं ४ चतुर्थं । तदेवं मेरुश्चतुर्नन्दनवनाद्युपेतो विचित्रक्रीडास्थानं, यत्र महेन्द्राः समागत्य रतिं वेदयन्ति । रमणीयगुणे मेरौ समागत्य (?) महेन्द्रा अप्यागत्य क्रीडामनुभवन्तीति गाथार्थः ॥ ११ ॥

से पवए सद्दमहप्पगासे, विरायए कंचणमट्ठवन्ने ।
अणुत्तरे गिरीसु य पव्वदुग्गे, गिरीवरे से जलिए व भोमे ॥ १२ ॥

व्याख्या—पुनः स मेरुः कीदृशः ? मन्दरो मेरुः सुदर्शनः सुरगिरिरित्यादिशब्दैः—र्नामभिर्महाप्रकाशः—महाप्रसिद्धिं प्राप्तो विराजते । तथा काञ्चनमृष्टवर्णः—(शुद्ध) काञ्चनवर्ण इत्यर्थः । अनुत्तरो गिरिषु—सर्वगिरिषु प्रधानः । 'पव्वदुग्गे' पर्वभि–र्मेखलादिभिर्दुर्गो–विषमः, सामान्यजन्तूनां दुरारोहो 'गिरिवरः' पर्वतपतलिका, मणिभिरौषधिभिश्च ज्वलितो–देदीप्यमानतया 'भौम इव' भूदेश इव ज्वलितः "जहा से णगाण पवरे, सुमहं मंदरे गिरी । णाणोसहिपज्जलिए" इति वचनात् सर्वगिरिषु प्रधानभूत इति गाथार्थः ॥ १२ ॥

महीइ मज्झंमि ठिते णगिंदे, पन्नायते सूरियसुद्धलेसे ।
एवं सिरिए उ स भूरिवन्ने, मणोरमे जोयइ अच्चिमाली ॥ १३ ॥

---

१ यथा स नगेषु प्रवरः सुमहान्मन्दरो गिरिः । नानौषधिप्रज्वलितः ।

व्याख्या—मेरुः-रत्नप्रभापृथिव्या मध्यदेशे जम्बूद्वीपस्य बहुमध्यदेशभागे स्थितः। समभूभागे दशसहस्रयोजन-विस्तीर्णः शिरसि सहस्रमेकं अधस्ताद्दशसहस्राणि नवति योजनानि योजनैकादशभागैर्दशभिरधिकानि विस्तीर्णः चत्वारिंशद्योजनोच्छ्रितचूलिकोपशोभितो 'नगेन्द्रः' पर्वतप्रधानो मेरुः प्रकर्षेण ज्ञायते। 'सूरियसुद्धलेसे' आदित्यसमतेजाः, एवं श्रिया 'तु'शब्दाद्विशिष्टतरया 'स' मेरुर्भूरिवर्णः-अनेकवर्णरत्नोपशोभितत्वात्। तथा मनोरमः, रमणीयत्वात् अर्चिमालीवा-ऽऽदित्य इव स्वतेजसा दशाऽपि दिशः प्रकाशयतीति गाथार्थः ॥ १३ ॥ अथ मेरूपमानं भगवति योजयति—

सुदंसणस्सेव जसो गिरिस्स, पवुच्चई महतो पव्वयस्स।
एओवमे समणे नायपुत्ते, जातीजसोदंसणनाणसीले ॥ १४ ॥

व्याख्या—एतद्यशःकीर्तनं सुदर्शनस्य (गिरेः)-मेरोर्महापर्वतस्योच्यते। अथ भगवति तदुपमा योज्यते-'एओवमे' एतदुपमः श्रमणो ज्ञातपुत्रः मेरूपम इत्यर्थः। जात्या यशसा ज्ञानेन दर्शनेन शीलेन च सर्वजगत्सामान्यमनुष्येभ्यः प्रधानत्वात् श्रेष्ठः, नाऽर्हद्रूप्यः (श्रेष्ठोऽन्योऽस्ति भूतले), अर्हन्तस्तु सर्वेऽपि सदृशा एव, अनन्तगुणाधारत्वादिति। यथा मेरुः सर्वगिरिषु श्रेष्ठस्तथा भगवानपि सर्वजगच्छ्रेष्ठ इति गाथार्थः ॥ १४ ॥

गिरीवरे वा निसहाऽऽययाणं, रुयए व सिट्ठे वलयायताणं।
तओवमे से जगभूतिपन्ने, मुणीण मज्झे तमुदाहु पन्ने ॥ १५ ॥

व्याख्या—यथा निषधाख्यो गिरिवरः सर्वगिरीणामायतानां मध्ये दैर्घ्येण श्रेष्ठः, तथा वलयायतानां मध्ये रुचको गिरिर्यथा प्रधानः, स हि रुचको मानुषोत्तरपर्वत इव वलयाकारेण व्यवस्थितोऽस्ति रुचकद्वीपे त्रयोदशमे, तथा भगवानपि तदुपमः । यथा निषधो दैर्घ्येण प्रधानः, रुचको वलयाऽऽकारत्वेन सर्वगिरिषु श्रेष्ठः, तथाऽसौ मुनीनां मध्ये प्रज्ञया–ज्ञानेन श्रेष्ठः, एवं तत्स्वरूपविद उदाहु–उदाहृतवन्तः–उक्तवन्त इति गाथार्थः ॥ १५ ॥

अणुत्तरं धम्ममुईरइत्ता, अणुत्तरं झाणवरं झियाइ ।
सुसुक्कसुक्कं अपगंडसुक्कं, संखिंदुवेगंतऽवदातसुक्कं ॥ १६ ॥

व्याख्या—स हि भगवान् अनुत्तरं–सर्वोत्कृष्टं धर्मं उदीरयित्वा–प्रकाश्यानुत्तरं ध्यानवरं ध्यायति । तथाहि–केवलज्ञानोत्पत्तेरनन्तरं सर्वोत्तमं धर्मं प्ररूपयामास भगवाँस्तदनु योगनिरोधकाले सूक्ष्मं काययोगं निरुन्धन् शुक्लध्यानस्य तृतीयं भेदं सूक्ष्मक्रियमप्रतिपात्याख्यं ध्यायति, तदनु निरुद्धयोगश्चतुर्थं शुक्लध्यानभेदं व्युपरतक्रियमनिवृत्त्याख्यं ध्यायति । तत्कथम्भूतं ? सुष्ठु–शुक्लवत्–शुक्लम् 'अपगण्डं' निर्दोषाऽर्जुनसुवर्णवत् शुक्लं देदीप्यमानं, यदिवा [अप]गण्ड–उदक–फेनं, तत्तुल्यं, तथा शङ्खेन्दुवदेकान्तावदातं शुक्लध्यानोत्तरभेदद्वयं ध्यायतीति गाथार्थः ॥ १६ ॥ अपिच—

अणुत्तरग्गं परमं महेसी, असेसकम्मं सुविसोहइत्ता ।
सिद्धिं गते साइमणंतपत्ते, नाणेण सीलेण य दंसणेणं ॥ १७ ॥

व्याख्या—स भगवान् शैलेश्यवस्थायां *शुक्लध्यानचतुर्थभेदाऽनन्तरं साद्यपर्यवसानां सिद्धिगतिं प्राप्तः । कथम्भूतां सिद्धिगतिं ? अनुत्तराख्यां, अनुत्तरा सर्वोत्तमा, अग्रया च लोकाग्रव्यवस्थिता । एवंविधां 'परमां' प्रधानां, महर्षिरेषः कर्म विशोध्य—अपनीय विशिष्टेन ज्ञानेन दर्शनेन शीलेन च सिद्धिगतिं सम्प्राप्त इति गाथार्थः ॥१७॥ पुनर्भगवतः स्तुतिमाह—

रुक्खेसु णाए जह सामली वा, जंसी रतिं वेययंती सुवन्ना ।
वणेसु वा णंदणमाहु सेट्ठं, नाणेण सीलेण य भूतिपण्णे ॥ १८ ॥

व्याख्या—वृक्षेषु यथा देवकुरुव्यवस्थितः शाल्मलीवृक्षो ज्ञातः—प्रसिद्धिं प्राप्तः । यत्र सुपर्णकुमाराः—भवनपतिदेवविशेषाः अन्यतोऽप्यागत्य क्रीडारतिं वेदयन्ति, क्रीडां कुर्वन्तीत्यर्थः । वनेषु मध्ये यथा नन्दनं वनं 'श्रेष्ठं' प्रधानं, तदपि देवानां क्रीडास्थानं । तथा ज्ञानेन केवलाख्येन शीलेन—चारित्रेण यथाख्यातेन 'श्रेष्ठः' प्रधानः, भूतिप्रज्ञः—प्रवृद्धज्ञानो भगवानपि 'श्रेष्ठः' प्रधानो महान् श्रेष्ठ इति गाथार्थः ॥ १८ ॥

थणियं व सद्दाण अणुत्तरे उ, चंदो व ताराण महाणुभावे ।
गंधेसु वा चंदणमाहु सेट्ठं, एवं मुणीणं अपडिन्नमाहु ॥ १९ ॥

---

* शुक्लध्यानश्चतुर्धा—पुहुत्तवियक्के सवियारी १, एगत्तवियक्कअवियारी २, सुहुमकिरियाअपडिवाई ३, समुच्छिन्नकिरिय अनियट्टी ४, तृतीयभेदे केवलज्ञानोत्पत्तिः, अप्रतिपतनस्वभावत्वात् ।

व्याख्या—यथा 'स्तनितं' मेघगर्जितं शब्दानां मध्ये अनुत्तरं-श्रेष्ठं, चन्द्रो यथा तारकाणां मध्ये 'महानुभावो' महीयान्। 'गन्धेषु' गन्धवत्सु पदार्थेषु यथा चन्दनं गोशीर्षाख्यं श्रेष्ठमाहुस्तथा महर्षीणां मध्ये भगवन्तं श्रेष्ठमाहुः। 'अप्रतिज्ञं' आशंसारहितमिति गाथार्थः ॥ १९ ॥

जहा सयंभू उदहीण सेट्ठे, नागेसु वा धरणिंदमाहु सेट्ठे।
खोओदए वा रसवेजयंते, तवोवहाणे मुणिवेजयंते ॥ २० ॥

व्याख्या—यथा समस्तसमुद्राणां मध्ये स्वयम्भूरमणाख्यः समुद्रः श्रेष्ठः, यथा नागदेवतानां मध्ये 'धरणो' नागराजा श्रेष्ठः, यथा सर्वरसेषु इक्षुरसः× 'वैजयन्तः' प्रधानः, (एवं) तपउपधानेन-विशिष्ट तपोविशेषेण मुनिर्भगवान् वैजयन्तः-प्रधान इति गाथार्थः ॥ २० ॥

हत्थीसु एरावणमाहु णाए, सीहो मियाणं सलिलाण गंगा।
पक्खीसु वा गरुले वेणुदेवे, निव्वाणवादीणिह णायपुत्ते ॥ २१ ॥

व्याख्या—यथा हस्तीषु ऐरावणो महान् ज्ञातः [प्राहुस्तज्ज्ञाः], यथा मृगाणां मध्ये 'सिंहः' केसरी श्वापदजाति-मध्ये प्रधानः, सलिलानां यथा 'गंगासलिलं' गंगोदकं प्रधानभावमनुभवति। पक्षिषु मध्ये यथा गरुत्मान् वेणुदेवापरनामा

× "इक्षुरस इव मधुरं यस्य स इक्षुरसोदकः समुद्रो यथा रसमाश्रित्य" हर्ष०।

प्राधान्येन व्यपदिश्यते । तथा निर्वाणवादिनां मध्ये भगवान् ज्ञातपुत्रः, यथाऽवस्थितनिर्वाणार्थवादित्वादिति गाथार्थः ॥ २१ ॥

जोहेसु णाए जह वीससेणे, पुप्फेसु वा जह अरविंदमाहु ।
खत्तीण सेट्ठे जह दंतवक्के, इसीण सेट्ठे तह वद्धमाणे ॥ २२ ॥

व्याख्या—यथा ' योधेषु ' सुभटेषु मध्ये ' विश्वसेनः ' चक्रवर्ती प्रधानभूतः, यथा पुष्पेष्वरविन्दं प्रधानमाहुः । क्षत्रियाणां मध्ये दान्तवाक्य–चक्रवर्ती, यस्य वचनेन शत्रवो 'दान्ता' उपशान्ता इति भावः । सर्वक्षत्रियेषु चक्रवर्ती श्रेष्ठः, तथा ऋषीणां मध्ये श्रीवर्द्धमानस्वामी श्रेष्ठ इति गाथार्थः ॥ २२ ॥

दाणाण सेट्ठं अभयप्पयाणं, सच्चेसु वा अणवज्जं वयंति ।
तवेसु वा उत्तमबंभचेरं, लोउत्तमे समणे नायपुत्ते ॥ २३ ॥

व्याख्या—यथा दानानां चतुर्विधानामपि मध्ये अभयदानं श्रेष्ठं, " दाणाणमभयदाणं " मिति वचनात् । यतः " दीयते म्रियमाणस्य, कोटिं जीवितमेव वा । धनकोटिं न गृह्णीयात्, सर्वो जीवितुमिच्छति ॥ १ ॥" यथा सत्येषु वाक्येषु यद्‘नवद्यं ' अपापं–परपीडानुत्पादकं वाक्यं श्रेष्ठं, तपस्सु मध्ये यथोत्तमं ब्रह्मचर्यं प्रधानं भवति । तथा लोकेषूत्तमः श्रमणो ज्ञातपुत्र इति गाथार्थः ॥ २३ ॥

ठितीण सेट्ठा लवसत्तमा वा, सभा सुहम्मा व सभाण सेट्ठा ।

निव्वाणसेट्ठा जह सव्वधम्मा, ण णायपुत्ता परमत्थि नाणी ॥ २४ ॥

व्याख्या—यथा स्थितिमतां देवानां मध्ये लवसत्तमाः—पञ्चानुत्तरविमानवासिनो देवाः सर्वोत्कृष्टस्थितिवर्तिनः। सभानां मध्ये सुधर्मा पर्षत् श्रेष्ठा, यथा सर्वेऽपि धर्मा निर्वाणश्रेष्ठाः—मोक्षप्रधाना भवन्ति। एवं ज्ञातपुत्र—वर्द्धमानस्वामिनः सकाशात् परं प्रधानमन्यद्विज्ञानं नास्ति। सर्वथैव हि भगवान् अपरज्ञानिभ्योऽधिकज्ञानी भवतीति गाथार्थः ॥ २४ ॥

पुढोवमे धुणाति विगयगेही, ण सन्निहिं कुव्वति आसुपन्ने।

तरित्तु समुद्दं व महाभवोघं, अभयंकरे वीरियअणंतचक्खू ॥ २५ ॥

व्याख्या—यथा पृथ्वी सर्वपदार्थानामाधारभूता, तथा भगवानपि सर्वसत्त्वानामभयप्रदानेन धर्मोपदेशदानेन च सत्त्वाधार इति। यदि वा (यथा) पृथिवी सर्वंसहा तथा भगवानपि "सव्वं सहे परिसहे" इति वचनात् सर्वंसहः। तथा धुनाति कर्मेति शेषः। विगतगृद्धिः, गार्ध्य—आहाराद्यभिलाषः, स यस्माद्विगतः, न सन्निधिं करोति भगवान्। तथा 'आशुप्रज्ञः' सर्वत्र सदोपयोगवान् केवली, न छद्मस्थ इत्यर्थः। एवंविधो महासमुद्रवद्भवौघं तीर्त्वा निर्वाणमासादितवान्, अभयंकरो वीरः, सर्वपरीषहोपसर्गसहिष्णुत्वात्, अनन्तचक्षुः—केवलज्ञानवानिति गाथार्थः ॥ २५ ॥

कोहं च माणं च तहेव मायं, लोभं चउत्थं अज्झत्थदोसा।

एयाणि वंता अरहा महेसी, ण कुव्वई पाव ण कारवेई ॥ २६ ॥

व्याख्या—क्रोधाद्याश्चत्वारोऽप्याध्यात्मदोषाः—संसारहेतवः। एवं चत्वारोऽपि परित्यज्य भगवान् अर्हन् जातः, तथा महर्षिः स्वयं पापं न करोति न कारयत्यन्यैरिति गाथार्थः ॥ २६ ॥

किरियाकिरियं वेणइयाणुवायं, अण्णाणियाणं पडियच्च ठाणं।
से सव्वभावं इती वेयइत्ता, उवट्ठिए संजमदीहरायं ॥ २७ ॥

व्याख्या—क्रियावादिनामक्रियावादिनामज्ञानवादिनां वैनयिकवादिनां च स्थानं—दर्शनस्वरूपं दुर्गतिपातहेतु ज्ञात्वा अपरानपि सर्वान् यथाऽवस्थिततत्त्वोपदेशेन वेदयित्वा—परिज्ञाप्योपस्थितः—सम्यगुत्थानेन संयमे व्यवस्थितः, स भगवान् 'दीर्घरात्रं' यावज्जीवमिति गाथार्थः ॥ २७ ॥

से वारिया इत्थि सराइभत्तं, उवहाणवं दुक्खखयट्ठयाए।
लोगं विदित्ता आरं पारं च, सव्वं पभू वारिय सव्ववारं ॥ २८ ॥

व्याख्या—स भगवान् स्त्रियं तथा रात्रिभोजनं—उपलक्षणार्थत्वादन्यानप्याश्रवान् 'वारयित्वा' प्रतिषिध्य 'उपधानवान्' विशिष्टतपसा निष्टप्तदेहोऽजनि, को भावः? सर्वपापस्थानपरित्यागं विधाय घोरतपोभिः स्वदेहशोषमकरोत्। किमर्थं देहशोषकोऽजनि? दुःखक्षयार्थं। किं कृत्वा? लोकं विदित्वा 'आरं' इहलोकं 'पारं' परलोकं। यदि वा 'आरं' मनुष्यलोकं 'पारं' नारकादिकं, स्वरूपतः तत्प्राप्तिकारणं च सम्यग् ज्ञात्वा बहुशो निवारितवान्। सर्वपापस्थानक-

निर्वाणं कृतवानिति गाथार्थः ॥ २८ ॥

साम्प्रतं सुधर्मस्वामी तीर्थंकरगुणानाख्याय स्वशिष्यानाह—

सोच्चा य धम्मं अरिहंतभासियं, समाहियं अट्ठपओवसुद्धं ।
तं सद्दहाणा य जणा अणाऊ, इंदा व देवाहिव आगमिस्संति त्ति बेमि ॥ २९ ॥

व्याख्या—अर्हद्भिर्भाषितं धर्मं श्रुत्वा, अर्थपदविशुद्धं-सयुक्तिकं सहेतुकं, तमेवम्भूतमर्हद्भाषितं धर्मं श्रद्दधानास्तथा समनुतिष्ठन्तो 'जना' लोकाः 'अनायुषः' आयुष्कर्मरहिताः सिद्धा भवन्ति, अथवा इन्द्रादिपदवीं लभन्त इति गाथार्थः ॥२९॥

इतिः परिसमाप्तौ । ब्रवीमीति पूर्ववत् ।

इति श्रीपरमसुविहितखरतरगच्छविभूषणश्रीमत्साधुरङ्गगणिवरसन्दृब्धायां श्रीसूत्रकृताङ्गदीपिकायां
वीरस्तुत्याख्यं षष्ठमध्ययनं समाप्तम् ।

अथ सप्तमं कुशीलपरिभाषाध्ययनम् ।

समाप्तं षष्ठमध्ययनं साम्प्रतं सप्तममारभ्यते कुशीलपरिभाषाख्यं । तत्र भगवद्गुणोत्कीर्तनकारिणः सुशीलास्तद्विपरीताः कुशीलाः परतीर्थिकाः स्वयूथ्या वा, ते कीदृशाः ? तत्स्वरूपप्ररूपिका चेयं प्रथमगाथा—

पुढवी य आऊ अगणी य वाऊ, तणरुक्खबीया य तसा य पाणा ।
जे अंडया जे य जराउपाणा, संसेयया जे रसयाभिहाणा ॥ १ ॥

व्याख्या—पृथिव्यप्तेजोवायुकायाः सूक्ष्मबादरपर्याप्तापर्याप्तभेदेन द्रष्टव्याः । वनस्पतिकायिकाश्च तृणवृक्षबीजादिभेदाद् द्वादश भवन्ति । "रुक्खा गुच्छा गुम्मा, लया य वल्ली य पव्वगा चेव । तणवलयहरियओसहि—जलरुहकुहणा य बोधव्वा ॥ १ ॥" इति वनस्पतिभेदाः । तथा त्रसाः द्वीन्द्रियादयः प्राणास्तेऽपि भेदेन दर्शयति + 'अण्डजाः' पक्षिणः

+ अण्डजाः—पक्षिगृध्रकोकिलादयः १, पोतादिव जायन्ते पोतजा—हस्तिवल्गुलीचर्मचटीजलूकादयः । तत्र 'जरायुरहितो गर्भः पोतः' दशवै० अवचूरौ २, जरायुवेष्टिता जायन्ते इति जरायुजा—गोमहिष्यजाऽविकमनुष्यादयः ३, रसजा—आरनालदधिक्षीरमलादिषु कृमयः ४, संस्वेदाज्जाता इति संस्वेदजा—मत्कुणयूकादयः ५, सम्मूर्च्छजाः—शलभपिपीलिकादयः ६, उद्भिज्जाः—पतङ्गखञ्जरीटादयः ७, उपपातो—देवशयनं, तत्र भवा देवनारकाः ८ । टिप्पनकमेतदन्यमन्यान्तरादुद्धृतं केनापि [illegible] ।

उद्भिदाश्च, अण्डजाः—चाषो मयूराद्याश्च संस्वेदजाः—यूकामत्कुणादयः, रसजाः—दधिसौवीरादिसमुद्भवाः, इत्यादिभेदभिन्नं जीवसङ्घातं प्रदर्श्याऽधुना तदुपघातदोषं दर्शयतीति गाथार्थः ॥ १ ॥

एयाइं कायाइं पवेदिताइं, एतेसु जाणे पडिलेह सायं ।

एतेण काएण य आयदंडे, एतेसु या विप्परियासुवेंति ॥ २ ॥

व्याख्या—एते षडपि पृथिव्यादयः काया भगवद्भिः प्रवेदिताः, एतेषु सातं—सुखं जानीहि । एते सर्वेऽपि जीवाः सुखैषिणो दुःखद्विषश्च, इति 'शास्त्रा' अभ्युपेक्ष्य स्वकुशाग्रीयधिया पर्यालोचय, यथा—एतैः पीड्यमानैरात्मा दण्ड्यते—निःसारीक्रियते, आत्मदण्डो जायते । एतान् कायान् यो दीर्घकालं दण्डयति—पीडयति, स (इह) एतेष्वेव परिभ्रमन्नादाशु दीर्घं 'उवेंति' याति । य एतान् पीडयिष्यति स एतेष्वेव भूयो भूयः समुत्पत्स्यते । यदि वा 'विपर्यासो' व्यत्ययः, सुखार्थिभिः पीड्यन्ते परं दुःखमेव जायते, न सुखं, अयं विपर्यासः, अथवा मोक्षार्थिभिः कायसमारम्भः क्रियते × परं संसारवृद्धिरेव, न मुक्तिरिति गाथार्थः ॥ २ ॥

जातीपहं अणुपरियट्टमाणे, तसथावरेहिं विणिघायमेति ।

---

* "ये च जरायुजा—अम्बावेष्टिताः समुत्पद्यन्ते, ते च गोमहिष्यजाऽविकमनुष्यादयः" इति बृहद्वृत्तौ । × प्राण्युपघातादिकं करोति ।

से जातिजातिं बहुकूरकम्मे, जं कुव्वती मिज्जति तेण बाले ॥ ३ ॥

व्याख्या—'जातिपथः' एकेन्द्रियादिपञ्चेन्द्रियपर्यन्तः, तस्मिन् परिवर्तमानः-एकेन्द्रियादिषु पर्यटन्त्रसेषु वा स्थावरेषु समुत्पन्नः सन् कायदण्डविपाकजेन कर्मणा बहुशो विनिघातमेति-विनाशमाप्नोति। स बहुक्रूरकर्मा जातौ जातौ उत्पत्तिं लब्ध्वा पुनस्तदेव क्रूरं कर्म करोति येन तेनैव कर्मणा '[मीयते-]'म्रियते पूर्यते, यादृशं कर्म करोति तादृशमेव पुर उदयमायाति। यदेवोप्यते तदेव लूयते, शुभे कर्मणि कृते शुभं कर्म उदेति, अशुभे त्वशुभमिति। तेनैव कर्मणा म्रियते बालो निर्विवेक इति गाथार्थः ॥ ३ ॥

अस्सिं च लोए अदुवा परत्था, सयग्गसो वा तह अन्नहा वा।

संसारमावन्नपरंपरं ते, बंधंति वेदेंति य दुन्नियाणि ॥ ४ ॥

व्याख्या—यान्यशुभकारीणि कर्माणि तान्यस्मिन्नेव जन्मनि विपाकं ददति परस्मिन् जन्मनि नरकादौ वा। एकस्मिन्नेव जन्मन्येकवारं तीव्रं विपाकं यच्छन्ति, शतशो वा, येनैव प्रकारेण त(य)दशुभमाचरन्ति तथैवोदयमायाति। यतः—"वह-बंधणअब्भक्खाणा-दाणपरधणविलोयणाईणि। सव्वजहन्नो उदओ, दसगुणिओ इक्कसि कयाणं ॥ १ ॥"

१ वधबन्धनाभ्याख्यानादानपरधनविलोपनादीनि। सर्वजघन्य उदयो दशगुणितः एकशः कृतानाम् ॥ १ ॥
तीव्रतरे च प्रद्वेषे, शतगुणितः शतसहस्रकोटिगुणितः। कोटाकोटिगुणितो वा भवेद्विपाको बहुतरो वा ॥ २ ॥

" तित्थयरे य पओसे, सयगुणिओ सयसहस्सकोडिगुणो। कोडाकोडिगुणो वा, हुज्ज विवागो बहुतरो वा ॥ २ ॥" यथा कृतं तथैव [सकृत्]अनेकशो वा तस्मिन्नेव भवे जन्मान्तरे वा विपाकं ददाति। एकशोऽनेकशो वा हस्तपादशिरश्छेदादिकं वा लभन्ते। एवं बहुक्रूरकर्माणः कुशीलाः अरहट्टघटीयन्त्रन्यायेन संसारं भ्रमन्तः 'परं' प्रकृष्टं दुःखमनुभवन्ति। दुष्टं नीतानि दुर्नीतानि–दुष्कृतानि कर्माणि उदयमायान्त्येवेति गाथार्थः ॥ ४ ॥

जे मायरं वा पियरं च हिच्चा, समणव्वते अगणिं समारभेज्जा।
अहाहु से लोए कुसीलधम्मे, भूताइं जो हिंसति आयसाते ॥ ५ ॥

व्याख्या—ये केचन धर्मार्थितया मातरं पितरं पुत्रभार्यास्वजनादिवर्गं 'हित्वा' त्यक्त्वा श्रमणव्रते वयं समुत्थिताः–वयं श्रमणा इति मत्वा अग्निकायं समारभन्ते, पचनपाचनादिप्रकारेण कृतकारितानुमत्या अग्न्यारम्भं ये कुर्वन्ति, तीर्थङ्करगणधरादय एवमाहुः, कुशीलधर्मा सोऽयं पाषण्डिकलोको गृहस्थलोको वा, य आत्मसुखार्थं भूतानि 'हिनस्ति' व्यापादयति स कुशीलधर्मा। तीर्थकरगणधरा एवमाहुरुक्तवन्त इति गाथार्थः ॥ ५ ॥

अग्निकायसमारम्भे यथा प्राणातिपातः स्यात्तथा दर्शयति—

उज्जालओ पाणतिवातएज्जा, निव्वावओ अगणिनिवायएज्जा।
तम्हा उ मेहावि समिक्ख धम्मं, ण पंडिए अगणि समारभेज्जा ॥ ६ ॥

व्याख्या—योऽग्निकायं समारभते, सोऽग्निकायमन्यांश्च त्रसस्थावरान् पृथिव्या[द्या]श्रितान् अतिपातयेत् । तथाऽग्निकायमुदकादिना 'निर्वापयन्' विध्यापयंस्तदाऽऽश्रितानन्यांश्च प्राणिनोऽतिपातयेत् । एवमुभयथाऽपि प्राणाऽतिपात इति, यस्मादेवं तस्मात् पण्डितो-विवेकी 'समीक्ष्य' स्वबुद्ध्या पर्यालोच्य नाऽग्निकायं समारभते । पण्डितोऽपि स एव, योऽग्निकायं न समारभते इति गाथार्थः ॥ ६ ॥ अग्निसमारम्भे कथमपरप्राणिवधः स्यात्, इत्याशङ्क्याह—

पुढवी वि जीवा आऊ वि जीवा, पाणा य संपाइम संपयंति ।
संसेयया कट्ठसमस्सिया य, एते दहे अगणिसमारभंते ॥ ७ ॥

व्याख्या—पृथिवीजीवा आपोजीवास्तथा सम्पातिमाः शलभादयः [तत्राग्नौ] सम्पतन्ति, तथा संस्वेदजाः करीषादीन्धनेषु घुणपिपीलिकाकृम्यादयः काष्ठाद्याश्रिताश्च ये केचन । 'एतान्' स्थावरजङ्गमान् प्राणिनः स दहेत् योऽग्निकायं समारभते । अतोऽग्निसमारम्भो महादोषाय । यतः श्रीउत्तराध्ययने ३५तमेऽध्ययने—

"तहेवं भत्तपाणेसु, पयणे पयावणेसु य । पाणभूयदयट्ठाए, लज्जा भिक्खू न पए न पयावए ॥ १ ॥"

१ तथैव भक्तपानेषु पचने पाचनेषु च । प्राणिभूतदयार्थं तस्माद्भिक्षुर्न पचेन्न पाचयेत् ॥ १ ॥ जलधान्यनिश्रिता जीवाः पृथ्वीकाष्ठनिश्रिताः । हन्यन्ते भक्तपानेषु तस्माद्भिक्षुर्न (पचेत) पाचयेत् ॥ २ ॥ विसर्पत्सर्वतो धारं बहुप्राणिविनाशनं । नास्ति ज्योतिस्समं शस्त्रं तस्माज्ज्योतिर्न दीपयेत् ॥ ३ ॥

" जलधन्ननिस्सिया जीवा, पुढवीकट्ठनिस्सिया । हम्मंति भत्तपाणेसु, तम्हा भिक्खू न पयावए ॥ २ ॥ "
" विसप्पे सव्वओ धारे, बहुपाणविणासणे । नत्थि जोइसमे सत्थे, तम्हा जोइं न दीवए ॥ ३ ॥ "

तथा दशवैकालिकेऽपि—

जायतेयं न इच्छंति, पावगं जलइत्तए । तिक्खमन्नयरं सत्थं, सव्वओ वि दुरासयं ॥ १ ॥
पाईणं पडिणं वा वि, उड्ढं अणुदिसामवि । अहे दाहिणओ वा वि, दहे उत्तरओ वि य ॥ २ ॥
भूयाणं एसमाघाओ, हव्ववाहो न संसओ । तं पईवपयावट्ठा, संजया किंचि नारभे ॥ ३ ॥
तम्हा एयं वियाणित्ता, दोसं दुग्गइवड्ढणं । अगणिकायसमारंभं, जावजीवाइ वज्जए ॥ ४ ॥ "

इत्यादि मत्वा नाग्निकायसमारम्भं कुर्यादिति गाथार्थः ॥ ७ ॥

हरियाणि भूताणि विलंबगाणि, आहारदेहा य पुढो सियाइं ।
जे छिंदती आयसुहं पडुच्च, पागब्भि पाणे बहुणंऽतिपाती ॥ ८ ॥

१–जातवेदसं नेच्छन्ति पावकं ज्वलयितुम् । तीक्ष्णमन्यतरच्छस्त्रं सर्वतोऽपि दुराश्रयम् ॥ १ ॥ प्राच्यां प्रतीच्यां वाऽपि ऊर्ध्वमनुदिशमपि । अधोदक्षिणतश्चापि दहेदुत्तरतोऽपि च ॥२॥ भूतानामेष आघातो हव्यवाहो न संशयः । तं (हव्यवाहं) प्रदीपार्थं प्रतापार्थं वा संयतः किञ्चिन्नारभेत ॥ ३ ॥ तस्मादेवं विज्ञाय दोषं दुर्गतिवर्धनम् । अग्निकायसमारम्भं, यावज्जीवं वर्जयेत् ॥ ४ ॥

व्याख्या—'हरितानि' दूर्वाङ्कुरादीनि, तान्यपि 'भूतानि' जीवाः, कथं ? आहारादेव वृद्धिदर्शनात्। तद्विना च म्लायन्ति, अत एव जीवाकारं 'विलम्बयन्ति' धारयन्ति। यथा मनुष्यः कललार्बुदमांसपेशीगर्भप्रसवबालकुमारतरुणस्थविरावस्थां धारयति, तथा वनस्पतिरपि अङ्कुर-मूल-स्कन्ध-पत्र-शाखादिविशेषैः परिवर्द्धमानाः युवानः पोता इत्युपदिश्यन्ते [illegible] संवर्द्धन्ते, परिपक्वानि जीर्णानि, परिशुष्काणि मृतानि। एवं हरितादीन्यपि जीवाकारं धारयन्ति। तत एतानि मूल-स्कन्ध-शाखा-पत्र-पुष्पादिषु पृथक् प्रत्येकजीवानि, न तु मूलादिषु सर्वेष्वप्येक एव जीवः। एतानि च भूतानि आत्मसुखार्थी यो छिनत्ति स प्रागल्भ्यात्-धार्ष्ट्यात् बहूनां प्राणिनामतिपाती, तदतिपाताच्च निरनुक्रोशतया न धर्मो नाऽप्याऽऽत्मसुखमिति गाथाऽर्थः॥ ८॥ किञ्च—

जातिं च वुड्ढिं च विणासयंते, बीयाइ अस्संजय आयदंडे।
अहाहु से लोए अणज्जधम्मे, बीयाइं जे हिंसति आतसाते॥ ९॥

व्याख्या—हरितकायानां जातिमुत्पत्तिं वृद्धिं च विनाशयन् 'असंयतो' गृहस्थः प्रव्रजितो वा आत्मदण्डको ज्ञेयः। स हि जीवोपघातात्परमार्थतः आत्मानमेवोपहन्ति, एतमाहुरुक्तवन्तस्तीर्थकराः, यो हरितादिच्छेदकः सोऽस्मिंल्लोके अनार्यधर्मा-क्रूरकर्मकारी ज्ञेयः, धर्मोपदेशेन आत्मसुखार्थं वा वनस्पतिकायं करणकारणाऽनुमतिभेदेन समारभते, स पाखण्डिकलोकोऽन्यो वा अनार्यधर्मा भवतीति गाथाऽर्थः॥ ९॥

गब्भाइ मिज्जंति बुयाऽबुयाणा, णरा परे पंचसिहा कुमारा ।
जुवाणगा मज्झिमथेरगा य, चयंति ते आउखए पलीणा ॥ १० ॥

व्याख्या—इह वनस्पतिकायोपमर्दकाः बहुषु जन्मसु गर्भादिकास्ववस्थासु कललार्बुदमांसपेशीरूपासु म्रियन्ते । ब्रुवन्तोऽब्रुवन्तो—व्यक्तवाचोऽव्यक्तवाचस्तथा पञ्चशिखाः कुमाराः युवानो मध्यमवयसः 'स्थविराश्च' अत्यन्तवृद्धाः सन्तः सर्वास्वप्यवस्थासु बीजादीनां ध्वंसकाः स्वायुषः क्षये देहं त्यजन्ति प्रलीनाः सन्तः, एवं न केवलं वनस्पतिकायोपमर्दकाः, सर्वस्थावरजङ्गमोपमर्दकारिणोऽप्यनियतायुष एव, यावद्गृहकार्यचिन्ताभारोद्वहनक्षमा जातास्तावता अपूर्णमनोरथा एव स्वपरिवारस्य दुःखं दत्वा उत्थाय परलोकं प्रयान्तीति गाथार्थः ॥ १० ॥ किञ्च—

संबुज्झह जंतवो ! माणुसत्तं, दट्ठुं भयं बालिसेणं अलंभो ।
एगंतदुक्खे जरिए व लोए, सकम्मुणा विप्परियासुवेति ॥ ११ ॥

व्याख्या—हे जन्तवः ! सम्बुध्यध्वं, नहि कुशीललोकत्राणाय भवति, धर्मं च सुदुर्लभं जानन्तु । अकृतधर्माणां च मानुषत्वमतिदुर्लभं । तथा सर्वगतिषु दुःखरूपासु भयं जन्मजरामरणरोगशोकादिमयं दृष्ट्वा 'बालिशेन' निर्विवेकेन सद्विवेकप्राप्तिर्दुर्लभा इत्येतदपि बुध्यध्वम् । एकान्तदुःखोऽयं ज्वरित इव लोकः । ईदृक्स्वरूपे लोके अनार्यकर्मकारी कर्मणा विपर्यासमुपैति । आत्मसुखार्थी जीवघातादि कुरुते, तद्विपर्यासं सुखार्थी दुःखमेव लभते । प्राणिनां दुःखोत्पादनेन दुःखं प्राप्नोति ।

मोक्षार्थी संसारं पर्यटतीति गाथार्थः ॥ ११ ॥

उक्तः कुशीलविपाकोऽधुना तद्दर्शनान्यभिधीयते—

> इहेगमूढा पवयंति मोक्खं, आहारसंपज्जणवज्जणेणं ।
> एगे य सीओदगसेवणेणं, हुएण एगे पवयंति मोक्खं ॥ १२ ॥

व्याख्या—इह मोक्षगमनाधिकारे, एके 'मूढा' अज्ञानिन एवं प्रवदन्ति—आहार'संपज्जनकं' लवणं, तद्वर्जनेन मोक्षावाप्तिः, + येन सर्वरससारभूतं लवणं "लवणेन विहूणा रसवइ व्व"[1] इति वचनात्। पाठान्तरेण—आहारओ पंचक-वज्जणेण" आहारमाश्रित्य पञ्चकं वर्जयन्ति। तथाहि—लशुनं १ पलाण्डुः २ करभीक्षीरं ३ गोमांसं ४ मद्यं ५ चेत्येतत्पञ्चक-वर्जनेन मोक्षं प्रवदन्त्येके। तथा एके—शीतोदकपरिभोगेन मोक्षं प्रवदन्ति, तथा च तद्युक्तिः—यथा च शीतोदकेन बाह्यमल-मपयाति वस्त्रादेव यथोदकात् शुद्धिः—शरीरशुद्धिः। एवं बाह्यशुद्धिर्यथोदकादुपजायते तथाऽऽन्तरशुद्धिरप्युदकाज्जायते, एके एवं मन्यन्ते। तथाऽपरे तापसब्राह्मणादयो हुतेन मोक्षं वदन्ति। ये स्वर्गादिफलमनाशंस्य घृताहुतिभिरग्निं तर्पयन्ति तदा मोक्षावाप्तिः। अन्ये त्वभ्युदयनिमित्तमग्निं तर्पयन्ति तेषामैहिकं फलं। तथा च ते युक्तिमुदीरयन्ति, यथा सुवर्णादीनां

+ यथा सर्वरसानां सारभूतं लवणं, लवणपरित्यागे सर्वरसपरित्यागः, सर्वरसपरित्यागे मोक्षः, एवमेके वदन्ति अज्ञानिनः इति टिप्पनं हाकालीयप्रतौ। १ लवणविहीना रसवती इव।

मलं अग्नितापादुपयाति, एवमात्मनोऽप्यान्तरं पापं अग्नितर्पणात्प्रयाति ॥ १२ ॥

अथैतेषां प्रवादिनामसम्बद्धप्रलापिनामुत्तरदानायाह—

पाओ सिणाणादिसु णत्थि मोक्खो, खारस्स लोणस्स अणासएणं ।
ते मज्जमंसं लसणं च भोच्चा, अन्नत्थ वासं परिकप्पयंति ॥ १३ ॥

व्याख्या—प्रातः स्नानादिषु नास्ति मोक्षः, यतो निःशीलानामनाचारचारिणां प्रातर्जलावगाहनेन कुतो मोक्षावाप्तिः ?। आदिशब्दाद्धस्तपादप्रक्षालनेऽपि न मोक्षः, यत उदकपरिभोगे तदाश्रितानां चराचराणां जीवानां घातः स्यात्, तद्घाताच्च कुतो मोक्षावाप्तिरिति ?, अथ यथा बाह्यशुद्धिरुदकेन दृष्टा तथाऽऽन्तरशुद्धिरपि भविष्यति, न चैवं, अन्तःशुद्धिर्भावशुद्ध्या स्यात्, भावशुद्धिं विनाऽपि चेदन्तरङ्गशुद्धिः प्रतिपाद्यते तदा मत्स्यबन्धादीनामपि जलाऽभिषेकेण मुक्त्यवाप्तिर्भविष्यति, न च दृष्टा । तथा लवणवर्जनेन चेन्मोक्षस्तदा लवणवर्जिते देशे लोकानां न मोक्षादन्या गतिः ? परमसम्बद्धभाषिणो यूयमिति । पुनस्ते कुतीर्थिका मद्यमांसलशुनादिकं भुक्त्वा मोक्षादन्यत्र वासं परिकल्पयन्ति, कोऽर्थः ? मद्यमांसलशुनादिभोजिनां हि संसार एव वासः, न मोक्षावाप्तिरिति गाथार्थः ॥ १३ ॥ साम्प्रतं विशेषेण परिजिहीर्षुराह—

उदएण जे सिद्धिमुदाहरंति, सायं च पायं उदगं फुसंता ।
उदगस्स फासेण सिया य सिद्धी, सिज्झिंसु पाणे बहवे दगंसि ॥ १४ ॥

व्याख्या—ये केचन अज्ञानिनः 'उदकेन' जलाऽभिषेकेण मुक्तिमुदाहरन्ति, सन्ध्यायां प्रभाते मध्याह्ने च उदकस्पर्शनात् प्राणिनां मुक्त्यवाप्तिः, इत्येवं ये उदाहरन्ति, तन्मिथ्या । यदि जलस्पर्शादेव मुक्तिरुदाह्रियते तदा जलजन्तूनां त्रसस्थावराणां सर्वदैवाम्भोऽवगाहिनां मुक्तिरेव, न संशयः, मत्स्यबन्धिनामपि मुक्तिरेव भविष्यति, न चैतत् सङ्गतं, तस्मान्मृषा भवदुक्तिः । यदपि भवद्भिरुच्यते—बाह्यमलापनयनसामर्थ्यं उदकस्य दृष्टं, तदपि विचार्यमाणं न घटते, यतो यथोदकमनिष्टं मलमपनयति, एवमभिमतमप्यङ्गरागं कुङ्कुमादिकमपनयति, तथा चोदकाऽभिषेकेण यथा पातकमपयाति तथा पुण्यमपि प्रयाति, अङ्गलग्नविलेपनादिवत्, एवं तूदकस्नानमिष्टविघातकृत्, ततो न किञ्चिदिति । अतः पुण्यविघातकारित्वाज्जलाऽभिषेकेण न मुक्तिरिति गाथाऽर्थः ॥ १४ ॥

मच्छा य कुम्मा य सिरीसिवा य, मग्गू य उट्टा दगरक्खसा य ।
अट्ठाणमेयं कुसला वयंति, उदगेण जे सिद्धिमुदाहरंति ॥ १५ ॥

व्याख्या—यद्यम्भस्संस्पर्शेण मुक्तिस्तदा मत्स्याः कूर्माः सरीसृपाः मद्गवो-जलवायसाः उष्ट्राः जलचरविशेषाः 'दगरक्खसा' जलमानुषाः, एते सर्वेऽपि जलचरजीवाः मुक्तिगामिन एव, न चैतद्दृष्टमिष्टं वा, अतश्च ये उदकेन सिद्धिमुदाहरन्ति तदस्थान-मप्रमाणमयुक्तमित्यर्थः । [अ]स्थानमेतं (?) कुशलाः निपुणाः मोक्षमार्गाऽभिज्ञाः एवं वदन्तीति गाथाऽर्थः ॥ १५ ॥

किञ्चाऽन्यत्—

उदगं जइ कम्ममलं हरिज्जा, एवं सुहं इच्छामित्तमेव ।
अंधं व णेयारमणुसरित्ता, पाणाणि चेवं विणिहंति मंदा ॥ १६ ॥

व्याख्या—यद्युदकं कर्ममलमपहरेत् एवं शुभं पुण्यमप्यपहरेत् । यदि पुण्यं नाऽपहरेत्तदा कर्ममलमपि नाऽपहरेत् । इच्छामात्रमेवैतद्यज्जलात्कर्ममलमपयाति, एतदुक्तिर्मृषैव । एवं ये पुण्याय जलस्नानमाचरन्ति ते जात्यन्धा अपरजात्यन्धमेव ' नेतारं ' मार्गदेशकमनुसृत्य उन्मार्गगामिनो भवन्ति, नाऽभिप्रेतं स्थानमवाप्नुवन्ति । एवं जलशौचवादिनो ' मन्दा ' अज्ञा जलाऽऽश्रितान् पूतरकादीन् प्राणिनो विनिघ्नन्ति । अवश्यं जलस्नाने प्राणिव्यपरोपणस्य सम्भवादिति गाथाऽर्थः ॥१६॥

अपि च—

पावाइं कम्माइं पकुव्वतो हि, सिओदगं तु जति तं हरिज्जा ।
सिज्झिंसु एगे दगसत्तघाती, मुसं वदंते जलसिद्धिमाहु ॥ १७ ॥

व्याख्या—' पापानि ' पापहेतूनि कर्माणि कुर्वतः प्राणिनो यः कर्मबन्धः स्यात् तत्कर्म यद्युदकमपहरेत्तर्हि उदकसत्त्वघातिनः—पापीयांसोऽपि सिद्ध्येयुर्न चैतद्दृष्टमिष्टं वा, तस्माद्ये जलाऽवगाहनात्सिद्धिमाहुस्ते मृषा वदन्तीति गाथाऽर्थः ॥१७॥

किञ्चान्यत्—

हुएण जे सिद्धिमुदाहरंति, सायं च पायं अगणिं फुसंता ।

एवं सिया सिद्धि हवेज्ज तम्हा, अगणिं फुसंताण कुकम्मिणं पि ॥ १८ ॥

व्याख्या—ये दर्शनिनो मूढा हुतेना-ऽग्नौ घृतादिप्रक्षेपेण सिद्धिमुदाहरन्ति, कथं ? 'सायं' सन्ध्यायां प्रातःकाले अग्निं स्पृशन्तः यथेष्टैर्घृतादिद्रव्यैरग्निं तर्पयन्तः सिद्धिगतिमभिलषन्ति, अग्निस्पर्शेण सिद्धिः, एवं ये उदाहरन्ति, तेषा-मुच्यते-यद्यग्निस्पर्शनतः सिद्धिस्तर्हि कुकर्मिणामङ्गारदाहककुम्भकारायस्कारादीनां सिद्धिः स्यात्, यदपि मन्त्रपूतादि-भिरुदाह्रियते तदपि निरन्तराः सुहृदः प्रत्येष्यन्ति, न पुनरस्मादृशाः, कुकर्मिणामप्यग्निकार्ये भस्मापादनम्, एवमग्नि-होत्रकादीनामपि भस्मसात्करणं, को विशेषः ? अपि तु मन्त्रपूतेऽपि भस्मापादनमाऽन्यत् फलमिति गाथाऽर्थः ॥ १८ ॥

अपरिक्ख दिट्ठं ण हु एव सिद्धी, एहिंति ते घायमबुज्झमाणा ।
भूएहिं जाणं पडिलेह सायं, विज्जं गहाय तसथावरेहिं ॥ १९ ॥

व्याख्या—यैरुदकस्पर्शेनाऽग्निहोत्रेण वा सिद्धिरभिहिता तैर'परीक्ष्य दृष्टं' युक्तिविकलमभिहितं-अविचार्य प्रति-पादितं, यतो 'न हु' नैव जलाऽवगाहनेनाऽग्निहोत्रेण वा सिद्धिः, प्राणिघातसम्भवात्, प्राणिघाते च कुतो मोक्षाऽवाप्तिः ? ते चाऽज्ञानिनः प्राण्युपघातेन धर्मबुद्ध्या पापमेव कुर्वन्तः, स(? ते) 'घातं' संसारमेष्यन्ति, अबुध्यमानाः परमार्थमिति अप्कायतेजस्कायसमारम्भेण चाऽवश्यं त्रसस्थावरजीवघातः, तद्घाते च संसार एव, न सिद्धिरिति । +एव एवं ततो विद्वान्

+ + एत चिह्नगतपाठस्थाने-" विद्वान्-सदसद्विवेकी यथावस्थिततत्त्वं गृहीत्वा त्रसस्थावरैर्भूतैः-जन्तुभिः कथं सातं-सुखमवाप्यते ? " इत्येवमस्ति वृद्धवृत्तौ ।

त्रसस्थावरघाते कथं सुखमवाप्यते ? + इत्येतत्सम्युप्रेक्ष्य 'जानीहि' अवबुध्यस्व त्वं, यतः सर्वेऽपि जन्तवः सुखैषिणो दुःखद्विषः, न च तेषां सुखैषिणां दुःखोत्पादकत्वेन सुखाऽवाप्तिरिति गाथाऽर्थः ॥ १९ ॥

थणंति लुप्पंति तसंति कम्मी, पुढो जगा परिसंखाय भिक्खू ।
तम्हा विऊ विरतो आयगुत्ते, दट्ठुं तसे या पडिसंहरेज्जा ॥ २० ॥

व्याख्या—ते षट्कायाऽऽरम्भिणो सुखाभिलाषिणो नरकादिगतिं गतास्तीव्रदुःखैः पीड्यमानाः असह्यवेदनोपगताः अशरणाः स्तनन्ति 'लुप्यन्ते' छिद्यन्ते खड्गादिभिः । एवं कदर्थ्यमानास्त्रसन्ति कर्मिणः—सपापा इत्यर्थः । पृथक् 'जगा' इति जन्तवः, इत्येवं 'परिसंख्याय' ज्ञात्वा भिक्षुः—विद्वान्, यस्मात्प्राण्युपमर्दकारिणः संसाराऽन्तर्गता विलुप्यन्ते, तस्मात् पण्डितो विद्वान् 'विरतः' आत्मगुप्तः दृष्ट्वा त्रसान्, च शब्दात् स्थावरांश्च दृष्ट्वा तदुपघातकारिण्याः क्रियायाः प्रतिसंहरेत्—निवर्तयेत्, त्रसस्थावरोपघातकारिणीं क्रियां न कुर्यादिति भावः । इति गाथाऽर्थः ॥ २० ॥

जे धम्मलद्धं विणिहाय भुंजे, वियडेण साहट्टु य जे सिणाइ ।
जो धावती लूसयती व वत्थं, अहाहु से णागणियस्स दूरे ॥ २१ ॥

व्याख्या—ये केचन शीतलविहारिणो 'धर्मेण' मुनिकथा लब्धं निर्दोषमपि आहारजातं 'विनिधाय' संनिधिं कृत्वा भुञ्जन्ते, तथा ये 'विकटेन' प्रासुकोदकेनाऽपि संकोच्याङ्गोपाङ्गानि प्रासुकप्रदेशे सर्वस्नानं कुर्वन्ति, तथा यो वस्त्रं

'धावति' प्रक्षालयति, तथा 'वस्त्रं' पटशाटिकादि दीर्घं सत्ह्रस्वमित्यत्र ह्रस्वं करोति ह्रस्वं वा सन्धाय दीर्घं करोति, अथासौ 'णागणियस्स'त्ति निर्ग्रन्थभावस्य संयमानुष्ठानस्य दूरे वर्तते, न तस्य संयमं प्राहुस्तीर्थकरगणधरादयः, न तस्य संयमो भवतीति गाथाऽर्थः ॥ २१ ॥

उक्ताः कुशीलास्तत्प्रतिपक्षभूताः शीलवन्तः प्रतिपाद्यन्ते इत्येतदाह—

कम्मं परिन्नाय दगंसि धीरे, वियडेण जीविज्ज य आदिमोक्खं ।
से बीयकंदाइ अभुंजमाणे, विरते सिणाणाइसु इत्थियासु ॥ २२ ॥

व्याख्या—उदकसमारम्भे सति कर्मबन्धो जायते, इत्येवं परिज्ञाय 'विकटेन' प्रासुकोदकेन 'जीव्यात्' प्राण-सन्धारणं कुर्यात् । अन्येनाऽपि प्रासुकेनैवाहारेण प्राणवृत्तिं कुर्यात् । 'आदिः' संसारस्तस्मान्मोक्षः आदिमोक्षस्तं, संसार-विमुक्तिं यावत् । अथवा आदिमोक्षं-यावज्जीवमित्यर्थः । तथा स साधुर्बीजकन्दादि परिहरन् स्नानादिभ्यस्तथा स्त्रीभ्यश्च विरतः सन् कुशीलदोषैर्न लिप्यत इति गाथार्थः ॥ २२ ॥

जे मायरं च पियरं च हिच्चा, गारं तहा पुत्तपसुं धणं च ।
कुलाइं जे धावइ साउगाइं, अहा हु से सामणियस्स दूरे ॥ २३ ॥

व्याख्या—ये केचन मातरं पितरं त्यक्त्वा, तथा अगारं पुत्रं पशुं धनं च त्यक्त्वा, सम्यक् प्रव्रज्योत्थानेनोत्थाय, पंच-

महाव्रतभारस्य स्कन्धं दत्त्वा पुनर्निःसत्त्वतया रसगारवगृद्धः सुखशीलः 'स्वादुकानि' स्वादुभोजनवन्ति कुलानि 'धावति' गच्छति, स साधुः 'श्रामण्यस्य' श्रमणभावस्य दूरे वर्तते । एवमाहुस्तीर्थकरा इति गाथार्थः ॥ २३ ॥

एतदेव विशेषेण दर्शयितुमाह—

कुलाइं जे धावइ साउगाइं, आघाति धम्मं उदराणुगिद्धे ।
अहा हु से आयरियाण सयंसे, जे लावएज्जा असणस्स हेउं ॥ २४ ॥

व्याख्या—यो रसलम्पटः सन् स्वादुभोजनवत्सु कुलेषु याति-धावति रसनेन्द्रियप्रभावितः, गत्वा च धर्ममाख्याति, भिक्षार्थं गतः सन् यद्यस्मै कथासम्बन्धं रोचते तत्तस्याऽऽख्याति 'उदराऽनुगृद्धः' उदरभरणव्यग्रः, को भावः ? यो उदरगृद्धः आहारादिनिमित्तं दानश्रद्धकाऽऽख्यानि कुलानि गत्वा धर्ममाख्याति स कुशील इति । अथासौ आचार्यगुणानां शतांशेऽपि न वर्तते, सहस्रांशेऽपि, लक्षकोटितमेऽपि भागे न वर्तते । तथा यो भक्तस्य निमित्तं वस्त्रादिनिमित्तं वा आत्मगुणान् परेण 'आलापयेत्' भाषयेत्, असावप्याचार्यगुणानां सहस्रांशे न वर्तते, यस्तु स्वयमेवाऽऽत्मगुणान् कथयति आत्मप्रशंसां विदधाति तस्य किमुच्यते ? सोऽपि कुशील इति गाथाऽर्थः ॥ २४ ॥

निक्खम्म दीणे परभोयणंमि, मुहमंगलिए उदराणुगिद्धे ।
नीवारगिद्धेव महावराहे, अदूरए एहिति घातमेव ॥ २५ ॥

व्याख्या—यः स्वकीयं धनधान्यादि परित्यज्य आहारवस्त्रादिषु गृद्धः दैन्यमुपगतः सन् दयामनको भूत्वा, बन्दिवन्मुखमाङ्गलिको भवति, मुखेन मङ्गलानि-प्रशंसावाक्यानि ईदृक्तादृक्त्वमित्येवं दातारं प्रशंसति ।

"सो एसो जस्स गुणा, वियरंतिऽणिवारिया दसदिसासु । इहरा कहासु सुव्वसि, पच्चक्खं अज्ज दिट्ठोसि ॥१॥"

इत्येवमुदरार्थी यथा नीवारगृद्धो महावराहः अतिसङ्कटे प्रविष्टः सन् 'अदूर एव' शीघ्रमेव 'घातं' विनाशमेति, तथाऽसावपि कुशील आहारमात्रगृद्धः संसारोदरे पौनःपुन्येन विनाशमेव प्राप्नोति, अनन्तानि मरणानि लभते इति गाथार्थः ॥२५॥

अन्नस्स पाणस्सिहलोइयस्स, अणुप्पियं भासति सेवमाणे ।
पासत्थयं चेव कुसीलयं च, निस्सारए होइ जहा पुलाए ॥ २६ ॥

व्याख्या—स कुशीलः पार्श्वस्थो वा योऽन्नपानकृते वस्त्रादिकृते वा यस्य यत्प्रियं तदेव भाषते, सेवको यथा राजानमनुभाषते-राज्ञो यत्प्रियं तदेव वक्ति, एवं साधुरपि भोज्यपानवस्त्रादिनिमित्तं प्रियं भाषते, सः पार्श्वस्थभावं कुशीलभावं च लभते । तथा स 'पुलाकः' चारित्राऽपेक्षया निस्सारस्तुषप्रायो भवतीति गाथाऽर्थः ॥ २६ ॥

अन्नायपिंडेणऽहियासएज्जा, नो पूयणं तवसा आवहेज्जा ।
सद्देहिं रूवेहिं असज्जमाणे, सव्वेहिं कामेहिं विणीयगेहिं ॥ २७ ॥

---

१ स एष यस्य गुणा विचरन्त्यनिवारिता दशदिशासु । इतरथा कथासु श्रूयसे प्रत्यक्षमद्य दृष्टोऽसि ॥ १ ॥

व्याख्या—तथा यः साधुरज्ञातपिण्डः—अन्तप्रान्ताऽऽहारैराजीवति, नाऽप्युञ्छेन लब्धेन मदं करोति, नाप्यन्तप्रान्तेन लब्धेन वाऽलब्धेन वा दैन्यं भजते, नाऽपि पूजनसत्कारार्थं तपः करोति, रसेषु च गृद्धिं न कुर्यात्, तथा शब्देषु रूपेषु कामेषु वा गार्ध्यं नानयति, रागद्वेषौ त्यजति। एवंविधगुणोपशोभितः साधुर्भवति, नाऽपर इति गाथाऽर्थः ॥ १७ ॥

सव्वाइं संगाइं अइच्च धीरे, सव्वाइं दुक्खाइं तितिक्खमाणे।
अखिले अगिद्धे अणिएयचारी, अभयंकरे भिक्खु अणाविलप्पा ॥ १८ ॥

व्याख्या—तथा यः सर्वसङ्गं बाह्याभ्यन्तररूपं 'अतीत्य' त्यक्त्वा 'धीरो' विवेकी सर्वाण्यपि दुःखानि शारीर–मानसानि त्यक्त्वा, परीषहोपसर्गजनितानि 'तितिक्खमाणो' ऽधिसहन् 'अखिलो' ज्ञान–दर्शन–चारित्रैः पूर्णः, कामेष्वगृद्धः—तथा अनियतचारी, जीवानामभयङ्करः, विषयकषायैरनाविलोऽनाकुलाऽऽत्मा, संयममनुवर्तते, सः साधुरिति गाथाऽर्थः ॥ १८ ॥ किञ्च—

भारस्स जाता मुणि भुंजएज्जा, कंखेज्ज पावस्स विवेग भिक्खू।
दुक्खेण पुट्ठे धुयमातिएज्जा, संगामसीसे व परं दमेज्जा ॥ १९ ॥

व्याख्या—साधुः संयमभारस्य यात्रानिर्वाहाय शुद्धाहारग्रहणं करोति, तथा पूर्वार्जितस्य पापकर्मणो 'विवेकं' पृथग्भावं विनाशमाकाङ्क्षेद्भिक्षुः—साधुर्दुःखेन परीषहोपसर्गजनितेन 'स्पृष्टः' व्याप्तोऽपि 'धुवं' संयमं मोक्षं वा आदत्ते। यथा कश्चित् सुभटः [सङ्ग्रामशिरसि] शत्रुभिरभिद्रुतोऽपि 'परं' शत्रुं दमयति, एवं परीषहोपसर्गाभिद्रुतोऽपि

कर्मशत्रुं दमयेदिति गाथार्थः ॥ २९ ॥ अपि च—

अवि हम्ममाणो फलगावतट्ठी, समागमं कंखति अंतगस्स ।
णिद्धूय कम्मं ण पवंचुवेइ, अक्खक्खए वा सगडं तिबेमि ॥ ३० ॥

व्याख्या—साधुः परीषहोपसर्गैर्हन्यमानोऽपि—पीड्यमानोऽपि सम्यक् सहते । किमिव ? 'फलकमिव' फलकवदपकृष्टः, यथा फलकमुभाभ्यां पार्श्वाभ्यां 'तष्टं' घटितं सत्तनु भवति, उभयपार्श्वे तक्ष्यमाणोऽपि न रागद्वेषवान् भवति, एवं साधुरप्युग्रेण तपसा निष्टप्तदेहो दुर्बलशरीरो भवति रागद्वेषरहितश्च स्यात् । एवं 'अन्तकस्य' मृत्योः 'समागमं' प्राप्तिमाऽऽकाङ्क्षति—अभिलषति । तथाऽष्टप्रकारं कर्म निर्धूय 'प्रपञ्चं' संसारं न उपैति, यथा अक्षस्य 'क्षये' विनाशे सति शकटं समविषमपथरूपं प्रपञ्चकरणाऽभावान्नोपयाति, एवमसावपि साधुरष्टप्रकारस्य कर्मणः क्षये संसारप्रपञ्चं नोपयातीति गाथार्थः ॥ ३० ॥ इतिः परिसमाप्त्यर्थे, ब्रवीमीति पूर्ववत् ।

समाप्तं कुशीलपरिभाषाख्यं सप्तममध्ययनं, ग्रं० ३५४ ॥

अथाष्टमं वीर्याध्ययनम् ।

उक्तं सप्तममध्ययनं साम्प्रतमष्टममारभ्यते ।

दुहा चेयं सुअक्खायं, वीरियंति पवुच्चती । किं नु वीरस्स वीरत्तं ?, कहं चेयं पवुच्चती ? ॥ १ ॥

व्याख्या—' द्विधा ' द्विप्रकारं चेदं प्रोच्यते वीर्यं सुष्ठु आख्यातं तीर्थकरैः, वीर्यं जीवस्य शक्तिविशेष इत्यर्थः । तत्र किं ' वीरस्य ' सुभटस्य वीरत्वं ? केन वा कारणेनाऽसौ वीर इति कथ्यते ? इति गाथाऽर्थः ॥ १ ॥

अथ भेदद्वारेण वीर्यस्वरूपमाचिख्यासुराह—

कम्ममेगे पवेदिंति, अकम्मं वा वि सुव्वया ! । एतेहिं दोहि ठाणेहिं, जेहिं दीसंति मच्चिया ॥ २ ॥

व्याख्या—तत्र एके ' कर्म ' क्रियाऽनुष्ठानं, तदेव वीर्यं प्रवेदयन्ति, द्वितीयं त्वकर्मवीर्यं वीर्यान्तरायक्षयजनितं जीवस्य सहजं वीर्यमित्यर्थः । भो सुव्रता ! एवम्भूतं पण्डितवीर्यं जानीत यूयं, आभ्यामेव द्वाभ्यां सकर्मवीर्ये अकर्मवीर्ये इति स्थानाभ्यां व्यवस्थिता मनुष्या दृश्यन्ते, तथाहि—नानाविधासु क्रियासु प्रवर्त्तमानमुत्साहबलसम्पन्नं मनुष्यं दृष्ट्वा वीर्यवानयं मनुष्यः इत्येको भेदस्तथा तदावारककर्मणः क्षयादनन्तबलयुक्तोऽयं मनुष्य इति द्वितीयो भेदः । एतावता एकं सकर्मवीर्यमपरमकर्मवीर्य—जीवस्य सहजं वीर्यमिति गाथाऽर्थः ॥ २ ॥

पमायं कम्ममाहंसु, अप्पमायं तहाऽवरं । तब्भावादेसओ वा वि, बालं पंडियमेव वा ॥ ३ ॥

व्याख्या—प्रमादं कर्मवीर्यं, अप्रमाद-मपरं-अकर्मवीर्यमित्याहुस्तीर्थकराः । तथा यः प्रमादी सन् यत् कर्म करोति, तत्कर्मवीर्यं बालवीर्यमित्युच्यते । तथाऽप्रमत्तः सन् यत्कर्म करोति, तदकर्मवीर्यं-पण्डितवीर्यमित्यभिधीयते । 'तब्भावादेसओ वा वि' यदा येन भावेन वीर्यं स्फोरयति तदा तन्नाम व्यपदिश्यते प्रमादवीर्यमप्रमादवीर्यं चेति । तत्राऽपि प्रमत्तस्य कर्मवीर्यं-बालवीर्यं, अप्रमत्तस्य अकर्मवीर्यं-पण्डितवीर्यम् । तत्र बालवीर्यमभव्यानामनादि अपर्यवसितं भव्यानामनादिसपर्यवसितं चेति, पण्डितवीर्यं तु सादिसपर्यवसितमेव ॥ ३ ॥ तत्र प्रमादोपहतस्य सकर्मणो यद्बालवीर्यं तद्दर्शयितुमाह—

सत्थमेगे उ सिक्खंती, अतिवायाय पाणिणं । एगे मंते अहिज्जंति, पाणभूयविहेडिणो ॥ ४ ॥

व्याख्या—तत्र ['शस्त्रं' खड्गादिप्रहरणं] शास्त्रं [वा] धनुर्वेदायुर्वेदादिकं येऽभ्यसन्ति तत्प्राणिनामतिपाताय जायते, प्राणिघाताय स्यात् । तथा मन्त्रान् अभिचारकानाथर्वणान् अश्वमेधपुरुषमेधसर्वमेधयागार्थमधीयते । कथम्भूतान् मन्त्रान् ? प्राणभूतविहेठकान् पठन्ति । इत्येतत्सर्वं बालवीर्यमिति गाथार्थः ॥ ४ ॥

माइणो कट्टु मायाओ, कामभोगे समारभे । हंता छेत्ता पगब्भित्ता, आयसायाणुगामिणो ॥ ५ ॥

व्याख्या—एके मायां कृत्वा-मायिनो भूत्वा कामभोगान् 'समारभन्ते' सेवन्ते, एवं क्रोधिनो मानिनो लोभिनः सन्तः कामभोगान् सेवन्ते, ततश्च ते आत्मसुखार्थिनः आत्मसाताऽनुगामिनः स्वसुखलिप्सवो दुःखद्विषः कषायकलु-

पिपासमानाः सन्तः प्राणिनां हन्तारः छेत्तारः प्रकर्तयितारश्च भवन्ति । कामभोगेच्छवः आत्मसुखाऽभिलाषिणश्च प्राणिनां ध्वंसका भवन्तीति गाथाऽर्थः ॥ ५ ॥

मणसा वयसा चेव, कायसा चेव अंतसो । आरओ परओ वा वि, दुहा वि य असंजया ॥ ६ ॥

व्याख्या—मनसा वाचा कायेन करणकारणाऽनुमतिभिश्चाऽन्तशः कायेनाशक्तोऽपि मनसैव तन्दुलमत्स्यवत् कर्म बध्नाति । तथा आरतः परतः-इहलोके परलोके च पर्यालोच्यमानास्ते स्वयं करणेन परकरणेन च 'असंयता' जीवोपघातकारिण एवेति गाथाऽर्थः ॥ ६ ॥ साम्प्रतं जीवोपघातविपाकं दर्शयितुमाह—

वेराइं कुव्वई वेरी, तओ वेरेहिं रज्जती । पावोवगा य आरंभा, दुक्खफासा य अंतसो ॥ ७ ॥

व्याख्या—वैरी-स जीवोपमर्दकारी जन्मशताऽनुबन्धीनि वैराणि करोति । ततः वैरादपरैर्वैरैरनुरज्यते-सम्बध्यते । परम्पराऽनुषक्तं वैरं जायते । किमिति ? यतः 'पापोपगा' आरम्भाः सावद्यानुष्ठानरूपा 'अन्तशो' विपाककाले 'दुःखस्पर्शाः' असातोदयविपाकिनो जायन्ते इति गाथाऽर्थः ॥ ७ ॥ किञ्च—

संपराइयं नियच्छंति, अत्तदुक्कडकारिणो । रागदोसस्सिया बाला, पावं कुव्वंति ते बहुं ॥ ८ ॥

व्याख्या—कर्म द्विभेदं साम्परायिकं ईर्यापथिकं च । तत्र साम्परायिकं बादरकषायात्मकं जीवोपमर्दकत्वेन वैरानुषङ्गितया 'आत्मदुष्कृतकारिणः' स्वपापविधायिनः सन्तो 'नियच्छंति' बध्नन्ति, के बध्नन्ति ? रागद्वेषाश्रिताः 'बालाः'

अज्ञानिनः । ते वैरभूता असद्वेद्यं पापं 'बहु' अनन्तं कुर्वन्तीति गाथार्थः ॥ ८ ॥ एवं बालवीर्यं प्रदर्श्य उपसंजिहीर्षुराह—

एयं सकम्मविरियं, बालाणं तु पवेदियं । एत्तो अकम्मविरियं, पंडियाणं सुणेह मे ॥ ९ ॥

व्याख्या—एवं प्राक् प्रदर्शितं, तथाहि प्राणिनामतिपातार्थं शस्त्रं शास्त्रं वा केऽपि शिक्षन्ते, तथाऽपरे विद्यामन्त्रानधीयन्ते, तथाऽन्ये मायाविनो नानाप्रकारां मायां कृत्वा कामभोगार्थमारम्भान् कुर्वन्ति, अपरे पुनर्वैरिणस्तत् कुर्वन्ति येन वैरमनुबध्यन्ते । परशुरामसुभूमयोरिव । इत्यादिप्राक् प्रतिपादितं सर्वं बालवीर्यं, एतत्सकर्मणां बालानां वीर्यं, च शब्दात्प्रमादवतां 'प्रवेदितं' प्रतिपादितम् ; अत ऊर्ध्वं 'अकर्मणां' पण्डितानां यद्वीर्यं, तन्मे कथयतः शृणुत यूयमिति गाथाऽर्थः ॥९॥

तदेवाह—

दविए बंधणुम्मुक्के, सव्वओ छिन्नबंधणे । पणोल्ल पावकं कम्मं, सल्लं कंतति अंतसो ॥ १० ॥

व्याख्या—'द्रव्यो' भव्यो मुक्तिगमनयोग्यः, बन्धनोन्मुक्तः-बन्धनात्कषायात्मकान्मुक्तः 'सर्वतः' सर्वप्रकारेण सूक्ष्मबादररूपं छिन्न-मपनीतं बन्धनं कषायात्मकं येन स छिन्नबन्धनः, एवंविधः पापकं कर्म 'प्रणोद्य' निराकृत्य 'अन्तशः' सर्वप्रकारेण शल्यं छिनत्ति-दूरीकरोतीति गाथाऽर्थः ॥ १० ॥ यदुपादाय शल्यमपनयति तद्दर्शयितुमाह—

नेयाउयं सुयक्खायं, उवादाय समीहए । भुज्जो भुज्जो दुहावासं, असुहत्तं तहा तहा ॥ ११ ॥

व्याख्या—नैयायिकं ज्ञान-दर्शन-चारित्राऽऽत्मकं मार्गं मोक्षं प्रति नेतारं तीर्थकरादिभिः स्वाख्यातं, तमुपादाय—

गृहीत्वा सम्यग् मोक्षाय 'ईहते' चेष्टते–ध्यानाध्ययनादावुद्यमं विधत्ते। यत्तु बालवीर्यं भूयोभूयः–तदतीतानागतभव-ग्रहणेषु दुःखावासं वर्तते, यथा यथा च बालवीर्यवान् नरकादिषु दुःखेषु पर्यटति तथा तथा चास्याशुभाध्यवसायित्वाद-शुभमेव प्रवर्द्धते। इत्येवं संसारस्वरूपमनुप्रेक्षमाणस्य धर्मध्यानं प्रवर्त्तेत इति गाथार्थः॥ ११॥

साम्प्रतमनित्यभावनामधिकृत्याह—

ठाणी विविहठाणाणि, चइस्संति ण संसओ। अणियत्ते अयं वासे, णायएहिं सुहीहि य॥ १२॥

व्याख्या—स्थानानि विद्यन्ते येषां जीवानां ते स्थानिनः, तद्यथा–स्वर्गे इन्द्रस्तत्सामानिकत्रायस्त्रिंशत्पार्षद्यादीनि मनुष्येष्वपि चक्रवर्तिबलदेववासुदेवमहामाण्डलिकादीनि तिर्यक्ष्वपि यानिकानिचिदिष्टानि भोगभूम्यादीनि, तानि सर्वाण्यपि विविधानि उत्तममध्यमाधमानि ते स्थानिनस्त्यक्ष्यन्ति, नात्र संशयो विधेय इति। तथा चोक्तम्–" अशाश्वतानि स्थानानि, सर्वाणि दिवि चेह तत्। देवासुरमनुष्याणा–मृद्धयश्च सुखानि च॥ १॥" तथाऽयं ज्ञातिभिः सहायैश्च सुहृद्भिर्यः संवासः सोऽप्यनित्यः–अशाश्वतः, चकारादन्यदपि धनधान्यद्विपदचतुष्पदशरीराद्यपि अनित्यमेव, धर्ममेकं विहाय " धर्म एको हि शाश्वतः " इति वचनादिति गाथार्थः॥ १२॥

एवमादाय मेहावी, अप्पणो गिद्धिमुद्धरे। आरियं उवसंपज्जे, सव्वधम्ममगोवियं॥ १३॥

व्याख्या—सर्वाण्यनित्यानि स्थानानि, इत्येवमादाय–अवधार्य 'मेधावी' सद्विवेकी, आत्मसम्बन्धिनीं 'गृद्धिं'

गार्ध्यं—ममत्वमुद्धरेत्—अपनयेत्, ममेदमहमस्य स्वामीत्येवं ममतां क्वचिदपि न कुर्यात्। 'आर्यं' मार्गं सम्यग्ज्ञान-दर्शनचारित्रात्मकं 'उपसम्पद्येत' समाश्रयेत्। किम्भूतं आर्यमार्गं? सर्वैः कुतीर्थिकधर्मैरकोपितं—अदूषितं, अथवा सर्वधर्मैरनुष्ठानरूपैरगोपितं, कुत्सितकर्तव्याभावात् प्रकटं, एवंविधमार्यमार्गं समाश्रयेदिति गाथार्थः ॥ १३ ॥

सुधर्मपरिज्ञानं च कथं स्यादिति दर्शयितुमाह—

सहसंमईए णच्चा, धम्मसारं सुणेत्तु वा। समुवट्ठिए उ अणगारे पच्चक्खायपावए ॥ १४ ॥

व्याख्या—धर्मस्य 'सारं' परमार्थमवबुध्य, कथं? सहसम्मत्या जातिस्मरणादिना अन्येभ्यो वा तीर्थङ्करगणधर-आचार्यादिभ्यो वा + समुपस्थितः—उत्तरोत्तरगुणवृद्धये 'अनगारः' साधुः प्रवर्द्धमानपरिणामः प्रत्याख्यातपापको भवति। बालवीर्यरहितः पण्डितवीर्यसम्पन्नो धर्मसारमवबुध्य साधुः प्रत्याख्यातपापको भवतीति गाथार्थः ॥ १४ ॥ किञ्च—

जं किंचुवक्कमं जाणे, आउक्खेमस्स अप्पणो। तस्सेव अंतरा खिप्पं, सिक्खं सिक्खेज्ज पंडिए ॥१५॥

व्याख्या—स्वायुष्कस्य येन केनचित्प्रकारेण उपक्रमो भावी यस्मिन् वा काले, तज्ज्ञात्वा उपक्रमस्य कालस्य वा अन्तराले 'क्षिप्रं' शीघ्रमनाकुलः सन् जीविताशंसामकुर्वन्—पण्डितो विवेकी संलेखनारूपां शिक्षां शिक्षेत् संलेखनां कुर्यात्।

+ "इलापुत्रवत् श्रुत्वा चिलातपुत्रवद्वा धर्मसारमुपगच्छति, धर्मस्य वा सारं—चारित्रं, तत्प्रतिपद्यते, तत्प्रतिपन्नो च पूर्वोपात्तकर्मक्षयार्थं पण्डितवीर्यसम्पन्नो रागादिबन्धनविमुक्तो बालवीर्यरहित उत्तरोत्तरगुणसम्पत्तये" इति बृहद्वृत्तौ।

ग्रहणशिक्षया यथावन्मरणविधिं विज्ञाय आसेवनाशिक्षया आसेवेतेति गाथाऽर्थः ॥ १५ ॥ किञ्च—

जहा कुम्मे सअंगाइं, सए देहे समाहरे । एवं पावाइं मेहावी, अज्झप्पेण समाहरे ॥ १६ ॥

व्याख्या—यथा कूर्मः स्वान्यङ्गानि स्वकीयदेहे समाहरे–द्गोपयेत्, 'एवं' अनेन प्रकारेण मेधावी पापरूपाण्यनुष्ठानानि 'अध्यात्मना' सम्यग्धर्मध्यानादिभावनया समाहरेत्' उपसंहरेत्, मरणे समुपस्थिते सम्यक् संलेखनया संलिखितकायः पण्डितमरणेनात्मानं समाहरेदिति गाथाऽर्थः ॥ १६ ॥

साहरे हत्थपादे य, मणं सव्विंदियाणि य । पावकं तु परीणामं, भासादोसं च तारिसं ॥ १७ ॥

व्याख्या—पादपोपगमने इङ्गितमरणे भक्तपरिज्ञायां शेषकाले वा कूर्मवद्धस्तपादौ 'संहरेत्' व्यापारान्निवर्तयेत्, तथा मनोऽप्यकुशलव्यापारेभ्यो निवर्तयेत् । एवं सर्वाणि श्रोत्रेन्द्रियादीनि तथा पापकं परिणामं संहरेत् । भाषादोषं च तादृशं सावद्यात्मकं उपसंहरेत् । एवं पण्डितमरणं अशेषकर्मक्षयार्थं सम्यगनुपालयेदिति गाथाऽर्थः ॥ १७ ॥

तं च संयमे पराक्रममाणं कश्चित् पूजासत्कारादिना निमन्त्रयेत्तत्रात्मोत्कर्षो न कार्य इति दर्शयितुमाह—

अणु माणं च मायं च, तं परिन्नाय पंडिए । सुयं मे इहमेगेसिं, एयं वीरस्स वीरियं ॥ १८ ॥

व्याख्या—चक्रवर्त्यादिना पूज्यमानेन 'अणुरपि' स्तोकोऽपि मानो न विधेयः, स्तोकाऽपि माया न विधेया, किमुत महती ?, एवं क्रोधलोभावपि न विधेयावित्येवं ज्ञपरिज्ञया कषाया(णां)नां (?) विपाकं ज्ञात्वा प्रत्याख्यानपरिज्ञया तन्नि-

इति कुर्यात् । श्रुतं मया इह मनुष्यजन्मनि एकेषां तीर्थकरादीनां वाक्यं, वीरस्यैतदेव वीरत्वं, येन कषाया(णा)नां (?) विजयः क्रियते, येन बलेन सङ्ग्रामशिरसि महति सुभटसङ्कटे परानीकं विजयते तत्परमार्थतो वीर्यं न भवति, अपि तु येन क्रोधादीनां पराजयो विधीयते तद्वीरस्य वीरत्वमिति गाथार्थः ॥ १८ ॥

आयतट्ठं सुआदाय, एयं वीरस्स वीरियं । सातागारवणिहुए, उवसंतेऽणिहे चरे ॥ १९ ॥×

व्याख्या—'आयतो' मोक्षस्तदर्थं चारित्रमादाय यः क्रोधादीनां जयाय 'पराक्रमते' उद्यमं विधत्ते, एतद्वीरस्य वीरत्वं । यो धृतिबलेन कामक्रोधादिजयाय यतते स एव महान् वीरो नाऽपर इति । यः पुनः सातागारवनिभृतस्तदर्थमनुद्यमी तथा क्रोधाग्निजयादुपशान्तः—शीतीभूतः, तथा 'निहा' माया न विद्यते यस्यासावनिहो—मायाप्रपञ्चरहितः, तथा मानलोभरहित इत्यपि द्रष्टव्यं, स चैवम्भूतः संयमाऽनुष्ठानं चरेदिति गाथाऽर्थः ॥ १९ ॥ तथा—

उड्ढमहे तिरियं वा, जे पाणा तसथावरा । सव्वत्थ विरतिं कुज्जा, संति निव्वाणमाहियं ॥ २० ॥

सुगमार्थोऽयं श्लोकः, परं नाऽयं श्लोकः सूत्रादर्शेषु दृष्टः, टीकायां तु दृष्ट इति, अत्राऽपि तेन लिखित इति ॥

पाणे य णातिवाएज्जा, अदिन्नं पि य णादए । सादियं ण मुसं बूया, एस धम्मे वुसीमतो ॥२०॥

व्याख्या—प्राणप्रियाणां प्राणिनां प्राणानातिपातयेत्तथाऽपरेणादत्तं शिलाकामात्रमपि 'नाददीत' न गृह्णीयात् । तथा

× अष्टादशतमश्लोकोत्तरार्द्धं पूर्वार्द्धं चास्य पद्यस्य पाठान्तरत्वेन विन्यस्तं वृत्तिकृद्भिरतो न कार्या पद्याधिक्यशङ्केति ।

'सच्चं[वदे]' सत्यं भूतार्थं ब्रूयात्, एतावता यो हि परवञ्चनार्थे मृषावादः स परिह्रियते, यस्तु संयमगुप्त्यर्थं 'न मया मृगा उपलब्धा' इत्यादिकः स न दोषायेति। एष धर्मः श्रुतचारित्राख्यो 'वुसीमओ' त्ति वश्येन्द्रियस्य साधोः ज्ञातव्य इति गाथार्थः ॥ २० ॥ अपि च—

अतिक्कमंति वायाए, मणसा वि ण पत्थए। सव्वओ संवुडे दंते, आयाणं सुसमाहरे ॥ २१ ॥

व्याख्या—अतिक्रमं पञ्चानां महाव्रतानां मानावष्टब्धतया परतिरस्कारं वा वाचा मनसा[ऽपि] च न प्रार्थयेत्। एतद्द्वयनिषेधे कायातिक्रमोऽपि निषिद्धः। एतावता मनोवाक्कायैः कृतकारितानुमतिभिश्चातिक्रमं न कुर्यात्। सर्वतः संवृतो दान्तः सन् साधुर्मोक्षस्यादान-मुपादानं सम्यग्दर्शनादिकं आहरे-दाददीत, गृह्णीयादिति गाथार्थः ॥ २१ ॥ किञ्च—

कडं च कज्जमाणं च, आगमिस्सं च पावगं। सव्वं तं नाणुजाणंति, आयगुत्ता जिइंदिया ॥ २२ ॥

व्याख्या—साधूद्देशेन यदपरैरनार्यप्रायैः कृतं पापकं कर्म वर्तमाने काले च क्रियमाणं तथाऽऽगामिनि च काले यत्करिष्यते तत्सर्वं मनोवाक्कायकर्मभि 'नानुजानन्ति' नानुमोदन्ते। के नानुजानन्ति? 'आयगुत्ता जिइंदिया' इति आत्मगुप्ताः संवृतात्मानो जितेन्द्रियाः साधव इति गाथार्थः ॥ २२ ॥

जे अबुद्धा महाभागा, वीरा असमत्तदंसिणो। असुद्धं तेसि परक्कंतं, सफलं होइ सव्वसो ॥ २३ ॥

व्याख्या—ये केचन 'अबुद्धाः' अविज्ञातधर्मपरमार्थाः वल्कलग्राहिणः। किञ्चिज्ज्ञतया जातावलेपाः पण्डितमानिनः,

यदि वा अबुद्धा इव बालवीर्यवन्तस्तथा 'महाभागाः' महापूज्या लोकविश्रुतास्तथा 'वीराः' सुभटाः, परं 'असम्यक्त्वदर्शिनः' सम्यक्त्वविकला मिथ्यादृष्टयः, एवंविधा ये केचन, तेषां बालानां यत्किमपि तपोदानाध्ययनयमनियमादिषु 'पराक्रान्तं' उद्यमः कृतस्तत्सर्वमशुद्धं, सम्यक्त्वविकलत्वात्, सम्यक्त्वविकलैर्हि यत्किञ्चित्तपोदानाध्ययनादि विधीयते तदशुद्धम्। अविशुद्धकारि केवलं कर्मबन्धाय, न स्वल्पाऽपि काऽपि निर्जरा। अत एवोक्तं तच्च तेषां पराक्रान्तं 'सफलं' सह फलेन–कर्मबन्धेन वर्तत इति। सर्वाऽपि तत् क्रियातपोऽनुष्ठानादिका कर्मबन्धायैवेति गाथाऽर्थः ॥ २३ ॥

साम्प्रतं पण्डितवीर्यमधिकृत्याह—

जे य बुद्धा महाभागा, वीरा सम्मत्तदंसिणो। सुद्धं तेसिं परक्कंतं, अफलं होइ सव्वसो ॥ २४ ॥

व्याख्या—ये केचन 'बुद्धाः' स्तीर्थकरास्तच्छिष्या गणधरादयो वा 'महाभागाः' महापूज्या जगद्विश्रुता 'वीराः', कर्मविदारणप्रत्यलाः ज्ञानादिभिर्गुणैर्वा विराजमानाः, तथा 'सम्यक्त्वदर्शिनः' परमार्थतत्त्ववेदिनस्तेषां भगवतां यत्–'पराक्रान्तं' तपोऽध्ययनयमनियमादावनुष्ठितं तच्छुद्धमवदातं, सर्वदोषाकलङ्कितं, कर्मबन्धं प्रत्यफलं भवति, निर्जरार्थमेव भवतीत्यर्थः। एतावता सम्यग्दृशां सर्वमनुष्ठानं पण्डितवीर्यं निर्जराहेतुरेव स्यादिति गाथाऽर्थः ॥ २४ ॥

तेसिं पि तवो असुद्धो, निक्खंता जे महाकुला। जं नेवऽन्ने वियाणंति, न सिलोगं पवेयए ॥२५॥

व्याख्या—ये महाकुलोत्पन्ना अपि पूजासत्कारादिहेतवे तपोदानाध्ययनादिकं कुर्वन्ति तेषामपि तत्कृतमनुष्ठानमशुद्धं,

पूजासत्कारादिकृते कृतं संयमपालनादि न निर्जरार्थं जायते, यत्पुनः कृतं तपोऽध्ययनादि अन्ये श्रावकादयो न जानन्ति तथा विधेयं, तपोनियमाभिग्रहादिकं क्रियमाणं अन्ये श्रावका लोकाश्च न जानन्ति तथा विधेयं, यदि लोकानां पुरः प्रकाश्यते, आत्मश्लाघा स्वयमेव क्रियते तदपि तपो न निर्जरार्थं भवति । अत एवोक्तं—" न सिलोगं पवेयए " नैवात्मश्लाघां ' प्रवेदयेत् ' प्रकाशयेत्, स्वयं प्रकाशनेन स्वकीयमनुष्ठानं फल्गुतामापादयेदिति गाथार्थः × ॥ २५ ॥

अप्पपिंडासि पाणासि, अप्पं भासेज्ज सुव्वए । खंतेऽभिनिव्वुडे दंते, वीतगिद्धी सदा जए ॥ २६ ॥

व्याख्या—अल्पपिण्डाशी अल्पपानकः ' अल्पभाषको ' मितभाषी, सर्वथा विकथारहितः, तथा सुव्रतः, ' खंते ' ' क्षान्तः ' क्षमावान् ' अभिनिव्वुडे ' अभिनिर्वृतो लोभादिजयात् ' दान्तो ' जितेन्द्रियः, यतः " कषाया यस्य नो छिन्ना, यस्य नात्मवशं मनः । इन्द्रियाणि न गुप्तानि, प्रव्रज्या तस्य जीवनम् ॥ १ ॥ " तथा वीतगृद्धि–राशंसादोषरहितः, एवंविधः साधुः ' सदा ' सर्वकालं संयमानुष्ठाने यतेत–यत्नं कुर्यादिति गाथार्थः ॥ २६ ॥

झाणजोगं समाहट्टु, कायं विउसेज्ज सव्वसो। तितिक्खं परमं नच्चा, आमोक्खाए परिव्वएज्जासि त्तिबेमि॥

व्याख्या—ध्यानयोगं समाहृत्य ' कायं ' देहमकुशलयोगेषु प्रवृत्तं ' व्युत्सृजेत् ' परित्यजेत् ' सर्वतः ' सर्वप्रकारेण, हस्तपादादिकमपि परपीडाकारी न व्यापारयेत् । तथा 'तितिक्षां' क्षमां 'परमां' प्रधानां ज्ञात्वा 'आमोक्षाय' अशेषकर्मक्षयं

× आत्मश्लाघानिमित्तं कृतं व्याधिकरमेव स्यात्, न परलोकसाधकमिति भावः ।

यावत्परिव्रजेदिति संयमाऽनुष्ठानं कुर्यात्त्वमिति गाथार्थः ॥ २७ ॥ इतिः परिसमाप्त्यर्थे, ब्रवीमीति पूर्ववत् ।

इति श्रीपरमसुविहितखरतरगच्छविभूषणश्रीमत्साधुरङ्गगणिवरगुम्फितायां श्रीमत्सूत्रकृताङ्गदीपिकायां वीर्याध्ययनमष्टमं परिपूर्णम् ।

अथ नवमं धर्माध्ययनं आरभ्यते ।

कयरे धम्मे अक्खाए ?, माहणेण मईमया । अंजुं धम्मं अहातच्चं, जणगा ! तं सुणेह मे ॥ १ ॥

व्याख्या—जम्बूस्वामी सुधर्मस्वामिनमुद्दिश्येदमाह—'कतरः' किम्भूतो धर्मः 'आख्यातः' कथितो 'माहणेणं'ति भगवता श्रीवर्द्धमानस्वामिना, कथम्भूतेन ? मतिमता, इति पृष्टे सुधर्मस्वाम्याह—'अञ्जुं' मायाप्रपञ्चरहितमवक्रं 'अहातच्चं' यथावस्थितं मम कथयतः शृणुत यूयं हे 'जनकाः' जनाः ! (यथा) भगवता प्रतिपादितं मया चाकर्णितं तथा भवतां कथयामि, यूयं शृणुतेति गाथार्थः ॥ १ ॥

धर्मप्रतिपक्षभूतोऽधर्मस्तदाश्रितांस्तावद्दर्शयितुमाह—

माहणा खत्तिया वेस्सा, चंडाला अदु बोक्कसा । एसिया वेसिया सुद्दा, जे य आरंभनिस्सिया ॥ २ ॥

व्याख्या—ब्राह्मणाः क्षत्रिया वैश्याश्चाण्डाला अथवा बोक्कसा—अवान्तरजातीयाः 'एषिकाः' मृगलुब्धका हस्तितापसाश्च, मांसहेतोर्मृगान् हस्तिनश्च एषन्ति, तथा कन्दमूलफलादिकं च । तथा ये चान्ये पाषण्डिकाः, नानाविधैरुपायैर्भैक्ष्यमेषन्त्यन्यानि वा विषयसाधनानि, ते सर्वेऽप्येषिका उच्यन्ते । तथा 'वैशिकाः' वणिजः 'शूद्राः' कृषीवलादयः, ये चान्ये सावद्यारम्भनिश्रिताः, निर्लाञ्छनाऽङ्गारदाहादिभिः क्रियाविशेषैर्जीवोपमर्दकारिणस्तेषां सर्वेषामेव जीवापकारिणां वैरमेव प्रवर्द्धत इत्युत्तरश्लोके क्रियेति गाथार्थः ॥ २ ॥ किञ्च—

परिग्गहे निविट्ठाणं, वेरं तेसिं पवड्ढई+ । आरंभसंभिया कामा, न ते दुक्खविमोयगा ॥ ३ ॥

व्याख्या—परिग्रहे सचित्ताचित्तरूपे 'निविष्टानां' गार्ध्यं गतानां, परिग्रहे ममत्वोपेतानां, पाप-मसातवेदनीयादिकं 'प्रवर्द्धते' वृद्धिमुपयाति, जन्मान्तरेष्वपि दुर्मोचं भवति । तत्र येन यथा यस्य प्राणिन उपमर्दः क्रियते स तथैव संसारान्तर्वर्ती शतशो दुःखभाग्भवतीति, जमदग्नि—कृतवीर्यादीनामिव पुत्रपौत्रानुगं वैरं प्रवर्द्धत इति भावः । किमिति दुःखभाजो भवन्तीत्याह—यतस्ते प्राणिनः कामेषु प्रवृत्ताः, कामाश्चाऽऽरम्भसम्भृता—आरम्भपुष्टाः, आरम्भाश्च जीवोपमर्दकारिणः, अतस्ते आरम्भनिश्रिताः, परिग्रहनिविष्टाः कामसम्भृताः 'दुःखविमोचकाः' अष्टप्रकारकर्मविमोचका न भवन्ति । एवंविधास्ते

---

१ तद्यथा—ब्राह्मणेन शूद्रायां जातो निषादः, ब्राह्मणेनैव वैश्यायां जातो अम्बष्ठः, तथा निषादेनाम्बष्ठ्यां जातो बोक्कसः ।

+ "तेसिं पावं पवड्ढती" इति चूर्णौ, व्याख्याऽपि चूर्णिकृद्भिरेवैव कृता, पाठान्तरत्वेन तु स्वीकृतोऽयमपि पाठो वृत्तिकारैः ।

कर्मकृत आत्मानं मोचयितुं नालमिति गाथार्थः ॥ ३ ॥ किञ्चाऽन्यत्—

आघायकिच्चमाहेयं, नाइओ विसएसिणो। अन्ने हरंति तं वित्तं, कम्मी कम्मेहिं किच्चती ॥ ४ ॥

व्याख्या—यत्र दशविधाः प्राणिनां प्राणाः—आहन्यन्ते स 'आघातो' मरणं, तत्र कृत्यमग्निसंस्कारजलाञ्जलिप्रदानादि कृत्वा पश्चात् ज्ञातयः—पुत्रकलत्रादयो विषयैषिणः सन्तः स्वार्थकनिष्ठाः 'तद्वित्तं' द्रव्यजातं गोत्रिणः स्वीकुर्वन्ति। को भावः? यो मृत्वा गतस्तस्याग्निसंस्कारादिकं कृत्वा पाश्चात्याः पुत्रादयस्तदर्जितं द्रव्यं यथेष्टमुपभुञ्जन्ते, स तु द्रव्योपार्जकः सावद्याऽनुष्ठानवान् पापी स्वकृतैः कर्मभिः संसारे 'कृत्यते' छिद्यते ॥ ४ ॥

स्वजनाश्च तद्द्रव्योपजीविनस्तत्त्राणाय न भवन्तीति दर्शयितुमाह—

माया पिया ण्हुसा भाया, भज्जा पुत्ता य ओरसा। नालं ते तव ताणाए, लुप्पंतस्स सकम्मुणा ॥ ५ ॥

व्याख्या—एते सर्वेऽपि मातापित्रादयः, अन्ये श्वशुरादयोऽपि 'ते' तव संसारचक्रवाले स्वकर्मभिर्विलुप्यमानस्य त्राणाय नालं—न समर्था भवन्ति। इहापि तावदेते त्राणाय, किमुत परलोके इति गाथार्थः ॥ ५ ॥

एयमट्ठं सपेहाए, परमट्ठाणुगामियं। निम्ममो निरहंकारो, चरे भिक्खू जिणाहियं ॥ ६ ॥

व्याख्या—धर्मरहितानां स्वकृतकर्मविलुप्यमानानामिहलोके परलोके न कश्चित्त्राणाय, इत्येवं पूर्वोक्तमर्थं 'सम्प्रेक्ष्य' पर्यालोच्य 'परमार्थो' मोक्षः संयमो वा, समनुगच्छति, संयममार्गाराधको भवेत्। तथा निर्ममो निरहङ्कारः सन् स

भिक्षुर्जिनैराहितो मार्गः सम्यग्दर्शनज्ञानचारित्रात्मकस्तं 'चरेत्' अनुतिष्ठेदिति गाथार्थः ॥ ६ ॥ अपि च—

चिच्चा वित्तं च पुत्ते य, णाईओ य परिग्गहं । चिच्चा ण अंतगं सोयं, निरवेक्खो परिव्वए ॥ ७ ॥

व्याख्या—त्यक्त्वा वित्तं पुत्रान् ज्ञातींस्तथा परिग्रहं च सर्वं ममतारूपं त्यक्त्वा, णकारो वाक्यालङ्कारे, अन्तं गच्छतीति अन्तगो-दुष्परित्यज इत्यर्थः। अन्तको वा विनाशकारीत्यर्थः। आत्मनि वा गच्छतीति आत्मगः, आन्तर इत्यर्थः। एवम्भूतं शोकं 'त्यक्त्वा' परित्यज्य, श्रोतो वा-मिथ्यात्वाविरतिप्रमादकषायात्मकं, अनन्तगं अपारं वा परित्यज्य 'निरपेक्षः' सर्वममतास्नेहसम्बन्धशून्यः सन् मोक्षाय परिव्रजेत्, संयमानुष्ठाने तिष्ठेत्। य एवं संयमानुष्ठाने यतते स साधुर्ज्ञेय इति गाथार्थः॥ ७ ॥

स एवं साधुरहिंसादिषु व्रतेषु प्रयतेत, तत्राहिंसाप्रसिद्ध्यर्थमाह—

पुढवी आऊ अगणी वाऊ, तणरुक्खसबीयगा। अंडया पोयजराऊ-रससंसेयउब्भिया ॥ ८ ॥

व्याख्या—* पृथिवीकायिकाः सूक्ष्मबादरपर्याप्तकापर्याप्तकभेदेन भिन्नाः, तथा अप्काय-अग्निकाय-वायुकायिकाश्चैवम्भूता, एवं वनस्पतिकायिकास्तेषु भेदानाह—तृणानि कुशादीनि, वृक्षा आम्राशोकादिकाः, सबीजा—बीजसहिताः, बीजानि शालिगोधूमादीनि, एते एकेन्द्रियाः। पञ्चेन्द्रियानाह—अण्डजाः-शकुनिगृहकोकिलसरीसृपादयः, पोतजाः—हस्ति—

* नास्त्येतद्विद्यान्तर्गतो वृत्तिपाठः पुस्तकान्तरीयप्रतिकृतिकेऽपि ।

शरभादयः, जरायुजा-गोमहिष्यादयः, रसा-दधिसौवीरकादिजाता रसजास्तथा संस्वेदजा-यूकामत्कुणादयः, उद्भिज्जाः-खञ्जरीटकदर्दुरादय इति । अज्ञातभेदा हि दुःखेन रक्ष्यन्त इत्यतो भेदेनोपन्यास इति (गाथार्थः) ॥ ८ ॥*

एतेहिं छहिं काएहिं, तं विज्जं परिजाणिया । मणसा कायवक्केणं, णारंभी ण परिग्गही ॥ ९ ॥

व्याख्या—साधुरेभिः पूर्वोक्तैः षड्भिरपि कायैः त्रसस्थावररूपैः [सूक्ष्मबादर]पर्याप्तापर्याप्तकभेदभिन्नैर्नारम्भी न परिग्रही स्यात् । तदेतद्विद्वान्-सश्रुतिको ज्ञपरिज्ञया ज्ञात्वा प्रत्याख्यानपरिज्ञया च मनोवाक्कायकर्मभिर्जीवोपमर्दकारिणमारम्भं परिग्रहं च परिहरेदिति गाथार्थः ॥ ९ ॥ शेषव्रतान्यधिकृत्याह—

मुसावायं बहिद्धं च, उग्गहं च अजाइया । सत्थादाणाइं लोगंसि, तं विज्जं परिजाणिया ॥ १० ॥

व्याख्या—मृषावादं 'बहिद्धं'ति मैथुनं 'अवग्रहं' परिग्रहमयाचित-मदत्तादानं, एतानि च मृषावादादीनि प्राण्युपतापकारित्वात् शस्त्राणीव-शस्त्रप्रायाणि वर्तन्ते, तथा कर्मोपादानकारणान्यस्मिंल्लोके वर्तन्ते । तदेतत्सर्वं विद्वान् ज्ञपरिज्ञया ज्ञात्वा प्रत्याख्यानपरिज्ञया च परिहरेदिति गाथार्थः ॥ १० ॥ किञ्च—

पलिउंचणं च भयणं च, थंडिल्लुस्सयणाणि य । धूणादाणाइं लोगंसि, तं विज्जं परिजाणिया ॥ ११ ॥

व्याख्या—पञ्चमहाव्रतधारणमपि कषायिणो निष्फलं स्यात्, अतस्तत्साफल्यापादनार्थं कषायनिरोधो विधेय इति दर्शयति । तत्र 'पलिउंचणं' (परिकुञ्चनं) माया 'भजनो' लोभः 'स्थंडिलः' क्रोधः 'उच्छ्रयो' मानः, एतानि

परिकुञ्चनादीनि अस्मिँल्लोके 'आदानानि' कर्मोपादानकारणानि वर्तन्ते। तदेतत् विद्वान् पुनश्च मुनीहि वा ज्ञपरिज्ञया प्रत्याख्यानपरिज्ञया च प्रत्याचक्षीतेति गाथार्थः ॥ ११ ॥ अथोत्तरगुणानधिकृत्याह—

धोयणं रयणं चेव, वत्थीकम्मं विरेयणं। वमणंजणपलीमंथं, तं विज्जं परिजाणिया ॥ १२ ॥

व्याख्या—'धावनं' प्रक्षालनं हस्तपादवस्त्रादेः, रञ्जनमपि तेषामेव, तथा बस्तिकर्म—अनुवासनारूपं, तथा विरेचनं, तथाञ्जनं नयनयोः, अन्यदपि शरीरसँस्कारादिकं यत्संयमपलिमन्थकारि—संयमोपघातकारि विद्वान् प्रत्याचक्षीत—परिहरेदिति गाथार्थः ॥ १२ ॥ अपि च—

गंधमल्लसिणाणं च, दंतपक्खालणं तहा। परिग्गहित्थिकम्मं च, तं विज्जं परिजाणिया ॥ १३ ॥

व्याख्या—'गन्धं' सुगन्धिद्रव्यं 'माल्यं' पुष्पमालादि 'स्नानं' शरीरधावनं, दन्तप्रक्षालनं [तथा परिग्रहः—सचित्तादेः स्वीकरणं] तथा स्त्रियो दिव्यमानुष्यतैरश्च्यः, तथा हस्तकर्म सावद्यानुष्ठानं वा, तदेतत्सर्वं कर्मोपादानकारणत्वेन परिज्ञाय विद्वान् परित्यजेदिति गाथार्थः ॥ १३ ॥ किञ्चान्यत्—

उद्देसियं कीयगडं, पामिच्चं चेव आहडं। पूयं अणेसणिज्जं च, तं विज्जं परिजाणिया ॥ १४ ॥

व्याख्या—साधुनिमित्तं यद्दानाय स्थाप्यते—तदौद्देशिकं 'क्रीतं' मूल्येन गृहीतं 'प्रामित्यं' साध्वर्थमन्यत उद्यतकं यद्गृह्यते 'आहृतं' साध्वर्थं गृहस्थेन आनीय यद्दीयते, तथा 'पूय'मिति आधाकर्मावयवसम्पृक्तं शुद्धमप्याहारजातं पूतिभवति।

किम्बहुना ? यत्केनचिद्दोषेण अनेषणीयमशुद्धं तत्सर्वं विद्वान् परिज्ञाय परिहरेदिति गाथार्थः ॥ १४ ॥ किञ्च—

आसूणिमक्खिरागं च, गिद्धुवघायकम्मगं । उच्छोलणं च कक्कं च, तं विज्जं परिजाणिया ॥ १५ ॥

व्याख्या—येन आहारजातेन बलवानुपजायते तदाशूनीत्युच्यते, यदि वा 'आसूणी'ति श्लाघा, श्लाघितः सन् कश्चिल्लघुप्रकृतिको दर्पाध्मातत्वादुच्छूनवद् भवति, तां वर्जयेत् । तथाऽक्षिरागं—अक्ष्णो रञ्जनं शोभाकारी तदपि वर्जयेत् । तथा रसेषु विषयेषु वा गृद्धिं तथोपघातकर्म येनकेनचित्कर्मणाऽपरेषां जन्तूनामुपघातो भवति । तथा 'उच्छोलणं'ति अयतनया शीतोदकादिना (वा) हस्तपादादिक्षालनं, तथा 'कल्कं' शरीरोद्वर्तनकं, तदेतत्सर्वं कर्मबन्धहेतुं ज्ञात्वा विद्वान् परिहरेदिति गाथार्थः ॥ १५ ॥ तथा च—

संपसारी कयकिरिए, पसिणायतणाणि य । सागारियं च पिंडं च, तं विज्जं परिजाणिया ॥ १६ ॥

व्याख्या—असंयतैः समं 'सम्प्रसारणं' पर्यालोचनं परिहरेत् । एवं असंयमानुष्ठानं प्रत्युपदेशदानं 'कयकिरिए' त्ति कृता शोभना गृहकरणादिका क्रिया येन स कृतक्रियस्तस्य प्रशंसनं—असंयमानुष्ठानप्रशंसनं परिहरेत् । तथा 'प्रश्नस्य' दीपावतारादेः आविष्करणं यदिवा लौकिकव्यवहारप्रश्ननिर्णयनानि 'सागारिकः' शय्यातरस्तस्य पिण्डं यदिवा 'सागारिकपिण्डं' सूतकगृहपिण्डं जुगुप्सितं वर्णापसदपिण्डं वा, तदेतत्सर्वं विद्वान् परिहरेदिति गाथार्थः ॥ १६ ॥

अट्ठावयं न सिक्खिज्जा, वेहाईयं च नो वदे । हत्थकम्मं विवायं च, तं विज्जं परिजाणिया ॥ १७ ॥

व्याख्या—' अर्थपदं ' धनोपार्जनोपायं, अथवा द्यूतक्रीडा, अन्यदपि प्राण्युपमर्दकारिशास्त्रं न शिक्षयेत्तथा ' वेधो ' धर्मानुवेधस्तस्मादतीतं—धर्मानुवेधातीतं अधर्मप्रधानं वचो नो वदेत् । तथा ' हस्तकर्म ' हस्तव्यापारप्रधानः कलहस्तं तथा विरुद्धवादं—विवादं, शुष्कवादं, तदेतत्सर्वं संसारभ्रमणकारणं परिज्ञाय विद्वान् परिहरेदिति गाथार्थः ॥ १७ ॥

पाणहाओ य छत्तं च, णालीयं बालवीयणं । परकिरियं अन्नमन्नं च, तं विज्जं परिजाणिया ॥ १८ ॥

व्याख्या—उपानहौ काष्ठपादुके च तथा छत्रमातपादिनिवारणाय, तथा 'नालिका' द्यूतक्रीडाविशेषः, तथा बालव्यजनं, तथा ' परक्रियां ' परस्य—गृहस्थादेः क्रियां—सावद्यारम्भिकां, इत्यादि सर्वं विद्वान् परिहरेदिति गाथार्थः ॥ १८ ॥

उच्चारं पासवणं, हरिएसु न करे मुणी । वियडेण वा वि साहट्टु, णायमेज्ज कयाइवि ॥ १९ ॥

व्याख्या—उच्चारप्रस्रवणादिकां क्रियां हरितेषु—बीजेषु अस्थण्डिले वा मुनिर्न कुर्यात्, तथा ' विकटेन ' अचित्तेनोदकेन संहृत्य—अपनीय बीजानि हरितानि वा ' नाचमेत ' न निर्लेपनं कुर्यात् किमुताविकटेनेति गाथार्थः ॥ १९ ॥

परमत्ते अन्नपाणं, ण भुंजेज्ज कयाइवि । परवत्थं अचेलो वि, तं विज्जं परिजाणिया ॥ २० ॥

व्याख्या—'परमात्रे' गृहस्थभाजने अन्नपानकपरिभोगं न कुर्यात् । " कंसेसु+कंसपाएसु, कुंडमोएसु वा पुणो ।

+ ' कांस्येषु ' (करोटिकादिषु) ' कांस्यपात्रेषु ' (स्थालिकादिषु) ' कुण्डमोदेषु ' हस्तिपादाकारमृन्मयभाजनेषु, भुञ्जानोऽशनपानादीनाचारात्परिभ्रश्यति ।

भुंजंतो असणपाणाइं, आयारा परिभस्सई ॥ १ ॥ " इत्यादि (दश. अ. ६ गा. ५१) गाथाप्रामाण्यात्-गृहस्थपात्रेषु न भुञ्जीत। तथा अचेलोऽपि सन् ' परवस्त्रं ' गृहस्थवस्त्रं न भुञ्जीत, परभाजनं परवस्त्रं च संयमविराधनाकारणं मत्वा विद्वान् परिहरेदिति गाथार्थः ॥ २० ॥

आसंदी पलियंके य, निसिज्जं च गिहंतरे। संपुच्छणं सरणं वा, तं विज्जं परिजाणिया ॥ २१ ॥

व्याख्या—' आसन्दी ' आसनविशेषः ' पर्यङ्कः ' शयनविशेषः, [गृहस्यान्तः-मध्ये] गृहयोर्वा मध्ये ' निषद्या ' उपवेशनं " ×गंभीरविजया एए, [पाणा दुप्पडिलेहगा। × × × × " दश. अ. ६] इत्यादिवचनात्। तथा " *गोयरग्गपविट्ठो उ, न निसीएज्ज कत्थई "। [कहं च न पबंधेज्जा, चिट्ठित्ता ण व संजए ॥ ८ ॥ " दश. अ. ५. उ. २] इत्यादि। तथा गृहस्थगृहे कुशलादिप्रच्छनं, इत्यादि सर्वं संसारकारणं ज्ञात्वा विद्वान् परिहरेदिति गाथार्थः ॥ २१ ॥

जसं कित्तिं सिलोयं च, जा य वंदणपूयणा। सव्वलोयंसि जे कामा, तं विज्जं परिजाणिया ॥ २२ ॥

व्याख्या—यशः कीर्तिं श्लाघां च परिहरेत्। राजादिभ्यो वन्दना-पूजनं सत्कारसन्मानादि न इच्छेत्-नाभिलषेत्।

× ' गम्भीरविजया ' अप्रकाशाश्रया ' एते ' आसन्दकादयः, अत एतेषु प्राणा दुष्प्रतिलेख्या भवन्ति।

* गोचराग्रप्रविष्टस्तु न निषीदेत्कुत्रचित्। कथां च न प्रबध्नीयात्, स्थित्वा न च संयतः।

(सर्वस्मिँल्लोके ये) इच्छा-मदनरूपाः कामा इत्यादि सर्वं विद्वान् परिहरेदिति गाथार्थः ॥ २२ ॥

जेणेहं निव्वहे भिक्खू, अन्नपाणं तहाविहं। अणुप्पयाणमन्नेसिं, तं विज्जं परिजाणिया ॥ २३ ॥

व्याख्या—येन अन्नपानेन तथाविधेन सुपरिशुद्धेन कारणापेक्षया त्वशुद्धेन वा इहाऽस्मिँल्लोके इदं संयमयात्रादिकं दुर्भिक्षरोगातङ्कादिकं वा भिक्षुर्निर्वहे-न्निर्वाहयेद्वा, तदन्नपानं द्रव्यकालापेक्षया शुद्धं कल्प्यं गृह्णीयात्। तदन्नपानादि अन्यस्मै साधवे संयमयात्रादिनिर्वहणसमर्थं दद्यात्। तथा तेषामशनपानादीनामनुप्रदानं गृहस्थानां परतीर्थिकानां स्वयूथ्यानां वा संयमोपघातुकं नानुशीलयेदिति, तदेतत्सर्वं ज्ञपरिज्ञया ज्ञात्वा प्रत्याख्यानपरिज्ञया परिहरेदिति गाथार्थः ॥ २३ ॥

अथ यदुपदेशेनैतत्सर्वं कुर्यात्तं दर्शयितुमाह--

एवं उदाहु निग्गंथे, महावीरे महामुणी। अणंतनाणदंसी से, धम्मं देसितवं सुतं ॥ २४ ॥

व्याख्या—इत्यादि सर्वं धर्माध्ययनगतं न आचरेत्। 'उदाहु' उदाहृतवान् श्रीमहावीरो महानिर्ग्रन्थो महामुनिः, अनन्तज्ञानदर्शनी स भगवान् 'धर्मं' श्रुतचारित्रलक्षणं तथा श्रुतं जीवादिपदार्थप्रकाशकं प्रकाशितवान् इति गाथार्थः ॥ २४ ॥

भासमाणो न भासेज्जा, णेव वंफेज्ज मम्मयं। मातिट्ठाणं विवज्जेज्जा, अणुचिंतिय वियागरे ॥ २५ ॥

व्याख्या—यथाऽन्यः कश्चिद्रत्नाधिको भाषमाणः स्यात्तदन्तर एवाहं विद्वान्-गीतार्थोऽहमित्येवमभिमानवान्न भाषेत। तथा मर्मकं न भाषेत। तथा यद्वचनमुच्यमानं तथ्यमतथ्यं वा सद्यस्य कस्यचिन्मनःपीडामाधत्ते तद्विवेकी न

भाषेतेति भावः । यद्वा 'मामकं' ममीकारः—पक्षपातस्तं भाषमाणो 'न संपेहञ्ज'त्ति नाभिलषेत् । तथा 'माइट्ठाणं' मायाप्रधानं वचो वर्जयेत्, मातृस्थानं न कुर्यात् । यदा वक्तुकामो भवति तदा प्रागेव चिन्त्य वचनमुदाहरेत्, परानभिघातकं न वदेदिति गाथार्थः ॥ २५ ॥

तत्थिमा तइया भासा, जं वदित्ताऽणुतप्पती। जं छन्नं तं न वत्तव्वं, एसा आणा नियंठिया ॥ २६ ॥

व्याख्या—सत्या असत्या सत्यामृषा असत्यामृषा, एवं भाषाचतुष्टयं, तत्र सत्यामृषेत्येतदभिधाना तृतीया भाषा, सा च किञ्चित्सत्या किञ्चिन्मृषेत्येवंरूपा, साऽपि न वक्तव्या, यतः—'दशदारका जाता मृता वा' तदत्र न्यूनाधिकसम्भवे सत्यत्वाव्यभिचारादसत्यामृषेति । एवंरूपां भाषां न भाषेत । या तु भाषणानन्तरं 'किं मयैवम्भूतेन भाषितेने'त्येवं पश्चात्तापं विधत्ते, तथा च जन्मान्तरे तज्जनितेन दोषेण क्लिश्यते तादृशीं भाषां न वदेत् । तथा प्रथमाऽपि भाषा सत्या या प्राण्युपतापेन दोषानुषंगिणी—दोषकलङ्किता सा न वाच्या, तथा द्वितीयाऽपि भाषा 'असत्या' सद्भूतार्थविसंवादिनी सा तु न वक्तव्या, धर्मादिकारणे वक्तव्याऽपि—मृगाः प्रत्यक्षेण दृष्टा अपि 'न मया दृष्टा' एवं कारणे वदतो न दोषः । मिश्राऽपि भाषा दोषाय, तथा चतुर्थ्यपि असत्यामृषा या बुधैरनाचीर्णा, सा न वक्तव्येति । सत्याया अपि दोषानुषंगित्वं दर्शयति—यद्वचः 'छन्नं'ति 'क्षणु हिंसायां' हिंसाप्रधानं, तद्यथा—'बध्यतां चौरोऽयं, लूयन्तां केदाराः, दम्यन्तां गोरथकाः' इत्यादि, यदि वा 'छन्न'न्ति परलोकैरपि यत्नतः प्रच्छाद्यते तत्सत्यमपि न वक्तव्यं, एषा आज्ञा—उपदेशो 'निर्ग्रन्थो' भगवान् वीरस्तस्येति गाथार्थः ॥ २६ ॥

होलावायं सहीवायं, गोयावायं च नो वदे । तुमं तुमंति अमणुन्नं, सव्वसो तं न वत्तए ॥ ॥ २७ ॥

व्याख्या—होलावादः, सखिवादः, गोत्रोद्घाटनवादः–गोत्रवादः, इत्येवं साधुर्नो वदेत् । तथा ' तुमं तुमं 'ति तिरस्कारवचनं, बहु वचनोच्चारणयोग्ये एकवचनान्तं अवहेलावचनं ' अमनोज्ञं ' प्रतिकूलं मनःविघ्नकं अन्यदपि साधुर्न वदेदिति गाथार्थः ॥ २७ ॥

अकुसीले सया भिक्खू, णेव संसग्गियं भवे । सुहरूवा तत्थुवस्सग्गा, पडिबुज्झेज्ज ते विऊ ॥ २८ ॥

व्याख्या—भिक्षुरकुशीलो भवेत् । न च कुशीलैः समं संसर्गं ' भजेत ' सेवेत, कुशीलसंसर्गे सातागौरवप्रमादाः संयमोपघातकारिण उपसर्गाः सम्भवन्ति, यतस्ते सातागौरवाश्रिता एवं वदन्ति–धर्माधारं शरीरं यथा तथा आधाकर्मादिना पालनीयमेव × । प्रासुकोदकेन दन्तधावनादि क्रियते तदा को दोषः ? उपानहादिधारणे को दोषः ? साम्प्रतमल्पानि संहननानि अल्पधृतयश्च संयमे जन्तवः, इत्येवमादि कुशीलोक्तं श्रुत्वा अल्पसत्त्वास्तत्र रज्यन्ते, इत्येतद्विद्वान् विवेकी ' प्रतिबुध्येत ' जानीयात् । ज्ञात्वा च कुशीलसंसर्गं परिहरेदिति गाथार्थः ॥ २८ ॥

नन्नत्थ अंतराएणं, परगेहे ण णिसीयए । गामकुमारियं किड्डं, नातिवेलं हसे मुणी ॥ २९ ॥

व्याख्या—साधुर्गृहस्थगृहे कारणं विना नोपविशेत् । यतः–" तिण्हमन्नयरागस्स, निसेज्जा जस्स कप्पई । जराए

× " शरीरं धर्मसंयुक्तं, रक्षणीयं प्रयत्नतः । शरीरात्स्रवते धर्मः, पर्वतात्सलिलं यथा " ॥ १ ॥

अभिभूयस्स, वाहियस्स तवस्सिणो ॥ १ ॥" इति [दश. अ. ६, गा. ६०] वचनात् कारणे गृहस्थगृहे उपविष्टोऽपि न दोषः । तथा कश्चिदुपदेशलब्धिमान् धर्मोपदेशादिकारणे उपविशति तदा न क्षुण्णं । तथा ग्रामकुमारिका क्रीडा-कन्दुकादिना, तां न कुर्यात् । तथा आकुञ्चितनेत्रे नोच्चैः, हास्यकरणोत्पादितकर्मबन्धभयाच्च हसेत् । तथा चागमः— "जीवेणं भंते ! हसमाणे वा उस्सुयमाणे वा कइ कम्मपगडीओ बंधइ ?, गोयमा ! सत्तविहबंधए वा अट्ठविहबंधए वा" इत्यादि ॥ २९ ॥

अणुस्सुओ उरालेसु, जयमाणो परिव्वए । चरियाए अप्पमत्तो, पुट्ठो तत्थऽहियासए ॥ ३० ॥

व्याख्या—उदारेषु कामभोगेषु दृष्टेषु श्रुतेषु वा नोत्सुकः स्यात् । तथा मूलोत्तरगुणेषु उद्यमं कुर्वन् संयमे च यतमानः परिव्रजेत् । तथा चर्यायां भिक्षादिकायां अप्रमत्तः स्यात्, नाऽऽहारादिषु रसगार्ध्यं विदध्यादिति । तथा स्पृष्टश्च परीषहोपसर्गैस्तत्राऽदीनमनस्कः कर्मनिर्जरां मन्यमानो विषहेत्—सम्यक् सहेतादिति गाथार्थः ॥ ३० ॥

हम्ममाणो न कुप्पेज्जा, वुच्चमाणो न संजले । सुमणो अहियासेज्जा, ण य कोलाहलं करे ॥ ३१ ॥

व्याख्या—यष्टिमुष्टिभिर्हन्यमानो न कुप्येत्, दुर्वचनान्युच्यमानो न सञ्ज्वलेत्, न प्रतीपं-(प्रतिकूलं) भवेत्, किन्तु सुमनाः सर्वं कोलाहलमकुर्वन्नधिसहेतेति गाथार्थः ॥ ३१ ॥

---

१ जीवो भदन्त ! हसन्वा उत्सुकायमानो वा कति कर्मप्रकृतीर्बध्नाति ?, गौतम ! सप्तविधबन्धको वाऽष्टविधबन्धको वा ।

लद्धे कामे ण पत्थेज्जा, विवेगे एवमाहिए । आयरियाइं सिक्खेज्जा, बुद्धाणं अंतिए सया ॥ ३२ ॥

व्याख्या—लब्धान् कामान् प्रार्थयेत्, एवं कुर्वतो भावविवेक आख्यातः। तथा आर्याणि-आर्याणां कर्त्तव्यानि अनार्य[कर्त्तव्य]परिहारेण सदा शिक्षेत-अभ्यसेत्, एतावता गुरुकुलवास आसेवनीय इति गाथार्थः ॥ ३२ ॥

सुस्सूसमाणो उवासेज्जा, सुप्पन्नं सुतवस्सियं । वीरा जे अत्तपन्नेसी, धितिमंता जिइंदिया ॥ ३३ ॥

व्याख्या—तथा साधुः 'शुश्रूषमाणः' वैयावृत्त्यं कुर्वन् गुरुमुपासीत-सेवेत, तथा 'सुप्रज्ञं' गीतार्थं-स्वसमयपरसमयवेदिनं सुतपस्विनं गुरुं परलोकार्थी सेवेत । क एवं कुरुते ? जे[ये] वीरास्तथा आत्मप्रज्ञैषिणो धृतिमन्तो जितेन्द्रियास्ते गुरुपर्युपासिन + इति गाथार्थः ॥ ३३ ॥

गिहे दीवमपासंता, पुरिसादाणिया नरा । ते वीरा बंधणुम्मुक्का, नावकंखंति जीवितं ॥ ३४ ॥

व्याख्या—ये 'पुरुषादानीयाः' पुरुषप्रधाना महीपालस्ते ('गृहे') गृहस्थभावे-गृहस्थत्वे 'दीपं' भावदीपं श्रुतलाभमपश्यन्तः [अप्राप्नुवन्त] * सन्तः, अथवा 'द्वीपं' संसारोत्तारं अपश्यन्तश्चारित्रं स्वीकुर्वन्ति ते एवंविधा वीराः

+ "यदुक्तं—जस्स धिई तस्स तवो, जस्स तवो तस्स सुग्गई सुलहा । जे अधिइमंता पुरिसा, तवो वि खलु दुल्लहो तेसिं ॥ १ ॥" इति दृ०

* गृहस्थस्य सूत्रपठननिषेधोऽत्र स्पष्ट एव, गार्हस्थ्ये श्रुतलाभस्याप्राप्यत्वोक्तत्वात् । किञ्च-" योगरहितं-सम्यगकृतयोगोपचारं " आव० सू० हारि० पत्र ७२१, तथैव " विना योगकालग्रहणैर्विना तपसा च [यः] पठति वाचयति, अकृततपसः पार्श्वे च

बन्धनोन्मुक्ता असंयमजीवितं नावकाङ्क्षन्ति—न वाञ्छन्ति इत्यर्थः ॥ ३४ ॥

अगिद्धे सद्दफासेसु, आरंभेसु अणिस्सिए । सव्वं तं समयाऽतीतं, जमेतं लवियं बहु ॥ ३५ ॥

व्याख्या—शब्दरूपगन्धरसस्पर्शेष्वगृद्धः, आरम्भे 'अनिश्रितः' अप्रवृत्तः, यन्मया सर्वमेतदध्ययनादेरारभ्य प्रतिषिद्धत्वेन—यल्लपितं—उक्तं मया, तत्समयात्—आगमादतीत—मतिक्रान्तं समयप्रतिषिद्धं, तन्नाचरणीयं, यद्विधिद्वारेण सिद्धान्तानुसारेण तत्सर्वमाचरणीयं, एतावता यन्निषेधद्वारेणोक्तं तत्सर्वमनाचरणीयं यद्विधिद्वारेण कथितं तदाचरणीयमिति गाथार्थः ॥ ३५ ॥

अइमाणं च मायं च, तं परिन्नाय पंडिए । गारवाणि य सव्वाणि, निव्वाणं संधए मुणि त्तिबेमि ॥ ३६ ॥

व्याख्या—अतिमानं—महामानं, च शब्दात् तत्सहचरितं क्रोधं च, तथा मायां, च शब्दात्तत्कार्यभूतं लोभं च, तदेतत्सर्वं 'पण्डितो' विवेकी ज्ञपरिज्ञया परिज्ञाय प्रत्याख्यानपरिज्ञया परिहरेत् । तथा सर्वाणि गारवाणि ऋद्धिरससातरूपाणि सम्यग्-

---

यः शृणोति तस्य श्रुताज्ञाभङ्गः, आगमाज्ञाभङ्गो हि महते संसाराय ।" आचा० टी० जिनहंस० । इत्यादिशास्त्रप्रामाण्यात् कृतयोगवहनयोः साधुसाध्व्योरपि सूत्रपठननिषेधस्तर्हि गृहस्थस्य का कथा ? इति सुविमृश्यं सुधीभिः ।

ज्ञात्वा परिहरेत्, परिहृत्य च निर्वाणमशेषकर्मक्षयरूपं 'अभयेत्' प्रार्थयेत् ॥ ३६ ॥ इतिः परिसमाप्त्यर्थे, ब्रवीमीति पूर्ववत् ॥

इति श्रीपरमसुविहितखरतरगच्छविभूषणश्रीमत्साधुरङ्गगणिवरसन्दृब्धायां श्रीमत्सूत्रकृताङ्गदीपिकायां धर्माख्यं नवमाध्ययनं समाप्तम् ।

अथ दशमं समाध्याख्यमध्ययनम् ।

अथ नवमानन्तरं दशमं समाधिनामाध्ययनं प्रारभ्यते, समाधिमन्तरेण धर्मोऽपि न भवति, समाधिपूर्वक एव धर्मः स्यादत्रेयमादिगाथा—

आघं मईममणुवीय धम्मं, अंजू समाहिं तमिणं सुणेह ।
अपडिन्न भिक्खू उ समाहिपत्ते, अनियाणभूतेसु परिव्वएज्जा ॥ १ ॥

व्याख्या—'मतिमान्' केवलज्ञानी 'अनुविचिन्त्य' ज्ञानेन ज्ञात्वा ['आघं'ति] आख्यातवान् । किम्? धर्मं श्रुतचारित्राख्यं । कथम्भूतं? 'ऋजुं' अवक्रं सरलं, कौटिल्यपरिहारेणावक्रं तथ्यं धर्ममाख्यातवान् । स धर्मः समाधिः, समाधिश्च धर्मध्यानादिकमिति । तमिमं धर्मं समाधिं वा भगवदुपदिष्टं शृणुत यूयमिति सुधर्मस्वामी प्राह । यत्राप्रतिज्ञो भिक्षुः

'अनिदानो' आश्रवरहितः संयमं पालयति स साधुः समाधिमान् ज्ञेय इति गाथार्थः ॥ १ ॥

उड्ढं अहेयं तिरियं दिसासु, तसा य जे थावर जेय पाणा ।
हत्थेहिँ पाएहिँ य संजमित्ता, अदिन्नमन्नेहि य णो गहिज्जा ॥ २ ॥

व्याख्या—ऊर्ध्वाधस्तिर्यक्षु सर्वलोके + ये त्रसाः स्थावराश्च जन्तवः सन्ति, ततश्च साधुस्तान् प्राणिनः हस्तपादाभ्यां 'संयम्य' बद्ध्वा अन्यथा वा कदर्थयित्वा यच्चेषां दुःखोत्पादनं, तन्न कुर्यात् । यदि वा हस्तपादौ च संयम्य संयतकायः सन्न हिंस्यात्, च शब्दादुच्छ्वासनिश्वासकासितक्षुतवातनिसर्गादिषु सर्वत्र मनोवाक्कायकर्मसु संयतो भूत्वा समाधिमनुपालयेत्तथा परैरदत्तं न गृह्णीयात् । एतावता सर्वव्रतपरिग्रहः कृत इति गाथार्थः ॥ २ ॥

सुयक्खायधम्मे वितिगिच्छतिण्णे, लाढे चरे आयतुले पयासु ।
आयं न कुज्जा इह जीवियट्ठी, चयं न कुज्जा सुतवस्सि भिक्खू ॥ ३ ॥

व्याख्या—येन साधुना सुष्ठु धर्म आख्यातः स स्वाख्यातधर्मा, एतावता गीतार्थः । गीतार्थतामन्तरेण स्वाख्यातधर्मत्वं न सम्भवति, तथा 'विगिगिच्छतिण्णो ।'× सर्वज्ञोक्तं तथेति प्रतिपद्यते, अनेन दर्शनसमाधिः 'दंसणेण य

+ "प्राच्यादिदिक्षु च" इति दर्श० । × "'विचिकित्सा' चित्तविप्लुतिर्विद्वज्जुगुप्सा वा, तां '[वि]तीर्णः' अतिक्रान्तः" इति वृहद्वृत्तौ ।

सदट्ठे' इति वचनात् । तथा 'लाढः' येन केनचित्प्रासुकाहारेणात्मानं यापयति-पालयतीति भावः । तथा 'प्रजाः' पृथिव्यादिप्राणिनः स्वात्मवत् पश्यति, एवंविधो महात्मा सर्वजीवेषु आत्मतुल्यं कल्पयति । तथा असंयमजीवितार्थी 'आयं' कर्माश्रवलक्षणं न कुर्यात् । तथा 'चय'माहारोपकरणादेः सञ्चयं न कुर्यात् । कः ? सुतपस्वी भिक्षुरिति गाथार्थः ॥ ३ ॥

सव्विंदियाभिनिव्वुडे पयासु, चरे मुणी सव्वतो विप्पमुक्के ।
पासाहि पाणे य पुढो वि सत्ते, दुक्खेण अट्टे परितप्पमाणे ॥ ४ ॥

व्याख्या—भिक्षुः 'प्रजासु' स्त्रीषु सर्वेन्द्रिय[रिभिः]निर्वृतः-संवृतेन्द्रियो भवेत्-चरेत्संयमानुष्ठानं, सर्वतो विप्रमुक्तः-निस्सङ्गो निष्किञ्चन इत्यर्थः । स एवम्भूतः पश्य प्राणिनः, किम्भूतान् ? दुःक्खेनासातावेदनीयोदयरूपेण 'आर्त्तान्' पीडितान् परितप्यमानान् पश्येति सम्बन्धो योज्य इति गाथार्थः ॥ ४ ॥

एतेसु बाले य पकुव्वमाणे, आवट्टती कम्मसु पावएसु ।
अतिवायतो कीरति पावकम्मं, निउंजमाणे वि करेति कम्मं ॥ ५ ॥

व्याख्या—'एतेषु' पूर्वोक्तेषु पृथिव्यादिषु जीवेषु 'बालः' अज्ञानी सङ्घट्टनपरितापोपद्रवादि कुर्वन् पुनस्तेष्वेव जीवेषु आगत्य 'आवर्त्यते' पीड्यते पापकर्माणि कुर्वाण इति, तदतिपातात्-प्राणिव्यपरोपणात्पापकर्म 'क्रियते' बध्यते । तथा मृषावादींश्च प्राणातिपातादौ 'नियोजयन्' व्यापारयन् पापकर्म 'करोति' बध्नाति, चशब्दान्मृषावादादिना च

पापकर्म समुच्चिनोतीति गाथार्थः ॥ ५ ॥

आदीणवित्ती वि करेति पावं, मंता उ एगंतसमाहिमाहु ।
बुद्धे समाहीइ रते विवेगे, पाणातिवाता विरते ठियप्पा ॥ ६ ॥

व्याख्या—स भिक्षुरादीनवृत्तिः—कृपणवनीपकादेरिवाहारार्थी दीनवृत्तिः, एवम्भूतोऽपि पापकर्म करोति, आहारार्थी दीनतां भजन् पापकर्म [illegible], [illegible] एवं मत्वा एकान्तेन यो भावरूपो ज्ञानसमाधिस्तं तीर्थङ्कराः संसारोत्तारणायाहुः । कोऽर्थः ? यो भावसमाधिः स एव संसारोत्तारणायालं, नवेवं 'बुद्धो' अवगततत्त्वः, ज्ञानादिके समाधौ एकान्तसुखोत्पादके 'रतो' व्यवस्थितः, विवेके चाहारोपकरणकषायपरित्यागरूपे रतः सम्बद्धभूतो भवति । प्राणातिपातविरतः, सन्मार्गानुगतः स्थितात्मा स्यादिति गाथार्थः ॥ ६ ॥ किञ्च—

सव्वं जगं तू समयाणुपेही, पियमप्पियं कस्सति णो करेज्जा ।
उट्ठाय दीणोय पुणो विसण्णो, संपूयणं चेव सिलोयकामी ॥ ७ ॥

व्याख्या—'सर्वं जगत्' सचराचरं प्राणिसमूहं 'समतानुप्रेक्षी' समतापश्यकः, समशत्रुमित्रः, समतायुक्तस्य न कश्चित्प्रियमप्रियं वा कुर्यात्, शत्रुमित्राभावात् । ईदृशो हि साधुः सम्पूर्णभावसमाधियुक्तो भवति । कश्चित्परीषहैस्तर्जितः संयमभग्नो दीनतामालम्ब्य विषयार्थी विषण्णः पुनर्गृहस्थत्वं प्रतिपद्यते । गारवत्रयगृद्धः पूजासत्काराभिलाषी स्यात्,

तदभावे दीनः सन् पार्श्वस्थादिभावं भजते। कश्चित्तु अन्नं वस्त्रपात्रादिना प्रार्थयेत्। श्लोककामी—महत्त्वार्थी व्याकरण-गणितज्योतिषनिमित्तशास्त्राणि पठति कश्चित्स भावसमाधिभ्रष्टो भवेदिति गाथार्थः ॥ ७ ॥ किञ्च—

अहाकडं चेव निकाममीणे, णिगामचारी य विसण्णमेसी।
इत्थीसु सत्ते य पुढो य बाले, परिग्गहं चेव पकुव्वमाणे ॥ ८ ॥

व्याख्या—साधूनाश्रित्य कृतं आहारोपकरणादिकं 'निकाममीणे' [अत्यर्थं] प्रार्थयते, तथा आधाकर्मादीनि तन्निमित्तं निमन्त्रणादीनि वा चरति। संयमोद्योगे विषण्णानां पार्श्वस्थादीनां विषण्णभावमेषते, सदनुष्ठाने विषण्णः संसारपङ्कावसन्नो भवति। तथा 'बालो' ऽज्ञः स्त्रीषु 'पृथक्' तद्भाषितहसितांगोपाङ्गेष्वासक्तः, द्रव्यमन्तरेण न तत् प्राप्तिर्भवतीति विचिन्त्य द्रव्योपार्जनाय परिग्रहमेव प्रकुर्वन् पापं कर्म समुचिनोतीति गाथार्थः ॥ ८ ॥

वेराणुगिद्धे णिचयं करेति, इओ चुते से दुहमट्ठदुग्गं।
तम्हा उ मेधावि समिक्ख धम्मं, चरे मुणी सव्वओ विप्पमुक्के ॥ ९ ॥

व्याख्या—येन परोपतापरूपेण कर्मणा वैरमनुबध्यते जन्मान्तरशतानुयायी भवति, तत्र गृद्धो वैरानुगृद्धः। पाठान्तरे 'आरंभसत्तो'त्ति आरम्भे—सावद्यानुष्ठाने सक्तो निरनुकम्पः सन् 'निचयं' कर्मोपादानरूपं करोति। स एवम्भूतः उपात्तवैरः कृतकर्मोपचयः इतः स्थानाच्च्युतो—मृतो जन्मान्तरमनुप्राप्तः सन् 'दुःखं' नरकादियातनास्थानं

अर्थतो 'दुर्गं' विषमं दुरुत्तारं उपैति। यत एवं तस्मान्मेधावी–विवेकी सम्पूर्णसमाधिगुणं जानन् धर्मं श्रुतचारित्ररूपं 'समीक्ष्य' पर्यालोच्य 'मुनिः' साधुः सर्वतो विप्रमुक्तः संयमानुष्ठानं चरेत्' अनुतिष्ठेत्। योऽपि–आरम्भादिसङ्गादि-प्रमुक्तोऽनिश्रितभावेन विहरेदिति गाथार्थः ॥ ९ ॥

आयं न कुज्जा इह जीवियट्ठी, असज्जमाणो य परिव्वएज्जा ।
निसम्म भासी य विणीय गिद्धिं, हिंसन्नियं वा ण कहं करेज्जा ॥ १० ॥

व्याख्या—साधुरिहासंयमजीवितार्थी 'आयं' द्रव्यादिलाभं न कुर्यात्, द्रव्यसञ्चयं न कुर्यात्। पाठान्तरे– 'छंदं ण कुज्जा' छन्दं–प्रार्थनाऽभिलापं इन्द्रियाणां स्वस्वविषयाभिलाषं वा न कुर्यात्। 'असज्जमानः' गृहपुत्रकलत्रादिषु सङ्गं–प्रतिबन्धं अकुर्वन् परिव्रजेत्–उद्यतविहारी भवेत्। किं कृत्वा? 'विनीय' अपनीय गृद्धिं विषयेषु 'निशम्य' सम्यगवगम्य–पूर्वोत्तरेण पर्यालोच्य भाषको भवेत्'हिंसन्नियं वा ण कहं करेज्जा' हिंसान्विता–प्राण्युपमर्दरूपां कथां न कुर्यात्, यदात्मनः परेषां च कर्मोपादानभूतं वचो न भाषणीयं, "जेणं परो दूमिज्जइ, अवराहो होइ जेण भणिएणं। अप्पा पडइ किलेसे, तं न हु जंपंति गीयत्था ॥ १ ॥" एतावता 'अश्नीत पिबत खादत मोदत हत छिन्त प्रहरत पचत' इत्यादिकां पापोपादानभूतां वाचं न भाषेत इति गाथार्थः ॥ १० ॥

---

१ येन परो दूयते(पीड्यते)ऽपराधी भवति येन भणितेन। आत्मा पतति क्लेशे, तन्नैव जल्पन्ति गीतार्थाः ॥ १ ॥

अहाकडं वा न णिकामएज्जा, निकामयंते य ण संथवेज्जा ।
धुणे उरालं अणुवेहमाणे, चिच्चा ण सोयं अणुवेक्खमाणे ॥ ११ ॥

व्याख्या—'आधाय कृतं' साधूनुद्दिश्य कृतं आहारजातं निश्चयेन न कामयेत्–नाभिलषेत् । 'निकामयतो' निश्चयेन अभिलषतः औद्देशिकं भोजनं पार्श्वस्थादीन् न संस्तवयेन्नोपबृंहयेत्तैर्वा सार्द्धं संस्तवं न कुर्यात् । 'धुणे उरालं' औदारिकं शरीरं धुनीयात्–कृशं कुर्यात् । कर्मनिर्जरामनुप्रेक्षमाण औदारिकं शरीरं विकृष्टतपसा कृशयेत् । अथवा बहुजन्मान्तर-सञ्चितं कर्म 'उदारं' मोक्षं अनुप्रेक्षमाणः धुनीयात्, तस्मिंश्च धूयमाने कृशी भवति शरीरे कदाचिच्छोकः स्यात्, तं त्यक्त्वा वाञ्छितोपकरणरक्तिमोहः सन् शरीरं धुनीयात्, न शरीरे प्रतिबन्धं कुर्यादिति भावः । इति गाथार्थः ॥ ११ ॥

एगत्तमेयं अभिपत्थएज्जा, एवं पमोक्खो न मुसंति पास ।
एसप्पमोक्खो अमुसे वरेवि, अकोहणे सच्चरते तवस्सी ॥ १२ ॥

व्याख्या—साधुरेकत्व–मसहायत्वमभिप्रार्थयेत्, एकत्वाध्यवसायी स्यात्, यतः संसारे जन्ममरणरोगशोकाकुले स्वकर्मणा विलुप्यमानानां प्राणिनां न कश्चित्त्राणसमर्थः सहायः स्यात् । यतः–"[1] एगो मे सासओ अप्पा, नाणदंसण-संजुओ । सेसा मे बाहिरा भावा, सव्वे संजोगलक्खणा ॥ १ ॥" तथा अनया एकत्वभावनया 'प्रमोक्षः'

---

१ एको मे शाश्वत आत्मा, ज्ञानदर्शनसंयुतः । शेषा मे बाह्या भावाः, सर्वे संयोगलक्षणाः ॥ १ ॥

विप्रमुक्तसङ्गः स्यात् । ‘ न चैतन्मृषा ’ नालीकं इत्येवं पश्य, एतदुक्तं—[illegible] सत्यमेव

सत्यभावमेव । तथा ‘ वरोऽपि ’ प्रधानोऽप्ययमेव भावसमाधिर्वा । अथवा यस्तपस्वी—तपोनिष्टप्तदेहः अक्रोधनः अमानः अमायः अलोभश्च सत्यरतः एष एव प्रमोक्षः ‘ अमृषा ’ सत्यो ‘ वरः ’ प्रधानश्च वर्तते इति गाथार्थः ॥ १२ ॥ किञ्च—

इत्थीसु या आरय मेहुणा उ, परिग्गहं चेव अकुव्वमाणे ।
उच्चावएसु विसएसु ताई, निस्संसयं भिक्खु समाहिपत्ते ॥ १३ ॥

व्याख्या—दिव्यमानुषतिर्यग्रूपासु स्त्रीषु त्रिविधास्वपि विषयभूतासु यन्मैथुनं, तस्मादासमन्ताच्च रतो—निवृत्तः, तुशब्दात्प्राणातिपात[ादि]निवृत्तश्च, तथा परिग्रहं चाकुर्वन्, उच्चावचेष्वपि विषयेषु रागद्वेषरहितः, तथा ‘ त्रायी ’ षट्कायरक्षकः ‘ निःसंशयं ’ निश्चयेन परमार्थतो भिक्षुरेवम्भूतः समाधिं प्राप्तो भावसाधुर्भवतीति गाथार्थः ॥ १३ ॥

एतावता विषयेभ्यो निवृत्त एव भावसमाधियुक्तो भवतीत्याह—

अरइं रइं च अभिभूय भिक्खू, तणाइफासं तह सीयफासं ।
तेउं [उण्हं] च दंसं च हियासएज्जा, सुब्भिं च दुब्भिं च तितिक्खएज्जा ॥ १४ ॥

व्याख्या—पुनः साधुः कीदृशो भवति ? संयमे अरतिं असंयमे च रतिं ‘ अभिभूय ’ निराकृत्य निष्किञ्चनतया तृणादिकान् ‘ स्पर्शान् ’ परीषहांस्तथा निम्नोन्नतभूप्रदेशस्पर्शांश्च सम्यगधिसहेत । तथा शीतोष्ण-दंश-मशक-क्षुत्पि-

पानादिकान् परीषहान् अक्षोभ्यतया निर्जरार्थमध्यासयेत्—अधिसहेत। तथा सुरभिगन्धं दुरभिगन्धं च, चशब्दादाक्रोश-वधादिकांश्च परीषहान् मुमुक्षुरितितिक्षयेदिति गाथार्थः ॥ १४ ॥ किञ्चान्यत्—

गुत्तो वईए य समाहिपत्तो, लेसं समाहट्टु परिव्वएज्जा ।
गिहं न छाए नवि छायएज्जा, संमिस्सभावं पयहे पयासु ॥ १५ ॥

व्याख्या—'वाचा गुप्तो' मौनव्रती सुपर्यालोचितधर्मसम्बन्धभाषी चेत्येवं भावसमाधिं प्राप्तो भवति। तथा शुद्धां तेजोलेश्यादिकां 'समाहृत्य' उपादाय अशुद्धां च कृष्णादिकां लेश्यां परिहृत्य 'परि' समन्तात्संयमानुष्ठाने 'व्रजेत्' गच्छेत्। तथा गृहं स्वतोऽन्येन वा न छादयेत्, तथाऽपरमपि गृहादेः संस्कारं न कुर्यात्, अन्यत् परकृतबिलनिवासित्वात्साधोः, अन्यदपि गृहस्थकर्तव्यं न कुर्यात्। तथा प्रजासु—[स्त्रीषु] सम्मिश्रभावं प्रजह्यात्। एतदुक्तं भवति—प्रव्रजितोऽपि पचनपाचनादिकां क्रियां कुर्वन् कारयंश्च गृहस्थैः सम्मिश्रभावं भजते, यदि वा 'प्रजासु' स्त्रीषु स्त्रीभिर्वा सह यः सम्मिश्रीभावस्तं अविकलसंयमार्थी परित्यजेदिति गाथार्थः ॥ १५ ॥ किञ्च—

जे केइ लोगंमि उ अकिरियआया, अन्नेण पुट्ठा धुयमादिसंति ।
आरंभसत्ता गढिता य लोए, धम्मं न याणंति विमुक्खहेउं ॥ १६ ॥

व्याख्या—ये केचन अस्मिँल्लोके अक्रिय आत्मा एवं मन्यन्ते, अक्रियात्मानस्तु सांख्यास्तेषां हि मते सर्वव्यापित्वा-

दात्मा निष्क्रियः पठ्यते, यथा प्रोक्तं—" अकर्त्ता निर्गुणो × भोक्ता आत्मा कापिलदर्शने " इति वचनात् । यदा अक्रियमेवात्मा तर्हि कथं मोक्षावाप्तिः ? एवं पृष्टाः सन्तस्ते सांख्याः अक्रियेऽप्यात्मनि ' ध्रुवं ' मोक्षं प्रतिपादयन्ति, ते तु पचनपाचनादिके स्नानार्थं जलावगाहनरूपे चारम्भे-सावद्ये सक्ताः, गृद्धाः लोके, मोक्षैकहेतुभूतं धर्मं श्रुतचारित्राख्यं न जानन्ति, कुमार्गग्राहिणो न सम्यगवगच्छन्तीति गाथार्थः ॥ १६ ॥

पुढो य छंदा इह माणवा उ, किरियाकिरीणं च पुढो य वायं ।
जायस्स बालस्स पकुव्व देहं, पवड्ढती वेरमसंजतस्स ॥ १७ ॥

व्याख्या—' पृथक्छन्दाः ' पृथगभिप्रायाः, इहास्मिन्मनुष्यलोके मानवाः सन्ति । इह मनुष्यलोके ये केचन मानवाः सन्ति ते सर्वेऽपि पृथगभिप्राया एव सन्ति । कथं पृथगभिप्रायाः ? क्रियाअक्रिययोः पृथक्त्वेन, एके क्रियावादिनः एकेऽक्रियावादमाश्रिताः । एके वदन्ति—" क्रियैव फलदा पुंसां, न ज्ञानं फलदं स्मृतम् । यतः स्त्रीभक्ष्यभोगज्ञो, न ज्ञानात्सुखितो भवेत् ॥ १ ॥ " इति क्रियावादिनो वदन्ति । अन्ये एतद्विपर्ययेण अक्रियावादमाश्रिताः, एवं च नानाऽभिप्राया मानवाः क्रियाऽक्रियादिकं पृथग्वादमाश्रिताः, मोक्षैकहेतुं धर्ममजानानाः, आरम्भमग्नाः, इन्द्रियवशगाः सातगारवाभिलाषैस्तत्कुर्वन्ति—जातस्य ' बालस्य ' सदसद्विवेकविकलस्य सुखैषिणो देहं खण्डशः कृत्वाऽऽत्मनः सुखमु-

× सत्वरजस्तमोगुणै रहितः ।

स्वादयन्ति, तदेवं परोपघातक्रियया तेषां जन्मान्तरशतानुबन्धि वैरं वर्द्धते, को भावः ? हिंसादिषु कर्मसु प्रवृत्तस्य निरनु-कम्पस्य या आत्मा प्रगल्भता-धार्ष्ट्यं, तया वैरमेव प्रवर्द्धत इति गाथार्थः ॥ १७ ॥ अपि च—

आउक्खयं चेव अबुज्झमाणे, ममाइ से साहसकारि मंदे ।

अहो य राओ परितप्पमाणे, अट्टे सुमूढे अजरामरुव्व ॥ १८ ॥

व्याख्या—कश्चिन्मूढः आयुःक्षयं अजानन् आरम्भप्रवृत्तो 'ममाइ'त्ति किमुच्यते ? ममत्ववान् भवति+ 'इदं मे अहमस्य स्वामी' इत्येवं च 'मन्दो' बालः साहसकारी स्यात्, कामभोगेष्वसक्तः सन् अह्नि रात्रौ च धनव्याधी मम्मण-वणिग्वदार्तध्यानध्यायी कायेनापि क्लिश्यते । यतः—" अजरामरवद्बालः, क्लिश्यते धनकाम्यया । शाश्वतं जीवितं चैव, मन्यमानो धनानि च ॥ १ ॥ " तदेवं अट्टे—इति आर्तध्यानी-मूढः सुमूढः अजरामरवदात्मानं मन्य-मानोऽपगतशुभाध्यवसायोऽहर्निशमारम्भे प्रवर्तत इति गाथार्थः ॥ १८ ॥ अपि च—

जहाहि वित्तं पसवो य सव्वे, जे बंधवा जे य पिया य मित्ता ।

+ " यथा कश्चिद्वणिग्महता क्लेशेन बहुमूल्यरत्नानि प्राप्योज्जयिन्या बहिरावासितः । स च ' राजचौरदायादभयाद्रात्रौ रत्नान्येवमेवं नगरे नयामी, एवं विचाराकुलो निशाक्षयं न ज्ञातवान्, दिवैव रत्नानि प्रवेशयन् राजपुरुषैस्तो रत्नानि गृहीतानि चेति " वृ० ।

लालप्पती सेवि य एइ मोहं, अन्ने जणा तं से हरंति वित्तं ॥ १९ ॥

व्याख्या—'वित्तं' द्रव्यजातं तथा 'पशवो' गोमहिष्यादयस्तान् 'जहाहि' परित्यज, तेषु ममत्वं मा कृथाः। ये बान्धवाः—पित्रादयः श्वशुरादयश्च प्रियमित्राः—सहपांशुक्रीडितादयः, एतेऽपि मातापित्रादयो न किञ्चित्तस्य परमार्थतः कुर्वन्ति, सोऽपि च वित्तपशुबान्धवमित्रार्थी अत्यर्थं पुनःपुनर्वा लपति—लालप्यते, असमाधिवान् पुनःपुनर्मुह्यते, यच्च प्राण्युपमर्देनोपार्जितं वित्तं, तदन्ये जनाः 'से' तस्यापहरन्ति जीवत एव [वा, तस्य] मृतस्य च क्लेश एव केवलं पापबन्धश्चेत्येवं मत्वा पापकर्माणि परित्यजेत्तपश्चरेदिति गाथार्थः ॥ १९ ॥

सीहं जहा खुद्दमिगा चरंता, दूरे चरंती परिसंकमाणा।
एवं तु मेहावि समिक्ख धम्मं, दूरेण पावं परिवज्जएज्जा ॥ २० ॥

व्याख्या—यथा क्षुद्रमृगाश्चरन्तो—ऽटव्यामटन्तः सर्वतो बिभ्यतः परिशङ्कमानाः सिंहं व्याघ्रं वा आत्मोपद्रवकारिणं दूरेण परिहृत्य चरन्ति, एवं मेधावी धर्मं 'समीक्ष्य' पर्यालोच्य 'पापं' कर्म दूरेण परिहृत्य परिव्रजेत्, संयमानुष्ठायी तपश्चारी च भवेत्। 'पापं' (वा) सावद्यानुष्ठानं सिंहमिव मृगः स्वहितमिच्छन् परित्यजेदिति गाथार्थः ॥ २० ॥

संबुज्झमाणे उ णरे मतीमं, पावाउ अप्पाण निवट्टएज्जा।
हिंसप्पसूयाइं दुहाइं मत्ता, वेराणुबंधीणि महब्भयाणि ॥ २१ ॥

व्याख्या—संबुध्यमानो नरो मतिमान् पापादात्मानं निवर्तयेत्। किं कृत्वा ? 'हिंसा' प्राणिव्यपरोपणं, तया प्रसूतानि यान्यशुभकर्माणि, तानि दुःखोत्पादकानि वर्तन्ते, तथा वैरानुबन्धीनि-जन्मशतसहस्रदुर्मोचानि, अत एव महाभयानीत्येवं मत्वा मतिमानात्मानं पापान्निवर्तयेदिति गाथार्थः ॥ २१ ॥

मुसं न बूया मुणि अत्तगामी, णिव्वाणमेयं कसिणं समाहिं ।
सयं न कुज्जा उ न कारवेज्जा, करंतमन्नंपि य नाणुजाणे ॥ २२ ॥

व्याख्या—'आप्तः' सर्वज्ञस्तदुपदिष्टमार्गगामी 'मुनिः' साधुर्मृषावाद-मयथार्थं न ब्रूयात्, सत्यमपि प्राण्युपघातकं न वदेत्, एतन्मृषावादवर्जनं 'कृत्स्नं' सम्पूर्णं भावसमाधिं निर्वाणं चाहुः, तदेवं मृषावादमन्येषां वा व्रतानामतिचारं स्वयमात्मना न कुर्यात्, नाप्यपरेण कारयेत्तथा कुर्वन्तमप्यपरं नानुमन्येत इति गाथार्थः ॥ २२ ॥

उत्तरगुणानधिकृत्याह—

सुद्धे सिया जाए न दूसएज्जा, अमुच्छिए ण य अज्झोववन्ने ।
धितिमं विमुक्के ण य पूयणट्ठी, न सिलोयकामी य परिव्वएज्जा ॥ २३ ॥

व्याख्या—'शुद्धे' निर्दोषे स्यात्-कदाचिज्जाते-प्राप्ते सत्याहारे साधु रागद्वेषाभ्यां न दूषयेत्, तथाहारे न मूर्च्छित-अमूर्च्छितः, सकृदपि शोभनाहारलाभे सति गृद्धिमकुर्वन्नाहारपति। धृतिमान् संयमे, विमुक्तः-सबाह्याभ्यन्तरेण

ग्रन्थेन विप्रमुक्तः, तथा पूजनं-वस्त्रपात्रादि, तेनार्थः-पूजनार्थः, स पूजनार्थी, तदेवम्भूतो न भवेत् । तथा न श्लोक-कामी-कीर्त्यर्थी काञ्चन क्रियां कुर्यादिति, निर्जरार्थी संयमं पालयेदिति गाथार्थः ॥ २३ ॥

निक्खम्म गेहाउ निरावकंखी, कायं विउसेज्ज नियाणछिन्ने ।

णो जीवियं णो मरणाभिकंखी, चरेज्ज भिक्खू वलया विमुक्के त्ति बेमि ॥ २४ ॥

व्याख्या—गृहाद्विनिःसृत्य 'निष्क्रम्य च' प्रव्रजितोऽपि भूत्वा जीवितेऽपि निराकाङ्क्षी 'कायं' शरीरं 'व्युत्सृज्य' निष्प्रतिकर्मतया चिकित्सादिकमकुर्वंश्छिन्ननिदानो भवेत् । तथा जीवितं मरणं च नाभिकाङ्क्षेत् 'भिक्षुः' साधुः 'वल-यात्' संसारवलयात् कर्मबन्धनाद्वा विप्रमुक्तः संयमानुष्ठानं चरेत्, इतिः परिसमाप्त्यर्थे, ब्रवीमीति पूर्ववत् ॥ २४ ॥

इति श्रीपरमसुविहितखरतरगच्छविभूषणश्रीमत्साधुरङ्गगणिवरसङ्कलितायां श्रीसूत्रकृताङ्गदीपिकायां दशममध्ययनं समाधाख्यं समाप्तमिति ॥

अथैकादशं मार्गाध्ययनम् ।

उक्तं दशममध्ययनं, अथैकादशमं प्रारभ्यते मार्गाध्ययनम्, तस्येयमादिगाथा—

कयरे मग्गे अक्खाए ?, माहणेण मईमया । जं मग्गं उज्जु पावित्ता, ओहं तरति दुत्तरं ॥ १ ॥

व्याख्या—सुधर्मस्वामिनं प्रति जम्बूस्वामी प्राह—'कतरः' किम्भूतो मार्गोऽपवर्गावाप्तिसमर्थः प्रतिपादितो ? भगवता माहनेन मतिमता, मतिः—केवलज्ञानाख्या यस्यास्त्यसौ मतिमाँस्तेन, यं प्रशस्तं भावमार्गं मोक्षगमनं प्रति प्रगुणं ऋजु—अवक्रं, तदेवम्भूतं मार्गं—ज्ञानदर्शनचारित्रात्मकं 'प्राप्य' लब्ध्वा प्राणी ओघमिति भवौघं—संसारसमुद्रं तरति, अत्यन्तदुस्तरमपि हेलया प्राणी तरति इति गाथार्थः ॥ १ ॥ स एव पृच्छकः पुनरप्याह—

तं मग्गं णुत्तरं सुद्धं, सव्वदुक्खविमोक्खणं । जाणासि णं जहा भिक्खू !, तं णो बूहि महामुणी ! ॥२॥

व्याख्या—योऽसौ मार्गः सत्त्वहिताय सर्वज्ञेनोपदिष्टस्तं मार्गमनुत्तरं—सर्वोत्कृष्टं, सर्वदुःखेभ्यो विमोचकं, हे भिक्षो ! यथा त्वं जानीषे 'ण'मिति वाक्यालङ्कारे, हे महामुने ! तथा त्वं [नः—अस्माकं] कथयेति ॥ २ ॥

यद्यप्यस्माकं युष्मत्प्रत्ययेनैव प्रवृत्तिः स्यात्तथाऽप्यन्येषां मया किम्भूतो मार्गः कथनीयः ? इत्यभिप्रायवानाह—

जइ णो केइ पुच्छेज्जा, देवा अदुव माणुसा । तेसिं तु कयरं मग्गं, आइक्खेज्ज ? कहाहि णो ॥ ३ ॥

व्याख्या—'यदि' कदाचित्त्वाऽस्मान् केचन सुलभबोधयः संसारभयोद्विग्नाः सम्यङ्मार्गं पृच्छेयुः, के ते? देवास्तथा मनुष्याः, तयोरेव प्रश्नसद्भावात्, न तिर्यङ्नैरयिकाः पृच्छेयुः, अथ तेषां पृच्छतां कतरं मार्गमहमाख्यास्ये-कथयिष्ये ?, तदेतदस्माकं त्वं जानानः कथयेति गाथार्थः ॥ ३ ॥ एवं पृष्टः सुधर्मस्वाम्याह—

जइ वो केइ पुच्छेज्जा, देवा अदुव माणुसा । तेसिमं पडिसाहेज्जा, मग्गसारं सुणेह मे ॥ ४ ॥

व्याख्या—'यदि' कदाचिद्वो-युष्मान् देवा मनुष्याः सम्यङ्मार्गं पृच्छेयुः, तेषां पृच्छतामिमं-वक्ष्यमाणं षड्जीवनिकायरक्षाप्रवणं ज्ञानदर्शनचारित्रात्मकं मुक्तिमार्गप्रसाधकं प्रतिकथयेत् मार्गसारं-मार्गपरमार्थं, यं भवन्तोऽन्येषां प्रतिपादयिष्यन्ति तन्मे-मम कथयतः शृणुत यूयमिति गाथार्थः ॥ ४ ॥ पुनः सुधर्मस्वाम्याह—

अणुपुवेण महाघोरं, कासवेण पवेइयं । जमादाय इओ पुवं, समुद्दं ववहारिणो ॥ ५ ॥

व्याख्या—यथाऽहं 'अनुपूर्व्येण' आनुपूर्व्या कथयामि तथा शृणुत यूयम् । किम्भूतं मार्गं? कापुरुषैः सङ्ग्रामप्रवेशवत्-दुरध्यवसेयत्वान्महाघोरं-महाभयानकं 'काश्यपेन' श्रीवर्द्धमानस्वामिना 'प्रवेदितं' प्रणीतं मार्गं कथयिष्यामीत्यनेन स्वमनीषिकापरिहारः कृतः । यं शुद्धं मार्गमुपादाय 'इत' इति सन्मार्गोपादानात्पूर्व-मादायैव दुस्तरं संसारं महापुरुषास्तरन्ति, व्यवहारिणो यानपात्रेण समुद्रमिव, यथा हि सांयात्रिका वणिजो यानपात्रेण समुद्रं तरन्ति तथा साधवोऽपि सम्यग्दर्शनादिना मार्गेण दुस्तरमपि भवौघं तरन्तीति गाथार्थः ॥ ५ ॥

अतरिंसु तरंतेगे, तरिस्संति अणागया । तं सोच्चा पडिवक्खामि, जंतवो ! तं सुणेह मे ॥ ६ ॥

व्याख्या—यं मार्गं समाश्रित्य बहवोऽनन्ताः सत्त्वा अशेषकर्मक्षयात् संसारमतीर्षु–स्तीर्णवन्तः, साम्प्रतमपि संख्येयास्तरन्ति, महाविदेहादौ सर्वदा सिद्धिसद्भावात्, अनागते च काले अनन्ता एव जीवास्तरिष्यन्ति । एवं कालत्रयेऽपि संसारसमुद्रोत्तारकं भावमार्गं तीर्थकृद्भिरुपदिष्टं, तं चाहं सम्यक् श्रुत्वा युष्माकं प्रतिपादयिष्यामि । सुधर्मस्वामी जम्बूस्वामिनं निमित्तीकृत्यान्येषामपि जन्तूनां कथयतीति, एतदेव दर्शयितुमाह—हे जन्तवो ! अभिमुखीभूय तं–चारित्रमार्गं मम कथयतः शृणुत यूयमिति गाथार्थः ॥ ६ ॥ चारित्रमार्गस्य प्राणातिपातविरमणमूलत्वात्पूर्वं जीवस्वरूपनिरूपणार्थमाह—

पुढवीजीवा पुढो सत्ता, आउजीवा तहाऽगणी । वाउजीवा पुढो सत्ता, तणरुक्खा सबीयगा ॥ ७ ॥

व्याख्या—पृथिवीजीवास्ते च प्रत्येकशरीरत्वात् ' पृथक् ' प्रत्येकं सत्त्वा–जीवा अवगन्तव्याः । तथा आपः–अग्निकायाश्च तथाऽपरे वायुजीवाः, एते सर्वेऽपि पृथक्सत्त्वाः–प्रत्येकशरीरिणः, वक्ष्यमाणवनस्पतेस्तु साधारणशरीरत्वेनापृथक्त्वमप्यस्तीति । तत्र वनस्पतिकायो द्विधा–साधारणः प्रत्येकश्च । तत्र तृणानि–दर्भादीनि वृक्षाश्च–सहकारादयः । सबीजाश्च–[सह बीजैः]शालिगोधूमादिभिर्वर्त्तन्त इति सबीजकाः । एते सर्वेऽपि वनस्पतिकायिकाः अवगन्तव्या इति गाथार्थः ॥ ७ ॥

अहावरे तसा पाणा, एवं छक्काय आहिया । इत्ताव एव जीवकाए, नावरे विज्जई काए ॥ ८ ॥

व्याख्या—सुगमैव, × नवरं-एतावन्त एव जीवाः षट्कायलक्षणाः, नापरे केचन जीवाः सन्तीति गाथार्थः ॥ ८ ॥

सव्वाहिं अणुजुत्तीहिं, मइमं पडिलेहिया । सव्वे अक्कंतदुक्खा य, अतो सव्वे न हिंसया ॥ ९ ॥

व्याख्या—सर्वाभिरप्यनुयुक्तिभिः—पृथिव्यादिजीवनिकायसाधकत्वेन अनुयुक्तिभिः 'मतिमान्' सद्विवेकी पृथिव्यादिजीवनिकायेषु जीवत्वं प्रसाध्य 'प्रत्युपेक्ष्य' पर्यालोच्य, तथा सर्वेऽप्यक्रान्तदुःखाः-दुःखद्विषः सुखार्थिनश्च [इति] मत्वा मतिमान् सर्वानपि प्राणिनो न हिंस्यादिति मनोवाक्कायकर्मभिः कृतकारितानुमतिभिश्च नवकेन भेदेन च तत् पीडाकारि उपमर्दाभिवर्जनीयमिति गाथार्थः ॥ ९ ॥

एयं खु नाणिणो सारं, जं न हिंसंति कंचण । अहिंसा समयं चेव, एतावंतं विजाणिया ॥ १० ॥

व्याख्या— + एतदेव ज्ञानिनो ज्ञानस्य सारं-यत्कञ्चन प्राणिनमनिष्टदुःखं सुखार्थिनं न हिनस्ति, विदितागमार्थस्यैतदेव सारं-यत् प्राणातिपातान्निवर्तनं, ज्ञानमपि परमार्थतस्तदेव-यत्किञ्चित्प्राणातिपातान्निवर्तनं, प्राणिपीडाकारिणो ज्ञानमपि अज्ञानमेवेति मत्वं, यतः—"किं ? ताए पढियाए, पयकोडीए पलालभूयाए । जत्थेत्तियं न नायं, परस्स पीडा न

× "अथापरे त्रसाः प्राणिनो-द्वित्रिचतुष्पञ्चेन्द्रिया, एवं षट्काया आख्यातास्तीर्थकृद्भिः ।" इति हर्ष०

+ "खुर्वाक्यालङ्कारे निश्चये वा" इति हर्ष० ।

१ किं ? तया पठितया पदकोट्या पलालभूतया । यत्रैतावन्न ज्ञातं, परस्य पीडा न कर्तव्या ॥ १ ॥

कायवधा ॥ १ ॥" एवमहिंसाप्रधानः 'समय' आगमः, तमेवम्भूतं अहिंसाप्रधानं आगमं एतावन्तमेव विज्ञाय, किमन्येन बहुना परिज्ञानेन ? एतावतैव कार्यसिद्धेः, एतावता अहिंसाप्रधानं समयं ज्ञात्वा न हिंस्यात् कञ्चनेति गाथार्थः ॥ १० ॥

साम्प्रतं क्षेत्रप्राणातिपातमधिकृत्याह—

उड्ढं अहे तिरियं च, जे केइ तसथावरा । सव्वत्थ विरतिं कुज्जा, संति निव्वाणमाहियं ॥ ११ ॥

व्याख्या—ऊर्ध्वमधस्तिर्यक् च ये केचन त्रसास्तथा स्थावरास्तत्र सर्वत्र त्रसस्थावरभेदभिन्ने विरतिं–प्राणातिपातनिवृत्तिं कुर्यात्, परमार्थत एवमेवासौ ज्ञाता भवति यदि ज्ञात्वा प्राणातिपातनिवृत्तिर्विधीयते, तन्निवृत्तेश्च परेषामात्मनश्च शान्तिर्वर्तते, यतो विरतिमतो नान्ये केचन बिभ्यन्ति नाप्यसौ भवान्तरेऽपि कुतश्चिद्बिभेति । तथा निर्वाणमप्येतदेव यत्प्राणातिपातादिनिवर्तनं, शान्तिस्तथा निर्वाणमिति मत्वा प्राणातिपातनिवृत्तिं कुर्यादिति गाथार्थः ॥ ११ ॥ किञ्च—

पभू दोसे निराकिच्चा, ण विरुज्झेज्ज केणई । मणसा वयसा चेव, कायसा चेव अंतसो ॥ १२ ॥

व्याख्या—प्रभु–र्वश्येन्द्रियः, स एवम्भूतो 'दोषान्' मिथ्यात्वाविरतिप्रमादकषाययोगान्निराकृत्य केनापि प्राणिना सार्द्धं न विरुध्येत–न केनचित्सह विरोधं कुर्यात्, मनसा वचसा कायेन 'अन्तशो' यावज्जीवं न केनापि सह विरोधं कुर्यादिति गाथार्थः ॥ १२ ॥

संवुडे से महापन्ने, धीरे दत्तेसणं चरे । एसणासमिए निच्चं, वज्जयंते अणेसणं ॥ १३ ॥

व्याख्या—आश्रवद्वारनिरोधेन संवृतः स भिक्षुर्महाप्रज्ञः-विपुलबुद्धिर्धीरो-ऽक्षोभ्यो दायकेन एषणामेषणां चरेत्, एषणीयं गृह्णातीत्यर्थः। एवंविधः साधुः एषणासमितः अनेषणां वर्जयन् संयममनुपालयेदिति गाथार्थः ॥ १३ ॥

अनेषणीयपरिहारमधिकृत्याह—

भूयाइं च समारब्भ, तमुद्दिस्सा य जं कडं। तारिसं तु न गिण्हिज्जा, अन्नपाणं सुसंजए ॥ १४ ॥

व्याख्या—भूतानि समारभ्य, ['यं'] साधुमुद्दिश्य-साध्वर्थं 'यत्कृतं' तदुपकल्पितमाहारोपकरणादिकं, तादृशमन्नं पानकं च सुसाधुर्न गृह्णीयात्-नाभ्यवहरेत्। एवं तेन मार्गोऽनुपालितो भवतीति गाथार्थः ॥ १४ ॥ किञ्च—

पूईकम्मं न सेवेज्जा, एस धम्मे वुसीमओ। जं किंचि अभिकंखेज्जा, सव्वसो तं न कप्पए ॥ १५ ॥

व्याख्या—आधाकर्माद्यविशुद्धिकोट्यवयवेनापि संपृक्तं पूतिकर्म प्रोच्यते, तदेवं पूतिकर्मदोषदुष्टं आहारादिकं न सेवेत-नोपभुञ्जीत, एष धर्मः 'वुसीमओ' त्ति सम्यक्संयमवतः, अयमेव सम्यङ्मार्गो-साधुरशुद्धमाहारादिकं परिहरतीति। तथा यदपि शुद्धमप्यशुद्धत्वेनाभिशङ्केत किञ्चिदप्याहारादिकं तत् 'सर्वशः' सर्वप्रकारमप्याहारोपकरणं पूतिकर्म भोक्तुं न कल्पत इति गाथार्थः ॥ १५ ॥ किञ्च—

हणंतं नाणुजाणेज्जा, आयगुत्ते जिइंदिए। ठाणाइं संति सड्ढीणं, गामेसु नगरेसु वा ॥ १६ ॥

व्याख्या—धर्मश्रद्धावतां ग्रामेषु नगरेषु [वा] 'स्थानानि' आश्रयाः 'सन्ति' विद्यन्ते। तत्र तत् स्थानाश्रितः कश्चिद्-

सोद्देशेन किल धर्मश्रद्धालुतया कूपतडागखननप्रपासत्रादिकां × प्राण्युपमर्दकारिणीं क्रियां कर्तुकामः कश्चिद्धर्मश्रद्धया पृच्छेत्—यदहं कूपतडागखननादिकां पूर्वोक्तां क्रियां करोमि ? अस्ति कश्चिद्धर्मो न वेत्येवं पृष्टः साधुः किं कुर्यात् ? तत्र तदुपरोधाद्भयाद्वा [तं] प्राणिनो घ्नन्तं नानुजानीयात् । किम्भूतः ? आत्मना—मनोवाक्कायरूपेण गुप्तः आत्मगुप्तस्तथा जितेन्द्रियः सन् साधुः सावद्यानुष्ठानं नानुमन्येतेति गाथार्थः ॥ १६ ॥

तहा गिरं समारब्भ, अत्थि पुन्नंति नो वए । अहवा नत्थि पुन्नंति, एवमेयं महब्भयं ॥ १७ ॥

व्याख्या—केनचिद्राजादिना कूपखननसत्रदानादिप्रवृत्तेन पृष्टः साधुः—किमस्मदनुष्ठाने अस्ति पुण्यमाहोस्विन्नास्तीत्येवम्भूतां गिरं 'समारभ्य' निशम्याऽऽश्रित्य वा अस्ति पुण्यं नास्ति वा इत्युभयथापि महाभयमिति मत्वा नानुमन्येतेति गाथार्थः ॥ १७ ॥ किमर्थं नानुमन्येत ? इत्याह—

दाणट्ठया य जे पाणा, हम्मंति तसथावरा । तेसिं सारक्खणट्ठाए, अत्थि पुन्नंति नो वए ॥ १८ ॥

व्याख्या—अन्नपानदानार्थमाहारमुदकं च पचनपानादिरूपया क्रियया कूपखननादिरूपया चोपकल्पयेत्तत्र यस्माद्धन्यन्ते व्यापाद्यन्ते त्रसाः स्थावराश्च जन्तवस्तस्मात्तेषां (सं)रक्षणार्थं—रक्षार्थं साधुरात्मगुप्तोऽस्त्यत्र भवदीयेऽनुष्ठाने पुण्यमित्येवं नो वदेदिति गाथार्थः ॥ १८ ॥ यद्येवं नास्ति पुण्यमित्येवं ब्रूयादित्याह—

× सत्रादिकां—दानशालादिकाम् ।

जेसिं तं उवकप्पंति, अन्नपाणं तहाविहं । तेसिं लाभंतरायंति, तम्हा णत्थित्ति नो वए ॥ १९ ॥

व्याख्या—येषां जन्तूनां कृते तदन्नपानादिकं किल धर्मबुद्ध्योपकल्पयन्ति—तथाविधं प्राण्युपमर्ददोषदुष्टं निष्पादयन्ति, तन्निषेधे च यस्मात्तेषाम्—आहारपानार्थिनां तल्लाभान्तरायो—विघ्नो भवेत्तदभावेन तु [ते] पीड्येरन्, तस्मात् कूपखननसत्रादिके कर्मणि नास्ति पुण्यमित्येवमपि नो वदेदिति गाथार्थः ॥ १९ ॥

एनमेवार्थं पुनरपि स्पष्टतरं बिभणिषुराह—

जे य दाणं पसंसंति, वहमिच्छंति पाणिणं । जे उण पडिसेहंति, वित्तिच्छेयं करिंति ते ॥ २० ॥

व्याख्या—ये केचन प्रपासत्रादिकं दानं बहूनां जन्तूनामुपकारीति 'प्रशंसन्ति' श्लाघन्ते, ते परमार्थानभिज्ञाः प्रभूततरप्राणिनां तत्प्रशंसाद्वारेण तेषां प्राणिनां 'वधं' प्राणातिपातमिच्छन्ति, तद्दानं तु प्राणातिपातमन्तरेण न भवेत् । ये पुनः किल सूक्ष्मधियो वयं—गीतार्था इत्येवं मन्यमाना आगमसद्भावमजानन्तः 'प्रतिषेधयन्ति' निषेधयन्ति तेऽप्यगीतार्थाः प्राणिनां 'वृत्तिच्छेदं' लाभान्तरायं कुर्वन्तीति गाथार्थः ॥ २० ॥

तदेवं राज्ञा अन्येन वा ईश्वरेण कूपतडागयागसत्रदानाद्युद्यतेन पुण्यसद्भावं पृष्टैर्मुमुक्षुभिर्यद्विधेयं तद्दर्शयितुमाह—

दुहओ वि ते न भासंति, अत्थि वा नत्थि वा पुणो । आयं रयस्स हिच्चाणं, निव्वाणं पाउणंति ते ॥२१॥

व्याख्या—यद्यस्ति पुण्यमित्येवं ब्रूयुस्ततोऽनन्तानां जीवानां सूक्ष्मबादराणां सर्वदा प्राणत्याग एव स्यात्, प्रीणन-

मात्रं पुनः[स्वल्पत्वात्] स्वल्पकालीयं, अतोऽस्ति-पुण्यमित्येवं नो वदेत् । नास्ति पुण्य मित्यपि न वक्तव्यं, इत्येवं वदतां तत् प्रतिषेध एव कृतो भवेत्, तत् प्रतिषेधे कृते तेषामन्तरायः स्यात् । ततो द्विधाऽप्यस्ति नास्ति वा पुण्यमित्येवं ते साधवः पुनर्न भाषन्ते, किन्तु पृष्टैः सद्भिर्मौनमेव समाश्रयणीयं, निर्बन्धे त्वस्माकं द्विचत्वारिंशद्दोषवर्जित आहारः कल्पते, एवंविधविषयेऽस्माकं मुमुक्षूणामधिकार एव नास्ति तदेवमुभयथाऽपि भाषिते 'रजसः' कर्मण 'आयो' लाभो भवति + । ततस्तमायं रजसो वा मौनेनानवद्यभाषणेन वा 'हित्वा' त्यक्त्वा ते अनवद्यभाषिणो निर्वाणं-मोक्षं प्राप्नुवन्तीति गाथार्थः ॥ २१ ॥ अपि च—

निव्वाणं परमं बुद्धा, णक्खत्ताण व चंदिमा । तम्हा सया जए दंते, निव्वाणं संधए मुणी ॥ २२ ॥

व्याख्या—येषां परलोकार्थिनां बुद्धानां निर्वाणं, तत्परमं प्रधानं, बुद्धास्तु निर्वाणमेवाभिसन्धाय प्रवृत्ताः, अतस्त एव प्रधानाः, नापरे इति । यदि वा यथा नक्षत्राणां चन्द्रमाः प्रधानभावमनुभवति, एवं लोकस्य निर्वाणं परमं प्रधानमेवं 'बुद्धाः' अवगततत्त्वाः प्रतिपादयन्तीति । यस्माच्च निर्वाणं प्रधानं तस्मा'त्सदा' सर्वकालं 'मुनिः' साधु'र्यतः' प्रयत्नवान् 'दान्तः' इन्द्रियनोइन्द्रियदमेन, एवंविधो निर्वाणमभिसन्धये-निर्वाणार्थं सर्वाः क्रियाः कुर्यादिति गाथार्थः ॥ २२ ॥

वुज्झमाणाण पाणाणं, किच्चंताण सकम्मुणा । आघाति साहु तं दीवं, पतिट्ठेसा पवुच्चती ॥ २३ ॥

+ यथा लोकग्रन्थैः—"सत्यं वप्रे[वापी]षु शीतं हिमकरधवलं वारि पीत्वा प्रकामं, व्युच्छिन्नाशेषतृष्णाः प्रमुदितमनसः पान्थसार्था भवन्ति । शोषं नीते जलौघे दिनकरकिरणैर्यान्त्यनन्ता विनाशं, तेनोदासीनभावं व्रजति मुनिगणः कूपवप्रा[वाप्या]दिकार्ये ॥१॥" इत्यादि ।

व्याख्या—संसारसागरे मिथ्यात्वकषायादिभिरुह्यमानानां प्राणिनां, तथा स्वकर्मणा निकृत्यमानानां—छिद्यमानानां तीर्थकृदन्यो वा गणधराचार्यादिकः परमकारुणिकोऽत्यन्तवत्सलः स तेषां प्राणिनामाश्वासभूतं 'साधुं' शोभनं द्वीपमाख्याति, सम्यग्दर्शनादिकं संसारभ्रमणविश्रामहेतुमाख्याति। तथैषा सम्यग्दर्शनाद्यवाप्तिः 'प्रतिष्ठा' मोक्षावाप्तिसाध्या संसारभ्रमनिवारिणीति गाथार्थः ॥ २३ ॥

कीदृग्विधेन च अयमाश्वासद्वीपः कथ्यते इत्याह—

आयगुत्ते सया दंते, छिन्नसोए अणासवे। जे धम्मं सुद्धमक्खाति, पडिपुन्नमणेलिसं ॥ २४ ॥

व्याख्या—य आत्मगुप्तः सदा दान्तः, तथा छिन्नसंसारस्रोताः, तथा अनाश्रवः, स एव शुद्धं धर्ममाख्याति, नापरः। कीदृशं धर्मं? प्रतिपूर्णम्—सर्वविरतिरूपं, अनीदृशं—निरुपममिति गाथार्थः ॥ २४ ॥

तमेव अविजाणंता, अबुद्धा बुद्धमाणिणो। बुद्धामो त्ति य मन्नंता, अंत एते समाहिए ॥ २५ ॥

व्याख्या—तमेवं शुद्धं धर्मं परिपूर्णमनीदृशमजानाना 'अप्रबुद्धाः' अविवेकिनः पण्डितमानिनो—'वयमेव धर्मतत्त्वं प्रतिबुद्धाः' इत्येवं मन्यमानाः भावसमाधेः सम्यग्दर्शनाख्यादन्ते—पर्यन्ते दूरे वर्तन्ते। ते च सर्वे परतीर्थिकाः द्रष्टव्या इति गाथार्थः ॥ २५ ॥ किमिति ते भावसमाधेर्दूरे वर्तन्ते? इत्याह—

ते य बीओदगं चेव, तमुद्दिस्सा य जं कडं। भोच्चा झाणं झियायंति, अखेयन्नेऽ[अ]समाहिया ॥२६॥

व्याख्या—ते च परतीर्थिकाः जीवाजीवादितत्त्वानभिज्ञाः सन्तो 'बीजानि' शालिगोधूमादीनि तथा 'शीतोदकं' अप्रासुकोदकं, तांश्च उद्दिश्य–तद्भक्तैर्यदाहारादिकं निष्पादितं तत्सर्वमविवेकितया भुक्त्वा, पुनः रसलोलुपतया औद्देशिकभक्तकृते आर्त्त[ध्यानं]ध्यायन्ति। न ऐहिकसुखार्थिनां परिग्रहारम्भिणां धर्मध्यानं भवति। तथा ते परतीर्थिकाः कथम्भूताः? धर्माधर्मविवेके कर्त्तव्ये 'अखेदज्ञाः' अनिपुणास्तथा असमाहिताः, यतः–प्रायेणार्त्तध्यायिनस्त्वसन्तोषिण एव भवन्तीति गाथार्थः ॥ २६ ॥

जहा ढंका य कंका य, कुलला मग्गुका सिही। मच्छेसणं झियायंति, झाणं ते कलुसाहमं ॥२७॥

व्याख्या—यथा ढङ्काद्याः पक्षिविशेषाः, मत्स्यान्वेषणपरं ध्यानं ध्यायन्ति, ते हि पक्षिणः आमिषजीविनो मत्स्यप्राप्तिं ध्यायन्ति, एवम्भूतं च ध्यानं आर्त्तरौद्रध्यानरूपतयाऽत्यन्तकलुषमधमं च भवतीति गाथार्थः ॥ २७ ॥

दार्ष्टान्तिकं दर्शयितुमाह—

एवं तु समणा एगे, मिच्छद्दिट्ठी अणारिया। विसएसणं झियायंति, कंका वा कलुसाहमा ॥ २८ ॥

व्याख्या—'एव'मिति यथा ढङ्कादयो मत्स्यान्वेषणपरं ध्यानं ध्यायन्ति, तद्ध्यायिनश्च कलुषाधमा भवन्ति, एवं मिथ्यादृष्टयः श्रमणाः अनार्याः शाक्यादयो विषयाणां प्राप्तिं ध्यायन्ति, तद्ध्यायिनश्च कङ्का इव कलुषाधमा भवन्तीति गाथार्थः ॥ २८ ॥ किञ्च—

सुद्धं मग्गं विराहित्ता, इहमेगे उ दुम्मती । उम्मग्गगया दुक्खं, घातमेसंति तं तहा ॥ २९ ॥

व्याख्या—एके शाक्यादयः 'शुद्धं' निर्दोषं सम्यग्दर्शनादिकं मोक्षमार्गं कुमार्गप्ररूपणया विराध्य इह—अस्मिन् संसारे मोक्षमार्गप्ररूपणप्रस्तावे वा एके—अन्यतीर्थीया 'दुर्मतयः' कुमतयः 'उन्मार्गेण' संसारावतारणरूपेण 'गताः' प्राप्ताः सन्त उन्मार्गगामिनः दुःख—मष्टप्रकारं कर्म असातोदयरूपं च तथा घातं चान्तशः सन्मार्गविराधनया उन्मार्गगमनं च एषन्ते—अन्वेषयन्ति, दुःखमरणे शतशः प्रार्थयन्तीति गाथार्थः ॥ २९ ॥ अथ शाक्यादीनां दृष्टान्तपूर्वकमाह—

जहा आसाविणिं नावं, जाइअंधो दुरूहिया । इच्छती पारमागंतुं, अंतरा य विसीयती ॥ ३० ॥

व्याख्या—यथा जात्यन्ध 'आस्राविणीं' शतच्छिद्रां नावमारुह्य पारमागन्तुमिच्छति, न चासौ सच्छिद्रत्वात् पारगामी भवति, किन्त्वन्तराले एव निमज्जतीति गाथार्थः ॥ ३० ॥

एवं तु समणा एगे, मिच्छदिट्ठी अणारिया । सोयं कसिणमावन्ना, आगंतारो महब्भयं ॥ ३१ ॥

व्याख्या—एवमेव श्रमणा एके शाक्यादयो मिथ्यादृष्टयोऽनार्या भावस्रोतः कर्माश्रवरूपं कृत्स्नं सम्पूर्णमापन्नाः सन्तस्ते महाभयं नारकादिस्वभावं दुःखमागन्तारः—आगमनशीला भवन्ति । न तेषां संसारोदधेराश्राविणीं नावं व्यवस्थितानामिवोत्तरणं भवतीति गाथार्थः ॥ ३१ ॥

एवं शाक्यादयः श्रमणा मिथ्यादृष्टयोऽनार्याः संसारस्रोतस्समापन्नाः सन्तो महाभयं नरकादिदुःखमाप्नुवन्ति, तत

इदमुपदिश्यते—

इमं च धम्ममादाय, कासवेण पवेइयं । तरे सोयं महाघोरं, अत्तत्ताए परिव्वए × ॥ २२ ॥

व्याख्या—इदं धर्मं श्रुतचारित्राख्यं 'आदाय' गृहीत्वा 'काश्यपेन' श्रीवर्द्धमानस्वामिना प्रवेदितं संसारस्रोतः समुल्लङ्घ्य 'तरेत्' पारगामी स्यात् । कथम्भूतं संसारस्रोतः 'महाघोरं' दुरुत्तरत्वान्महाभयानकं, तदेवं काश्यपेन प्रवेदितं धर्मं समादाय साधुरात्मत्रायी आत्मत्राणाय परिव्रजेत्, संयमानुष्ठायी भवेदिति गाथार्थः ॥ २२ ॥

विरए गामधम्मेहिं, जे केई जगई जगा । तेसिं अत्तुवमायाए, थामं कुव्वं परिव्वए ॥ २३ ॥

व्याख्या—ग्रामधर्माः शब्दादिविषयाः, तेभ्यो विरतो मुनिः, ये केचन 'जगति' संसारोदरे पृथिव्यां 'जगा' इति जन्तवस्ते सर्वेऽपि जीवितार्थिनस्तेषां दुःखद्विषामात्मोपमया दुःखमनुत्पादयन् तत्पालने सामर्थ्यं कुर्यात् । तत् कुर्वंश्च संयमाऽनुष्ठाने परिव्रजेदिति गाथार्थः ॥ २३ ॥

संयमविघ्नकारिणामपनयनार्थमाह—

अतिमाणं च मायं च, तं परिन्नाय पंडिए । सव्वमेयं निराकिच्चा, निव्वाणं संधए मुणी ॥ २४ ॥

× "क्वचित्पश्चार्द्धस्यायं पाठः—" कुज्जा भिक्खू गिलाणस्स, अगिलाए समाहिए ॥ " भिक्षुः—साधुर्ग्लानस्य वैयावृत्त्यमग्लानो—ऽपरिश्रान्तः कुर्यात्समाधिना—ग्लानस्य समाधिमुत्पादयन् । " इति हर्ष० ।

व्याख्या—चारित्रमतिक्रम्य यो [मानो] वर्तते सोऽतिमानः, चकारात्क्रोधोऽपि परिगृह्यते। एवमतिमायां अतिलोभं [च], तमेवम्भूतं कषायव्रातं संयमपरिपन्थिनं 'पण्डितो' विवेकी परिज्ञाय सर्वमेनं संसारकारणभूतं कषायसमूहं निराकृत्य निर्वाणमनुसन्धयेत्। सति च कषायकदम्बके न संयमः सम्यक् सफलतां प्रतिपद्यते। तदुक्तम्—"सामण्णमणुचरंतस्स, कसाया जस्स उक्कडा हुंति। मन्नामि उच्छुपुप्फं व, निप्फलं तस्स चारित्तं ॥ १ ॥" इति, तस्मिंश्च निष्फले न मोक्षसम्भवः, अतः कषायपरित्यागात् प्रशस्तभावानुसन्धानेन निर्वाणं साधयेदिति गाथार्थः ॥ ३४ ॥ किञ्च—

संधए साहुधम्मं च, पावधम्मं निराकरे। उवहाणवीरिए भिक्खू, कोहं माणं ण पत्थए ॥ ३५ ॥

व्याख्या—साधुधर्मः क्षान्त्यादिको दशप्रकारः सम्यग्दर्शनचारित्राख्यो वा, तं साधुधर्ममनुसन्धयेत्-वृद्धिमापादयेत्। तथा 'पापं' पापोपादानकारणं 'धर्मं' प्राण्युपमर्दनप्रवृत्तं निराकुर्यात्। तथोपधानं-तपः, तत्र यथाशक्त्या वीर्यं यस्य स उपधानवीर्यो भिक्षुः, क्रोधं मानं च न प्रार्थयेत् न वर्द्धयेद्वा इति गाथार्थः ॥ ३५ ॥

अथैवम्भूतं भावमार्गं किं वर्द्धमानस्वाम्येवोपदिष्टवान्? उतान्येऽपीत्येतदाशङ्क्याह—

जे य बुद्धा अतिक्कंता, जे य बुद्धा अणागया। संति तेसिं पइट्ठाणं, भूयाणं जगती जहा ॥ ३६ ॥

व्याख्या—ये बुद्धास्तीर्थकृतोऽतीतेऽनादिके कालेऽनन्ता अतिक्रान्तास्ते सर्वेऽप्येवंविधं भावमार्गमुपदिष्टवन्तः।

---

१ श्रामण्यमनुचरतः कषाया यस्योत्कटा भवन्ति। मन्ये इक्षुपुष्पमिव निष्फलं तस्य चारित्रम् ॥ १ ॥

तथा ये चानागता—भविष्यदनन्तकालभाविनोऽनन्ता एव तेऽप्येवमेवोपन्यसिष्यन्ति । चशब्दात् वर्तमानकालभाविनः संख्येयास्तेऽप्येवमेवोपदिशन्ति कुर्वन्ति च । एतावता ये सर्वेऽप्येनं भावमार्गमुक्तवन्तोऽनुष्ठितवन्तश्च, तेषां सर्वेषामप्यर्हतां प्रतिष्ठान—माधारो मोक्षः, स शान्तिस्तेषां प्रतिष्ठानं, को भावः ? यथा 'भूतानां' स्थावरजङ्गमानां 'जगती' त्रिलोकी प्रतिष्ठानं, एवं ते सर्वेऽपि बुद्धाः शान्तिप्रतिष्ठानाः, एतावता 'शान्तिः' सर्वजीवानां दया, सैव सर्वधर्माणां मूलं सर्वेऽप्यर्हन्तः प्ररूपयन्तीति गाथार्थः ॥ ३६ ॥

अह णं वयमावन्नं, फासा उच्चावया फुसे । ण तेसु विणिहण्णेज्जा, वाएणेव महागिरी ॥ ३७ ॥

व्याख्या—'अथ' भावमार्गप्रतिपत्त्यनन्तरं तं भिक्षुं 'स्पर्शाः' परीषहोपसर्गरूपाः 'उच्चावचा' गुरुलघवः 'स्पृशेयुः' अभिद्रवेयुः, स च साधुस्तैरभिद्रुतः संसारस्वरूपं विदन् कर्मनिर्जरां च मानयंस्तैः परीषहोपसर्गैर्न विहन्यात्, न संयमाऽनुष्ठानाद् मनागपि विचलेत् । किमिव ? महावातैरिव महागिरि—र्मेरुरिति गाथार्थः ॥ ३७ ॥

संवुडे से महापन्ने, धीरे दत्तेसणं चरे । निव्वुडे कालमाकंखी, ए(यं)वं केवलिणो मयं ॥३८॥ ति बेमि

व्याख्या—सः साधुः 'संवृतः' संवरयुक्तः, महाप्राज्ञो धीरः, स एवम्भूतः परेण दत्ते सत्याहारादिके एषणां चरेत् । तथा 'निर्वृतः' कषायोपशमाच्छीतीभूतः 'कालं' मृत्युं यावत् अभिकाङ्क्षेत् । एतन्मया प्राक्प्रतिपादितं, तत् 'केवलिनः' सर्वज्ञस्य मतं । एतच्च जम्बूस्वामिनमुद्दिश्य सुधर्मस्वाम्याह । तदेतदध्ययने मार्गस्वरूपं प्रभणितं तन्मया न स्वमनीषिकया

कथितं, किं तर्हि ? केवलिनो मतमित्येवं भवता ग्राह्यमिति गाथार्थः ॥ ३८ ॥ [इतिः परिसमाप्त्यर्थे, ब्रवीमीति पूर्ववत्]

इति श्रीपरमसुविहितखरतरगच्छविभूषण–श्रीमत्साधुरङ्गगणिवरगुम्फितायां श्रीसूत्रकृताङ्गदीपिकायां मार्गाध्ययनमेकादशं सम्पूर्णमिति ।

अथ द्वादशं समवसरणाभिधमध्ययनम् ।

उक्तमेकादशमध्ययनं साम्प्रतं द्वादशमारभ्यते ।

चत्तारि समोसरणाणिमाणि, पावादुया जाइं पुढो वयंति ।
किरियं अकिरियं विणियंति तइयं, अन्नाणमाहंसु चउत्थमेव ॥ १ ॥

व्याख्या—चत्वारि ' समवसरणानि ' परतीर्थिकाभ्युपगमसमूहरूपाणि, यानि प्रावादुकाः पृथक्पृथक् प्रवदन्ति, तानि चामूनि अन्वर्थाभिधायिभिः संज्ञापदैर्निर्दिश्यन्ते, तद्यथा-एके क्रियावादिनः एके अक्रियावादिनो विनयवादिनस्त्वेके, एके अज्ञानवादिन इति गाथार्थः ॥ १ ॥ अथाज्ञानवादिन एव सर्वथा असम्बद्धप्रलापिनः, अतस्तानेवादावाह—

अण्णाणिया ता कुसलावि संता, असंथुया नो वितिगिच्छतिन्ना ।
अकोविया आहु अकोवियेहिं, अणाणुवाई य मुसं वयंति ॥ २ ॥

व्याख्या—अज्ञानिकास्तावद्वदन्ति—वयमेव 'कुशलाः' निपुणाः, नाऽन्ये, एवं वदन्तोऽपि ते 'असंथुया' इति असंस्तुताः, अज्ञानमेव श्रेय इत्येवंवादितया असम्बद्धाः, असंस्तुतत्वाद्विचिकित्सां—चित्तभ्रान्तिं 'न तीर्णाः' नातिक्रान्ताः, चित्तभ्रान्तिस्तेषां न सम्यगपगता×, अतस्तेऽज्ञानवादिनः स्वयं 'अकोविदाः' धर्मोपदेशं प्रति अनिपुणाः, ततोऽकोविदेभ्य एव स्वशिष्येभ्यः 'आहुः' कथितवन्तः, यथा—अज्ञानमेव श्रेयः इत्यादि प्ररूपयन्ति । ते शिष्या अपि तदेव मन्यन्ते, मूर्खत्वात् "सरिसा सरिसेसु रमंति" इति वचनात् । एवं ते अपर्यालोच्यवादिनो मृषाभाषिणो ज्ञेया इति गाथार्थः ॥२॥

साम्प्रतं विनयवादं निराचिकीर्षुः प्रक्रमते—

× "तथाहि—केचित्सर्वगं मन्यन्ते केचित्तं निषेधयन्ति, एके सर्वगमात्मानं वदन्ति अन्ये देहमात्रं, अपरेऽङ्गुष्ठपर्वमात्रं केचन श्यामाकतन्दुलमात्रं, अन्ये मूर्त्तममूर्त्तं हृदयमध्यवर्तिनं ललाटस्थितं इत्यादि, एवमेकवाक्यता कथं स्यात्?, न चातिशयज्ञानी कश्चिदस्ति यद्वाक्यं प्रमाणी क्रियते, तथा ज्ञानवतां प्रमादे बहुदोषः, ततो वरमज्ञानमेवेति वदन्तश्चित्तभ्रान्तिं नातिक्रान्ताः" इति दृ० ।

१ सदृशाः सदृशेषु रज्यन्ते ।

सच्चं असच्चं इति चिंतयंता, असाहु साहुत्ति उदाहरंता ।
जेमे जणा वेणइया अणेगे, पुट्ठा वि भाव विणइंसु णाम ॥ ३ ॥

व्याख्या—'सत्यं' संयमस्तदसत्यमित्येवं चिन्तयन्तोऽसत्यं सत्यमिति मन्यमानाः। एतावता सत्यमसत्यमिति असत्यं च सत्यमिति, विनयादेव मोक्ष इत्येतदसत्यमपि सत्यतया मन्यमानाः, तथा असाधुमपि वन्दनादिकया विनयप्रतिपत्त्या साधुमित्येवमुदाहरन्तः-प्रतिपादयन्तो न सम्यग्यथाऽवस्थितधर्मस्य परीक्षकाः, कथं? यतस्ते विनयादेव धर्म इत्येवं युक्तिविकलं भाषन्ते, के एते एवं भाषन्ते? इत्याह-'जेमे जणा वेणइया अणेगे' ये इमे जना इव-प्राकृतपुरुषा इव, यथा प्राकृतपुरुषाः-पामराः विनयादेव केवलात्स्वर्गमोक्षावाप्तिरित्येवं भाषन्ते, गुणागुणविशेषो नापरो मोक्षकारणं, विनयस्यैव प्राधान्यं। एवंविधा विनयवादिनः कियन्तः? 'अणेगे' अनेके, द्वात्रिंशद्भेदभिन्नत्वाद्-बहवः, 'पुट्ठा वि' ते विनयवादिनः पृष्टा अपि परैर्विनयादेव मोक्षावाप्तिरित्येवं व्यनैषु-र्विनीतवन्तः। 'नाम' इति सम्भावनायां। सर्वदा सर्वस्य सिद्धये विनयं प्राहितवन्तः, "तस्मात् कल्याणानां सर्वेषां भाजनं विनय" इति वचनादिति गाथार्थः ॥३॥ किञ्च—

अणोवसंखा इति ते उदाहु, अट्ठे स ओभासति अम्ह एवं ।
लवावसंकी य अणागएहिं, णो किरियमाहंसु अकिरियवादी ॥ ४ ॥

व्याख्या—सम्यग् यथाऽवस्थितार्थपरिज्ञानं-उपसंख्या, न उपसंख्या 'अनुपसंख्या' अपरिज्ञानं, तेन व्यामूढ-

मन्यन्ते वैनयिका अज्ञानाच्छादिता इति 'उदाहुः' कथयन्ति । यथा 'स्वोऽर्थः' स्वर्गमोक्षादिकः सर्वोऽपि सर्वस्य विनयप्रतिपत्त्या अस्माकमवभासते—आविर्भवति, प्राप्यते, अस्माकं मते सर्वोऽप्यर्थो विनयप्रतिपत्त्या सिद्ध्यतीति (प्रत्युत्तरं दीयते) भावः, इति विनयवादिमतं । तत्र प्रतिविधीयते—नैकस्माद्विनयादर्थसिद्धिः, किन्तु सम्यग्दर्शनादिसद्भावे सति विनयस्य कल्याणभाक्त्वं भवति, नैकस्मादिति, [illegible] हि विनयोपेतः सर्वस्य प्रह्वतया न्यत्कार + मवाप्नोति । ततश्च विवक्षितार्थाविभासनाभावात्तेषामेव वादिनामज्ञानावृतत्वमेवावशिष्यते, नाभिप्रेतार्थावाप्तिरिति । उक्ता वैनयिकाः, साम्प्रतमक्रियावादिदर्शनं निराचिकीर्षुर्गाथापश्चार्द्धमाह—'लवावसंकी' त्यादि, 'लवं' कर्म, तस्मादपशङ्कि[तुं-अपसर्तुं शीलं येषां ते लवापशङ्कि]नो लोकायतिकाः शाक्यादयश्च सर्वेऽप्यक्रियावादिनः क्रियां न मन्यन्ते, क्षणिकत्वात्सर्वपदार्थानां, "क्षणिकाः सर्वसंस्काराः" इति वचनात् परिकल्पितक्रियते तत्सर्वमनायतमेवोच्यत इत्यक्रियत्वं, क्रियां विना कर्मबन्धोऽपि नास्ति, एवं ते अक्रियावादिन उक्तवन्त इति गाथार्थः ॥ ४ ॥

सम्मिस्स भावं सगिरा गहीए, से मुम्मुई होति अणाणुवादी ।

+ "न्यक्कारस्तु तिरस्क्रिया" इति हैमः श्लो. ४४१ । "तिरस्कारे परीभावः, पराभवनिकृतो भवः ॥ ६८ ॥ न्यक्कारः सनिकारः स्यात्" इति शब्दरत्नाकरः काण्ड ३ । "न्यग् निम्ने नीचकारयोः" इत्यनेकार्थः १–७ । इत्यादिप्रामाण्यतो 'न्यक्कार' एव समीचीनमाभाति, परं न ज्ञायते केन हेतुना सर्वेष्वप्यादर्शेषु 'न्यत्कार' एवोपलभ्यते ।

इमं दुपक्खं इममेगपक्खं, आहंसु छलायतणं च कम्मं ॥ ५ ॥

व्याख्या—ते लोकायतिकाः 'स्वगिरा स्ववाचैव शून्यता [सं]मिश्रभावं भजन्ते, एतावता स्ववाचैव बद्धाः, यस्यैव पदार्थस्यास्तित्वं तस्यैव नास्तित्वं प्रतिपादयन्ति, यस्यैव नास्तित्वं प्रतिपादयन्ति तस्यैवास्तित्वं प्रतिपादयन्ति, एवं मिश्रीभावं भजन्ते । यदि ते जीवादिपदार्थस्य सर्वस्याप्यभावं मन्यन्ते तदास्मिन् एवाभावं प्रतिपद्यन्ते, तथा शिष्यस्य शास्त्रस्य चाभावं प्रतिपद्यन्ते । यदि सर्वशून्यता तर्हि कः कस्योपकुरुते ? सर्वाभावप्रसङ्गात्, आत्मनः शिष्याणां शास्त्रस्य चाभावो जायते । एवं ते सर्वाभावप्रतिपादनात् असम्बद्धप्रलापिनः सन्तः मिश्रीभावं स्ववाचैव प्रतिपद्यन्ते । तथा सांख्या अप्यात्मनः सर्वव्यापित्वं मन्यन्ते अक्रियत्वं च, एवं सांख्या अप्यसमञ्जसभाषिणः, यतस्तेऽप्यक्रियमात्मानमभ्युपगच्छन्तो बन्धमोक्षसद्भावं च स्वाभ्युपगमेनैव सक्रियमिश्रीभावं भजन्ति । यतः सांख्यानां प्रकृतिवियोगे मोक्षः, यद्येवं तदा बन्धं विना न मोक्षः, पूर्वं कर्मणा बन्धस्ततो मोक्षः, कर्मबन्धस्तु क्रियां विना न स्यात् मोक्षोऽपि क्रियां विना न स्यात् । एतावता आत्माऽपि सक्रियः, एवमात्मनः सक्रियत्वं स्ववाचैव प्रतिपन्नं सांख्यैरेवं स्ववचनेनैवात्मनोऽक्रियत्वं व्यवस्थाप्य पुनर्बन्धमोक्षप्ररूपणया चात्मनि सक्रियत्वं प्रतिपन्नं, एवं मिश्रीभावं सांख्यानामप्यायातम् । सर्वदर्शनिनामपि ज्ञेयमिति । एतद्दीपिकाभाष्यं दर्शितमस्ति । अपरं टीकातोऽवगन्तव्यमिति । एवं सर्वोऽपि परवादिसमूहः स्याद्वादिना हेतुदृष्टान्तैर्व्याकुली क्रियमाणः सन् सम्यगुत्तरं दातुमसमर्थो यत्किञ्चनभाषितया "मुम्मुर्

होइ "त्ति गद्गदभाषित्वेनाव्यक्तभाषी भवति×, न किमपि वक्तुमलम् । तथा " अणाणुवाई " इत्यादिनोक्तं साधन-मनुवदितुं शीलमस्येत्यनुवादी, तत्प्रतिषेधादननुवादी, प्रयुक्तिभिर्व्याकुलितमना मौनमेव प्रतिपद्यत इति भावः । यद्यपि ते परतीर्थिका जैनैः समं वक्तुं न प्रभविष्णवस्तथापि कदाग्रहग्रस्ताः स्वपक्षमेव स्थापयन्ति, तद्यथा–' इमं दुपक्खं इममेगपक्खं ' इदमस्मदभ्युपगतं दर्शनमेकपक्षं, अप्रतिपक्षतया एकान्तिकं–अविरुद्धार्थाभिधायितया निष्प्रतिबाधं पूर्वापराविरुद्धमित्यर्थः । एवम्भूतश्च शिष्यं प्रति गुरुर्वक्ति । यद्यपि ते दर्शनिनः स्वीयं वचनं एकपक्षमिति भाषन्ते परं द्विपक्षं, द्वौ पक्षावस्येति द्विपक्षं सप्रतिपक्षमनैकान्तिकम्, [परस्परं] विरुद्धवचनमित्यर्थः । अथवा विरुद्धमनृतमपि निजं वचः ' अविरुद्धं तथ्यं चैतत् ' एवं प्रलापिनां एकपक्षमपि द्विपक्षतया व्यवस्थितं, उत्सूत्रप्ररूपणादिहामुत्र च विडम्बनाकारि चौरपारदारिकयोरिव, यथा ते हि करचरणनासिकाच्छेदादिकामिहैव पुष्पसदृशां विडम्बनां स्वकर्मजनितामनुभवन्ति, परत्र च नरकादौ तत्फलभूतां वेदनामनुभवन्तीति, एवमन्यदपि कर्मोपचयबन्धमभ्युपगम्यते, एवमेकपक्षमपि इहामुत्र च विडम्बनाहेतुत्वाद्-द्विपक्षमित्यर्थः । तथा ते तीर्थान्तरीयाः स्याद्वादोच्छेदाय ' छलायतनं ' वाक्छलं १ सामान्यछलं २ उपचारछलं ३ चेति छलत्रयं प्रयुञ्जन्ते । ' नवकम्बलो देवदत्त ' इत्यादिकं छलमाहुः–कथयन्ति । अथवा षड् ' आयतनानि ' उपादानकारणानि–आश्रवद्वाराणि श्रोत्रेन्द्रियादीनि यस्य कर्मणस्तत्षडायतनं कर्मेत्येवमाहुरिति गाथार्थः ॥ ५ ॥

साम्प्रतमेतद्दूषणायाह—

× " अथवा मूकादपि मूको(मूक)मूकः स्यात् " इति वृ० ।

ते एवमक्खंति अबुज्झमाणा, विरूवरूवाणि अकिरियवाई ।
जे मायइत्ता बहवे मणूसा, भमंति संसारमणवदग्गं ॥ ६ ॥

व्याख्या—ते चार्वाकबौद्धादयो अक्रियावादिनः सम्यग्मार्गानभिज्ञा मिथ्यात्वमलपटलावृतात्मानः परं आत्मानं च व्युद्ग्राहयन्तो 'विरूपरूपाणि' नानाप्रकाराणि शास्त्राणि प्ररूपयन्ति+ । कथम्भूता ? अक्रियात्मानो-ऽक्रियावादिनः, ते च परमार्थमविदन्तो यद्दर्शनमादाय-गृहीत्वा बहवो मनुष्याः संसारमनवदग्र-मपर्यवसानं भ्रमन्त्यरघट्टघटीन्यायेन पर्यटन्तीति गाथार्थः ॥ ६ ॥ अथ शून्यवादमेदं दर्शयन्नाह—

णाइच्चो उएति ण अत्थमेति, ण चंदिमा वड्ढति हायती वा ।
सलिला ण संदंति ण वंति वाया, वंझे णियते कसिणे हु लोए ॥ ७ ॥

व्याख्या—सर्वशून्यवादिनो अक्रियावादिनश्च सर्वजगत्प्रत्यक्षामादित्योद्गमनादिकामेव क्रियां तावन्न मन्यन्ते-निषेधयन्तीत्यर्थः, तथाहि-आदित्यो हि सर्वजनप्रतीतो जगत्प्रदीपकल्पो दिवसादिकालविभागकारी, स एव तावन्नास्ति,

+ "तथाहि—" दानेन महाभोगश्च देहिनां सुरगतिश्च शीलेन । भावनया च विमुक्ति—स्तपसा सर्वाणि सिध्यन्ति ॥ १॥ " तथा 'पृथिव्यापस्तेजोवायुरिति चत्वारि सन्ति०, न कश्चिदात्मा'। तथा बौद्धः—'सर्वं क्षणिकं निरात्मकं' इत्यादीनि शास्त्राणि वदन्ति" इति पूर्व० ।

कुतस्तस्योद्गमनमस्तमनं वा ? यच्च आज्वल्यमानं तेजोमण्डलं दृश्यते तद् भ्रान्तमतीनां द्विचन्द्रादिप्रतिभास-मृगतृष्णिका-कल्पं वर्त्तते । तथा न चन्द्रमा वर्द्धते शुक्लपक्षे नापि कृष्णपक्षे प्रतिदिनमपहीयते । तथा न सलिला—न्युदकानि 'स्यन्दन्ते' पर्वतनिर्झरेभ्यो न स्रवन्ति । तथा 'वाताः' सततगतयो न वान्ति । किं बहुनोक्तेन ? कृत्स्नोऽप्ययं लोको 'वन्ध्यो' ऽर्थ-शून्यो 'नियतो' निश्चितः अभावरूप इति यावत् । सर्वमिदं यदुपलभ्यते तन्मायास्वप्नेन्द्रजालकल्पमिति गाथार्थः ॥ ७ ॥

एतत् परिहर्तुकाम आह—

जहा हि अंधे सह जोतिणा वि, रूवाइं णो पासति हीणणेत्ते ।
संतं पि ते एवमकिरियवाई, किरियं ण पस्संति निरुद्धपन्ना ॥ ८ ॥

व्याख्या—यथा अन्धो—जात्यन्धो हीननेत्रः ज्योतिषाऽपि—प्रदीपादिना सह वर्त्तमानोऽपि रूपाणि—घटपटादीनि 'न पश्यति' नोपलभते, एवं तेऽप्यक्रियवादिनः सदपि घटपटादिकं वस्तु तत्क्रियां चास्तित्वादिकां परिस्पन्दादिकां [वा] न पश्यन्ति । किमिति ? यतो निरुद्धप्रज्ञाः—ज्ञानावरणादिना समाच्छादिता 'प्रज्ञा' ज्ञानं येषां ते तथा, तथाहि—आदित्योद्गमः सर्वान्धकारक्षयकारी कमलाकरोद्घाटनपटुः प्रत्यहं भवन्नुपलक्ष्यते, तत्क्रिया च देशाद्देशान्तरावाप्तिलक्षणा सर्वजनप्रतीताऽनुमीयते । तथा चन्द्रमा अपि प्रत्यहं क्षीयमाणः पुनः कलाभिर्वृद्ध्या प्रवर्द्धमानश्चोपलक्ष्यते । तथा सरितोऽपि प्रावृषि उत्कल्लोलाः वहमानाः दृश्यन्ते । वायवोऽपि वृक्षभङ्गकम्पादिभिरनुमीयन्ते । एवं च न सर्वाभावः,

(या हि)सर्वशून्यताप्ररूपणा सा तु वृथैव, सर्वाभावे कः कस्याग्रे प्रतिपादयति ? कथकोऽपि नास्ति श्रोताऽपि नास्ति । स्वप्नादिकमपि कः पश्यति ? सर्वशून्यत्वाद् । तथा यः सर्वशून्यवादी तस्याप्यभावः स्यात्, तस्माद्यत्किञ्चिदेतदिति । तदेवं विद्यमानायां क्रियायां निरुद्धप्रज्ञास्तीर्थिका अक्रियावादमाश्रिताः । अनिरुद्धप्रज्ञास्तु यथावस्थितार्थवेदिनो भवन्ति, तथाहि—अवधिमनःपर्यायकेवलज्ञानिनस्त्रैलोक्योदरविवरवर्तिनः पदार्थान् करतलामलकन्यायेन पश्यन्ति, समस्तश्रुतज्ञानिनोऽपि आगमबलेनातीतानागतानर्थान् विदन्ति, येऽप्यन्येऽष्टाङ्गनिमित्तपारगास्तेऽपि निमित्तबलेन जीवादिपदार्थपरिच्छेदं विदधतीति गाथार्थः ॥ ८ ॥ तदेवाह—

संवच्छरं सुविणं लक्खणं च, निमित्तदेहं च उप्पाइयं च ।
अट्ठंगमेतं बहवे अहित्ता, लोगंसि जाणंति अणागताइं ॥ ९ ॥

व्याख्या—'संवच्छरं' (नाम) ज्योतिषं 'सुविणं' स्वप्नप्रतिपादको ग्रन्थः 'लक्खणं' सामुद्रिकादि ['निमित्तं' वाक्प्रशस्तशकुनादिकं] 'देहं' मषतिलकादि 'औत्पातिकं' उल्कापातदिग्दाहनिर्घातभूमिकम्पादिकं, अष्टाङ्गनिमित्तं चाधीत्य लोके अतीतानि वस्तून्यनागतानि च जानन्ति, न च शून्यादिवादेष्वेतद् घटते, तस्माच्छून्यवादिनामक्रियावादिनां च युक्तयो निरर्थकाः ॥ ९ ॥

अत्राह परः—ननु श्रुतज्ञानमपि व्यभिचरति, अष्टाङ्गनिमित्तान्यपि व्यभिचारीणि, अत इदमाह—

केई निमित्ता तहिया भवंति, केसिंचि तं विप्पडिएति णाणं ।
ते विज्जभावं अणहिज्जमाणा, जाणामो लोगंसि वयंति मंदा ॥ १० ॥

व्याख्या—कानिचिन्निमित्तानि 'तथ्यानि' सत्यानि भवन्ति, केषाञ्चिन्निमित्तानां निमित्तवेदिनां वा बुद्धिवैकल्याद्यथाविधक्षयोपशमाभावेन तन्निमित्तज्ञानं 'विपर्यासं' व्यत्ययमेति । तथा विद्यामनधीत्यैव लोके साक्षाद् वयं जानीम एवं 'मन्दाः' जडाः वदन्ति, न च निमित्तं तथ्यं । तथाहि— कस्यचित् क्षुतेऽपि कार्यसिद्धिदर्शनाद् शुभशकुनसद्भावेऽपि कार्यविघातदर्शनात्, अतो निमित्तबलेनादेशविधायिनां मृषावाद एव केवलमिति, नैतदस्ति, न हि सम्यगधीतस्य श्रुतस्यार्थे विसंवादोऽस्ति, न हि सुविवेचितं कार्यं कारणं व्यभिचरतीति । ततश्च प्रमातुर[यम]पराधो, न प्रमाणस्य, एवं सुविवेचितं निमित्तं श्रुतमपि न व्यभिचारीति । यच्च—क्षुतेऽपि कार्यसिद्धिदर्शनेन व्यभिचारः शङ्क्यते सोऽपि वृथा, तथाहि—कार्योत्कलेन क्षुतेऽपि गच्छतो या कार्यसिद्धिः सा अपान्तराले अपरशोभननिमित्तबलात्सञ्जातेत्येवमवगन्तव्यं, शोभननिमित्तेन प्रस्थितस्यापि इतरनिमित्तबलात्कार्यव्याघात इति, तदेवमन्तराऽपरनिमित्तसद्भावात्सव्यभिचारशङ्केति स्थितम् ॥ १० ॥

साम्प्रतं क्रियावादिमतं दूषयितुस्तन्मतमाविष्कुर्वन्नाह—

ते एवमक्खंति समिच्च लोगं, तहा तहा समणा माहणा य ।
सयं कडं णऽन्नकडं च दुक्खं, आहंसु विज्जाचरणं पमोक्खं ॥ ११ ॥

व्याख्या—ये क्रियात एव मोक्षमिच्छन्ति त एवमाख्यान्ति—"अस्ति माता पिताऽस्ति सुचीर्णस्य कर्मणः फल'मिति। किं कृत्वा त एवं कथयन्ति? क्रियात एव सर्वं सिध्यतीति स्वाभिप्रायेण 'लोकं' स्थावरजङ्गमात्मकं 'समेत्य' ज्ञात्वा 'किल वयं यथावस्थितवस्तुनो ज्ञातार' इत्येवमभ्युपगम्य सर्वमस्त्येवेत्येवं सावधारणं प्रतिपादयन्ति, न कथञ्चिन्नास्तीति। कथमाख्यान्ति? 'तथा तथा' तेन तेन प्रकारेण, यथा यथा क्रिया तथा तथा स्वर्गनरकादिकं फलमिति, ते च श्रमणा ब्राह्मणा वा क्रियात एव सिद्धिमिच्छन्ति। किल यत्किमपि संसारे दुःखं तथा सुखं तत्सर्वमात्मना कृतं, नान्येन कालेश्वरादिना, एतावता सर्वं कृतं स्यात्, नाकृतं, तथैतत्क्रियावादे घटते। एतावता क्रियात एव कार्यसिद्धिः, न ज्ञानेन। अत्रोच्यते—न च ज्ञानरहितायाः क्रियायाः सिद्धिः, तदुपायपरिज्ञानाभावात्। न चोपायमन्तरेणोपेयमवाप्यत इति प्रतीतम्। सर्वा हि क्रिया ज्ञानवत्येव फलवती जायते। यतः—"पढमं नाणं तओ दया, एवं चिट्ठइ सव्वसंजए। अन्नाणी किं काही?, किं वा नाही? छेयपावगं ॥ १० ॥" [दश० अ. ४] इति वचनात्। इत्यतो ज्ञानस्यापि प्राधान्यम्। नापि ज्ञानादेव कार्यसिद्धिः, क्रियारहितस्य ज्ञानस्य पङ्गोरिव कार्यसिद्धेरनुपपत्तेरित्यालोच्याह—"आहंसु विज्जाचरणं पमोक्खं"ति। न ज्ञाननिरपेक्षायाः क्रियायाः सिद्धिरन्धस्येव, नापि क्रियाविकलस्य ज्ञानस्य पङ्गोरिवेत्यवगम्याहुरुक्तवन्तस्तीर्थकरगणधरादयः। किमाहुः? मोक्षं, कथं? विद्या च—ज्ञानं, चरणं च—क्रिया, ते द्वे अपि विद्येते कारणत्वेन यस्य [असौ] 'विद्याचरणो' मोक्षः, ज्ञानक्रियासाध्य इत्यर्थः ॥ ११ ॥

---

१ प्रथमं ज्ञानं ततो दया एवं तिष्ठति सर्वसंयतः। अज्ञानी किं करिष्यति? किं वा ज्ञास्यति? छेकपापकम् ॥ १ ॥

[ते एवमक्खंति समि(क्ख)च्च लोगं, तहा तहा समणा माहणा य ।
सयं कडं णऽन्नकडं च दुक्खं, आहंसु विज्जाचरणं पमोक्खं ॥ ११ ॥]

व्याख्या—इयं गाथा अन्यथा व्याख्यायते—अनिरुद्धप्रज्ञा—स्तीर्थकरगणधरादयः, लोकं चतुर्दशरज्ज्वात्मकं 'स[मेत्य]मीक्ष्य' ज्ञात्वा एवमाख्यान्तीति सम्बन्धः । 'तहा तहा' यथा यथा समाधिमार्गो व्यवस्थितस्तथा तथा कथयन्ति । किं कथयन्ति ? तद्यथा—यत्किञ्चित् संसारान्तर्गतानामसुमतां यद्दुःखं यच्च सुखं तत्स्वयमात्मना कृतं नान्येन केनचित्कालेश्वरादिना कृतमिति । पुनस्तीर्थंकर गणधरादयः किमाहुः ? तदेवाह—'विद्या' ज्ञानं 'चरणं' चारित्रं, तत्प्रधानो मोक्षस्तं उक्तवन्तः, न ज्ञानक्रियाभ्यां समुदिताभ्यां विना मोक्षः, एवमाख्यान्तीति गाथार्थः ॥ ११ ॥

अथैतानि समवसरणानि केन प्रणीतानि ? यथोक्तं यच्च वक्ष्यते इत्येतदाशङ्क्याह—

ते चक्खुलोगंसिह णायगा उ, मग्गाणुसासंति हितं पयाणं ।
तहा तहा सासयमाहु लोए, जंसी पया माणव ! संपगाढा ॥ १२ ॥

व्याख्या—ते तीर्थकरगणधरादयो [इह—अस्मिन्] लोके चक्षुरिव वर्तन्ते, यथा चक्षुर्योग्यदेशावस्थितान् पदार्थान् परिछिनत्ति, एवं तेऽपि लोकस्य यथावस्थितपदार्थाविष्करणं कारयन्ति । तथा ते च भगवन्तोऽस्मिंल्लोके 'नायकाः' प्रधानाः सदुपदेशदानतो वा नायकाः, तथा 'मार्गं' ज्ञानक्रियादिकं मोक्षमार्गमनुशासन्ति—प्रतिपादयन्ति । प्रजानां

'हितं' सद्गतिप्रापक-मनर्थनिवारकं। किञ्च—तथा तथा लोकं शाश्वतमाहुः, येन येन प्रकारेण द्रव्यास्तिकनयाभिप्रायेण यद्वस्तु शाश्वतं [तत्तथा] आहु—रुक्तवन्तः। यदि वा प्राणिनः संसारे यथा यथा व्यवस्थितास्तथा तथा आहुरिति। यथा यथा मिथ्यादर्शनाभिवृद्धिस्तथा तथा शाश्वतो लोकः, यथा च "महारंभयाए महापरिग्गहयाए" इत्यादिभि-श्चतुष्प्रकारैर्जीवा नारकायुष्कं यावन्निबध्नन्ति तावत्संसारवृद्धिः। अथवा यथा यथा रागद्वेषादिवृद्धिस्तथा तथा संसारोऽपि शाश्वत इत्याहुः। यथा यथा कर्मोपचयमात्रा तथा तथा संसाराभिवृद्धिः, दुष्टमनोवाक्कायाभिवृद्धौ च संसाराभिवृद्धिरन-न्तश्चेति। यस्मिंश्च संसारे 'प्रजाः' लोकाः हे मानव! 'प्रगाढाः' प्रकर्षेण व्यवस्थिता इति गाथार्थः ॥ १२ ॥

अथ तत्पर्यटनद्वारेणाह—

जे रक्खसा वा जमलोइया य, जे या सुरा गंधव्वा य काया।
आगासगामी य पुढोसिया जे, पुणो पुणो विप्परियासुवेंति ॥ १३ ॥

व्याख्या—ये राक्षसात्मानो ये यमलौकिकात्मानः—सर्वे परमाधार्मिकाः, एतावता सर्वे भवनपतयो गृहीताः, ये च सुराः सौधर्मादिवैमानिकाः, च शब्दाज्ज्योतिष्काः, गान्धर्वा—विद्याधरास्तथा 'कायाः' पृथिवीकायादयः षडपि, तथा [आकाशगामिनः—सम्प्राप्तलब्धयश्चतुर्विधा देवा विद्याधराः पक्षिणो वायवश्च, ये च] पृथिव्याश्रिताः सर्वेऽपि जीवनिकायाः

---

१ महारम्भतया महापरिग्रहतया।

स्वकृतकर्मभिः पुनः पुनर्विविध-मनेकप्रकारं 'पर्यासं' परिक्षेपं-अरघट्टघटीन्यायेन परिभ्रमणं 'उप' सामीप्येन 'यान्ति' गच्छन्तीति गाथार्थः ॥ १५ ॥ किञ्च—

जमाहु ओहं सलिलं अपारगं, जाणाहि णं भवगहणं दुमोक्खं ।
जंसी विसन्ना विसयंगणाहिं, दुहओ वि लोयं अणुसंचरंति ॥ १४ ॥

व्याख्या—यं संसारमाहु-रुक्तवन्तः, के ? तीर्थंकरगणधरादयः, कीदृशमाहुः संसारं ? स्वयंभूरमणसलिलौघवदपारगं, यथा स्वयम्भूरमणसलिलौघो न केनचिज्जलचरेण लङ्घयितुं शक्यते, एवमयमपि संसारसागरः सम्यग्दर्शनमन्तरेण लङ्घयितुं न शक्यत इति 'जानीहि' अवगच्छ, णमिति वाक्यालङ्कारे, भवगहनमिदं चतुरशीतियोनिलक्षप्रमाणं 'दुर्मोक्षं' दुस्तरमस्तिवादिनामपि, किम्पुनर्नास्तिकानामिति । 'यस्मिन्' संसारगहने सावद्यानुष्ठायिनः कुमार्गपतिताः 'विषण्णा' मग्नाः विषयाङ्गनाभिर्वशीकृताः सर्वत्र सदनुष्ठाने अवसीदन्ति । ततश्च विषयाङ्गनाभिर्वशीकृताः सदनुष्ठानविमुखाः कुमार्गपतिताः 'लोकं' स्थावरजङ्गमात्मकं 'अनुसञ्चरन्ति' गच्छन्ति । यदि वा लिङ्गमात्रप्रव्रज्यया अविरत्या च स्वकर्मप्रेरिता 'लोकं' चतुर्दशरज्ज्वात्मकं 'अनुसञ्चरन्ति' पर्यटन्तीति गाथार्थः ॥ १४ ॥ किञ्च—

न कम्मुणा कम्म खवेंति बाला, अकम्मुणा कम्म खवेंति धीरा ।
मेधाविणो लोभमया वितीता, संतोसिणो नो पकरेंति पावं ॥ १५ ॥

व्याख्या—ते कुवादिनो मिथ्यामतयः सावद्येतरदोषा[दोषा]नभिज्ञाः सन्तः कर्मक्षयार्थमभ्युद्यता निर्विवेकतया सावद्यमेव कर्म कुर्वते, न च कर्मणा—सावद्यारम्भेण 'कर्म' पापं क्षपयन्ति, अज्ञानत्वात् बालाः। यथा च कर्म क्षप्यते तथा दर्शयति—'अकर्मणा तु' आश्रवनिरोधेन अन्तशः शैलेश्यवस्थायां 'धीरा' महासत्त्वाः कर्म क्षपयन्ति। सद्वैद्याश्चिकित्सया रोगानिव। कीदृशाः? 'मेधाविनः' हिताहितप्राप्तिपरिहाराभिज्ञाः, पुनः कीदृशाः? (लोभमयात्—परिग्रहाद्व्यतीताः) लोभातीताः—वीतरागा इत्यर्थः। तथा सन्तोषिणः, त एवम्भूता भगवन्तः पाप—मसदनुष्ठानापादितं कर्म न कुर्वते। एतावता ये लोभातीतास्ते अवश्यं पापं न कुर्वन्तीति स्थितं, इति गाथार्थः॥ १५॥ ये लोभातीतास्ते किम्भूता भवन्तीत्याह—

तेऽतीयमुप्पन्नमणागयाइं, लोगस्स जाणंति तहागयाइं।
णेता[रो]सि अन्नेसि अणन्ननेया, बुद्धा हु ते अंतगडा भवंति॥ १६॥

व्याख्या—ते वीतरागाः लोकस्य—चतुर्दशरज्ज्वात्मकस्य अतीतान्य—न्यजन्माचरितानि तथा वर्तमानानि अनागतानि—भवान्तरभावीनि सुखदुःखादीनि 'तथागतानि च' यथैव स्थितानि तथैव जानन्ति, न पुनर्विभङ्गज्ञानिन इव विपरीतं पश्यन्ति, यथावस्थितमेव पश्यन्तीति भावः। तेषां नान्यः कोऽपि तत्त्वदर्शकः, ते एवंविधा अन्येषां संसारस्य पारं नेतुमलं, ते स्वयम्बुद्धाः सन्तः तत्पर्यन्तकारी निश्चयेन कर्मणामन्तकृतो ज्ञेया इति गाथार्थः॥ १६॥

यावदद्यापि भवान्तं न कुर्वन्ति तावत् किं कुर्वन्तीत्याह—

ते णेव कुव्वंति न कारविंति, भूताहिसंकाए दुगुंछमाणा ।
सया जता विप्पणमंति धीरा, वि[ण्णाय]त्ति धीरा य हवंति एगे ॥ १७ ॥

व्याख्या—'ते' वीतरागाः सम्यग्ज्ञानिनः सावद्यानुष्ठानं भूतोपमर्दाभिशङ्कया तत् कर्म जुगुप्समानाः सन्तो न स्वतः कुर्वन्ति नाप्यन्येन कारयन्ति कुर्वन्तमप्यन्यं नानुमन्यन्ते । एवमन्यान्यपि महाव्रतान्यायोज्यानि । तदेवं सदा 'यताः' संयताः पापविमुखाः तथाविधं संयमानुष्ठानं प्रति प्रणमन्ति । के ? 'धीराः' महापुरुषाः, एके धीराः एवंविधं सम्यग्मार्गं ज्ञात्वा शूराः वीराः परीषहाञ्जयन्तीति गाथार्थः ॥ १७ ॥

किं ज्ञात्वा सावद्यं न कुर्वन्तीत्याह—

डहरे य पाणे वुड्ढे य पाणे, ते आत्तओ पासति सव्वलोए ।
उवेहती लोगमिणं महंतं, बुद्धप्पमत्ते सुपरिव्वएज्जा ॥ १८ ॥

व्याख्या—'डहरा' लघवः कुन्थ्वादयः सूक्ष्मा वा, ते सर्वेऽपि 'प्राणाः' प्राणिनो, ये च 'वृद्धाः' बादराः प्राणिनस्तान् सर्वानप्यात्मतुल्यान्–आत्मवत्पश्यति, सर्वस्मिन्नपि लोके यथा मम दुःखमनभिमतं एवं सर्वेषामपि प्राणिनां दुःखमप्रियं, सर्वेऽपि दुःखादुद्विजन्ति, इति मत्वा तेऽपि प्राणिनो नाक्रमितव्याः–न संघट्टनीया इत्येवं यः [पश्यति स] पश्यति । तथा लोकमिमं महान्तमुत्प्रेक्षते, सूक्ष्मबादरभेदैः प्राणिभिराकुलत्वान्महान्तमुत्प्रेक्षते, एवं लोकमुत्प्रेक्षमाणो 'बुद्धः'

अवगततत्त्वः सर्वाणि स्थानान्यशाश्वतानि, तथा नात्र संसारे सुखलेशोऽप्यस्तीत्येवं मन्यमानोऽप्रमत्तः सन् संयमं पालयन् परिव्रजेदिति गाथार्थः ॥ १८ ॥ किञ्च—

जे आयओ परओ वा वि णच्चा, अलमप्पणो होति अलं परेसिं ।
तं जोइभूतं च सयाऽऽवसेज्जा, जे पाउकुज्जा अणुवीइ धम्मं ॥ १९ ॥

व्याख्या—यः स्वयं सर्वज्ञः आत्मनो लोकद्वयोदरविवरवर्तिपदार्थदर्शी यथावस्थितं लोकं ज्ञात्वा, यश्च गणधरादिकः परतः-तीर्थकरादेर्जीवादीन् पदार्थान् विदित्वा परेभ्य उपदिशति, स एवम्भूतो हेयोपादेयवेदी आत्मनः संसारात्त्रातुमलं, आत्मानं भवाटव्या लङ्घयितुं समर्थः स्यात्, सदुपदेशदानेन परेषां च त्राता जायते, तमेवम्भूतं पदार्थप्रकाश[क]तया 'ज्योतीभूतं' चन्द्रार्कप्रदीपकल्पमात्महितमिच्छन् भवभयोद्विग्न आत्मानं धन्यं मन्यमान आ[वसेत्-] सेवेत, गुर्वन्तिक एव यावज्जीवं संवसेत् । उक्तं च—"णाणस्स होइ भागी, थिरयरओ दंसणे चरित्ते य । धन्ना आवकहाई, गुरुकुलवासं न मुंचंति ॥ १ ॥" गुरुकुलवासं के न मुञ्चन्ति ? ये कर्मपरिणतिं अनुविचिन्त्य यदि वा 'धर्मं' श्रुतचारित्राख्यं श्राद्धधर्मं साधुधर्मं वा 'अनुविचिन्त्य' पर्यालोच्य, तमेव धर्मं 'प्रादुष्कुर्युः' प्रकटयेयुस्ते गुरुकुलवासं सदा आसेवन्ते, यदि वा ज्योतिर्भूतं आचार्यं सततमासेवन्ते त एव आगमज्ञा धर्ममनुविचिन्त्य यथावस्थितं प्रादुष्कुर्युरिति गाथार्थः ॥ १९ ॥

---

१ ज्ञानस्य भवति भागी स्थिरतरको दर्शने चारित्रे च । धन्या यावत्कथं गुरुकुलवासं न मुञ्चन्ति ॥ १ ॥

अत्ताण जो जाणइ जो य लोगं, गई च जो जाणइ णागई च ।
जो सासयं जाण असासयं × च, जाई च मरणं च जणोववायं ॥ २० ॥

व्याख्या—यः आत्मानं सम्यग्जानाति, तथा यश्च लोकस्वरूपं जानाति, तथा यश्च जीवानां गतिमागतिमनागतिं च—यत्र गतः सन् चलमानो नायाति (तां सिद्धिं) इत्यादि जानाति, यश्च पदार्थानां नित्यानित्यत्वं जानाति, तथा यश्च जीवानां जन्म मरणं च जानाति, तथा यश्च देवनारकाणां उपपातोद्वर्तनां च जानाति, स एव क्रियावादी, स एवात्मज्ञ, इति द्वितीयवृत्तस्यान्ते क्रिया विशेषेति गाथार्थः ॥ २० ॥

अहो वि सत्ताण विउट्टणं च, जो आसवं जाणइ संवरं च ।
दुक्खं च जो जाणइ निज्जरं च, सो भासिउमरिहइ किरियवादं ॥ २१ ॥

व्याख्या—तथा यश्च [सत्त्वानां] अधो—नरकादिषु कर्मविपाकजनितां 'विकुट्टनां' शारीरादिरूपां जानाति, तथा आश्रवं संवरं च जानाति, यश्च, चकारात् पुण्यपापे जानाति, तथा जीवानां दुःखं सुखं च यो जानाति, तथा तपसा निर्जरां च यो जानाति, तथा यश्च कर्मबन्धहेतूंस्तद्विपर्यासहेतूंश्च मुख्यतया जानाति, तथा 'यावन्तः संसारहेतवस्तावन्त एव निर्वाणहेतवः' एवं यः सम्यक् परमार्थतो जानाति, स एव क्रियावादं भाषितुमर्हति। किंविशिष्टं क्रियावादं? अस्ति जीवः अस्ति

× पाठान्तरं "जाणसिऽसासयं च" इति हर्षकुलीयदीपिकाप्रतिकृतौ ।

रुन्धन्ति पापं क्षपयन्ति च पूर्वोपचितं कर्म, तपसा च कर्मनिर्जरा, इत्येवंरूपं क्रियावादं स एव भाषितुमर्हति, नापर इति । अत्र च श्लोकद्वयेन नवापि पदार्थाः सङ्गृहीता इति विस्तरार्थिना बृहद्वृत्तिरनुसरणीयेति गाथार्थः ॥ २१ ॥

साम्प्रतमध्ययनार्थमुपसञ्जिहीर्षुः सम्यग्वादफलमुपदर्शयति—

सद्देसु रूवेसु असज्जमाणो, गंधेसु रस्सेसु अदुस्समाणो ।
णो जीवितं णो मरणेऽहिकंखी, आयाणगुत्ते वलया विमुक्के त्ति बेमि ॥ २२ ॥

व्याख्या—'शब्देषु' श्रुतिसुखदेषु 'रूपेषु' नयनानन्दकारिषु 'सङ्गमकुर्वन्' गार्ध्यमकुर्वाणस्तथा गन्धेष्वमनोज्ञेषु रसेषु च अन्तप्रान्तेषु 'अदुस्समाणो' द्वेषमकुर्वन् जीवित-मसंयमजीवितं नाभिकाङ्क्षेत् नापि परीषहोपसर्गैरभिद्रुतो मरणमभिकाङ्क्षेत्, जीवितमरणेऽनभिलाषी संयममनुपालयेत् । तथा 'आदाने' संयमे 'गुप्तो' रक्षपालः तथा 'वलया विमुक्के'ति भाववलयं-माया, तया विप्रमुक्तः संयममनुपालयेदिति परिसमाप्त्यर्थे, ब्रवीमीति पूर्ववदिति गाथार्थः ॥ २२ ॥

इति श्रीपरमसुविहितखरतरगच्छविभूषण-श्रीमत्साधुरङ्गगणिवरगुम्फितायां श्रीसूत्रकृताङ्गदीपिकायां
समाप्तं समवसरणाख्यं द्वादशमध्ययनम् ।

अथ त्रयोदशं याथातथ्यमध्ययनम् ।

अथानन्तरं त्रयोदशमारभ्यते याथातथ्याख्यं, तस्येयमादिगाथा—

आहत्तहियं तु पवेयइस्सं, नाणप्पकारं पुरिसस्स जातं ।
सओ य धम्मं असतो असीलं, संतिं असंतिं करिस्सामि पाउं ॥ १ ॥

व्याख्या—'याथातथ्यं' तत्त्वं, तच्च परमार्थचिन्तायां सम्यग्ज्ञानादिकं–ज्ञानदर्शनचारित्ररूपं, एतत्पुरुषस्य–जन्तोर्यज्जातं–उत्पन्नं, तदहं 'प्रवेदयिष्यामि' कथयिष्यामि । 'तु' शब्दो विशेषणे । वितथाचारिणस्तद्दोषाँश्चाविर्भावयिष्यामि । तथा नानाप्रकारं वा विचित्रं पुरुषस्य स्वभावमुच्चावचं–प्रशस्ताप्रशस्तरूपं प्रवेदयिष्यामि । तथा 'सतः' सत्पुरुषस्य धर्मं श्रुतचारित्राख्यं तथा 'शीलं' उद्यतविहारित्वं, तथा शान्ति–मशेषकर्मक्षयलक्षणां प्रादुष्करिष्ये–प्रकटयिष्यामि । तथा 'असत' अशोभनस्य परतीर्थिकस्य गृहस्थस्य पार्श्वस्थस्य वा 'अशीलं' कुत्सितशीलं अशान्तिमनिर्वाणरूपां संसृतिं प्रादुर्भावयिष्यामीति गाथार्थः ॥ १ ॥

अहो य राओ य समुट्ठिएहिं, तहागएहिं पडिलब्भ धम्मं ।
समाहिमाघातमजोसयंता, सत्थारमेवं फरुसं वयंति ॥ २ ॥

व्याख्या—'अहोरात्र'महर्निशं सम्यगुत्थिताः—समुत्थितास्ते हि सदनुष्ठानवन्तस्तेभ्यः श्रुतधरेभ्यस्तथा [आचा]र्येभ्य-स्तीर्थकृद्भ्यो वा धर्मं संसारनिस्तरणोपायं [illegible] आत्मोत्कर्षात्तीर्थकृदा-[ख्या]ख्यातं सम्यग्दर्शनादिकं मोक्षमार्गं 'अजोषयन्तः' असेवन्तः—सम्यगकुर्वाणा निह्नवा बोटिकाश्च स्वरुचिविरचितव्या-ख्याप्रकारेण निर्दोषमपि सर्वज्ञप्रणीतं मार्गं विध्वंसयन्ति, कुमार्गं प्ररूपयन्ति । एवं भाषन्ते—असौ सर्वज्ञ एव न भवति, यः 'क्रियमाणं कृत'मिति प्रत्यक्षेण विरुद्धं प्ररूपयतीति जमालिनः, तथा 'यः पात्रादिपरिग्रहान्मोक्षमार्गमाविर्भावयति सोऽपि न सर्वज्ञः' इत्येवं बोटिकाः प्रतिपादयन्ति, एवं सर्वज्ञोक्तमश्रद्दधाना धृतिसंहननदुर्बलतया संयमभारं वोढुमसमर्थाः कचिद्विषी-दन्तोऽपरेण केनापि चञ्चलतया शिथिलाः सन्तस्तं—शास्तारं परुषं वदन्ति—कर्कशं निष्ठुरं भाषन्त इति गाथार्थः ॥ २ ॥

> विसोहियं ते अणुकाहयंते, जे आयभावेण वियागरेज्जा ।
>
> अट्ठाणिए होंति बहूगुणाणं, जे णाणसंकाए मुसं वएज्जा ॥ ३ ॥

व्याख्या—कुमार्गप्ररूपणाऽपनयनद्वारेण विशोधितः सम्यग्दर्शनज्ञानचारित्राख्यो मोक्षमार्गस्तं मोक्षमार्गं 'ते' निह्नवा मिथ्यामतय आत्मोत्कर्षात् स्वरुचिविरचितव्याख्याप्रकारेण व्यामोहिता 'आत्मभावेन' स्वाभिप्रायेण आचार्य-पारम्पर्येणायातमप्यर्थं निषिद्ध्य अन्यथा व्याख्यानयन्ति । किमिति ? यतस्ते गम्भीराभिप्रायं सूत्रार्थं कर्मोदयात्पूर्वापरेण यथावत्परिणामयितुमसमर्थाः पण्डितमानिन उत्सूत्रं प्रतिपादयन्ति । आत्मभावव्याकरणं महतेऽनर्थाय । स एवम्भूतः

स्वकीयाभिनिवेशादस्थानिकोऽनाचारो बहूनां गुणानां ज्ञानादीनां अभाजनं भवति । [क्वचित्पाठः] " अट्ठाणिए होति बहूणिवेस " त्ति, अस्यायमर्थो–अस्थान–अभाजनं अपात्रमसौ भवति सम्यग्ज्ञानादीनां गुणानां, किम्भूतो ? बहु–रनर्थसम्पादकत्वेनासदभिनिवेशो यस्य स बहुनिवेशः, यदि वा बहूनां गुणानामस्थानिको–ऽनाचारो बहूनां दोषाणां [च] ' निवेशः ' स्थानं आश्रय इति । किम्भूताः ? पुनरेवं सम्भवन्तीति दर्शयति–' ये ' केचन दुर्गृहीतज्ञानलवाऽवलेपिनो ' ज्ञाने ' श्रुतज्ञाने शङ्का–ज्ञानशङ्का, तया मृषावादं वदेयुः, एतदुक्तं भवति–सर्वज्ञप्रणीते आगमे शङ्कां कुर्वन्ति, अयं तत् प्रणीत एव न भवेत्, अन्यथा वाऽस्यार्थः स्यात् । यदि वा ' ज्ञानशङ्कया ' पाण्डित्याभिमानेन मृषावादं वदेयुः यथाऽहं ब्रवीमि तथैव [युज्यते] नान्यथेति गाथार्थः ॥ ३ ॥ किञ्चान्यत्—

जे आवि पुट्ठा पलिउंचयंति, आयाणमट्ठं खलु वंचयंति ।
असाहुणो ते इह साहुमाणी, मायण्णि एसिंति अणंतघातं ॥ ४ ॥

व्याख्या—ये केचन अविदितपरमार्थाः स्वल्प[तुच्छ]तया समुत्सेकिनोऽपरेण पृष्टाः–कस्मादाचार्यात्सकाशादधीतं ? श्रुतं भवद्भिः, ते तु स्वकीयमाचार्यं ज्ञानावलेपेन निह्नुवाना अपरं प्रसिद्धं प्रतिपादयन्ति, यदि वा मयैवैतत्स्वत उत्प्रेक्षित-(मधीतं)मित्येवं ज्ञानावलेपात् 'पलिउंचयंति'त्ति निह्नुवते, निह्नवं च कुर्वाणाः ' आदानं ' ज्ञानादिकं मोक्षो वा, तमर्थं [' खलु ' निश्चयेन] ' वञ्चयन्ति ' भ्रंशयन्त्यात्मनः, एवं कुर्वाणाश्च ते ' असाधवः ' परमार्थतः–साधुविचारे असाधवोऽपि

'साधुमानिनः' आत्मोत्कर्षात्सदनुष्ठानमानिनो मायान्विता 'एष्यन्ति' यास्यन्ति 'अनन्तशो' बहुशो 'घातं' विनाशं संसारं वा अनवदग्रं अनुवर्तयिष्यन्तीति, दोषद्वयदुष्टत्वादेषां, एकं तावत्स्वयं असाधवो द्वितीयं साधुमानिनः, उक्तं च—" पावं काऊण पुणो, अप्पाणं सुद्धमेव वाहरइ । दुगुणं करेइ पावं, बीयं बालस्स मंदत्तं ॥ १ ॥ " तदेवमात्मोत्कर्ष-दोषात् बोधिलाभमप्युपहत्यानंतसंसारभाजो भवन्त्यसुमन्तः—प्राणिन इति स्थितमिति गाथार्थः ॥ ४ ॥

मानविपाकमुपदर्श्याधुना क्रोधादिदोषमुद्भावयितुमाह—

जे कोहणे होति जगट्ठभासी, विओसियं जे उ उदीरएज्जा ।
अंधे व से दंडपहं गहाय, अविओसिए घासति पावकम्मी ॥ ५ ॥

व्याख्या—यः प्रकृत्या स्वभावेन क्रोधनो भवति तथा यश्च जगदर्थभाषी भवति, जगत्यर्था जगदर्थाः, ये यथा व्यवस्थिताः पदार्थाः तांस्तथैव भाषते [यः] स जगदर्थभाषीत्युच्यते । तद्यथा—' ब्राह्मणं डोडमिति ब्रूयात् ' तथा ' वणिजं किराट 'मिति ' शूद्रं आभीर 'मिति ' श्वपाकं चाण्डाल'मिति, तथा ' काणं काण 'मिति, तथा ' खंजं कुब्जं वडभं, कुष्ठिनं क्षयिण 'मित्यादि, तथा यो यस्य दोषस्तं तेन खरं परुषतरं ब्रूयात् यः स जगदर्थभाषीति । अथवा जयार्थभाषी—यथैवात्मनो जयो भवति तथैव अविद्यमानमप्यर्थं भाषते, येन केनचित् प्रकारेण असत्प्ररूपणयाऽपि

१ पापं कृत्वा पुनरात्मानं शुद्धमेव व्याहरति । द्विगुणं करोति पापं द्वितीयं बालस्य मन्दत्वम् ॥ १ ॥

आत्मनो नाशमिच्छतीत्यर्थः । तथा ' विओसियं 'ति व्यवसितं-उपशान्तं कलहं-विवादं यः पुनरप्युदीरयेत्-प्रज्वालयेत्, किमुक्तं भवति ? कलहकारिभिर्मिथ्यादुष्कृतादिना परस्परं क्षामितेऽपि तत्तद्ब्रूयात् येन पुनरपि तेषां क्रोधोदयो भवति । साम्प्रतमेतद्विपाकं दर्शयति-यथा अन्धः ' दण्डपथं ' गोमण्डं [क्षुद्रमार्गं] गृहीत्वा व्रजन् अज्ञानतया कण्टकश्वापदादिभिः पीड्यते, एवमसावपि केवलं लिङ्गधारी अनुपशान्तक्रोधः उदीरणशीलः अधिकरणोदीरणतः अनुपशान्तद्वन्द्वः ' पापकर्मकारी ' अनार्यकर्मकर्ता, एते सर्वेऽपि संसारे अनन्तशः [क्षुण्यन्ते-] पीड्यन्त इति गाथार्थः ॥ ५ ॥ किञ्चान्यत्—

जे विग्गहीए अन्नायभासी, न से समे होति अझंझपत्ते ।
ओवायकारी य हिरीमणे य, एगंतदिट्ठी य अमाइरूवे ॥ ६ ॥

व्याख्या—यथा यः कश्चित् साधुर्यद्यपि प्रत्युपेक्षणादिका क्रिया करोति तथापि युद्धप्रियः कचि[कचि]र्भवति, तथाऽन्याय्यभाष्य-स्थानभाषी गुर्वाद्यधिक्षेपकारी[वा], यश्चैवम्भूतो नासौ ' समो ' रक्तद्विष्टतया मध्यस्थो भवति, नापि ' अझंझाप्राप्तः ' अकलहप्राप्तः, [यदि वा] सम्यग्दृष्टिभिः समो न भवति । अतः-अक्रोधनेन अकर्कशभाषिणा उपशान्तयुद्धानुदीरकेण न्याय्यभाषिणा अझंझाप्राप्तेन मध्यस्थेन च भाव्यमिति । एवं पूर्वोक्तदोषवर्जी सम्युपपातकारी—आचार्यनिर्देशकारी, यथोपदेशं क्रियासु प्रवृत्तः यथोपदेशप्रवर्तको वा, तथा ह्रीमनाः, ' ह्री ' लज्जासंयमो मूलोत्तरगुणभेदभिन्नः, तत्र मनो यस्य स ह्रीमनाः, [यदि वा] अनाचारं कुर्वन् आचार्यादिभ्यो लज्जते, तथा ' एगंतदिट्ठी ' एकान्तेन तत्त्वेषु जीवादिपदार्थेषु दृष्टि-

रेकान्तदृष्टिस्तथा 'अमाइरूवे' न गुर्वादीन् छद्मना उपचरति, नाप्यन्येन केनचित्सार्धं छद्मव्यवहारं विधत्ते, एवंविधेन साधुना भाव्यमिति गाथार्थः ॥ ६ ॥ पुनरपि सद्गुणोत्कीर्तनायाह—

से पेसले सुहुमे पुरिसजाए, जच्चन्निए चेव सु उज्जुयारी ।
बहुंपि अणुसासिए जे तह(च्चे)च्चा, समे हु से होति अझंझपत्ते ॥ ७ ॥

व्याख्या—कश्चित्संसारोद्विग्नः प्रमादस्खलने गुर्वादिना [बह्वपि] अनुशास्यमानस्तथैव सन्मार्गानुसारिणी 'अर्चा' लेश्या–चित्तवृत्तिर्यस्य भवति स तथाऽर्चः । तथा स एव 'पेशलो' मिष्टवाक्यो विनयादिगुणसमन्वितः, तथा सूक्ष्मदर्शित्वात्सूक्ष्मभाषित्वात्सूक्ष्मः, स एव पुरुषजात–स एव परमार्थतः पुरुषा[र्थ]कारी, तथा स एव जात्यन्वितः–सुकुलोत्पन्नः, सुशीलान्वितो हि कुलीन इत्युच्यते, न सुकुलोत्पत्तिमात्रेण, तथा स एव 'ऋजुकारी' यथोपदेशं यः प्रवर्तते, न पुनर्वक्रतया गुरुवचनं प्रतिकूलयति । तथा यश्च तथार्चः पेशलः सूक्ष्मभाषी जात्यादिगुणान्वितः कश्चिद्वक्रः 'समो' मध्यस्थः, निन्दा[यां पूजा]यां च न रुष्यति [नापि तुष्यति], तथा 'झंझा' क्रोधो माया वा, तामप्राप्तः अझंझाप्राप्तः, एवंविधः साधुर्वीतरागतुल्यो भवतीति गाथार्थः ॥ ७ ॥

प्रायस्तपस्विनां ज्ञानावलेपो भवतीत्यतस्तमधिकृत्याह—

जे आवि अप्पं वसुमंति मत्ता, संखाय वायं अपरिच्छ कुज्जा ।

तवेण वाऽहं सहिओ त्ति मंता, अण्णं जणं पासति बिंबभूयं ॥ ८ ॥

व्याख्या—यः कोऽपि तुच्छप्रकृतिरल्पतयाऽऽत्मानं 'वसु' द्रव्यं, तच्च परमार्थचिन्तायां संयमस्तद्वन्तमात्मानं मत्वाऽहमेवात्र संयमवान्—मूलोत्तरगुणानां सम्यग्विधायी, नापरः कश्चिन्मत्तुल्योऽस्तीति । येन जीवादयः पदार्थाः सम्यग् परिच्छिद्यन्ते तज्ज्ञानं संख्येत्युच्यते, तद्वन्तमात्मानं मत्वा [सम्यक् परमार्थमपरीक्ष्य वादं—] आत्मोत्कर्षं कुर्यात् । तथा तपसा आत्मोत्कर्षं करोति, यथाऽहमेव तपस्वी, न मत्तुल्यस्तपस्वी कश्चिदस्तीति मदं करोति । अन्यं साधुजनं गृहस्थजनं वा 'बिम्बभूतं' जलचन्द्रवत्तदर्थशून्यं कूटकार्षापणवद्वा लिङ्गमात्रधारिणं पुरुषाकृतिमात्रं वा 'पश्यति' अवमन्यते साधून्, आत्मानमेव बहु मन्यते । यदन्यदस्थानं तत्तदात्मन्येवारोप्यापरं न किञ्चित्तथा पश्यतीति गाथार्थः ॥ ८ ॥ किञ्च—

एगंतकूडेण उ से पलेति, न विज्जती मोणपयंसि गोत्ते ।
जे माणणट्ठेण विउक्कसेज्जा, वसुमन्नतरेण अबुज्झमाणे ॥ ९ ॥

व्याख्या—एवंविधः पूर्वोक्तः पुरुषः, यथा मृगादिः कूटेन बद्धः परवशः सन् एकान्तदुःखभाग्भवति, तथा सोऽपि पुरुषो भावकूटेन स्नेहमयेन बद्धः संसारे दुःखभाग् भवति, संसारचक्रवाले प्रकर्षेण लीयते—प्रलीयते, अनेकप्रकारं संसारं परिभ्रमति । एवम्भूतश्च ['मौनपदं' संयमस्तत्र] मौनीन्द्रे वा पदे—सर्वज्ञप्रणीते मार्गे नासौ विद्यते, तथा नाप्यसौ उच्चैर्गोत्रे प्रवर्तते, स तु नीचैर्गोत्रं प्राप्नोति, आत्मोत्कर्षवत्त्वादिति । तथा यो हि 'माननार्थेन' पूजासत्कारादिना मदं

कुर्यात्, स न सर्वज्ञप्रणीते मार्गे विद्यते, तथा 'बहु' प्रभूतं, तदेव संयमस्तं संयममादाय परमार्थमजानन् [अन्यतरेण] ज्ञानादिना माद्यति स पठन्नपि सर्वशास्त्राणि तदर्थं चावगच्छन्नपि सर्वज्ञमतं परमार्थतो न जानातीति गाथार्थः ॥ ९ ॥

यथात्मानं बहुमन्यते मदं च करोति स तु परमार्थतो ऽज्ञानी अत एवं करोति । अथ जातिमधिकृत्याह—

जे माहणे खत्तियजायए वा, तहुग्गपुत्ते तह लेच्छई वा ।
जे पव्वइए परदत्तभोई, गोत्ते ण जे थब्भऽभिमाणबद्धे ॥ १० ॥

व्याख्या—यो जात्या ब्राह्मणः क्षत्रियो वा उग्रपुत्रः, 'लेच्छई वा' क्षत्रियविशेष एव, एवमादि विशिष्टकुलोत्पन्नोऽपि यथावस्थितसंसारस्वरूपवेदी [यः] प्रव्रजित–स्त्यक्तराज्यादिगृहबन्धनः, परदत्तभोजी, सम्यक्संयमानुष्ठायी उच्चैर्गोत्रे हरिवंशादिके समुत्पन्नोऽपि 'स्तम्भं' गर्वं नोपयायात्, गर्वं न करोतीति भावः । किम्भूते गोत्रे जातः ? 'अभिमानबद्धे' अभिमानास्पदे । किमुक्तं भवति ? विशिष्टकुलोत्पन्नोऽपि सर्वलोकमान्योऽपि प्रव्रजितः सन् कृतशिरस्तुण्डमुण्डनो भिक्षार्थं परगृहाण्यटन् कथं हास्यास्पदं गर्वं कुर्यात् ? नैवासौ मानं विदध्यादिति गाथार्थः ॥ १० ॥

न चासौ मानः क्रियमाणो गुणाय स्यादिति दर्शयितुमाह ।

न तस्स जाती व कुलं व ताणं, णण्णत्थ विज्जाचरणं सुचिण्णं ।
णिक्खम्म से सेवतिऽगारिकम्मं, ण से पारए होति विमोयणाए ॥ ११ ॥

व्याख्या—न तस्य जातिमदः कुलमदो वा क्रियमाणः संसारे पर्यटतस्त्राणं भवति। यत्पुनः संसारोत्तारकत्वेन त्राणसमर्थं तद्दर्शयति—ज्ञानं च चरणं च ज्ञानचरणं, तस्मादन्यत्र संसारोत्तर[णश्र]णाशा न विद्यते। एतच्च सम्यक्त्वोपबृंहितं[सुचीर्णं] संसारादुत्तारयति "ज्ञानक्रियाभ्यां मोक्षः" इति वचनात्। यः पुनः प्रव्रज्यां गृहीत्वाऽपि 'अगारिकर्म' गृहस्थकर्मानुष्ठानं सावद्यारम्भं जातिमदादिकं वा सेवते, न चासावगारिकर्मणां सेवकोऽशेषकर्ममोचनाय पारगो भवति, निःशेषकर्मक्षयकारी न भवतीत्यर्थः। देशमोचना तु प्रायशः सर्वेषामेव प्राणिनां प्रतिक्षणमुपजायत इति गाथार्थः ॥ ११ ॥

पुनरप्यभिमानदोषं दर्शयति—

निक्किंचणे भिक्खु सुलूहजीवी, जे गारवं होति सिलोगगामी।
आजीवमेयं तु अबुज्झमाणे, पुणो पुणो विप्परियासुवेति ॥ १२ ॥

व्याख्या—साधुर्निष्किञ्चनोऽपि 'भिक्षुः' परदत्तोपजीवी ['सुरूक्षजीवी'] अन्तप्रान्ताशनभोज्यपि यः कश्चिद्गौरवप्रियो भवति, तथा 'श्लोककामी' आत्मश्लाघाऽभिलाषी भवति, स च परमार्थमजानानः, एतदेव अकिञ्चनत्वं सुरूक्षजीवित्वं च आत्मश्लाघातत्परतया आजीविका—आत्मवर्तनोपायं कुर्वाणः पुनः पुनः संसारकान्तारे 'विपर्यासं' जातिजरामरणरोगशोकोपद्रवमुपैति—गच्छति। तदुत्तरणायाभ्युद्यतोऽपि तत्रैव निमज्जतीत्ययं विपर्यास इति गाथार्थः ॥ १२ ॥

जे भासवं भिक्खु सुसाहुवादी, पडिहाणवं होति विसारए य।

आगाढपण्णे सुविभावियप्पा, अन्नं जणं पन्नया परिहवेज्जा ॥ १३ ॥

व्याख्या—तथा यः साधुर्भाषागुणदोषज्ञः, तथा सुमधुरवादी-हितमितवक्ता, प्रियंवद इत्यर्थः, क्षीराश्रवमध्वाश्रवलब्धियुक्तस्तथा 'प्रतिभा[न]वान्' बुद्धिचतुष्टययुक्तः-परैराक्षिप्तस्तत्कालमेवोत्तरदानसमर्थः, यदि वा धर्मकथावसरे 'कोऽयं पुरुषः ? कं च देवताविशेषं प्रणतः ? कतरद्वा दर्शनमाश्रितः' इत्येवमासन्नप्रतिभतयाऽवेत्य यथायोगमुत्तरं ददाति । तथा 'विशारदो'ऽर्थग्रहणसमर्थः, चशब्दात् श्रोत्रभिप्रायज्ञः, तथा 'आगाढप्रज्ञः' परमार्थपर्यवसितबुद्धिः-तत्त्वार्थवेदी, तथा 'सुविभावितात्मा' सुधर्मवासनावासितः, एवंविधगुणान्वितः शोभनः साधुर्भवति । यश्चामीभिर्गुणैर्निर्जराहेतुभूतैर्युक्तोऽपि यदि मदं कुर्यात्तदाऽन्येषां का वार्ता ? । कथं मदं करोति ? तद्यथा-यथाऽहमेव भाषाविधिज्ञस्तथा साधुवाद्यहमेव, न मत्तुल्यः प्रतिभा[न]वानस्ति । नापि च मत्समानो लौकिकलोकोत्तरशास्त्रार्थविशारदो अवगाढप्रज्ञः, सुभावितात्माऽहमेवेति चैवमात्मोत्कर्षवानपरं जनं स्वकीयया प्रज्ञया 'परिभवेत्' अवहीलयति । तथाहि-किमनेन वाकुण्ठेन दुर्दुरूढेन कुण्डिकाकार्पासकल्पेन ? नाऽसौ साधुवर्गः किमपि वेत्ति, वयमेव भगवदाज्ञावर्तिनः क्रमागता बहुश्रुता वा इत्यादिविविधविलासेन साधूनामवर्णवादेनात्मोत्कर्षपराः कश्चित्सभायां धर्मकथावसरे वा भवन्ति । तथा चोक्तं " अन्यैः स्वेच्छारचितानर्थविशेषान् क[अ]मेण विज्ञाय । कृत्स्नं वाङ्मयमित इति, खादत्यङ्गानि दर्पेण ॥ १ ॥ " ॥ १३ ॥

साम्प्रतमेतद्दोषाभिधित्सयाऽऽह—

एवं ण से होइ समाहिपत्ते, जे पन्नवं भिक्खु विउक्कसेज्जा ।
अहवा वि जे लाभमयावलित्ते, अन्नं जणं खिंसति बालपन्ने ॥ १४ ॥

व्याख्या—एवमात्मोत्कर्षं कुर्वन्परानवजानन् समस्तशास्त्रार्थविशारदोऽपि तत्त्वार्थावगाढप्रज्ञोऽपि 'समाधिं' मोक्षमार्गं ज्ञानदर्शनचारित्ररूपं न प्राप्तो भवति, परमार्थोदधेरुपर्येव प्लवते । क एवम्भूतो भवतीति दर्शयति—'जे पन्नवं भिक्खु विउक्कसेज्ज' त्ति, यो ह्यविदितपरमार्थतया आत्मानमेव प्रतिभावन्तं मन्यमानः स्वप्रज्ञया भिक्षुः 'उत्कर्षेत्' गर्वं कुर्यात्, नासौ समाधिप्राप्तो भवति । अथवा यो हि अल्पान्तरायो लाभवानात्मकृते परस्मै चोपकरणादिकमुत्पादयितुं समर्थः स तुच्छस्वभावतया मदं कुर्वन् न समाधिप्राप्तः कथ्यते । स चान्यं जनं कर्मोदयादलब्धिमन्तं 'खिंसइ' त्ति निन्दति परिभवति, वक्ति च—न मत्तुल्यः सर्वसाधारणशय्यासंस्तारकाद्युपकरणोत्पादकोऽस्ति, किमन्यैः ? स्वोदरभरणव्यग्रतया काकप्रायैः कृत्यमस्तीत्येवं 'बालप्रज्ञो' मूर्खप्रायोऽपरजनापवादं विदध्यादिति गाथार्थः ॥ १४ ॥

एवं मदे कृते बालसदृशो भवति, अतो मदं न विदध्यादित्याह—

पण्णामयं चेव तवोमयं च, निन्नामए गोयमयं च भिक्खू ।
आजीवगं चेव चउत्थमाहु, से पंडिए उत्तमपुग्गले से ॥ १५ ॥

व्याख्या—प्रज्ञामदं तपोमदं च न कुर्यात्, अहमेव [यथाविधशास्त्रार्थस्य वेत्ता, तथाऽहमेव] विकृष्टतपोविधायी, नाहं

तपसा ग्लानिमुपगच्छामि, एवं तपोमदं न कुर्यात् । तथा गोत्रमदं निर्नामये-दपनयेत, उच्चैः कुलसम्भूतोऽहमित्येवं मदं न विदध्यादिति । तथा आजीवो-ऽर्थनिचयस्तस्य मदं न कुर्यात् । एवमन्यानपि मदविशेषान् त्यजन् साधुः पण्डित-स्तत्ववेत्ता भवति । तथाऽसौ समस्तमदस्थानपरित्यागी-पुरुषः 'उत्तम' [illegible] [[illegible], तत्सामर्थ्यः-] उत्तमोत्तमो-महतोऽपि महीयान् भवतीति गाथार्थः ॥ १५ ॥ अथ मदस्थानमुपसंजिहीर्षुराह—

एताइं मयाइं विगिंच धीरे, नेयाणि सेवंति सुधीरधम्मा ।
ते सव्वगोत्तावगया महेसी, उच्चं अगोत्तं च गतिं वयंति ॥ १६ ॥

व्याख्या—एतानि मदस्थानानि संसारकारणानि विज्ञाय 'धीरो' विदिततत्त्वार्थः 'विगिंचइ'त्ति आत्मनः पृथक्कुर्यात्-त्यजेदिति भावः । सुधीरधर्माणो नैतानि मदस्थानानि सेवन्ते, ये परित्यक्तसर्वमदस्थाना महर्षयस्तपःशोषितकल्मषाः सर्वस्माद्गोत्रादेरपगताः सन्तः, 'उच्चां' मोक्षाख्यां सर्वोत्तमां गतिं व्रजन्ति । च शब्दान्महाविमानेषु कल्पातीतेषु वा व्रजन्ति-गच्छन्तीति गाथार्थः ॥ १६ ॥

भिक्खू मुयच्चे तह दिट्ठधम्मे, गामं च नगरं च अणुप्पविस्सा ।
से एसणं जाणमणेसणं च, अन्नस्स पाणस्स अणाणुगिद्धे ॥ १७ ॥

व्याख्या—स एवम्भूतो मदस्थानरहितो भिक्षुः स्नानविलेपनादिसंस्काराभावान्मृता [इव] 'अर्चा' तनुः-शरीरं यस्य स

श्रुतार्थः, तथा 'दृढधर्म्मा' अवगतयथावस्थितधर्म्मस्वरूपः, एवंविधो भिक्षुः क्वचिदवसरे ग्रामनगरादिषु भिक्षाऽर्थं प्रविश्य एषणामनेषणां च जानन् अशनस्य पानकस्य वा कृते, तत्र 'अ[नु]गृद्धो'ऽलोलुपः सन् सम्यग्विहरेत्। आहारादावमूर्च्छितः सम्यक् शुद्धां भिक्षां गृह्णीयादिति गाथार्थः ॥ १७ ॥

एवंविधस्य साधोः कदाचित्संयमे रतिररतिश्च प्रादुःष्यात्, सा चापनेतव्येत्येतदाह—

अरइं रइं च अभिभूय भिक्खू, बहूजणे वा तह एगचारी।
एगंतमोणेण वियागरेज्जा, एगस्स जंतो गतिरागती य ॥ १८ ॥

व्याख्या—महामुनेरप्यस्नानतया मलाविलस्यान्तप्रान्तवल्लचणकादिभोजिनः कदाचित्कर्मोदयादरतिः संयमे समुत्पद्येत, तां चारतिमुत्पन्नामभिभवेत्-निराकुर्यात्, तथा रतिं चासंयमे अनादिभवाभ्यासादुत्पन्नां चाभिभवेत्, अभिभूय च संयमोद्युक्तो भवेत्। पुनः साधुमेव विशिनष्टि—बहवो 'जनाः' साधवो गच्छवासितया संयमसहाया यस्य स बहुजनः, तथा-एक एव चर[ती]ति—एकचारी, स च बहुजन एकाकी वा केनचित्पृष्टोऽपृष्टो वा 'एकान्तमौनेन' संयमेन 'व्यागृणीयात्' धर्मकथाऽवसरे संयमाबाधया किञ्चिद्धर्मसम्बद्धं ब्रूयात्। किमसौ ब्रूयादित्याह—एकस्य जन्तोः शुभाशुभसहायस्य 'गतिः' परलोके गमनं भवति, तथा आगति-रागमनं भवान्तरादुपजायते शुभाशुभकर्मसहायस्य, यतः—“एकः प्रकुरुते कर्म, भुनक्त्येकश्च तत् फलम्। जायते म्रियते चैक, एको याति भवान्तरम् ॥ १ ॥” इत्यादि। ततः संसारे परमार्थतो

न कश्चित्सहायो धर्ममेकं विहाय, एतद्विगणय्य संयम[स्तेन तत्]प्रधानं वा ब्रूयादिति गाथार्थः ॥ १८ ॥ किञ्च—

सयं समिच्चा अदुवा वि सोच्चा, भासेज्ज धम्मं हितयं पयाणं ।
जे गरहिया सणियाणप्पओगा, ण ताणि सेवंति सुधीरधम्मा ॥ १९ ॥

व्याख्या—'स्वयं' आत्मना परोपदेशमन्तरेण संसारकारणानि मिथ्यात्वाविरतिप्रमादकषाययोगरूपाणि 'समेत्य' ज्ञात्वा तथा मोक्षं तत्कारणानि च सम्यग्ज्ञानदर्शनचारित्राणि, एतत्सर्वं स्वत एव ज्ञात्वा अन्यस्माद्वाऽऽचार्यादेः सकाशाच्छ्रुत्वा अन्यस्मै मुमुक्षवे धर्मं भाषेत । किम्भूतं ? 'प्रजानां' स्थावरजङ्गमानां जन्तूनां हितं धर्मं ब्रूयादिति उपादेयं प्रदर्श्य हेयं प्रदर्शयति—ये 'गर्हिता' जुगुप्सिता मिथ्यात्वादयः कर्मबन्धहेतवः, सनिदानाः 'प्रयोगा' व्यापारा ममास्मात्सकाशात् किञ्चित्पूजालाभसत्कारादिकं भविष्यतीत्येवम्भूतनिदानाशंसारूपास्तांश्च चारित्रविघ्नभूतान् महर्षयः सुधीरधर्माणो 'न सेवन्ते' नानुतिष्ठन्ति, न वदन्तीति गाथार्थः ॥ १९ ॥ किञ्च—

केसिंचि तक्काइ अबुज्झ भावं, खुद्दंपि गच्छेज्ज असद्दहाणे ।
आउस्स कालाइयारं वघाए, लद्धाणुमाणे य परस्स अट्ठे ॥ २० ॥

व्याख्या—केषाञ्चिन्मिथ्यादृष्टीनां कुतीर्थिकभावितानां 'तर्कया' वितर्केण दुष्टाभिप्रायं अबुद्ध्वा कश्चित्साधुः श्रावको वा स्वधर्मस्थापनेच्छया कुतीर्थिकतिरस्कारप्रायं वचो ब्रूयात्, [स च] तीर्थिकस्तद्वचनमश्रद्दधानोऽतिकटुकत्वं भावयन्

'क्षुद्रत्वमपि गच्छेत्' विरूपमपि कुर्यात्, पालकपुरोहितवत् स्कन्दकाचार्यस्येति । ततः स निन्दावचनकुपितो वक्तु+रायुषो व्याघातं कालातिचारं-दीर्घस्थितिकमप्यायुस्संवर्तयेत् । धर्मदेशना हि पुरुषविशेषं ज्ञात्वा विधेया, तद्यथा-कोऽयं पुरुषो राजादिकः, कं च देवताविशेषं नतः, कतरद्वा दर्शनमाश्रित इति सम्यग्भावं परिज्ञाय यथायोग्यं देशना विधेया । यः पुनरेन-दबुद्ध्वा धर्मदेशनाद्वारेण परनिरोधकृद्वचो ब्रूयात् स तस्मान्मरणादिकमपकारं प्राप्नुयात् । यत एवं ततो लब्धानुमानः-पराभिप्रायं ज्ञात्वा यथायोगमर्थान्-सद्धर्मप्ररूपणादिकान् भावान् स्वपरोपकाराय वदेदिति गाथार्थः ॥ २० ॥

कम्मं च छंदं च विगिंच धीरे, विणएज्ज उ सव्वतो आय(पाव)भावं × ।
रूवेहिं लुप्पंति भयावहेहिं, विज्जं गहाय तसथावरेहिं ॥ २१ ॥

व्याख्या—'धीरः' अक्षोभ्यो धर्मकथाश्रोतुः देशनावसरे 'कर्म' अनुष्ठानं गुरुलघुकर्मभावं [वा], छन्द-मभिप्रायं च श्रोतुर्जानीयात् । असौ धर्मश्रोता किं गुरुकर्मा लघुकर्मा वा इत्याद्यालोच्य धर्मकथिको धर्मदेशनां कुर्यात् । यथा च तस्य श्रोतुर्जीवादिपदार्थावगमो भवति, यथा च मनसि न दूयते, अपि तु प्रसन्नतां भजेत्तथा वाच्यं, एवं च धर्मोपदेशं यच्छन् विशेषेण अपनयेत्पर्षदः 'पापभावं' अशुद्धमन्तःकरणं विशिष्टगुणारोपणं च कुर्यात् । [क्वचित्पाठ] 'आयभावं'

+ जिनधर्मभावकस्य । × 'पावभाव'मिति स्वाभाविकत्वेन 'आयभाव'मिति तु पाठान्तरत्वेन स्वीकृतो वृत्तिकृत्पूज्यैरपि । तथा "आतभावं-आतभावो णाम मिथ्यात्वं अविरतो वा" इति चूर्णिकाराः ।

ति [तत्र] आत्मभावोऽनादिभवाभ्यस्तो मिथ्यात्वादिकस्तमपनयेत् । यदि वा 'आत्मभावो' विषयगृध्नुता, तामपनयेदिति । एतदर्शयति—'रूवेहिं लुप्पंति भयावहेहिं' रूपैः—नयनमनोहारिभिः स्त्रीणामङ्गप्रत्यङ्गकटाक्षनिरीक्षणादिभिरल्पसत्त्वा 'विलुप्यन्ते' सद्धर्माच्च्याव्यन्ते, रूपैः कथम्भूतैः? 'भयावहैः' भयानकैः, इहैव तावद्रूपादिविषयासक्तस्य साधुजनजुगुप्सा, नानाविधा विडम्बनाश्च प्रादुर्भवन्ति इहलोके, परलोके च बहुविधा वेदनाः विषयासक्ता अनुभवन्ति । एवं विद्वान्—पण्डितो धर्मदेशनाचतुरो पराभिप्रायं सम्यग्गृहीत्वा पर्षदनुसारेण त्रसस्थावरेभ्यो हितं धर्ममाविर्भावयेदिति गाथार्थः ॥ २१ ॥

पूजासत्कारादिनिरपेक्षेण च सर्वं तपश्चरणादिकं विधेयं विशेषतो धर्मदेशनेत्येतदभिप्रायवानाह—

न पूयणं चेव सिलोयकामी, पियमप्पियं कस्सइ णो करिज्जा ।
सव्वे अणट्ठे परिवज्जयंते, अणाउले या अकसाइ भिक्खू ॥ २२ ॥

व्याख्या—साधुर्धर्मदेशनां कुर्वन् 'पूजनं' वस्त्रादिलाभरूपं न वाञ्छेन्नापि 'श्लोकं' कीर्ति—प्रशंसामभिलषेत् । तथा श्रोतुः प्रियं (राजकथादिकं) अप्रियं च न कथयेत्—तत्समाश्रितदेवताविशेषं न निन्देत् । रागद्वेषरहितः श्रोतुरभिप्रायं समीक्ष्य यथावस्थितं धर्मं सम्यग्दर्शनादिरूपं कथयेत् । उपसंहारमाह—सर्वाननर्थान् पूजासत्कारलाभाभिप्रायेण स्वकृतान् परदूषणतया च परकृतान् परिहरन् कथयेदनाकुलः, अकषायी भिक्षुर्भवेदिति गाथार्थः ॥ २२ ॥

सर्वाध्ययनोपसंहारार्थमाह—

आहत्तहीयं समुपेहमाणे, सव्वेहिं पाणेहिं निहाय दंडं ।
नो जीवियं नो मरणाहिकंखी, परिव्वएज्जा वलया विमुक्के त्ति बेमि ॥ २३ ॥

व्याख्या—'याथातथ्यं' धर्ममार्गं सूत्रानुगतं सम्यक् 'प्रेक्षमाणः' पर्यालोचयन् 'सर्वेषु' स्थावरजङ्गमेषु प्राणिषु दण्डं प्राणिवधात्मकं परित्यज्य प्राणात्ययेऽपि याथातथ्यं धर्मं नोल्लंघयेत् । तथा 'जीवितं' असंयमजीवितं जन्तुदण्डेन नाभिकाङ्क्षेत् । परीषहपराजितो वेदनासमुद्घातगतोऽपि तद्वेदनामसहमानो जलानलादिना जन्तुघातेन न मरणमभिकाङ्क्षेत् । तदेवं सर्वेष्वपि प्राणिषूपरतदण्डो जीवितमरणापेक्षारहितः संयमानुष्ठानं चरे—दुद्युक्तविहारी भवेत् । मेधावी 'वलयेन' मायारूपेण मोहनीयकर्मणा वा विप्रमुक्त इति, इतिः परिसमाप्त्यर्थे, ब्रवीमीति पूर्ववत् ॥ २३ ॥

इति श्रीपरमसुविहितखरतरगच्छविभूषण श्रीमत्साधुरङ्गसङ्कलितायां श्रीसूत्रकृताभिधद्वितीयाङ्गदीपिकायां
समाप्तं याथातथ्याध्ययनं त्रयोदशमिति ॥

अथ चतुर्दशं ग्रन्थाभिधमध्ययनम् ।

उक्तं त्रयोदशमध्ययनं, साम्प्रतं चतुर्दशमारभ्यते ग्रन्थाख्यं, बाह्यग्रन्थपरित्यागाद्याथातथ्यं स्यात्, अत (स्तद्) एवाह, तस्येयमादिगाथा—

गंथं विहाय इह सिक्खमाणे, उट्ठाय सुबंभचेरं वसेज्जा ।
ओवायकारी विणयं सुसिक्खे, जे छेय विप्पमायं न कुज्जा ॥ १ ॥

व्याख्या—'इह' प्रवचने ज्ञातसंसारस्वभावः साधुः सम्यगुत्थानेन उत्थितो 'ग्रन्थं' परिग्रहं धनधान्यहिरण्यद्विपदचतुष्पदादिरूपं त्यक्त्वा ग्रहणासेवनारूपां च शिक्षां कुर्वाणः सम्यगासेवमानो नवभिर्ब्रह्मचर्यगुप्तिभिर्गुप्तः [सु]ब्रह्मचर्यं वसे-त्तिष्ठेत्, यदिवा [ब्रह्मचर्य-] संयमस्तमावसेत्-तं सम्यक्कुर्यात् । गुर्वन्तिके यावज्जीवं वसमानो यावदभ्युद्यतविहारं न प्रतिपद्यते तावदाचार्यवचनस्य 'अवपातकारी' गुरोरादेशकारी विनयं सुष्ठु शिक्षे-द्विद्ध्यात् । तथा यश्छेको-निपुणः स संयमानुष्ठाने सदाचार्योपदेशे वा विविधं प्रमादं न कुर्यादिति गाथार्थः ॥ १ ॥

जहा दियापोतमपत्तजायं, सावासगा पविउं मन्नमाणं ।
तमचाइयं तरुणमपत्तजायं, ढंकाइ अव्वत्तगमं हरेज्जा ॥ २ ॥

व्याख्या—यः पुनर्गुरूपदेशमन्तरेण स्वच्छन्दतया गच्छान्निर्गत्य एकाकिविहारितां प्रतिपद्यते स बहुदोषभाग् भवतीति। अस्यार्थस्य दृष्टान्तमाविर्भावयन्नाह—'जहा दिया(पोतं)' यथा 'द्विजपोतः' पक्षिशिशुरपत्रजातः—अजातपक्षः स्वे 'वासावसकात्' स्वनीडात् 'उप्पइत्तुं' उत्पतितुकामं [तत्र] तत्र पतन्तमुपलभ्य पक्षाभ्यामाकाशं गन्तुमसमर्थं (तथा 'तरुणं' नूतनं 'अपत्रजातं' अनुद्भूतपक्षं तं) ढङ्कादयः क्षुद्रसत्त्वाः पिशिताशिनः 'अव्यत्तगमं' गमनाभावे नंष्टुमसमर्थं हरेयुः—चञ्च्वादिनोत्क्षिप्य नयेयुः—विनाशयेयुरिति गाथार्थः ॥ २ ॥ एवं दृष्टान्तं प्रदर्श्य दार्ष्टान्तिकमाह—

एवं तु सेहंपि अपुट्ठधम्मं, निस्सारियं वुसिमं मन्नमाणा ।
दियस्स छायं व अपत्तजायं, हरिंसु णं पावधम्मा अणेगे ॥ ३ ॥

व्याख्या—यथा तं अव्यक्तं पक्षिशिशुं ढङ्कादयः क्षुद्रपक्षिणो विनाशयन्ति तथा अगीतार्थं शिष्यं गच्छवासान्निर्गतं अनेके क्षुद्राः पाखण्डिनो विप्रतार्य संयमजीविताद्भ्रंशयन्ति, ते कीदृशाः पाखण्डिनः ?, तं अगीतार्थशिष्यं 'वुसिमं मन्नमाणा' आत्मवशगं मन्वाना—अस्मद्वशे पतितमिति मत्वा पक्षरहितं पक्षिणो बालकमिव ते पापधर्माणो × हरन्तीति गाथार्थः ॥ ३ ॥

एवमेकाकिनः साधोर्यतो बहवो दोषाः प्रादुर्भवन्ति अतः सदा गुरुपादमूले स्थातव्यमित्येतद्दर्शयितुमाह—

ओसाणमिच्छे मणुए समाहिं, अणोसिते णंऽतकरेति णच्चा ।

× "कुतीर्थिकाः स्वजनराजादयो वा अनेके क्षुद्रसत्त्वा हरन्ति हरिष्यन्ति चेति कालत्रयोपलक्षणार्थं सूत्रनिर्देशः" इति वृ० ।

ओभासमाणे दवियस्स वित्तं, ण णिक्कसे बहिया आसुपन्ने ॥ ४ ॥

व्याख्या—'अवसानं' गुरोरन्तिकेऽवस्थानं, तद्यावज्जीवमिच्छेदभिलषेत् 'मणुओ' मनुष्यः साधुरित्यर्थः। स एव तत्त्वतो मनुष्यो यो यथाप्रतिज्ञातं निर्वाहयति, तच्च सदा गुरोरन्तिके व्यवस्थितेन निर्वाह्यते इत्येतद्दर्शयति—गुरोरन्तिके 'अनुषितः' अव्यवस्थितः—स्वच्छन्दविधायी यथाप्रतिज्ञातस्य नान्तकरो भवति, न यथाप्रतिज्ञातं निर्वाहयितुं समर्थः स्यान्नापि संसारस्यान्तं करोतीति ज्ञात्वा सदा गुरुकुलवासोऽनुसरणीयः, गुरुकुलवासं विना शिक्षितमपि विज्ञानमुपहासाय स्यात्, यतः "नहि भवति निर्विगोपक—मनुपासितगुरुकुलस्य विज्ञानं। प्रकटितपश्चाद्भागं, पश्यत नृत्यं मयूरस्य ॥ १ ॥" एवं ज्ञात्वा गुरुकुलवासे स्थातव्यमिति दर्शयति—'ओभासमाणे दवियस्स वित्तं' 'अवभासयन्' उद्भासयन्—सम्यगनुतिष्ठन् 'द्रव्य(द्रविक)स्य' मुक्तिगमनयोग्यस्य साधोः सर्वज्ञस्य वा 'वृत्तं' अनुष्ठानं, तत्तदनुष्ठानतोऽवभासयेत्—धर्मकथिकः [कथयतो वोद्भासयेदिति]। तदेवं गुरुकुलवासो बहूनां गुणानामाधारः, अतो न निर्गच्छेद् गच्छात्—स्वेच्छाचारी न भवेदाशुप्रज्ञ इति गाथार्थः ॥ ४ ॥

जे ठाणओ य सयणासणे य, परक्कमे यावि सुसाहुजुत्ते।
समितीसु गुत्तीसु य आसु[आय]पन्ने, वियागरंते य पुढो वदेज्जा ॥ ५ ॥

व्याख्या—यो हि वैराग्यात् प्रव्रजितः साधुः, स 'स्थाने' कायोत्सर्गादौ शयने आसने गमने च 'पराक्रमं कुर्वन्'

बलं स्फोरयन् साधुगुणैर्युक्तो भवति । साधुर्हि यत्र स्थाने कायोत्सर्गादिकं विधत्ते तत्र सम्यक् प्रत्युपेक्षणादिकां क्रियां करोति, कायोत्सर्गं च मेरुरिव निष्प्रकम्पो विधत्ते, तथा शयनं च कुर्वन् संस्तारकं भुवं कायं च प्रत्युपेक्ष्य उचितकाले गुर्वनुज्ञातः स्वपेत्, तत्रापि जाग्रदिव नात्यर्थं निस्सहः इति, एवमासनादिष्वपि योज्यम् । तदेवमादिसुसाधुक्रियायुक्तो गुरुकुलवासी साधुर्भवतीति स्थितम् । अपि च-गुरुकुलवासे निवसन् पञ्चसमितिसमितः त्रिगुप्तिगुप्तः 'आगय[आगत]प्रज्ञः' सञ्जात-[कर्तव्या]कर्तव्यविवेकः [स्वतो भवति] परस्यापि च व्याकुर्वन् समितिगुप्तीनां यथावस्थितस्वरूपप्रतिपालनं तत्फलं च [पृथक्-पृथग्] प्रोत्(-प्र)बोधयेदिति गाथार्थः ॥ ५ ॥

सद्दाणि सोच्चा अदु भेरवाणि, अणासवे तेसु परिव्वएज्जा ।
निद्दं च भिक्खू न पमाय कुज्जा, कहंकहंची वितिगिच्छतिण्णे ॥ ६ ॥

व्याख्या—शब्दान् श्रुतिमधुरान् श्रुत्वा अथवा 'भैरवान्' कर्णकटुकान् श्रुत्वा ('तेषु' अनुकूलप्रतिकूलशब्देषु) 'अनाश्रवो' रागद्वेषरहितो भूत्वा 'परि' समन्तात्प्रव्रजेत्-संयमानुष्ठायी भवेत् । तथा निद्रां च प्रमादं च स साधुर्न कुर्यात् । एवं निषिद्धसर्वप्रमादः सन् गुरोरन्तिके [कथङ्कथमपि] विचिकित्सां चित्तविप्लुतिरूपां 'वितीर्णो'ऽतिक्रान्तो भवति । [यदि वा मद्गृहीतोऽयं पञ्चमहाव्रतभारोऽतिदुर्वहः] कथङ्कथमप्यन्तं गच्छेत् ? इत्येवम्भूतां 'विचिकित्सां' चित्तविप्लुतिं गुरुप्रसादात्तीर्णो भवति । अन्येषामपि तदपनयनसमर्थः स्यादिति गाथार्थः ॥ ६ ॥ किञ्च—

डहरेण वुड्ढेणऽणुसासिओ उ, रायणिएणा वि समव्वएणं ।
सम्मं तयं थिरओ णाभिगच्छे, णिज्जंतए वावि अपारए से ॥ ७ ॥

व्याख्या—स साधुः गुरुसमीपे वसन् क्वचित्प्रमादस्खलितः सन् केनापि क्षुल्लकेन प्रमादाचरणं प्रति निषिद्धस्तथा 'वृद्धेन वा' [वयोऽधिकेन] श्रुताधिकेन वा अनुशासितोऽभिहितो रत्नाधिकेन समवयसा वा अनुशासितः कुप्यति, यथाऽहमनेन द्रमकप्रायेणोत्तमकुलप्रसूतः सर्वजनसम्मत एवं लोकसमक्षं शिक्षित, इत्येवमनुशास्यमानो न मिथ्यादुष्कृतं ददाति नापि तदनुशासनं सम्यक्स्थिरतो वाऽपुनःकरणतयाऽभिगच्छेत्—न प्रतिपद्येत, सम्यक् अप्रतिपद्यमानश्चासौ संसारस्रोतसा 'नीयमान' उह्यमानोऽनुशास्यमानः कुपितोऽसौ न संसारार्णवपारगो भवति किन्त्वपारग एव भवतीति गाथार्थः ॥ ७ ॥

विउट्ठिएणं समयाणुसिट्ठे, डहरेण वुड्ढेण उ चोइए य ।
अच्चुट्ठियाए घडदासिए वा, अगारिणं वा समयाणुसिट्ठे ॥ ८ ॥

व्याख्या—विरुद्धोत्थानेनोत्थितं असम्यक्चारिणं साधुं दृष्ट्वा कश्चित् परतीर्थिको गृहस्थो वा स्वसमयेन शिक्षयेत्, यथा—नैवंविधमनुष्ठानं भवतामागमे व्यवस्थितं कथं त्वमेवंविधाचरणं करोषि? अथवा केनापि साधुना अर्हत्प्रणीतागमानुसारेण मूलोत्तरगुणाऽऽचरणे स्खलितः सन् आगमं प्रदर्श्य अभिहितः, यथा—नैतच्चरितगमनादिकं भवतामनुरूपं,

इत्यादि 'डहरेण' लघुतरेण वृद्धेन वा कुत्सिताचारप्रवृत्तः साधुः शिक्षितः, (दासीत्येनात्यन्तक्षुद्रिका या दासी, तया) दास्या 'घटदास्या' जलवाहिन्या वा शिक्षितो न कोपं कुर्यात्। 'अगारिणं' गृहस्थानामप्येतन्न युज्यते कर्तुम्। ततः स साधुर्ममैवैतद्धितकारी ब्रूते इत्येवं मन्यमानो मनागपि न कोपं कुर्यादिति गाथार्थः ॥ ८ ॥ एतदेवाह—

ण तेसु कुज्झे ण य पव्वहेज्जा, ण यावि किंची फरुसं वदेज्जा ।

तहा करिस्संति पडिस्सुणेज्जा, सेयं खु मेयं ण पमाय कुज्जा ॥ ९ ॥

व्याख्या—एवं साधुः शिक्षितः सन्न कुप्येत् न च तं प्रव्यथेत्—न च तं दण्डादिप्रहारेण पीडयेन्न चापि किञ्चित्परुषं वचो वदेत्। तथैवं वदेत्—यथाऽहं सुष्ठु शिक्षितः, भवदुक्तमेव करिष्यामीत्येवं मध्यस्थवृत्त्या प्रतिशृणुयात्—अनुतिष्ठेत्, मिथ्यादुष्कृतादिना निवर्तेत, एतच्छिक्षादानं ममैव श्रेयो। यत एतद्भयात् कश्चि[त्कदाचि]त्पुनः प्रमादं न कुर्यादेव असदाचरणमनुतिष्ठेदिति गाथार्थः ॥ ९ ॥

वणंसि मूढस्स जहा अमूढा, मग्गाणुसासंति हितं पयाणं ।

तेणेव मज्झं इणमेव सेयं, जं मे बुहा समणुसासयंति ॥ १० ॥

व्याख्या—यथा 'वने' अरण्ये दिग्भ्रमेण कस्यचिन्मूढस्य—मार्गभ्रष्टस्य यथा केचिदन्ये 'अमूढाः' सदसन्मार्गज्ञाः प्रजानां हित—मीप्सितस्थानप्रापकं मार्गं 'अनुशासन्ति' दर्शयन्ति। स च तैर्विवेकिभिः सन्मार्गावतारणतोऽनुशासित

आत्मनः श्रेयो मन्यते। यदेतद्बुधाः सम्यगनुशासयन्ति। पुत्रमिव पितरः। तन्ममैव श्रेय इति मन्तव्यमिति गाथार्थः ॥१०॥

अह तेण मूढेण अमूढगस्स, कायव्व पूया सविसेसजुत्ता।
एओवमं तत्थ उदाहु वीरे, अणुगम्म अत्थं उवणेति सम्मं ॥ ११ ॥

व्याख्या—अथानन्तरं यथा तेन दिङ्मूढेन सन्मार्गावतारिते तस्यामूढस्य—सन्मार्गोपदेशकस्य पुलिन्दादेरपि परममुपकारं मन्यमानेन पूजा विशेषयुक्ता कर्तव्या, एषोपमा श्रीमहावीरेणोदाहृता, इत्य(र्थम)वगम्य सम्यक् प्रकारेण + यदहमनेन पुरुषेण मिथ्यात्ववनगहनात्सदुपदेशेन दुःखाभिस्तारितः, अतोऽस्य सन्मार्गोपदेशकस्य भक्तिः—पूजा विशेषतः कर्तव्येति गाथार्थः ॥ ११ ॥

णेता जहा अंधकारंसि राओ, मग्गं ण जाणाति अपस्समाणे।
से सूरिअस्स अब्भुग्गमेणं, मग्गं वियाणाति पगासियंसि ॥ १२ ॥

व्याख्या—यथा ' नेता ' नायकोऽटव्यां बहुलान्धकारायां रात्रौ ' मार्गं ' पन्थानं न सम्यग्जानाति, स एव प्रणेता सूर्यस्याभ्युद्गमेनाऽपनीते तमसि जाते प्रकाशे मार्गं जानाति, विवक्षितपुरप्रापकं पन्थानं मन्यस्वेति। गुणदोषविचारणतः सम्यग्जानातीति गाथार्थः ॥ १२ ॥

+ " आत्मनि उपनयति परमोपकारं " इति वृ० ।

एवं तु सेहेवि अपुट्ठधम्मे, धम्मं न जाणाति अबुज्झमाणे ।
से कोविए जिणवयणेण पच्छा, सूरोदये पासति चक्खुणेव ॥ १३ ॥

व्याख्या—एवं शिष्योऽप्यपुष्टधर्मा—अगीतार्थः अभिनवप्रव्रजितो [सूत्रार्थानभिज्ञत्वादबुध्यमानो] धर्मं न जानाति, स एव पश्चात्सूर्योदये यथा निर्मलचक्षुः सर्वं पश्यति तथा शिष्योऽपि गुरुकुलवासात् जिनवचनेन 'कोविदो'ऽभ्यस्तसर्वज्ञप्रणीतागमत्वान्निपुणः सम्यक् सर्वान् जीवादीन् पदार्थान् पश्यतीति गाथार्थः ॥ १३ ॥

कदाचिच्चक्षुषाऽन्यथाभूतोऽप्य[र्थोऽ]न्यथा परिच्छिद्यते, तद्यथा—मरुमरीचिकानिचयो जलभ्रान्त्या, किंशुकनिचयोऽग्न्याकारेणापीति । न च सर्वज्ञप्रणीतागमस्य क्वचिदपि व्यभिचारः, तद्व्यभिचारेण हि सर्वज्ञत्वहानिप्रसङ्गात्, +तत्सम्भवस्य चासर्वज्ञत्वेन प्रतिषेद्धुमशक्यत्वादिति । शिक्षको हि गुरुकुलवासितया जिनवचनाभिज्ञो भवति, तत् कोविदश्च सम्यङ्मूलोत्तरगुणान् जानाति, तत्र मूलगुणानधिकृत्याह—

उड्ढं अहेयं तिरियं दिसासु, तसा य जे थावर जे य पाणा ।
सदा जए तेसु परिव्वएज्जा, मणप्पओसं अविकंपमाणे ॥ १४ ॥

व्याख्या—ऊर्ध्वमधस्तिर्यग् दिक्षु विदिक्षु च ये त्रसाः स्थावराः प्राणिनस्तेषु [सदा] 'यतः' यत्नं कुर्वन्

+ सर्वज्ञप्रणीतागमोक्तपदार्थसम्भवस्य सर्वज्ञसम्भवस्येति वा ।

संयमानुष्ठायी परिव्रजेत्—संयमं पालयेत् । तेषु प्राणिषु—अपकारिषु मनसापि प्रद्वेषं न गच्छेत्, आस्तां तावद्दुर्वचनदण्डप्रहारादिकं, मनसापि न विरूपकं चिन्तयेत् । 'अविकम्पमानः' संयमादविचलन् सदाचारमनुपालयेदिति गाथार्थः ॥ १४ ॥

कालेण पुच्छे समियं पयासु, आइक्खमाणे दवियस्स वित्तं ।
तं सोयकारी य पुढो पवेसे, संखा इमं केवलियं समाहिं ॥ १५ ॥

व्याख्या—गुरोरन्तिके वसन् विनयं करोति, कथम् ? आचार्यस्य समीपे अवसरं ज्ञात्वा प्रष्टव्यकाले सूत्रार्थं पृच्छेत् । कथम्भूतस्य गुरोः समीपे ? 'प्रजासु' सर्वजन्तुषु समितस्य, सदाचारानुष्ठायिन इत्यर्थः । स च गुरुस्तेन पृष्टः आचक्षाणः शुश्रूषयितव्यो भवति । ततश्च 'द्रविकस्य' मुक्तिगमनयोग्यस्य पुरुषस्य वृत्त—आचारं भाषते, भाषमाणश्च वन्दनीयः पूजनीयो भवति । तानि च गुरुवचांसि पृथक् पृथक्श्रोत्रकारी श्रोत्रे—कर्णौ धारयति, यथोपदेशकारी आज्ञाविधायी सन् पृथक् हृदये प्रवेशयति—चेतसि स्थापयति । किं कृत्वा ? 'संख्याय' सम्यग् ज्ञात्वा, किम् ? इमं 'केवलिकं' केवलिना कथितं 'समाधिं' सम्यङ्मार्गमाचार्यादिना कथितं स्वहृदये धारयेदिति गाथार्थः ॥ १५ ॥ किञ्च—

अस्सिं सुठिच्चा तिविहेण तायी, एएसु या संति निरोहमाहु ।
ते एवमक्खंति तिलोगदंसी, ण भुज्जमेयंति पमायसंगं ॥ १६ ॥

व्याख्या—अस्मिन् गुरुकुलवासे वसता यच्छ्रुतं, श्रुत्वा च हृदयेऽवधारितं, तस्मिन् समाधिमार्गे स्थित्वा 'त्रिविधेन'

मनोवाक्कायकर्मणा कृतकारितानुमतिभिश्च 'त्रायी' षट्कायपालकः 'एतेषु' समितिगुप्त्यादिषु समाधिमार्गे[षु] स्थितस्य तस्य साधोः शान्तिर्भवति—अशेषद्वन्द्वोपरमो भवति। तथाऽशेषकर्मक्षयरूपं निरोधमाहुः। क एवमाहुः? त्रिलोकदर्शिनः—सर्वज्ञाः केवलालोकेन दृष्ट्वा प्रतिपादयन्ति। किम्? एतदेव समितिगुप्त्यादिकं संसारोत्तारणसमर्थं मार्गं जानीहि, नान्यथेति। एतदेव कथितवन्तः, न पुनः प्रमादसङ्गं विधेयत्वेन प्रतिपादितवन्त इति गाथार्थः॥ १६॥

निसम्म से भिक्खु समीहियट्ठं, पडिभाणवं होति विसारए य।
आयाणअट्ठी वोदाणमोणं, उवेच्च सुद्धेण उवेति मोक्खं॥ १७॥

व्याख्या—स गुरुकुलवासी भिक्षुः 'द्रव्यस्य' मुक्तिगमनयोग्यस्य 'इतं' आचारे निशम्य स्वतः समीहितार्थं मोक्षाख्यं बुद्ध्वा—हेयोपादेयं सम्यक्परिज्ञाय 'प्रतिभा[न]वान्' उत्पन्नप्रतिभो भवति। ततश्च श्रोतॄणां यथास्थितार्थानां 'विशारदः' प्रतिपादको भवति। ईदृशः साधुरादानार्थी—मोक्षार्थी+ 'व्यवदाने' द्वादशप्रकारं तपस्तथा 'मौनं' संयमस्तदेवमेतौ तपःसंयमौ 'उपेत्य' प्राप्य 'शुद्धेन' द्विचत्वारिंशद्दोषरहितेन आहारेणात्मानं यापयन् मोक्षमुपैतीति गाथार्थः॥१७॥

तदेवं गुरुकुलवासितया धर्मे सुस्थिताः बहुश्रुताः प्रतिभा[न]वन्तोऽर्थविशारदाश्च सन्तो यत्कुर्वन्ति तद्दर्शयितुमाह—

संखाए धम्मं च वियागरंति, बुद्धा हु ते अंतकरा भवंति।

+ "आदीयते मोक्षार्थिभिरिति आदानं—ज्ञानादि, स एवार्थो विद्यते यस्य स आदानार्थी—ज्ञानादिप्रयोजनवान्" इति वृ०।

ते पारगा दोण्ह वि मोयणाए, संसोधितं पण्हमुदाहरंति ॥ १८ ॥

व्याख्या—'संख्यया' सद्बुद्ध्या स्वतो धर्मं परिज्ञाय परेषां यथावस्थितं धर्मं 'व्यागृणन्ति' प्रतिपादयन्ति, यदिवा स्वपरशक्तिं पर्षदं च 'परिज्ञाय' सम्यगवबुध्य धर्मं प्रतिपादयन्ति । ते चैवंविधा 'बुद्धाः' कालत्रयवेदिनो जन्मान्तरसञ्चितानां कर्मणामन्तकरा भवन्ति, अन्येषां च कर्मापनयनसमर्था भवन्ति, तदेव दर्शयति–ते यथावस्थितधर्मप्ररूपका 'द्वयोरपि' (स्व)परात्मनोः कर्मपाशविमोच[नया]काः (?) स्नेहादिनिगडविमोचनया वा कारणभूतया संसारसमुद्रपारगा भवन्ति । ते चैवम्भूताः सम्यक् शोधितं 'प्रश्नं' शब्दमुदाहरन्ति । तदेवं [ते] गीतार्था यथावस्थितं धर्मं कथयन्तः स्वपरतारका भवन्तीति गाथार्थः ॥ १८ ॥

स च प्रश्नमुदाहरन् कदाचिदन्यथाऽपि ब्रूयात्, अतस्तत्प्रतिषेधार्थमाह—

णो छायए णो वि य लूसएज्जा, माणं ण सेवेज्ज पगासणं च ।
ण या वि पन्ने परिहास कुज्जा, ण याऽऽसीआवाय वियागरेज्जा ॥ १९ ॥

व्याख्या—स प्रश्नस्योदाहर्ता रत्नकरण्डककल्पः कुत्रिकापणकल्पो वा चतुर्दशपूर्विणामन्यतरः कश्चिदाचार्यादिः कुतश्चिन्निमित्तान्मोहात् कुपितोऽपि सूत्रार्थं न 'छादयेत्' नान्यथा व्याख्यानयेत्, स्वगुरुं [वा] नापलपेत्, आत्मगुणोत्कर्षाभिप्रायेण परगुणानाच्छादयेत् । न परगुणान् लूषयेत् । तथा समस्तशास्त्रार्थवेत्ताऽहं, सर्वलोकविदितोऽहं, समस्तसंशयापनेता,

न मनुष्यो हेतुयुक्तिभिरर्थमप्रतिपादयितेत्येवं मानं न सेवेत—न कुर्यात् । नाप्यात्मनो बहुश्रुतत्वेन [तपस्वित्वेन वा] प्रकाशनं कुर्यात् । तथा न चापि प्रज्ञावान् कस्यापि परिहासं कुर्यात् यदि वा अनवबुध्यमाने श्रोतरि न तदुपहासं कुर्यात् । न चापि चाशीर्वादं ' बहुपुत्रो बहुधनो दीर्घायुर्[स्त्वं] भूया ' इत्यादि व्यागृणीयादिति गाथार्थः ॥ १९ ॥

भूताभिसंकाइ दुगुंछमाणे, ण णिव्वहे मंतपदेण गोयं ।

ण किंचि मिच्छे मणुओ पयासुं, असाहुधम्माणि ण संवएज्जा ॥ २० ॥

व्याख्या—' भूताभिशङ्कया' जन्तूपमर्दशङ्कया आशीर्वादं सावद्यं जुगुप्सन् न ब्रूयात् । न ' मन्त्रपदेन ' विद्याप्रयुञ्जनेन ' गोत्रं ' [वाक्]संयमं निस्सारं कुर्यात् , न राजादिना सार्द्धं जन्तुजीवोपमर्दकं मन्त्रं कुर्यात् । तथा ' मनुष्यो ' भिक्षुः प्रजासु व्याख्यानं कुर्वन् लाभपूजासत्कारादिकं नेच्छेत्—नाभिलषेत् । तथा असाधूनां धर्मान्—छागवधतर्पणादिकांश्च संवदेत्—न ब्रूयादिति गाथार्थः ॥ २० ॥ किञ्च—

हासं पि णो संधति पावधम्मे, ओए तहीयं फरुसं वियाणे ।

नो तुच्छए णो य विकंथएज्जा, अणाउ[अणाइ]ले वा अकसाइ भिक्खू ॥ २१ ॥

व्याख्या—यथा परात्मनोर्हास्यमुत्पद्यते तथा ' न सन्धयेत् ' न कुर्यात् । तथा ' पापधर्मं ' सावद्यं वचो न वदेत् , तथा कुप्रावचनिकानोल्लासयेत् । तथा ' ओजो ' रागद्वेषरहितः सन् तथ्यमपि ' परुषं ' कठोरं वचः परिहरेत् , सावद्यं वचो

ज्ञपरिज्ञया ज्ञात्वा प्रत्याख्यानपरिज्ञया परिहरेत्, पूजासत्कारादिना 'णो तुच्छए' नोन्मादं कुर्यात्। तथा 'णो य विकंथइज्जा' आत्मश्लाघां न कुर्यात्। तथा अनाकुलो× व्याख्यानावसरे, तथा 'अकसाई' कषायरहितो भवेद्भिक्षुः—साधुरिति गाथार्थः ॥ २१ ॥

संकेज्ज याऽसंकितभाव भिक्खू, विभज्जवायं च वियागरेज्जा।
भासादुगं धम्मसमुट्ठितेहिं, वियागरेज्जा समया सुपन्ने ॥ २२ ॥

व्याख्या—साधुः सूत्रार्थे निःशङ्कितोऽपि शङ्केत, नो गर्वं कुर्यात्, अहमेवार्थवेत्ता, न मत्तुल्यः कश्चिदपरोऽस्तीति न गर्वं कुर्वीत। तथा 'विभज्यवादं' पृथगर्थनिर्णयवादं व्यागृणीयाद्यदिवा 'विभज्यवादं' स्याद्वादं वदेत्। विभज्यवादमपि भाषाद्वितयेनैव ब्रूयादित्याह—भाषयोराद्यचरमयोः सत्या-ऽसत्याऽमृषयोर्द्विकं भाषाद्विकं, तद्भाषाद्वयं कश्चित्पृष्टोऽपृष्टो-वा धर्मकथावसरे व्यागृणीयात्। सम्यक् संयमानुष्ठानेन समुत्थितैः साधुभिः सह, न पुनः कुत्सितैरुदायिनृपमारकवत्, एवंविधैः साधुभिः सह विहरन् चक्रवर्तिद्रमकयोः समतया रागद्वेषरहितो वा शोभनप्रज्ञो भाषाद्वयोपेतः सम्यग्धर्मं व्यागृणीयादिति गाथार्थः ॥ २२ ॥ किञ्च—

अणुगच्छमाणे वितहं वियाणे, तहा तहा साहु अकक्कसेणं।

× "अणाइले" इति पाठान्तरे "अनाविलो–क्षोभादिनिरपेक्षः स्यात्" इति दृ०।

न कत्थई भास विहिंसइज्जा, निरुद्धगं वावि ण दीहइज्जा ॥ २३ ॥

व्याख्या—तस्यैवं भाषाद्वयेन धर्मं कथयतः साधोः—कश्चित्पण्डितस्तथैव तमर्थमनुगच्छन् सम्यगवबुध्यते, अपरस्तु मन्दमेधावितया 'वितथं' अन्यथैवाभिजानीयात्, तं च सम्यगनवबुध्यमानं 'तथातथा' तेन तेन हेतूदाहरणसयुक्तिप्रकटनप्रकारेण साधुरकर्कशैर्वचोभिस्तमवबोधयेत्, न पुनस्त्वं मूर्खोऽसि! एतदपि नावगच्छसि! शठतरस्त्वं! इत्यादि परुषवचनं न ब्रूयात्, मधुरभाषया भाषते, न परं तं अवगणयति। न तत्कार्यं विहिंसते—न विध्वंसयति, न निन्दति। तथा 'निरुद्धं' अर्थस्तोकं दीर्घवाक्यैर्महता शब्ददुर्दुरेण न कथयेत्, 'निरुद्धं' वा स्तोककालीनं व्याख्यानं न दीर्घये—न दीर्घकालिकं कुर्यात्, (अर्थात्) स्तोकमप्यर्थमालजालप्रकटनेन न विस्तारयति, यतः—"सो[1] अत्थो वत्तव्वो, जो भण्णइ अक्खरेहिं थोवेहिं। जो पुण थोवो बहुअक्खरेहिं सो होइ निस्सारो ॥ १ ॥" इति वचनात्, स्तोकाक्षरैर्बहुवक्तव्यमिति गाथार्थः ॥ २३ ॥

समालवेज्जा पडिपुण्णभासी, निसामिया समियाअट्ठदंसी।
आणाइ सुद्धं वयणंऽभिउंजे, अभिसंधए पावविवेग भिक्खू ॥ २४ ॥

व्याख्या—यत् पुनरतिविषमत्वादल्पाक्षरैर्न सम्यगवबुध्यते, तच्छोभनेन प्रकारेण समन्तात्पर्यायशब्दोच्चारणतो

१ सोऽर्थो वक्तव्यो यो भण्यतेऽक्षरैः स्तोकैः। यः पुनः स्तोको बहुभिरक्षरैः स भवति निस्सारः ॥ १ ॥

भावार्थकथनतश्चालपेत्-भाषेत, नाल्पाक्षरकथनतः कृतार्थो भवेत्, प्रतिपूर्णभाषी स्यात्, अस्खलितामिलिताहीनाक्षरैर्भाष्य-मिति। आचार्यादेः सकाशात् सम्यगवबुद्ध्य निशम्य सम्यग् यथावस्थितमर्थं यथा गुरुसकाशादवधारितमर्थं [प्रतिपाद्यं द्रष्टुं शीलमस्य स भवति सम्यगर्थदर्शी, स एवम्भूतः सन्] तीर्थंकराज्ञया शुद्ध-मवदातं निरवद्यं वचनमभियुञ्जीत। उत्सर्गे उत्सर्गं अपवादे चापवादं, न व्यत्ययं कुर्यात्। स्वपरसमययोर्यथास्वं वचनमभिवदेत्। एवमभियुञ्जन् भिक्षुः 'पापविवेकं' पापपरिहारं कुर्यादिति गाथार्थः ॥ २४ ॥ किञ्च—

अहाबुइयाइं सुसिक्खएज्जा, जइज्ज या णातिवेलं वदेज्जा।
से दिट्ठिमं दिट्ठि ण लूसएज्जा, से जाणई भासिउं तं समाहिं ॥ २५ ॥

व्याख्या—तीर्थकरगणधरादिभिर्यथोक्तानि तान्यहर्निशं सुष्ठु शिक्षेत-ग्रहणशिक्षया सर्वज्ञोक्तमागमं सम्यग्गृह्णीयात्, आसेवनाशिक्षया तु सेवेत, अन्येषां च तथैव प्ररूपयेत्। यो यस्य कर्तव्यस्य कालोऽध्ययनकालो वा, तां वेलामति-लङ्घ्य नातिवेलं वदेत्, अध्ययनकर्तव्यमर्यादां नातिलङ्घयेत्, यथावसरं परस्पराबाधया सर्वाः क्रियाः कुर्यादित्यर्थः। स एवंविधगुणजातीयो यथाकालवादी यथाकालचारी 'सम्यग्दृष्टिमान्' यथावस्थितान् पदार्थान् श्रद्दधानो देशनां च कुर्वन् 'दृष्टिं' सम्यग्दर्शनं न लूषयेत्-न दूषयेत्। एतदुक्तं भवति-पुरुषविशेषं ज्ञात्वा अपसिद्धान्तपरिहारेण तथा कथनीयं यथा श्रोतुः सम्यक्त्वं स्थिरी भवति। यश्चैवंविधः स भाषितुं जानाति समाधिं च ज्ञानदर्शनचारित्राख्यं सम्यग्-

वगच्छतीति गाथार्थः ॥ २५ ॥ किञ्च—

अलूसए नो पच्छन्नभासी, नो सुत्तमत्थं च करेज ताई ।
सत्थारभत्ती य अणुवीइ वायं, सुयं च धम्मं पडिवाययंती ॥ २६ ॥

व्याख्या—सर्वज्ञोक्तमागमं न लूषयेत्—न दूषयेत्तथा न प्रच्छन्नभाषी भवेत्, सिद्धान्तार्थं—सार्वजनीनं, तद् प्रच्छन्नभाषणेन न गोपयेत् अपशब्दभाषणेनापि न सूत्रं दूषयेत्तथा अर्थं न गोपयेत्। तथा 'त्रायी' षट्कायपालकः। तथा प्रच्छन्नं चार्थं नापरिणताय भाषेत, सिद्धान्तरहस्यमपरिणतस्याग्रे प्रकटनं दोषायैव संपद्यते। तथा 'शास्ता' परहितैकरतः, तथा शास्तरि या व्यवस्थिता भक्तिस्तया अनुविचिन्त्य—मयानेनोक्तेन न काचिद्बाधा स्यादित्येवं पर्यालोच्य यथा श्रुतं गुरोः सकाशे तथैव प्रतिपादयेत्, न सुखशीलतां मन्यमानो यथाकथंचिद्वदेदिति गाथार्थः ॥ २६ ॥

से सुद्धसुत्ते उवहाणवं च, धम्मं च जे विंदति तत्थ तत्थ ।
आदेज्जवक्के कुसले वियत्ते, से अरिहइ भासिउं तं समाहिं ति बेमि ॥ २७ ॥

व्याख्या—अनया रीत्या यः प्ररूपयति तस्य सूत्रं शुद्धं कथ्यते, स धर्मोपदेशकः शुद्धसूत्र इति। तथोपधानं—तपश्चरणं यदस्य सूत्रस्याभिहितमागमे तद्विद्यते यस्यासावुपधानवान्+। तथा 'धर्मं' श्रुतचारित्राख्यं, यः सम्यग्वेत्ति 'तत्र तत्रे'ति

+ स्फुटं भण्यतेऽनेन, यदुक्त—सर्वेऽप्यागमग्रन्थाः सति सामर्थ्ये सामग्रीसद्भावे च योगोद्वहनापरपर्यायोपधानपुरस्सरमेवाध्येतव्या इति।

[य] आगमग्राह्योऽर्थः स आज्ञयैव प्रतिपत्तव्यो हेतुकश्च सम्यग् हेतुना, यदि वा स्वसमयसिद्धोऽर्थः स्वसमये व्यवस्थापनीयः परसमयसिद्धश्च परसमये । [illegible] प्रतिपादयितव्यः । एवंभूतश्च 'आदेयवाक्यो' ग्राह्यवचनो भवति । तथा 'कुशलो' निपुणः आगमप्रतिपादनेन सदनुष्ठानेन च व्यक्तः, सोऽर्हति–योग्यो भवति 'तं' सर्वज्ञोक्तं ज्ञानादिकं भावसमाधिं भाषितुं, नापरः कश्चिदिति गाथार्थः ॥ २७ ॥ इतिः परिसमाप्त्यर्थे, ब्रवीमीति पूर्ववत् ।

इति श्रीपरमसुविहितखरतरगच्छविभूषणश्रीमत्साधुरङ्गगणिवरविरचितायां श्रीसूत्रकृताभिधद्वितीयाङ्ग-
दीपिकायां समाप्तं ग्रन्थाख्यं चतुर्दशमध्ययनमिति ।

अथ आदानीयाभिधं पञ्चदशमध्ययनम् ।

अथ पञ्चदशमारभ्यते—

जमतीतं पडुप्पन्नं, आगमिस्सं च णायओ । सव्वं मन्नति तं ताई, दंसणावरणंऽतए ॥ १ ॥

व्याख्या—यत् किमपि द्रव्यजातमतीतं यच्च प्रत्युत्पन्नं यच्चानागतं, कालत्रयभावि, तस्य यथावस्थितस्वरूपं यो ['मन्यते'] जानाति, जानानश्च विशिष्टोपदेशदानेन [नायकः–प्रणेता] संसारोत्तारणतः सर्वप्राणिनां त्रायी स्यात्, स च दर्शनावरणीयस्य कर्मणोऽन्तकः । अन्यग्रहणेन घातिचतुष्टयस्यान्तकृद्‌ग्रहणम् इति गाथार्थः ॥ १ ॥

अंतए वितिगिच्छाए, जे जाणति अणेलिसं । अणेलिसस्स अक्खाया, ण से होति तहिं तहिं ॥२॥

व्याख्या—यो घातिकर्मचतुष्टयक्षपकः स 'विचिकित्सा' चित्तविप्लुतिर्मिथ्याज्ञानं, तस्यान्तकृद्भवेत् । घातिकर्मचतुष्टयक्षयकर्तुर्मिथ्याज्ञानं न स्यादिति भावः । यो घातिक्षपकृत् स 'अनीदृशं' निरुपमं जानाति, एतावता नापरः कश्चित्तत्सदृक् ज्ञानी जगत्यस्ति । यस्त्वनीदृशस्यानन्यसदृशस्यार्थस्य परिच्छेदआख्याता, स तेषु तेषु दर्शनेषु बौद्धादिषु न स्यात् । स एवं बौद्धादिदर्शनेषु न मुक्तिमिच्छति, अर्हद्दर्शनमन्तरेण न कर्मभ्यो मुक्तिं प्ररूपयतीति गाथार्थः ॥ २ ॥

तहिं तहिं सुअक्खायं, से य सच्चे सुआहिए । सदा सच्चेण संपन्ने, मित्तिं भूएसु कप्पए ॥ ३ ॥

व्याख्या—य[थ]येनार्हता जीवाजीवादिकं पदार्थजातं यथा मिथ्यात्वाविरतिप्रमादकषाययोगा बन्धहेतव इति कृत्वा संसारकारणत्वेन प्ररूपितास्तथा "सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः" [त० १-१] इत्येतत्सर्वं पूर्वोत्तराविरोधितया सुष्ठु आख्यातं—स्वाख्यातम्। (स च वीतरागः सर्वज्ञो हितत्वात्सत्यः स्वाख्यातः), तीर्थिकानां तु वचनं पूर्वं " न हिंस्यात् सर्वभूतानि " इति भणित्वा पश्चात्तदुपमर्दकारम्भप्ररूपणात्पूर्वोत्तरविरोधितया तत्र तत्र चिन्त्यमानं निर्युक्तिकत्वान्न स्वाख्यातं भवति, सर्वज्ञोक्तं तु स्वाख्यातं ज्ञेयम्। एवंविधेन सत्यवचसा यः सम्पन्नः स किं करोतीत्याह—'मिति भूएसु कप्पए' भूतेषु—प्राणिषु मैत्रीभावं कल्पयेत् "मित्ती मे सव्वभूएसु" इति वचनात्सर्वेऽपि प्राणिनः आत्मसमाना गणनीया इति गाथार्थः ॥ २ ॥

भूएहिं न विरुज्झेज्जा, एस धम्मे वुसीमओ। वुसीमं जगं परिन्नाय, अस्सिं जीवितभावणा ॥ ४ ॥

व्याख्या—भूतैः स्थावरजङ्गमैः सह न विरोधं कुर्यात्। एष धर्मो भूताविरोधकारी, 'वुसीमओ'त्ति तीर्थकृतोऽयं धर्मः सत्संयमवतो वा ज्ञेयः। ['वुसीमं'ति] स साधुस्तीर्थकृद्वा जगच्चराचरभूतग्रामाख्यं केवलालोकेन सर्वज्ञप्रणीतागमपरिज्ञानेन वा परिज्ञाय इह जगति भावनाः पञ्चविंशतिरूपा द्वादशप्रकारा वा सत्संयमाङ्गतया मोक्षकारिणीर्भावयेदिति गाथार्थः ॥ ४ ॥

भावणाजोगसुद्धप्पा, जले णावा व आहिया। नावा व तीरसंपन्ना, सव्वदुक्खा तिउट्टति ॥ ५ ॥

व्याख्या—भावनायोगेन यो विशुद्धात्मा परित्यक्तसंसारस्वभावः सन् (जले) नौरिव समाख्यातः, यथा नौः समुद्रं

तीर्त्वा पारगामिनी भवति, तथा जीवोऽपि भावनाविशुद्धात्मा संसारार्णवं तीर्त्वा पारगामी स्यात् । संसारदुःखेभ्यो मुच्यत इति गाथार्थः ॥ ५ ॥

तिउट्टई उ मेहावी, जाणं लोगंसि पावगं । तुट्टंति पावकम्माणि, नवं कम्ममकुव्वओ ॥ ६ ॥

व्याख्या—स भावनायोगशुद्धात्मा नौरिव जले संसारे परिवर्तमानः 'तिउट्टति' + त्रुट्यति सर्वबन्धनेभ्यो मुच्यते । 'मेधावी' पण्डितः पुनः अस्मिल्लोके यत् किमपि पापकर्म सावद्यानुष्ठानरूपं, तद् ज्ञपरिज्ञया ज्ञात्वा प्रत्याख्यानपरिज्ञया परिहरँस्त्रुट्यति मुच्यते कर्मभ्य इति । तस्यैवं कर्मस्वरूपं जानतो नवानि कर्माण्यकुर्वतः निरुद्धाश्रवद्वारस्य विकृष्टतपश्चरणवतः पूर्वसञ्चितानि कर्माणि त्रुट्यन्ति । नवं च कर्माकुर्वतोऽशेषकर्मक्षयो भवतीति गाथार्थः ॥ ६ ॥

केषाञ्चिन्मते कर्मक्षयानन्तरं मोक्षावाप्तौ स्वतीर्थनिकारदर्शनतः पुनः संसाराभिगमनं भवतीदमाशङ्क्याह—

अकुव्वओ णवं नत्थि, कम्मं नाम विजाणई । विन्नाय से महावीरे, जेण जाई ण मिज्जइ ॥ ७ ॥

व्याख्या—तस्य सर्वज्ञस्याशेषक्रियारहितस्य नवं ज्ञानावरणादिकं कर्म 'नास्ति' न भवति, कारणाभावात्कार्याभावः, कर्माभावे च पुनः कुतः संसारेऽवतरणं ?, तस्य सर्वज्ञस्य रागद्वेषाभावात्स्वदर्शनतिरस्काराभिनिवेशोऽपि न भवत्येव, एवङ्गुणोपेतः कर्मस्वरूपं जानाति । नमनं नाम—कर्मनिर्जरणं, तच्च सम्यग् जानाति, विज्ञाय च कर्मबन्धं तत्संवरनिर्जरणो-

---

+ "त्रिभ्यो मनोवाक्कायेभ्योऽशुभेभ्यः" इति वृद्धवृत्तिः ।

पायं चासौ महावीरस्तत्करोति, येन कृतेनास्मिन् संसारोदरे न पुनर्जायते, जन्माभावाच्च नापि म्रियत इति गाथार्थः ॥७॥

केन कारणेन संसारे न जायते न म्रियते ? इत्याशङ्क्याह—

ण मिज्जई महावीरे, जस्स नत्थि पुरेकडं । वाउव्व जालमच्चेति, पिया लोगंसि इत्थिओ ॥ ८ ॥

व्याख्या—स महावीरः परित्यक्ताशेषकर्मा न जात्यादिना मीयते, न म्रियते वा, जातिजरामरणरोगशोकैर्वा संसारे पर्यटन्न मीयते—न पूर्यते । किमिति ? यतस्तस्यैव जात्यादिकं भवति यस्य पुराकृतं कर्म विद्यते, यस्य भगवतो महावीरस्य पुराकृतं कर्म न विद्यते, न तस्य मरणं [जातिजरामरणैर्मरणं वा] सम्भाव्यते, जन्मनोऽभावात् । तस्य कथं पुराकृतकर्माभावः ? यतस्तस्य स्त्रीः पराभवं कर्तुं न शक्नोति, यथा वायुरग्निज्वालामतिक्रामति—अग्निमध्ये भूत्वा व्रजति, परं वायुर्न दह्यते, एवं लोके स्त्रीरपि प्रिया अग्निज्वालासमाना, साधुर्वायुसमानः, यथा वायुरग्नेर्मध्ये भूत्वा व्रजति परं न दह्यते तथा साधुरपि न स्त्रीभिर्जीयते, न स्त्रियः पराभवितुं शक्नुवन्ति, स्त्रीसंसर्गात्कर्मबन्धस्तदभावात्कर्मबन्धाभाव इति गाथार्थः ॥ ८ ॥

इत्थीओ जे ण सेवंति, आइमोक्खा हु ते जणा । ते जणा बंधणुम्मुक्का, णावकंखंति जीवियं ॥९॥

व्याख्या—ये महासत्त्वाः स्त्रियो न सेवन्ते, स्त्रीप्रसङ्गं नाभिलषन्ति, ते साधवः आदिमोक्षा अवगन्तव्याः । आदौ मोक्षस्तेषामेव यैः स्त्रीप्रसङ्गो निवारितः, नान्ये आदिमोक्षाः, ते तु स्त्रीपाशबन्धनोन्मुक्ततयाऽशेषकर्मबन्धनोन्मुक्ताः सन्तो

'नावकाङ्क्षन्ति' नाभिलषन्ति असंयमजीवितं, अथवा परित्यक्तविषयेच्छाः सदनुष्ठानपरायणाः मोक्षैकतानाः 'जीवितं' दीर्घकालजीवितं नाभिकाङ्क्षन्तीति गाथार्थः ॥ ९ ॥

जीवितं पिट्ठओ किच्चा, अंतं पावंति कम्मुणो । कम्मुणा संमुहीभूता, जे मग्गमणुसासई ॥ १० ॥

व्याख्या—'जीवितं' असंयमजीवितं पृष्ठतः कृत्वा सदनुष्ठानपरायणाः कर्मणामन्तं-पर्यवसानं प्राप्नुवन्ति । तथा 'कर्मणा' विशिष्टानुष्ठानेन मोक्षस्य सम्मुखीभूता उत्पन्नदिव्यज्ञानाः शाश्वतपदस्याभिमुखीभूताः, क एवम्भूताः ? इत्याह-ये समासादितदिव्यज्ञाना मोक्षमार्गं ज्ञानदर्शनचारित्ररूपमनुशासन्ति-सत्त्वहिताय प्राणिनां प्रतिपादयन्ति स्वतश्चानुतिष्ठन्तीति गाथार्थः ॥ १० ॥

अणुसासणं पुढो पाणी, वसुमं पूयणा[सते]सुते । अणासए जते दंते, दढे आरयमेहुणे ॥ ११ ॥

व्याख्या—'अनुशासनं' धर्मदेशनया सन्मार्गावतारणं, तच्च भव्याभव्यादिषु प्राणिषु पृथक् पृथक् परिणमति, स्थिरस्तु-कस्वस्याशयवशादनेकधा भवति । यद्यप्यभव्येषु तदनुशासनं न सम्यक्परिणमति तथापि सर्वोपायज्ञस्यापि न सर्वज्ञस्य दोषः, तेषामेव स्वभावपरिणतिरियं, यदुलूको दिवा न पश्यति स दोषः किं सूर्यस्य ? न, तस्यैव स्वभावोऽयं, यतः सर्वज्ञवचोऽमृतमुपमैकान्तपथ्यं न यथावत्परिणमति । (इयं) अभव्यानामेव स्वभावपरिणतिः । किम्भूतोऽसावनुशासकः ? 'वसुमं' संयम(द्रव्य)वान् 'पूजनं' देवादिकृतमास्वादय-त्युपभुङ्क्ते इति पूजनास्वादकः, ननु चाधाकर्मणो देवादि-

फलस्य समवसरणादेरुपभोगात्कथमसौ सत्संयमवान् ? उच्यते 'अणासए' न विद्यते 'आशा' अभिप्रायो यस्यासावनाशयः, यदि वा ग्रन्थतो विद्यमानेऽपि समवसरणादिके भोक्ताऽनास्वादको, गार्द्ध्याभावात् । सत्यप्युपभोगे 'यतः' प्रयतः संयमवानेव । तथा 'दान्त' इन्द्रिय-नोइन्द्रियाभ्यां दान्तः, तथा 'दढे' दृढः परीषहोपसर्गैरक्षोभ्यस्तथा 'आरतमैथुनो' निवृत्तमैथुनाभिप्राय इति गाथार्थः ॥ ११ ॥

नीवारे य ण लीएज्जा, छिन्नसोए अणाविले । अणाविले सया दंते, संधिं पत्ते अणेलिसं ॥ १२ ॥

व्याख्या—'नीवारः' शूकरादीनां वध्यस्थानप्रवेशनोपायभूतो भक्ष्यविशेषस्तत्सदृशमेतन्मैथुनं, यथाऽसौ शूकरो नीवारादिना प्रलोभ्य वध्यस्थानमानीय बहुविधा वेदनाः प्राप्यते, एवमसावप्यसुमान्नीवारकल्पेन स्त्रीप्रसङ्गेन वशीकृतो बहुप्रकारा यातनाः प्राप्नोति, अतो नीवारप्राये मैथुने न प्रसक्तव्यो लीयेत । कथम्भूतः साधुः ? 'छिन्नस्रोताः' छिन्नाश्रवद्वारस्तथा 'अनाविलो' मलरहितो, रागद्वेषाभावात् । तथा अना(विलः)कुलः, विषयनिवृत्तत्वात् स्वस्थचेताः । तथा [सदा] दान्त—इन्द्रिय-नोइन्द्रियदमनात् । ईदृशस्तु भावसन्धिं कर्मविवरलक्षणमनीदृश—मनन्यतुल्यं प्राप्तो भवतीति गाथार्थः ॥ १२ ॥

अणेलिसस्स खेयन्ने, न विरुज्झेज्ज केणई । मणसा वयसा चेव, कायसा चेव चक्खुमं ॥ १३ ॥

व्याख्या—'अनीदृशः' अनन्यसदृशः संयमस्तस्मिन् 'खेदज्ञो' निपुणः साधुः केनचित्सार्द्धं न विरोधं कुर्वीत, सर्वेषु प्राणिषु मैत्रीं भावयेत्, कथं ? मनसा वाचा कायेन, दृष्टिपूतपादचारी सन् परमार्थतश्चक्षुष्मान् भवतीति गाथार्थः ॥ १३ ॥

से हु चक्खू मणुस्साणं, जे कंखाए य अंतए। अंतेण खुरो वहती, चक्कं अंतेण लुट्टति ॥ १४ ॥

व्याख्या—हुरवधारणे, स एव प्राप्तकर्मविवरोऽभीदृशस्य खेदज्ञो भव्यमनुष्याणां 'चक्षुः' सदसत्पदार्थाविर्भावनान्नेत्रभूतो वर्तते। किम्भूतोऽसौ? 'कांक्षाया' भोगेच्छाया 'अन्तको' विषयतृष्णायाः पर्यन्तवर्ती। आह परः—किमन्तवर्ती विवक्षितमर्थं साधयति? साधयत्येव, अमुमेवार्थं दृष्टान्तेन साधयन्नाह 'अंतेन' पर्यन्तेन क्षुरो [नापितोपकरणं,] वहति, तथा चक्रमपि—रथाङ्गं अन्तेनैव मार्गे प्रवर्तते, इदमुक्तं भवति—यथा क्षुरादीनां पर्यन्त एवार्थक्रियाकारी, एवं विषयकषायात्मकमोहनीयान्त एव संसारक्षयकारीति गाथार्थः ॥ १४ ॥

अंताणि धीरा सेवंति, तेण अंतकरा इहं। इह माणुस्सए ठाणे, धम्ममाराहिउं नरा ॥ १५ ॥

व्याख्या—अन्तप्रान्तानि धीराः सेवन्ते, तेन चान्तप्रान्ताभ्यसनेनान्तकराः—संसारस्य तत्कारणस्य कर्मणो वा क्षयकारिणो भवन्ति। 'इहे'ति मनुष्यलोके आर्यक्षेत्रे वा, न केवलं त एव तीर्थङ्करादयोऽन्येऽपीह मनुष्यलोके स्थाने प्राप्ताः सम्यग्ज्ञानदर्शनचारित्रात्मकं धर्ममाराधयित्वा 'नराः' मनुष्याः सदनुष्ठानसामग्रीमवाप्य निष्ठितार्था—उपरतसर्वद्वन्द्वा भवन्तीति गाथार्थः ॥ १५ ॥

निट्ठियट्ठा व देवा वा, उत्तरीइ इमं सुयं। सुतं च मेयमेगेसिं, अमणुस्सेसु णो तहा ॥ १६ ॥

व्याख्या—एवंविधपूर्वोक्तसंयमक्रियाधारिणः 'निष्ठितार्थाः' कृतकृत्या भवन्ति, केचन प्रचुरकर्मतया सत्यामपि

सम्यक्त्वादिकायां सामग्र्यां न मनुष्या एव मोक्षमास्कन्दन्ति, अपितु सौधर्माद्याः पश्चो[पश्चात्]त्तरविमानाश्रया देवा भवन्त्येतल्लोकोत्तरीये प्रवचने श्रुतं-आगम एवम्भूतः सुधर्मस्वामी वा जम्बूस्वामिनमुद्दिश्यैवमाह-यथा मयैतल्लोकोत्तरीये प्रवचने-ईदृगुपलब्धं । तद्यथा-अवाप्तसम्यग्दर्शनः सिध्यति वैमानिको वा भवतीति, परमेतन्मनुष्यगतावेव मोक्षगमनं पश्चो[पश्चात्]त्तरविमानगमनं चेति गाथार्थः ॥ १६ ॥

मनुष्यगतावेवैतन्नान्यत्रेति दर्शयितुमाह—

अंतं करिंति दुक्खाणं, इहमेगेसि आहियं । आघायं पुण एगेसिं, दुल्लभेऽयं समुस्सए ॥ १७ ॥

व्याख्या—न ह्यमनुष्या अशेषदुःखानामन्तं कुर्वन्ति, तथाविधसामग्र्यभावात् । यथा एकेषां वादिनामाख्यातमेतत्, एके वादिन एवमाख्यान्ति-देवा एवोत्तरोत्तरं स्थानमास्कन्दन्तोऽशेषक्लेशप्रहाणं कुर्वन्ति, एतावता देवा अपि मोक्षगतयो भवन्ति(इति)एके वादिनः-शाक्यादयः प्रतिपादयन्ति, तदपास्तं, मनुष्या एव सिद्धिगमनार्हा, नापरे । परमेकेषां गणधरादीनामेतदाख्यातं, तद्यथा-युगसमिलादिन्यायावाप्तकर्मविवरात् योऽयं शरीरसमुच्छ्रयः सोऽकृतधर्मोपायैरसुमद्भिर्महासमुद्रप्रभ्रष्टरत्नवद्दुर्लभो भवतीति गाथार्थः ॥ १७ ॥ अपि च—

इओ विद्धंसमाणस्स, पुणो संबोहि दुल्लहा । दुल्लहाओ तहऽच्चाओ, जे धम्मट्ठं वियागरे ॥ १८ ॥

व्याख्या—'इतो' मनुष्यभवाद्विध्वंसमानस्याकृतपुण्यस्य पुनरस्मिन् संसारे परिभ्रमतो जीवस्य बोधिः सुदुर्लभा-

सम्यग्दर्शनप्राप्तिर्दुर्लभा । तथा 'दुर्लभा' दुरवापा तथाभूता-सम्यग्दर्शनादिविषया 'अर्चा' लेश्या-ऽन्तःकरणपरिणतिर्-अकृतधर्माणामिति, तथापि ये शुद्धं धर्मं प्ररूपयन्ति तेषामर्चा दुर्लभा । एतावता शुद्धधर्मप्ररूपिणो दुर्लभास्तथा धर्मप्रतिपत्ति-योग्याऽर्चातोऽपि सुदुर्लभा इति गाथार्थः ॥ १८ ॥ किञ्च—

जे धम्मं सुद्धमक्खंति, पडिपुन्नमणेलिसं । अणेलिसस्स जं ठाणं, तस्स जम्मकहा कुओ ? ॥ १९ ॥

व्याख्या—ये महापुरुषा वीतरागाः परहितकरताः 'शुद्धं' अवदातं विशुद्धं धर्मं प्ररूपयन्ति—आख्यान्ति, स्वतः समाचरन्ति[च] । 'प्रतिपूर्णं' सम्पूर्णं यथाख्यातचारित्ररूपं वा 'अनीदृशं' अनन्यसदृशं धर्ममाख्यान्त्यनुतिष्ठन्ति च । तदेवमनीदृशस्या—नन्यसदृशस्य ज्ञानचारित्रोपेतस्य यत्स्थानं मोक्षाख्यं, तत्प्राप्तस्य तस्य प्राणिनः कुतो जन्मकथा ? जातो मृतो वेत्येवंरूपा कथा स्वप्नान्तरेऽपि न, तस्य कर्मबीजाभावाज्जन्ममृत्युकथा न विद्यते । " दग्धे बीजे यथाऽत्यन्तं, [प्रादुर्भवति नाङ्कुरः । कर्मबीजे तथा दग्धे, न रोहति भवाङ्कुरः ॥ १ ॥] " इति वचनादिति गाथार्थः ॥ १९ ॥

कुओ कयाइ मेधावी, उप्पज्जंति तथा गया । तहागया अपडिन्ना, चक्खू लोगस्सऽणुत्तरा ॥ २० ॥

व्याख्या—कर्मबीजाभावात् 'कुतः' कस्मात्कदाचिदपि 'मेधाविनो' ज्ञानात्मकास्तथा—पुनरनावृत्त्या गताः, यथा पुनरस्मिन् संसारे अशुचिगर्भाधाने न समुत्पद्यन्ते, न कथञ्चित्कर्मोपादानाभावादुत्पद्यन्ते । एतावता सिद्धिगतानां पुनरागमनं नास्तीति भावः । यतस्ते तीर्थकराः 'तथागताः' अप्रतिज्ञा—निदानरहिताः निराशंसास्तथा लोके 'अनुत्तराः' सर्वोत्तमाः सर्वलोकस्य चक्षुर्भूताः सर्वज्ञा भवन्तीति गाथार्थः ॥ २० ॥

अणुत्तरे य से ठाणे, कासवेणं पवेइए । जं किच्चा निव्वुडा एगे, निट्ठं पावंति पंडिया ॥ २१ ॥

व्याख्या—'अनुत्तरे' प्रधाने [तत्] स्थानं संयमाख्यं 'काश्यपेन' श्रीवर्द्धमानस्वामिना 'प्रवेदितं' कथितम् । कथम्भूतम् ? यदनुत्तरं संयमाख्यं स्थानं 'कृत्वा' अनुपाल्य 'निर्वृताः' निर्वाणमनुप्राप्ताः, निर्वृताश्च सन्तः संसारचक्रवालस्य 'निष्ठां' पर्यवसानं पण्डिताः प्राप्नुवन्ति । तदेवम्भूतं संयमस्थानं काश्यपेन प्रवेदितं यदनुपाल्य सिद्धिमवाप्नुवन्तीति गाथार्थः ॥ २१ ॥ अपि च—

पंडिए वीरियं लद्धुं, निग्घायाय पवत्तगं । धुणे पुव्वकडं कम्मं, णवं चावि ण कुव्वती ॥ २२ ॥

व्याख्या—'पण्डितो' विवेकी 'वीर्यं' कर्मोद्दलनसमर्थं सत्संयम[वीर्यं] तपोवीर्यं वा 'लब्ध्वा' प्राप्य निःशेषकर्मणो निर्घाताय प्रवर्तकं पण्डितवीर्यं बहुभवशतदुर्लभं कथञ्चित्कर्मविवरादवाप्य 'धुनीयात्' अपनयेत् । पूर्वभवेष्वनेकेषु यत्कृतं कर्म अष्टप्रकारं तत् पण्डितवीर्येण धुनीयात्, नवं चाश्रवनिरोधान्न करोत्यसाविति गाथार्थः ॥२२॥ किञ्च—

न कुव्वती महावीरे, अणुपुव्वकडं रयं । रयसा संमुहीभूतो, कम्मं हिच्चा ण जं मयं ॥ २३ ॥

व्याख्या—'महावीरः' कर्मविदारणसहिष्णुः सन् आनुपूर्व्येण—मिथ्यात्वाविरतिप्रमादकषाययोगैर्यत्कृतं रजोऽन्यजन्तुभिस्तदसौ न करोति । स च तत्प्राक्कृतं कर्म अवष्टभ्य [सत्संयमसंमुखीभूतः,] तदभिमुखीभूतश्च यदष्टप्रकारं कर्म, तत्सर्वं 'हित्वा' त्यक्त्वा मोक्षस्य सत्संयमस्य वा सम्मुखीभवतीति गाथार्थः ॥ २३ ॥ अन्यच्च—

जं मयं सव्वसाहूणं, तं सव्वं सल्लगत्तणं । साहइत्ताण तं तिन्ना, देवा वा अभविंसु ते ॥ २४ ॥

व्याख्या—सर्वसाधूनां यन्मतम्-अभिप्रेतं, यदेतत् सत्संयमस्थानं । तत् कीदृशं संयमस्थानं ? शल्यकर्त्तनं, शल्यं-पापानुष्ठानं 'कर्त्तयति' छिनत्ति तच्छल्यकर्त्तनं, तच्च संयममुद्युक्तविहारिणः 'साधयित्वा' सम्यगाराध्य बहवः संसारकान्तारं तीर्णाः । अपरे तु सर्वकर्मक्षयाभावाद्देवा अभूवन् । ते चावाप्तसम्यक्त्वाः सच्चारित्रिणो वैमानिकत्वमवा[प्नुः प्रा]प्नुवन्ति प्राप्स्यन्ति चेति गाथार्थः ॥ २४ ॥ सर्वोपसंहारार्थमाह—

अभविंसु पुरा धीरा, आगमिस्सा वि सुव्वता । दुन्निबोहस्स मग्गस्स, अंतं पाउकरा तिन्ने त्ति बेमि ॥२५॥

व्याख्या—'पूर्वं'मतीते काले बहवो 'धीरा'श्चारित्रिणोऽभूवन्, वर्तमानकाले च सन्ति, आगामिनि च काले 'सुव्रताः' संयमानुष्ठायिनो भविष्यन्ति । ये किं कृतवन्तः कुर्वन्ति करिष्यन्ति ? चेत्याह—यस्य 'निर्बो[दुर्निबो]धस्य' अतीव दुष्प्रापस्य ['मार्गस्य'] ज्ञानदर्शनचारित्ररूपस्य अन्तं परमकाष्ठामवाप्य तस्यैव मार्गस्य 'प्रादुष्कराः' स्वतः सन्मार्गानुष्ठायिनोऽन्येषां च 'प्रादुर्भावकाः' प्रकाशकाः सन्तः संसारार्णवं तीर्णास्तरन्ति तरिष्यन्ति चेति गाथार्थः ॥ २५ ॥ इतिः परिसमाप्तौ, ब्रवीमीति पूर्ववत् ।

इति श्रीपरमसुविहितखरतरगच्छविभूषणश्रीमत्साधुरङ्गगणिसङ्कलितायां श्रीसूत्रकृताभिधद्वितीयाङ्गदीपिकायां
समाप्तमादानीयाख्यं पञ्चदशमध्ययनमिति ॥

अथ षोडशं+गाथाध्ययनम् ।

उक्तं पञ्चदशमध्ययनं, साम्प्रतं षोडशमारभ्यते—

पूर्वोक्तेषु पञ्चदशस्वप्यध्ययनेषु येऽर्थाः प्रतिपादितास्तेऽत्र संक्षेपतः प्रतिपाद्यन्ते तत्रेयमादि(सूत्रं-)गाथा—

अहाह भगवं—एवं से दंते दविए वोसट्ठकाए त्ति वच्चे ।

व्याख्या—' भगवान् ' उत्पन्नदिव्यज्ञानः सदेवमनुजायां पर्षदीदं वक्ष्यमाणमाह, तद्यथा—' एवमसौ ' पञ्चदशाध्ययनोक्तार्थयुक्तः सुसाधुर्दान्तः—इन्द्रियनोइन्द्रियदमनात् , द्रव्यभूतो—मुक्तिगमनयोग्यस्तथा 'व्युत्सृष्टकायः' निष्प्रतिकर्मशरीरतया देहेऽपि प्रतिबन्धरहितः । एवंविधः साधुः पूर्वोक्तपञ्चदशाध्ययनार्थोपयुक्तः कीद[स्वाख्यः]गुच्यते ? इत्याह ।

माहणे त्ति वा समणे त्ति वा भिक्खू त्ति वा निग्गंथे त्ति वा । पडिआह—भंते ! कहं[नु] दंते दवीए वोसट्ठकाए त्ति वच्चे [माहणे त्ति वा समणे त्ति वा भिक्खू त्ति वा णिग्गंथे त्ति वा]? तओ बूहि

+ " गाथाछन्दसोपनिबद्धस्य प्राकृतस्य मधुरत्वादित्यभिप्रायो ' गीयते ' पठ्यते मधुराक्षरप्रवृत्त्या गायन्ति वा तामिति । यत एवमतस्तेन कारणेन गाथामिति तां ब्रुवते " यदिवा " गाथीकृताः–पिण्डीकृता विक्षिप्ताः सन्त एकत्र मीलिता अर्था यस्याः सा गाथेति, अथवा सामुद्रेण छंदसा या निबद्धा सा गाथेत्युच्यते " इति वृहद्वृत्तौ ।

महामुणी ! ॥ १ ॥

व्याख्या—'माहण'त्ति प्रवृत्तिर्यस्यासौ स्वयमपरं प्रति वा 'मा हन' इत्युच्यते, नवब्रह्मचर्यगुप्तिधारणाद्वा ब्राह्मणः इत्यनन्तरोक्तगुणकदम्बकयुक्तः साधुर्माहनो ब्राह्मण इति वा वाच्यः। तथा तपसा श्राम्यतीति श्रमणः। 'भिक्खू त्ति वा' भिक्षणशीलो भिक्षुर्भिनत्ति वाऽष्टप्रकारं कर्मेति भिक्षुः। तथा बाह्याभ्यन्तरग्रन्थाभावान्निर्ग्रन्थः। एवं पञ्चदशाध्ययनोक्तार्थानुष्ठायी दान्तो द्रव्यभूतो व्युत्सृष्टकायश्च, स निर्ग्रन्थ इ[ति वाच्यः]त्युच्यते। इत्येवं भगवतोक्ते सति तच्छिष्यः प्रत्याह—एतेषां चतुर्णामपि शब्दानां पृथगर्थं निवेदय महामुने ! ॥ १ ॥ इत्येवं पृष्टो भगवान् ब्राह्मणादीनां चतुर्णामप्यभिधानानां कथञ्चिद्भेदभिन्नानां यथाक्रमं प्रवृत्तिनिमित्तमाह—

इति विरए सव्वपावकम्मेहिं पेज्ज-दोस-कलह-अब्भक्खाण-पेसुन्न-परपरिवाय-अरतिरति-माया-मोस-मिच्छादंसणसल्लविरए, समिते, सहिए जं सदा जते णो कुज्झे णो माणी माहणे त्ति वच्चे ॥ २ ॥

व्याख्या—'इति' पूर्वोक्ताध्ययनार्थवृत्तिः सन् 'विरतो' निवृत्तः सर्वपापेभ्यस्तथा 'प्रेम' रागोऽभिष्वङ्गलक्षणं द्वेषोऽप्रीतिलक्षणः। कलहः–प्रसिद्धः। 'अभ्याख्यानं' कलङ्कारोपणं 'पैशुन्यं' परगुणासहिष्णुत्वं तद्दोषाविष्करणं 'परपरिवादः' परतप्तिकरणं, अरतिः संयमे, रतिर्विषयेषु 'माया' परवञ्चनाय कुटिलता, [तथा]मृषावादो–ऽसत्यभाषणं, मिथ्यादर्शन–मतत्त्वे तत्त्वमतिस्तत्त्वे चातत्त्वमतिः, एतदेव शल्यं, ततो वा विरतः, तथा समितः पञ्चसमितिभिः, तथा

सहितो-युक्तो ज्ञानादिभिः, तथा [सदा] 'यतः' प्रयतः संयमानुष्ठाने, तथा 'णो कुज्झे' कस्यचिदप्यपकारिणोऽपि न कुप्येत, न क्रोधवशगो भूयान्नापि मानी भवेत्, उत्कृष्टतपोयुक्तोऽपि न गर्वं विदध्यात्, इत्यादिगुणकलितः साधु-माहन इति निःशङ्कं वाच्य इति ॥ २ ॥ साम्प्रतं श्रमणशब्दार्थं विवृणोति—

एत्थ वि समणे अणिस्सिते अनियाणे आदाणं च, अतिवायं च, मुसावायं च, बहिद्धं च, कोहं च, माणं च, मायं च, लोहं च, पिज्जं च, दोसं च, इच्चेवं जओ जओ आदाणं अप्पणो पदोसहेऊ ततो ततो आदाणातो पुव्विं पडिविरते पाणाइवायाओ[सिआ] दंते दविए वोसट्ठकाए समणो त्ति वच्चे ॥ ३ ॥

व्याख्या—'अत्रापि' पूर्वोक्तविरत्यादिके गुणसमूहे वर्तमानः श्रमणोऽपि वाच्यः। पुनरेतद्गुणयुक्तेनापि भाव्यमित्याह—अनिश्रितोऽप्रतिबद्धविहारित्वात्तथा 'अनिदानो' निदानरहितः, तथा 'आदानं' कषायः परिग्रहः सावद्यानुष्ठानं वा 'अतिपातः' प्राणातिपातः, तथा 'मृषावादो'ऽसत्यं, तथा 'बहिद्धं' मैथुनपरिग्रहौ, इत्यादिज्ञपरिज्ञया ज्ञात्वा प्रत्याख्यानपरिज्ञया परिहरेत्। तथा 'क्रोधं' अप्रीतिलक्षणम् 'मानो' गर्वः माया लोभः 'प्रेम' रागो द्वेषश्च इत्या[दिकं] संसारावतरणमार्गं मोक्षमार्गविध्वंसकं सम्यक् परिज्ञाय परिहरेदिति, एवमन्यस्मादपि [यतो यतः] कर्मोपादाना-द्विहामुत्र चानर्थहेतोरात्मनोऽपायं पश्यति प्रद्वेषहेतुं च, ततस्ततः प्राणातिपातादिकादनर्थदण्डादानात् 'पूर्वमेव' अना-

गतमेवात्महितमिच्छन् प्रतिविरतो भवेत्। एतावता सर्वस्मादपि सावद्यानुष्ठानाद्विरतिं कुर्यादिति भावः। एवम्भूतो दान्तः शुद्धो द्रव्यभूतो निष्प्रतिकर्मतया व्युत्सृष्टकायः श्रमणो वाच्यः ॥ ३ ॥ साम्प्रतं भिक्षुशब्दार्थं विवृणोति—

एत्थ वि भिक्खू अणुन्नए विणीए नामए दंते दविए वोसट्ठकाए संविधूणीय विरूवरूवे परी-सहोवसग्गे अज्झप्पजोगसुद्धादाणे, उवट्ठिए ठिअप्पा संखाए परदत्तभोई भिक्खु त्ति वच्चे ॥ ४ ॥

व्याख्या—अत्रापि य एते पूर्वमुक्ता गुणाः—ब्राह्मणश्रमणशब्दयोरुक्तास्त एव भिक्षुशब्दविषये अवगन्तव्याः, अमी चान्ये—'अणुन्नए' अभिमानरहितः, तथा 'विणीए' विनीतः, तथा 'नामए' सदा गुर्वादौ प्रह्वो भवति 'दंते दविए वो-सट्ठकाए' इत्यादि पूर्ववत्। एवंविधो भिक्षुर्यत्करोति तद्दर्शयति—'संविधूणीय' सम्यग्विधूय—अपनीय 'विरूवरूवान्' नानाप्रकारान् परीषहोपसर्गान् अधिसह्य—विधूय 'अध्यात्मयोगेन' निर्मलचित्तपरिणामेन 'शुद्धादानेन' निस्तुष-चारित्रेण सम्यगुत्थानेन—सच्चारित्रोद्यमेनोत्थितस्तथा 'स्थितो' मोक्षाध्वनि व्यवस्थितः, परीषहोपसर्गैरकम्पितः, संसारासारतां 'संखाय' सम्यक्परिज्ञाय दुष्प्राप्यतां कर्मभूमेर्बोधेः सुदुर्लभत्वं च ज्ञात्वा संसारोत्तरणसामग्रीं चावाप्य 'परदत्तभोजी' विशुद्धाहारग्रहणशीलः, एवंविधगुणकलितो भिक्षुरिति वाच्यः ॥ ४ ॥

अथ निर्ग्रन्थशब्दार्थं विवृणोति—

एत्थ वि निग्गंथे एगे एगविऊ बुद्धे संछिन्नसोए सुसंजते सुसमिते सुसामाइए आयवायपत्ते

विऊ दुहओ वि सोयपलिच्छिन्ने णो पूयासक्कारलाभट्ठी धम्मट्ठी धम्मविऊ णियागपडिवन्ने समि[सम]यं चरे दंते दविए वोसट्ठकाए निग्गंथे त्ति वच्चे ॥ ५ ॥

व्याख्या—अत्रापि माहणश्रमणभिक्षुवत्पूर्वोक्तगुणयुक्तो निर्ग्रन्थो वाच्यः । विशेषमाह ‘एगे’ एको रागद्वेषरहितत्वात् ‘एगविऊ’ आत्मानमेकमेव [परलोकगामिनं] जानाति “एगस्स होइ मरणं, एगो चेव उववज्जइ” इति वचनाच्च कोऽपि कस्यापि सहायो, नरकादिषु एक एव वेदनामनुभवति, मुक्तावप्येक एव याति, अथवा संसारे न कोऽप्यात्मीयः—अहमेक एवाऽस्मि, अथवा ‘एको’ मोक्षः संयमो वा, तं वेत्तीति । ‘बुद्धो’ऽवगततत्त्वः ‘संछिन्नसोए’ सम्यग्छिन्नाश्रवद्वारः—स्थगिताश्रवद्वार इत्यर्थः । तथा ‘सुसंयतः’ कूर्मवत्संयतगात्रो निरर्थककायक्रियारहितः । तथा [सु]समितः पञ्चभिः समितिभिः ‘सुसामायिकः’ समशत्रुमित्रः । तथा आयवायपत्ते—तथाऽऽत्मन उपयोगलक्षणस्य जीवस्यासंख्येयप्रदेशात्मकस्य संकोचविकाशभाजः स्वकृतफलभुजः प्रत्येकसाधारणशरीरतया व्यवस्थितस्य द्रव्यपर्यायतया नित्याद्यनन्तधर्मात्मकस्य वा वाद–आत्मवादस्तं प्राप्त आत्मवादप्राप्तः, सम्यक्–यथाऽवस्थितात्मस्वतत्त्ववेदीत्यर्थः । तथा ‘विद्वान्’ अवगततत्त्वः, तथा ‘द्विधाऽपि’ द्रव्यतो भावतश्च, तत्र द्रव्यतः संवृतेन्द्रियो भावतो रागद्वेषरहितः, एवं द्विधाऽपि परिच्छिन्नस्रोताः, तथा नो पूजासत्कारलाभार्थी, किन्तु निर्जरापेक्षी सर्वास्तपश्चरणादिकाः क्रिया विदधाति । तथा ‘धर्मार्थी’ श्रुतधर्मचारित्रधर्मार्थित इत्यर्थः, सर्वाः क्रिया धर्मार्थमेव करोति, न पूजाद्यर्थं क्रियासु प्रवर्तते । तथा ‘धम्मविऊ’ धर्मस्वरूपं तत्फलं च स्वर्गापवर्गादिलक्षणं सम्यग्वेत्ति । धर्मं च सम्यग् जानानो यत्करोति तद्दर्शयति—‘णियागो’ मोक्षमार्गस्तं

प्रतिपक्षाः—निदानप्रतिपक्षाः । तथाविधश्च सन् कृपां दर्शयति—'समि[सम]यं चरे' समतां समभावरूपां वासीचन्दनकल्पां चरे—दनुतिष्ठेत् । तथा दान्तो द्रव्यभूतो व्युत्सृष्टकायश्च । एतद्गुणसमन्वितश्च निर्ग्रन्थ इति वाच्यः ॥ ५ ॥

एवं चत्वारोऽप्येकार्थास्तथा श्रीसुधर्मास्वामी जम्बूप्रमुखसाधूनुद्दिश्येदमाह—

से एवमेव जाणह जमहं भयंतारो त्ति बेमि । पढमो सुयक्खंधो समत्तो ॥

व्याख्या—'से' इति तदहं ब्रवीमि तं एवमेव जानीत यूयं, नान्यथा मया यदि विकल्पो विधेयः, यस्मादहं सर्वज्ञाज्ञया ब्रवीमि, न च सर्वज्ञा भगवन्तो भयत्रातारो रागद्वेषाभावादन्यथा ब्रुवते, ततो मया यत् कथितं तथैव प्रतिपत्तव्यम् । इतिः परिसमाप्त्यर्थे, ब्रवीमीति पूर्ववत् । षोडशं गाथाध्ययनं समाप्तम् (तत्समाप्तौ च समाप्तोऽयं गाथाषोडशाख्यः प्रथमः श्रुतस्कन्धः ।)

* श्रीजिनदेवसूरीणा—मादेशेन चिरायुषा । उपजीव्य बृहद्वृत्तिं, कृत्वा नामान्तरं पुनः ॥ १ ॥
श्रीसाधुरङ्गोपाध्याये—र्विहिता सूत्रकृद् दीपिका । संक्षेपरुचिजीवानां, हिताय सुखबोधिनी ॥ २ ॥* [त्रिभिर्विशेषकम् ।]
लिखिते यवलग्रामे, निधिनन्दशरेन्दु(१५९९)वत्सरे (सौम्ये)। कार्तिके (हि शुभे) मासे, (सुदा) चातुर्मासकपर्वणि ॥ ३ ॥*

इति श्रीपरमसुविहितखरतरगच्छविभूषणाचार्यवर्यश्रीमज्जिनदेवसूरिराज्ञावर्तिपाठकप्रवरश्रीमत्साधुरङ्ग-गणिवरसङ्कलितायां श्रीसूत्रकृताङ्गदीपिकायां प्रथमः श्रुतस्कन्धः सम्पूर्णः ॥